In Public domain. Digitization Muthulakshmi Research Academy

१२

सम्पूर्णानन्द-ग्रन्थमाला

(६)

अभिनवमणिविज्ञानम्

श्रीमदुदयालु-अग्निहोत्रिणा विरचितम्

वाराणसेय-संस्कृत-विश्वविद्यालयः

In Public domain. Digitization Muthulakshmi Research Academy

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

१९/४६/

द० नं० ६०११

~~आंशिक आरक्षित~~

वी० क्या० पु०

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

SAMPŪRṆĀNANDA GRANTHAMĀLĀ

Vol. 6

GENERAL EDITOR
Surati Narayana Mani Tripathi
Vice-Chancellor
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

ABHĪNAVA MANOVIJÑĀNAM

by

Prabhu Dayālu Agnihotrī

VARANASI
1965

In Public domain. Digitization Muthulakshmi Research Academy

Published by
Director, Research Institute
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by
Parijata Press
Ramakatora, Varanasi.
(pp. 1—216)
Remaining pages printed by
Sansar Press (Private) Ltd.
Kashipura, Varanasi.

In Public domain. Digitization Muthulakshmi Research Academy

सम्पूर्णानन्द-ग्रन्थमाला

(६)

अभिनवमनोविज्ञानम्

श्रीप्रभुदयालु-अग्निहोत्रिणा विरचितम्

सम्पूर्णानन्द संस्कृत विश्वविद्यालय
विक्रय अनुभाग
वाराणसी

वाराणस्याम्

१८८६ तमे शकाब्दे

In Public domain. Digitization Muthulakshmi Research Academy

प्रास्ताविकम्

वाराणसेयसंस्कृतविश्वविद्यालयस्थापनानुकालं काशिकराजकीयसंस्कृतमहाविद्यालयेन प्रवर्तितया सरस्वतीभवनग्रन्थमालया साकमन्या अप्यनेका ग्रन्थमालाः प्रकाशयितुं प्रारब्धाः। तास्वन्यतमा खलु सम्पूर्णानन्दग्रन्थमाला। अस्यां विगतासु द्वित्रशताब्दीषु पाश्चात्त्यदेशेष्वाविर्भूतानां नूत्नानां विषयाणां ग्रन्थाः प्रकाश्यन्ते। संस्कृतविश्वविद्यालयेऽमीषां विषयाणामत्रत्येभ्यश्छात्रेभ्यः संस्कृतभाषयैव परिचयो दीयेतेति मनसि निधाय प्रवर्तितेयं ग्रन्थमालाऽधुनावधि पञ्च प्रसूनानि प्रासूत। तेषु त्रीणि ज्योतिःशास्त्रसम्बन्धीनि, एकं नीतिशास्त्रविषयकम्, अपरं च मनोविज्ञानप्रतिपादकम्। साम्प्रतं तस्यां ग्रन्थमालायां षष्ठमेतत् प्रसूनं प्रकाश्यतेऽभिनवमनोविज्ञानं नाम।

पश्यतु नाम पण्डितवर्गः पुस्तकद्वयमिदं मनोविज्ञानविषयकम्। अत्र प्रतिपादिता अनेके विषया इतिहासग्रन्थेषु, पुराणेषु, योगवासिष्ठादिषु, नीतिग्रन्थेषु, योगादिदर्शनग्रन्थेषु च चिरपरिचिता भवतां समुपलप्स्येरन्। मनःसम्बन्धिनां सर्वेषां विषयाणामनुस्यूतिः प्रतिपादनशैली च नूत्ना कापि वर्ततेऽत्र। इमे विषया यथाऽत्र प्रतिपादितास्ते भारतीयदार्शनिकप्रतिपादनपद्धत्या किमपि सामञ्जस्यमञ्चन्ति न वा? किं नाम मनोविषयकैर्भारतीयैर्दार्शनिकविचारैः सहैषां साम्यं वैषम्यं च? इमे नूत्ना मनोविज्ञानविषयका विचारा जगतः कल्याणाय कल्पन्तेऽकल्याणाय वा? अत्रत्यः कियान् विषय उपादेयः कियांश्च हेय इत्यादिकं विमर्शपदवीमारोहयितव्यं श्रीमद्भिः।

"म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्। ऋषिवत्तेऽपि पूज्यन्ते" इति हि वराहमिहिराचार्येण ज्योतिःशास्त्रविषये यवनानां प्रामाण्यमङ्गीकृतम्। "पुराणमित्येव न साधु सर्वं न चापि सर्वं नवमित्यवद्यम्" इति चाह कविकुलगुरुः कालिदासः। इमे वचने संस्मृत्य संस्कृतज्ञैरस्य नूत्नस्य मनोविज्ञानशास्त्रस्योहापोहाय प्रवर्तितव्यम्। "पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्" इत्युपनिषद्दिशा केचन पाश्चात्त्या विद्वांसः प्रायेण पराग्दर्शिनस्तद्दृष्ट्यैव मनोविज्ञानशास्त्रं प्रतिपादयन्तः शमदमयोर्विरोधाय वागाडम्बरमातन्वते। हेयानां मानसिकवृत्तीनामप्युपभोगमेव ते वरं मन्वते, न तु तासां दमनम्। "न जातु कामः कामानामुपभोगेन शाम्यति", "यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। एकस्यापि न पर्याप्तम्" इत्यादीनि शममहिमख्यापकानि वचनानि न श्रद्दधते ते।

मनो नाम अन्तरिन्द्रियम्। अन्तरिन्द्रियविचारावसरे तस्य बहिर्वृत्तिभिः सहान्तरवृत्तीनामपि विचारो विधीयत एव। अस्मिंश्च प्रसङ्गे प्रत्यग्द्रष्टृत्वमपेक्षितम्। उपभोगेनैव वृत्तयः शमं यान्तीति पराग्दृष्टयो मन्वते। प्रत्यग्दर्शिनस्तु दुष्प्रवृत्तीनां दमनमुपदिशन्तो दृश्यन्ते पाश्चात्त्यदेशेष्वपि साम्प्रतम्। ते च दुष्प्रवृत्तीनां दमनाय भारतीययोगशास्त्रपरिशीलनपरा निभाल्यन्ते। एष एव निष्प्रत्यूहः पन्था दुर्वृत्तीनां दमनायेति सत्यं सत्वरमेवाङ्गीकरिष्यन्ति सर्वेऽपि मनोवैज्ञानिका मनीषिणः प्राच्याः पाश्चात्त्याश्च।

In Public domain. Digitization Muthulakshmi Research Academy

अस्मिन् ग्रन्थे विदुषा लेखकेनान्तिमेऽध्याये मनोविज्ञानशास्त्रस्य संक्षिप्त इतिहासः प्रदर्शितः। प्रक्रमेऽस्मिन् पाश्चात्त्या विद्वांस एव कृतभूरिपरिश्रमा दृश्यन्ते। अत्र भारतीयैर्मनीषिभिर्विशेषतः संस्कृतज्ञैः सुधीभिः किमपि स्वकीयं विशिष्टमवदानमुपस्थापयितव्यम्। तेन हि भारतीयप्रत्यग्दृष्टिमहिममण्डितमिदं शास्त्रं वर्तमानास्त्रुटीः परिमार्ज्य महते कल्याणाय जगतः कल्पेत। अस्यां सम्पूर्णानन्दग्रन्थमालायां मनोविज्ञानसम्बन्धि ग्रन्थद्वयं संस्कृतज्ञानां पुर उपस्थापयन्तो वयं परमं प्रमोदमुपलभामहे।

संस्कृतभाषा खल्वतीव परिमार्जिता, सकलविधानामपि तत्त्वानां विशेषत आध्यात्मिकानां तत्त्वानामभिव्यक्तावतीव योग्या वर्तते। अभिव्यञ्जकभाषाधीनः खलु शास्त्राणां विकास इति सुविदितमेतत्। तेनाधुनिकविज्ञानानामाधुनिकदर्शनानां च तत्त्वानि संस्कृतभाषयाऽभिव्यक्तानि सन्ति महद् वैशिष्ट्यं भजेयुः। तेषां गुणदोषा अपि स्पष्टा भवेयुः। अतीव कठिनमेतत् कर्म। भारतीयदर्शनप्रतिपादकानां संस्कृतभाषया निबद्धानां मूलग्रन्थानां वश्यता, तथैव पाश्चात्त्यदर्शनग्रन्थानां मूलत एव साक्षात् परिचय इत्युभयं यस्य विदुषोऽस्ति, स एवोत्साहसमन्वितः सन्नस्य कार्यस्य संपादने योग्यो भवेत्। एतादृशान् मनीषिणो वयं सादरमामन्त्रयामोऽस्यां ग्रन्थमालायां स्वकीयानि विचारप्रसूनानि प्रकाशयितुम्।

अन्ते च भूमिकायां ग्रन्थे च यत्र तत्र भारतीयदर्शनैः सह मनोविज्ञानविषयाणां तौलनिकमध्ययनं प्रस्तुवते प्रस्तुतग्रन्थकर्त्रे श्रीमते प्रभुदयालु-अग्निहोत्रिमहोदयाय धन्यवादान् वितरन्तो वयं विरमामः।

फाल्गुनपूर्णिमा, संवत् २०२१
वाराणसी।

सुरतिनारायणमणित्रिपाठी
वाराणसेयसंस्कृतविश्वविद्यालयस्य
उपकुलपतिः।

In Public domain. Digitization Muthulakshmi Research Academy

भूमिका

भारतीयैर्विचारकैः संसारस्य त्रिविधदुःखाश्रयत्वं सम्यगवगम्य ततो निवृत्तेरुपायाश्चिन्तिताः । 'दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ' इत्यनुसारेण दुःखत्रयस्य कारणं स्वरूपं तत्प्रतीकारोपायांश्च चिन्तयद्भिः प्रतिष्ठितप्रज्ञैर्ऋषिभिर्यत्किञ्चिदपि दृष्टमनुभूतं बुद्धिविषयीकृतं वा तत्सर्वं लोकोपकृतये सूत्ररूपेण निबद्धम् । तदनन्तरं तेषां सूत्राणां भाष्यं कुर्वद्भिः स्वतन्त्ररूपेण वा विषयं समीक्षमाणैर्बहुभिर्विद्वद्भिरनेके ग्रन्थाः प्रणीताः, येषु जगत आत्मनो मनसश्च विषये वैशद्येनोल्लिखितमस्ति । मानवजीवनस्य नियन्त्रकेषु मनसः स्थानं प्रमुखमिति मन्त्रद्रष्टॄणामृषीणां सुविदितमासीत् । अत एव यजुर्वेदस्य चतुस्त्रिंशत्तमेऽध्याये ऋषिणोद्गीतम्—

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ इति ।

मनसो गतिर्विचित्रा । दृश्यते हि मनोभेदेन व्यक्तिभेदः । मन एव मनुष्यस्य सर्वकर्मणां नियामकम् । मनसैवेदं जगत् स्वर्गरूपे नरकरूपे वा परिवर्तितुं शक्यम् । एतदुद्दिश्यैव ऋग्वेदे—

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मन........................ ॥

इत्याशीर्वचनमुक्तमृषिणा । उपनिषत्स्वपि मनसो वशीकरणाय, शुद्धये, उदात्तीभवनाय च प्रायेण विचारः कृतो वर्तते । 'यन्मनसा न मनुते येनाहुर्मनोमतम्' इत्यादिभिर्मन्त्रैर्मनसः कार्यक्षेत्रम्, शक्तिसीमानम्, लयोपायांश्च समुपवर्णयद्भिर्मनःसम्बन्धि रहस्यमुद्घाटितम् । भगवता व्यासेनापि वारं वारम्—"विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः', तथा—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥" इत्यादिना तदेव विशदीकृतम् । भारतीयैर्न केवलः पदार्थतत्प्रत्यक्षविषयक एवोहापोहो विहितः, परं मनःसम्बन्धिनां बुद्धिचित्ताहङ्काराणाम्, प्रकृतिपुरुषयोः, आत्मपरमात्मनोः, कारणकार्ययोः, हेतुहेत्वाभासानाम्, अनुभव-स्मृति-भ्रमाणां विषयेऽपि सूक्ष्मावलोकनं कृत्वा केचित् सिद्धान्ताः स्थिरीकृताः । कतिपयेन कालेन भारते मानसशास्त्रविषयकं प्रभूतं साहित्यं जातम्, परं मानसशास्त्रेतिनाम्ना न कोऽपि स्वतन्त्रो विशिष्टो ग्रन्थो व्यरचि केनापि विदुषा । एतद्विषयकाः सिद्धान्ताः सांख्ययोगन्यायवेदान्तमीमांसादिशास्त्रेषु, बौद्धजैनागमेषु, तत्सम्बन्धिस्वन्येषु च ग्रन्थेषु विकीर्णा विद्यन्ते ।

गतायाः खीष्टशताब्द्या अन्तिमे चरणे अस्याश्च प्रारम्भे योरोपीयदेशैर्विज्ञानक्षेत्रेऽद्भुतं नैपुण्यं प्रदर्शितम् । विज्ञानक्षेत्रे नवीनैराविष्कारैस्तेषां देशानामुत्पादनक्षमताया अभूतपूर्वोन्नतिर्जाता ।

In Public domain. Digitization Muthulakshmi Research Academy

यया समृद्धास्तत्रत्या जिज्ञासवो द्विगुणितोत्साहेन सर्वास्वेव दिशासु नवनवरहस्योद्घाटनाय प्रायतन्त। तेन विज्ञानविषयेषु प्रभूतं साहित्यं निर्मितमभूत्। अतीतकाले भारतीयैरपि शास्त्रस्य सर्वास्वेव शाखास्वाश्चर्यकारि वैचक्षण्यं प्रदर्शितम्। "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥" इति न कस्यचिन्मिथ्याराष्ट्राभिमानिनो गर्वोक्तिरपि तु सत्यमेव। परं कालवशात् पारतन्त्र्यमुपगतेऽस्मिन् देशे पारस्परिककलह-मिथ्याभिमान-दम्भ-दारिद्र्याशिक्षालस्यादिभिः पदं कृतमत्र। तेनाध्ययनाध्यापनानुसन्धानादेर्गतिर्निरुद्धैव जाता। येषु विषयेषु देशोऽयं जगद्गुरुरासीत्, तेष्वेवायं परमुखापेक्षी जातः। खगोलविज्ञाने, मनोविज्ञाने, भाषाशास्त्रे, गणिते, भूमितिशास्त्रे च सर्वाग्रणीरयं देशो नगण्योऽभवत्।

विज्ञानेन यथा योरोपीयदेशेषु भौतिकसुखानां द्वारमुद्घाटितम्, तथा जीविकोपार्जनविषये महान् सङ्घर्षोऽपि जनितः। प्रवर्धमानैः सुखसाधनैः सह सुखेच्छापि बलवत्तराऽभवत्, तदुत्पन्नाः स्पर्धेर्ष्याद्वेषक्रोधादयो महतीमशान्तिं व्यरचयन्। "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति यत्सत्यं तत्तु सर्वत्रैव विदितम्। तेन प्राच्या विद्वांसो मनसः शक्तेः, तद्व्यवहारस्य, मानवस्वभावस्य, मानवबुद्धेश्च विषयेऽधिकाधिकं ज्ञातुं प्रयेतिरे। अस्य प्रयत्नस्य परिणामरूपं विपुलं मनोविज्ञानसाहित्यं विरचितमास्ते। बहुसंख्याका विद्वांसोऽद्यापि विषयस्यास्याध्ययने दत्तमनस आसते। प्रतिदिनं च नवनवानि तथ्यानि ज्ञातानि भवन्ति, तेन पूर्वमतानां खण्डनस्य नवमतस्थापनस्य च प्रक्रिया प्रवर्तमाना आस्ते।

भारते मनोविज्ञानविषयकं यत्किञ्चित् कार्यमतीतकालेऽभूत् तद्दर्शनशास्त्रस्याङ्गभूतमेव। प्राचीनकाले प्रयोगार्थमुपकरणानामभावात्, वैज्ञानिकप्रक्रियाया अपरिचयात्, मनोवैज्ञानिकनिष्कर्षाणां प्रयोगाय तथाऽवसरो नासीद्यथाधुनिके युगे विद्यते। तेन मनोविज्ञानस्य प्रायोगिकसामाजिकादिशाखानां प्रगतिपथोऽवरुद्ध एवावर्तत। व्यक्तिनिष्ठानां प्रयोगाणां परिणामो व्यक्तीनां मानसिकस्तरेषु भेदान्न विश्वसनीयं भवितुं शक्नोति। साम्प्रतं पाश्चात्यदेशेषु सर्वेषामपि सिद्धान्तानां प्रयोगार्थं यन्त्राणि विविधान्यन्यानि चोपकरणानि निर्मितान्यासते।

विदेशीयशासनान्मुक्तेरनन्तरं भारते ज्ञानपिपासाया वृद्धिः स्वाभाविकी। स्वदेशभक्तेः कारणात् साम्प्रतिका विद्वांसो भारतीयं साहित्यमधीत्य तस्य पाश्चात्त्येन तोलनं कुर्वाणा द्वयोरपि दार्ढ्यं प्राप्तुं सचेष्टा वर्तन्ते। ज्ञानविषये देशकालनिष्ठा भेदा व्यर्था एव। कुतोऽप्यागतं ज्ञानं पवित्रमेव भवति। विद्वांसो भारतीया इव पाश्चात्त्या अपि पूज्याः। विचारक्षेत्रे प्राच्यपाश्चात्त्यभेदो मौर्ख्यनिदर्शक एव। सर्वत उपादेयं ज्ञानमिति दृष्ट्या ग्रन्थेऽस्मिन् पाश्चात्त्यैराविष्कृतानां परं सर्वैरपि निर्विवादतया गृहीतानां सिद्धान्तानां वर्णनमास्ते। प्रसङ्गानुसारेण यत्र तत्र सिद्धान्तसमीक्षाऽपि विहितैव।

सर्वेषामपि देशानां साहित्ये विचारसरणौ च तत्रत्याया जीवनपद्धतेः प्रभावो दृश्यते। भारते दुःखान्तानां नाटकानां सृष्टिर्ग्रीकदेश इव नोपलभ्यते, साहित्ये आत्महत्यानां चर्चैव नास्ति। अनीश्वरवादिनोऽपि धार्मिका गण्यन्ते चेति सर्वं भारतीयजीवनदर्शनानुकूलम्। एवमेव मनो-

In Public domain. Digitization Muthulakshmi Research Academy

वैज्ञानिकविचारेष्वपि भारतीयदर्शनस्य प्रभावः स्पष्ट एव। अत्रत्याः सर्वेऽपि विचारका आत्मनः सत्तामङ्गीकुर्वन्ति। तस्य स्वरूपे तेषु नैकमत्यमित्यन्यदेतत्। चेतोवृत्तिनिरोधस्यावश्यकतामप्यत्रत्याः सर्वे सम्प्रदायाः स्वीकुर्वन्ति। अस्य शास्त्रस्य किञ्चिदङ्गं 'भारते' विस्तृतं किञ्चिच्च योरोपीयदेशेषु। सिद्धान्तपक्षोऽत्रत्यो गरीयान्, प्रयोगपक्षो योरोपीयः। परं नैतदभिमन्तव्यं यत् सर्वमपि मनोवैज्ञानिकसिद्धान्तजातं भारतीयसाहित्ये विद्यमानम्। वस्तुतस्तत्त्वरूपेण विद्यमानोऽपि यथैष विषयो योरोपीयैः प्रपञ्चितो न तथा भारतीयैः। अस्य विषयस्य बह्वीनां शाखानां विकासस्त्वर्वाचीन एव। अद्यापि विकासोन्मुखोऽयं विषयः। मनोविज्ञानं साम्प्रतं विश्वविद्यालयेषु पाठ्यस्याङ्गम्। औद्योगिकशैक्षणिककूटनीतिकापराधवैज्ञानिकादिषु व्यवहारेषु साम्प्रतं मनोविज्ञानस्योपयोगो जायते। तस्य सम्यगवधारणाय भारतीयानां योरोपीयानां च विचाराणां सहैवाध्ययनमावश्यकम्। प्राच्याः पाश्चात्त्याश्च विचाराः परस्परं पूरकाः। यत्र कुत्रचित्तेषु विरोधस्तत्र सुधीभिः स्वधिया समीक्ष्य निर्णयः, वरीयांश्च पक्ष उपादेयः। दिग्दर्शनायात्र स्थालीपुलाकन्यायेन किञ्चिद् विचार्यते।

ज्ञानस्य साधनानि चत्वारि—प्रत्यक्षानुमानोपमानागमाः। तत्र प्रधानभूतं प्रत्यक्षम्। तच्चेन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानम्। ज्ञानं चात्मनो गुणः। तच्च इन्द्रियपदार्थसंयोगे, ततो मनसा सहेन्द्रियसंयोगे, ततो मनस आत्मना सह संयोग उत्पद्यते। मनश्चान्तरिन्द्रियम्। आत्मना सह मनसः सन्निकर्षः सर्वज्ञानेष्वावश्यकः। एवमेव प्रत्यक्षज्ञाने इन्द्रियार्थसन्निकर्ष आवश्यकः। प्रत्यक्षमपि द्विप्रकारकम्—सविकल्पकम्, निर्विकल्पकं चेति। निर्विकल्पकमेव प्रत्यक्षं गौतमेनाव्यपदेश्यमित्युक्तम्। प्रत्यक्षज्ञानं नान्यज्ञानाश्रितं भवति। अत एव तज्ज्ञानाकरणकमिति निगद्यते। निर्विकल्पकं प्रत्यक्षं सविकल्पकात् पूर्वं भवति, नहि तत्र पदार्थस्य गुणरूपादीनां परस्परं सम्बन्धोऽवगम्यते। इयं प्रत्यक्षस्य पूर्वा कोटिः। सा च सविकल्पकप्रत्यक्षेणानुमीयते। सविकल्पकं प्रत्यक्षं व्यवसायात्मकमपि कथ्यते। अस्मिन् पदार्थस्य वस्तुगुणक्रियाजातिनामादीनामपि ज्ञानं जायते। अत्र च पदार्थस्य व्यवच्छेद्यव्यवच्छेदकसाहचर्यादिपरिवेशेनावगमो भवति। अस्मिंश्च पूर्वप्रत्यक्षजन्याः संस्कारा अपि सहायाः। भारतीयास्तर्कशास्त्रिणः प्रत्यभिज्ञां स्मृतेरङ्गं न स्वीकृत्यैनां स्वतन्त्रां प्रत्यक्षक्रियां मन्यन्ते। सा चातीतप्रत्यक्षाश्रिता। 'अयं स देवदत्तः' इत्याकारकं प्रत्यक्षं प्रत्यभिज्ञापदेन व्यपदिश्यते। अतीतकालिकप्रत्यक्षावच्छिन्नं वर्तमानकालिकं प्रत्यक्षं प्रत्यभिज्ञा। अत्र च संस्काराः स्मृतिं प्रेरयन्ति। प्रत्यक्षे केवल इन्द्रियार्थसन्निकर्ष आवश्यकः। प्रत्यभिज्ञायामतीतसंस्कारोऽप्यपेक्ष्यते। नैयायिकैः प्रत्यक्षस्य लौकिकालौकिकौ द्वौ भेदौ स्वीकृतौ। लौकिकं प्रत्यक्षमपि द्विविधम्—बाह्यं मानसं चेति। बाह्यं त्विन्द्रियभेदेन चाक्षुषादिपञ्चप्रकारकम्। अन्तरिन्द्रियेणात्मनो गुणानां प्रत्यक्षं मानसम्। अलौकिकं प्रत्यक्षं त्रिविधम्—सामान्यलक्षणसन्निकर्षजम्, ज्ञानलक्षणसन्निकर्षजम्, योगजसन्निकर्षजं चेति। तत्र प्रथमेनैकपदार्थज्ञाने सति जाते ज्ञानं भवति। इदं जातिविषयकं प्रत्यक्षम्। अनेन कञ्चिन्मनुष्यं दृष्ट्वा तत्र मनुष्यत्वं सामान्यं परिगृह्य सर्वमनुष्यज्ञानं संभवति। ज्ञानलक्षणसन्निकर्षजं प्रत्यक्षं साहचर्याश्रितं भवति, येन चन्दनकाष्ठं दूरत एव दृष्ट्वा तत्सुगन्धस्य प्रत्यक्षं जायते। योगजं प्रत्यक्षं तु युक्तैर्युञ्जानैर्वा कर्तुं शक्यम्। तथा चोक्तं विश्वनाथेन—

In Public domain. Digitization Muthulakshmi Research Academy

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ इति।

आधुनिकाः प्रकाशविज्ञानविदो मन्यन्ते यत् पदार्थमभिभवन्तः प्रकाशरश्मयः, ततः प्रतिक्षिप्ता द्रष्टुश्चक्षुः प्राप्य कनीनिकायाश्चान्तः प्रविश्य दृष्टिपटले (Retina) पदार्थस्य प्रतिबिम्बमुपस्थापयन्ति। तेनैव पदार्थः प्रत्यक्षीभवति। प्रकाशकिरणानां गतिः सामान्यतया ऋज्वी भवति। परं यदोष्मण आधिक्याद् वायुमण्डले परिवर्तनं भवति, तदा प्रकाशकिरणानां मार्गेऽपि परिवर्तनं जायते। किरणाश्च वक्रीभवन्तः क्रान्तिबिन्दुं (Critical Point) संप्राप्य ततो विरुद्धदिशायां प्रतिक्षिप्ता भवन्ति। तेन च वस्तु मूलतः समग्ररूपेण विरुद्धमवलोक्यते। ग्रीष्मर्तौ मरुप्रदेशे वृक्षाणां मूलमुपरि शाखाश्चाधो विलोक्यन्ते। तत्रेदमेव कारणम्। वृक्षप्रतिबिम्बस्य विरुद्धतया प्रतिभानादेव मरुमरीचिकायाः सृष्टिर्भवति। न्यायदर्शनस्य भाष्यकृता वात्स्यायनेन प्रत्यक्षसूत्रभाष्ये इदमेव तथ्यमेवं स्पष्टीकृतम्—"ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते। तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते। तत्प्रत्यक्षं प्रसज्यते। अत आह—अव्यभिचारीति" इति।

सांख्य-योग-वेदान्तसूत्रेषु प्रत्यक्षज्ञानप्रक्रियाविषये बहु विवेचनमुपलभ्यते। तत्रान्तःकरणं वस्तु प्राप्य प्रकाशकारीति निगदितम्। नैयायिक-वैशेषिक-बौद्धानां चैतन्नाभिमतम्। सांख्यादिमते चित्तमिन्द्रियप्रणालिकया बाह्यघटपदादिभिः सम्बद्धं भवति। तेन च चित्तमर्थाकारे परिणमति। एषैव चित्तस्यार्थाकारा परिणतिश्चित्तवृत्तिर्बुद्धिवृत्तिर्वा भण्यते। अस्यां वृत्त्यां पुरुषस्य चेतनात्मनो वा प्रतिबिम्बस्य सत्त्वात्, चैतन्यवत्यात्मनि बुद्धिवृत्तेः प्रतिबिम्बस्य वा सत्त्वात्, पुरुषस्य चेतनात्मनो वा तदर्थावबोधो जायते। सांख्या इमं पौरुषेयबोधं कथयन्ति। स्पष्टीकृतं चैतद्योगसूत्रभाष्यकृता व्यासेन—"इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः" इति।

पाश्चात्याश्चिन्तकाः प्रत्यक्षस्य महत्त्वमेव न स्वीकृतवन्तः। ते च बुद्धिवादपक्षपातिनः। विश्वस्य व्याख्यया बुद्धेः सन्तुष्टीकरणमेव तेषां लक्ष्यम्। भारते च चिन्तनस्य लक्ष्यमात्मसाक्षात्कारः, स चानुभवरूपः। एतदेव कारणं यत् शेलिङ्ग-वर्गसाँप्रभृतीन् द्वित्रान् विचारकान् विहायान्यैः स्पिनौजा-लिबनीज-काण्टादिभिर्दार्शनिकैः प्रत्यक्षज्ञानस्य प्राधान्यं नाङ्गीकृतम्।

प्राच्यैर्ज्ञानस्य द्वौ भेदौ स्वीकृतौ—अनुभवः, स्मृतिश्च। तत्र ज्ञातविषयकं ज्ञानं स्मृतिः, स्मृतिव्यतिरिक्तं ज्ञानमनुभवः। ज्ञातविषयकमपि ज्ञानं द्विधा—तत्र पूर्वा स्मृतिरपरा च प्रत्यभिज्ञा। यदा किञ्चिद् वस्तु दृश्यते ज्ञायते वा, तदा तद्विषयकं ज्ञानमात्मनि स्वविषयकं संस्कारं जनयति। वस्तुनो ज्ञानं तु चलं भवति, परं तद्विषयकः संस्कारः स्थिरस्तिष्ठति। कालान्तरेण केनापि कारणेनोद्बुद्धः स एव संस्कारो बाह्येन्द्रियादिसाहाय्यं विनाऽपि पुनरपि तत्पदार्थविषयकं ज्ञानमुपस्थापयति। तदेव ज्ञानं स्मृतिरिति संज्ञातं भवति। स्मृतेः कारणं संस्कारोद्बोध एव। संस्कारोद्बोधकाश्च सादृश्यादृष्टचिन्ताद्या भवन्ति। अदृष्टमेवोद्दिश्य श्रीहर्षेणोक्तम्—

In Public domain. Digitization Muthulakshmi Research Academy

"अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम्" इति ।

किं सुप्तिरदृष्टं विषयं दर्शनातिथिं कर्तुं शक्ता न वेति ? शक्तेति चेत्कथमिति विषयान्तरम् ।

भारतीया जीवात्मन आनन्त्यमविच्छिन्नत्वं च स्वीकुर्वन्ति । तेषां मते न केवलं शरीरापेक्षस्तस्य विकासो भवति, गुणापेक्षोऽपि भवत्येव । कालक्रमेण चेतनाशक्तिरुद्बुद्धतरा जायते । तेन निम्नयोनिषु जन्मानन्तरं जीवात्मा क्रमेणाधिकसत्त्वसम्पन्नयोनिषु जन्म लभते । क्रमेण विकासमापन्ना चेतनाशक्तिः स्वाभिव्यक्तये साधुतरं साधनमपेक्षते । तमःप्रधानयोनिभ्यो रजःप्रधानयोनीः, रजःप्रधानयोनिभ्यश्च सत्त्वप्रधानयोनीर्लभमानो जीवात्मा शनैः शनैर्जन्मविनिर्वृत्तो[1] जायते । एवं भारतीयमतेन जीवस्योन्नतयेऽनन्तोऽवसरः । तदर्थं च महान् कालोऽपेक्ष्यते । पाश्चात्त्यविचारकेषु डार्विनानुयायिनो रूपाकृतेस्तु क्रमिकं विकासमङ्गीकुर्वन्ति, शरीराणां विकासं तु क्रमेण सरलाजटिलं मन्यन्ते, चेतनाया विषये तेषां दृष्टिः सर्वथा भिन्ना । सांख्यमते साक्षी केवलो निर्गुणः प्रकृतिसहचारी पुरुषः । योगसूत्रकारेण पतञ्जलिना सांख्यमतं स्वीकुर्वतेश्वरसत्तायां विश्वासोऽभिव्यक्तः । स च क्लेशकर्मविपाकाशयैरपरामृष्टं पुरुषविशेषमीश्वरं मनुते । ईश्वरः कालेनानवच्छेदात् पूर्वेषामपि गुरुः । वेदान्तिनस्तु जगतो मूलमव्यक्तमरूपं ब्रह्म जानते । तन्मतेऽन्यत् सर्वं मायैव । सर्वाणि परिवर्तनानि, सर्वं च परिवर्तमानं मायिकम् । एवं सति त्रिष्वपि सांख्ययोग-वेदान्तमार्गेषु शरीरव्यतिरिक्तपरमोच्चसत्ताविषय ऐकमत्यम् । एवमेव न्यायवैशेषिकमतयोरपि । योरोपीयास्तु मानवसत्ताया अमूर्तत्वपक्षे ईश्वरं प्रत्यास्थां प्रकटयन्ति, आत्मनः शाश्वतिकताया विषये तु संशयालव एव । भारतीयाः समग्रमपि विश्वं कस्याश्चिद् बुद्धिगम्याया विकासयोजनाया अङ्गं मन्यमानाः पूर्वजन्मानि, भविष्यन्ति च जनूंषि स्वीकुर्वाणाः साधनभूतैरतीतजन्मभिः क्रमेणोन्नतिपथमवलम्बमानमात्मानं मन्वते । योरोपीया आस्तिका (ईश्वरविश्वासिनः) आत्मन ईश्वराभिमुखीकरणे चित्तैकाग्र्यस्य महत्त्वं प्रतिपादयन्ति । भारतीयास्तु परमेश्वरविषयिणीं श्रद्धां प्रमुखां मन्यन्ते । यतः सा चित्तैकाग्र्यस्य साधिका । भारतीयदृष्टौ चित्तैकाग्रता लक्ष्यभूता, यतोऽव्यवस्थितमप्रतिष्ठितं बह्वासक्तं चित्तं नोन्नतिसाधकं भवति । अत एव चित्तवृत्तिनिरोधं द्रष्टुः स्वरूपावस्थितौ कारणं मन्यमानेन योगसूत्रकृतेश्वरप्रणिधानं साधनरूपेण परिगणितम् । व्याधिस्त्यान-संशय प्रमादालस्याविरति-भ्रान्ति-दर्शनालब्धभूमिकत्वानवस्थितत्वरूपचित्तविक्षेपाणां निराकरणाय तत्त्वाभ्यासश्चोपदिष्टः । एवं योरोपे ईश्वरप्रणिधानं साध्यं चित्तैकाग्र्यं च साधकम्, भारते तु स्थितिस्तद्विपरीता ।

भारते आस्तिका इव नास्तिका अप्याध्यात्मिकीं साधनां प्रत्युन्मुखा दृश्यन्ते । नास्तिकास्तिकभेदस्तु दर्शनक्षेत्रे एव महत्त्वमाप्नोति । जीवनक्षेत्रे कर्मभूमौ त्वास्तिकत्वं नास्तिकत्वं वा न कुत्राऽप्यन्तरायजनकम् । अत एव आस्तिका इव नास्तिका अप्यत्र धार्मिका मन्यन्ते, आस्तिकेभ्यो बहुमानमपि लभन्ते । सांख्यवेदान्तयोश्चार्वाकमीमांसयोश्च महदन्तरम्, परं नैतद्धार्मिकप्रगतावन्तरायभूतम् ।

---

१. धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ (सांख्यकारिका ४४)

In Public domain. Digitization Muthulakshmi Research Academy

भारतीयैर्विचारकैः कार्यकारणसम्बन्धस्याविच्छेद्यताऽप्यङ्गीकृता। तेषां मते सर्वमपि कार्यं कारणपूर्वम्। सर्वस्यापि कार्यस्य पश्चाद्भावी परिणामोऽप्यवश्यम्भावी। नात्र कार्यफलाद् मुक्तयेऽवकाशः। अत्र पूर्ववर्ति कार्यं पश्चाद्वर्तिनः कार्यस्य कारणं सम्पद्यते, अनया रीत्या मानवाः स्वयमेव स्वभाग्य-निर्मातारो भवन्ति। केवलमनासक्त्या कृतं कर्म बन्धनाय न प्रभवति। बन्धनमुक्तिश्च जीवनस्य लक्ष्यम्। नैव कर्मसिद्धान्तो नियतिवादस्य प्रेरकः प्रत्युत समग्ररूपेण तद्विरुद्धः। अस्मिन् सिद्धान्ते स्वयमात्मैव कारणं स्व-बन्ध-मोक्षयोः सिध्यति। पाश्चात्त्येषु देशेषु भौतिकजगद्व्यवहारेषु कार्यकारणनियमः साम्प्रतं स्वीक्रियते, परं नाध्यात्मक्षेत्रे, नापि सम्पूर्णतया मनोविज्ञानजगति तस्य महत्त्वमवधार्यते।

विकासोन्मुखाया मानवजातेः सङ्घटनायां साम्प्रतं तस्याः संवेगप्रवणा (प्रकृतिः संवेग-प्रधानः स्वभावो वा) सर्वाधिकमहत्त्वपूर्णा वर्तते। प्रतिदिनं वृत्तपत्रेषु प्रकाश्यमानाः समाचाराः घृणाऽनुरागेर्ष्या-गर्व-कामुकताऽहङ्कार-साहसादिसंवेगजा एव भवन्ति। परमद्यापि किं वयमेषां संवेगानां कारणानि परिणामांश्च जानीमहे? केषाञ्चित् संवेगास्तीव्राः, अन्येषाञ्च मन्दाः कथं भवन्ति? जनः कश्चिदेव जनं प्रत्यनुरक्तो जायते नान्यं तद्विशिष्टतरं प्रतीति किमत्र कारणम्? कामुकताप्रेरितोऽनुरागोऽल्पजीवी भवति। न तु गुणप्रसूतः। परं कथं तद्विरुद्धाऽपि स्थितिः समुपलभ्यते। दोषेषु कथमीर्ष्या सर्वाधिकतया व्यापिनी? किं कयाचित्परीक्षितया प्रक्रियया संवेगा उद्बोधयितुं शक्याः? क्रोधस्य प्रभावस्तत्कर्तरि विषयभूते च कीदृग् जायते? इत्यादीनां प्रश्नानां समुचितं समाधानं पाश्चात्त्या विचारका अद्यापि कर्तुं न पारयन्ति। तेनैव ते प्रायेण जगति प्रवर्तमानं बह्वाकस्मिकं मन्यमाना आसते। आधुनिकाः पाश्चात्त्या अगदङ्काराः केषाञ्चिद्रोगाणां सम्बन्धं संवेगैः स्थापयन्तीति सत्यम्, परं नास्मिन् विषयेऽद्यावधि प्रशंसार्हं कार्यं तैः कृतम्। प्राच्यानां भौतिकशरीरविषयकं ज्ञानमल्पमुपहासार्हं चेति पाश्चात्त्या विश्वसन्ति। भवेत्तेषां मते सत्यांशः, किन्तु संवेग रोग सम्बन्धविषयकं प्राच्यानां ज्ञानं सर्वथा पूर्णं श्रद्धेयं च। ते च रोगाणामुपचारं संवेगानां नियन्त्रणेन, संशुद्ध्या चारभन्ते, यतस्ते संवेगोत्पत्तौ कार्यकारणभावं सम्यग् द्रष्टुं निरूपयितुं च समर्थाः, अस्मिन् विषये सर्वासां शङ्कानां निराकरणाय च क्षमाः। भारतीयैः संवेगानां प्रभावविषये दीर्घकालव्यापिनीं परीक्षां कृत्वा केचित् सिद्धान्ताः स्थापिताः। चिरकालादारभ्याद्यावधि तेषां प्रयोगोऽनवच्छिन्नरूपेण क्रियमाण आस्ते योगनिष्ठैरन्यैश्च साधनपरायणैः। अतोऽत्र स्वीकृतः कार्यकारणनियमः सार्वदेशिकः सार्वकालिकश्च। भौतिकजगतीव तस्य प्रयोगो मनोविज्ञानक्षेत्रे सुतरां समीचीनः।

भारते संवेगानां क्षेत्रं व्यापकतरं स्वीक्रियते। तदनुसारेण बालानां कटुद्रव्येभ्यो विरतिः, यूनां च मधुरं प्रत्यासक्तिरेकस्यैव संवेगस्याङ्गम्। इच्छा, घृणा चोभे एकस्यैवानुभवस्याङ्गभूते। इयमेवानुभूतिर्मनःशास्त्रिणा फ्रायडमहोदयेन 'कामनाजगत्' इति नाम्ना व्यवह्रियते। यावत्कालं जनः कामनावशगः सहजाकर्षणविकर्षणाभिभूतो व्यवहरति, तावत् स बाल एव। एवं भारते संवेगानामुभयमुखी वृत्तिः स्वीक्रियते। एकस्यैव संवेगस्य पूर्वो भागः स्पृहातिरेकमपरश्च जुगुप्सातिरेकमभिव्यनक्ति। साम्प्रतं पाश्चात्त्यदेशेष्वपि प्रायोगिकमनोविज्ञानविदोऽस्मिन् सिद्धान्ते श्रद्धां प्रकटयन्त आसते।

In Public domain. Digitization Muthulakshmi Research Academy

पातञ्जले योगशास्त्रे चेतनायाः पञ्च कोटयः स्वीकृताः । तत्र लौकिकव्यवहारेषु सावहिततां विदधाना प्रथमा, भावनाजगतो नियन्त्रिका च द्वितीया । विचारकाले संकल्पानुच्छायिता बौद्धिकी चेतना च तृतीया । सामान्या जनाः स्वविषये एतास्वेव तिसृषु कोटिषु सचेतना भवन्ति । अत एव ते शारीरिकशैत्यस्य, मानसिकखिन्नतायाः, कस्याश्चिद् बौद्धिक-क्रियायाः (यथा वस्तूनां गणनायाः, भौमितिकप्रश्नानां समाधानस्य वा) विषये समकालमेव संवेदनवन्तो भवितुं शक्नुवन्ति । एकस्मिन् क्षणे चेतना अस्यास्त्रय्या मध्ये एकतमस्मिन् बिन्दौ केन्द्रिता भवति । अन्ये च द्वे तयाऽनुच्छायिते तिष्ठतः । पाश्चात्यास्त्वत्र विचारानुभूत्योर्मध्येऽन्तर-विशेषममन्यमाना द्वे एव कोटी स्वीकुर्वन्ति, न तु भारतीयवत् तिस्रः । नहि वस्तुतोऽनुभूतिर्विचार-स्यैवैकः पक्षः । जाग्रदवस्थायां विचारानुभूती परस्परं साहचर्येण वर्तेते इत्यन्यदेतत् ।

न्यायशास्त्रे प्रवृत्तेः (Volition) मनोवैज्ञानिकी व्याख्या समुपलभ्यते । केचिन्नैयायिकाः प्रवृत्तिमात्मनः कृतिं (Efforft) मन्यन्ते । सा चास्येच्छापूर्विका क्रिया । इच्छाया एव प्रवृत्तेः समुत्पत्तिः । इच्छा च ज्ञानाज्जायते । कस्यचिद् वस्तुनो ज्ञानमेव तद्विषयिणीमिच्छां जनयति । इच्छा च प्रवृत्तिं करोति । इच्छायाः स्थितिरेव प्रवृत्तयेऽलं भवति । तदर्थमिच्छायाः स्थितेः संज्ञानं नावश्यकम् । न चैका प्रवृत्तिरन्यस्याः प्रवृत्तेर्जननी, नापि तत्प्रवृत्तिसंज्ञानं वाऽन्यप्रवृत्तिजनकं सम्भवति । असंज्ञाताऽपीच्छा प्रवृत्तिं जनयितुं शक्ता ।

सर्वापि प्रवृत्तिः सप्रयोजना भवति । प्रयोजनमेव सर्वस्याः प्रवृत्तेर्मूलम् । नहि प्रयोजन-मनुद्दिश्य मन्दोऽपि प्रवर्तते । सामान्यतया दुःखप्रहाणिः सुखावाप्तिश्च प्रयोजने भवतः । प्रवृत्तः कर्ता उपायान् सञ्चिनोति, सहजप्रवृत्तयोऽपि प्रयोजनोपायविरहिता न भवन्ति । एवं न्यायशास्त्रं मनोवैज्ञानिकसुखवादस्य प्रेयोवादस्य वा पुरस्कर्तृ । चिकीर्षाऽपि ज्ञानत्रयाश्रिता । ज्ञानत्रयं च— कृतिसाध्यताज्ञानम् , इष्टसाधनताज्ञानम् , बलवदनिष्टाजनकत्वज्ञानमिति ।

प्रवृत्तिविषयका भारतीया विचाराः पाश्चात्यैः सह सङ्गतिं लभन्ते । परमियं प्रवृत्तिः (Volition) सामान्यार्थे प्रयुक्ताया इच्छाया (Will) विशिष्टा । सामान्यास्तु कस्यचिदभीष्ट-वस्तुनो बुद्धिगतं चित्रं निर्माय तत्प्राप्तये, प्राप्य च स्ववशे रक्षणाय प्रयुक्तामिच्छाशक्तिमेव प्रवृत्तिं मन्यन्ते । इयं सामान्यार्थे प्रयुक्तैवेच्छाशक्तिः कल्पनयाऽभिभूताऽवलोक्यते । कश्चित् पुरुषः प्रत्यहं प्रातर्भ्रमणस्य निश्चयं करोति, जाते च प्रभाते न तथा कर्तुं पारयति । अत्र च निश्चयाद् भ्रंशः सुखबाधाभयादेव जायते । नात्र प्रवृत्तिकल्पनयोर्मध्ये कोऽपि विरोधः, विरोधस्त्विच्छाद्वयस्यैव मध्ये वर्तते । स्वास्थ्यलाभादिकारणेन मनः प्रातर्भ्रमणस्य किञ्चित् काल्पनिकं मधुरं चित्रं सज्जी-करोति । काले च समुत्पन्ने तस्य शय्यास्वापसुखविषयकेण कल्पितमनश्चित्रेण विरोधो जायते । तत्र बलवत्तरा इच्छा विजयिनी जायते । नात्र प्रवृत्त्या सहेच्छाया विरोधो येन प्रवृत्तिः (Volition) पराजिता स्यात् । भारतीयमते अनुभवः (Feeling), विचारः, (Thought) संकल्प इच्छाशक्तिर्वा (Will) चेतनाया एवोत्तरोत्तरा उत्कृष्टाः कोटयः । जायमाने सङ्कल्प-शक्त्या विकासे जनाः प्रेयः परित्यज्य श्रेष्ठोऽनुष्ठातुमुद्युक्ता भवन्ति । पाश्चात्येषु मनोवैज्ञानिकेष्वपि केचित् सङ्कल्पजानां सर्वेषामपि कार्याणामात्मना सह सम्बन्धमङ्गीकुर्वन्ति । यद्यप्यात्मनः

In Public domain. Digitization Muthulakshmi Research Academy

स्वरूपविषये न तेषु मतैक्यम्, तथापि प्रवृत्तिं तेऽप्यात्मनः कार्यं मन्यन्ते। चेतनायाश्चतुर्थी कोटिरान्तःकरणिकी, अन्तःप्रज्ञाविषयिणी वा। पञ्चमी च सङ्कल्पशक्तिरध्यवसायशक्तिर्वा। एतां पञ्चमीं कोटिमारूढा चेतना काचित्क्येव। सङ्कल्पशक्तिविषये भारतीयशास्त्रकारैर्बहु चर्चितमास्ते। एतामेव भूमिकामवाप्य द्रष्टा स्वरूपेऽवस्थितो भवति।

व्यक्तिमनोविश्लेषणपरैर्मनश्चिकित्सकैः फ्रायडादिभिश्चेतनमचेतनं पूर्वचेतनमिति यानि त्रीणि रूपाणि मनसः स्वीकृतानि तान्यंशतो भारतीयमतानुकूलानि। पतञ्जलिना समाधिपादे क्लिष्टा अक्लिष्टाश्च पञ्चतय्यो वृत्तयो निरूपिताः। तत्र क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः। ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः। तथाजातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते, संस्कारैश्च वृत्तय इति। एवं वृत्तिसंस्कारचक्रमनिशमावर्तते। दृष्टस्यानुभूतस्य वा विषयस्याप्रमोषरूपा स्मृतिर्नष्टेऽन्तर्हिते वा विषयेऽप्यवतिष्ठत एव। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयं संस्कारमारभते। स संस्कारः स्वव्यञ्जकाञ्जनस्तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तत्र ग्रहणाकारपूर्वा बुद्धिः, ग्राह्याकारपूर्वा च स्मृतिः। सर्वा एता वृत्तयो निरोद्धव्याः। आसां निरोधे मनः समाहितं भवति निरोधश्चाऽभ्यासवैराग्याभ्यां सिद्ध्यति। चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय, वहति पापाय च। तत्र वैराग्येण विषयस्रोतः शोष्यते, दर्शनाभ्यासेन च विवेकस्रोत उद्घाट्यते। शुष्केऽपि विषयस्रोतसि तत्संस्कारा बीजरूपा अवतिष्ठन्त एव। नहि कदाचिद् वशीकृतं चित्तं सर्वकालाय वशमापद्यत इति कृत्वा प्राच्यैर्दीर्घकालं यावन्निरन्तरं तपसा, ब्रह्मचर्येण, विद्यया, श्रद्धया चाभ्यासस्यासेवनं विहितम्। एवं सत्कारवानभ्यासो दृढभूमिर्भवति। वैराग्यवन्मनो दृष्टवदानुश्रविकवितृष्णं जायते। समाहिते चित्ते वितर्कविचाराऽऽनन्दांऽस्मितारूपानुगमात् सम्प्रज्ञातः समाधिर्भवति। सर्ववृत्त्यस्तमये संस्कारशेषो निरोधो जायते। तेन च चित्तस्यासम्प्रज्ञातः समाधिरुपलभ्यते। विरामप्रत्ययो निर्वस्तुक आलम्बनीक्रियते, स चार्थशून्यः। तदभ्यासपूर्वं चित्तं निरालम्बनभावप्राप्तमिव भवति। एवं निर्बीजः समाधिर्जायते। येषां संवेगास्तीव्रा भवन्ति तेषां समाधिफलमासन्नं भवति। मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषो भवति। योगदर्शनप्रतिपादितेनैतेन विषयेण फ्रायडोक्तं बहु गलितार्थं भवति। फ्रायडानुयायिनां दृष्टिरस्मिन्नेव जन्मनि गृहीतानां संस्काराणां साक्षात्कारं विधत्ते, परं योगशास्त्रकृता पुनर्जन्म प्रतिपादयता पूर्वजन्मार्जितसंस्काराणामपि चिकित्सा विहिता। पुनश्च फ्रायडानुयायिनो निरोधे यान् दोषान् परिगणयन्ति तेषामपि निराकरणाय पतञ्जलिना उपायाश्चिन्तिताः। तेन अविद्याऽस्मिता-राग-द्वेषाभिनिवेशरूपान् पञ्च क्लेशान् तनूकर्तुं यमानां नियमानां च विधानं कृतम्। एतेन चेन्द्रियाणां परमावश्यता संप्राप्यते। पतञ्जलिविहितो निरोधो बुद्धिपूर्वक इति नात्र पुनर्व्युत्थानशङ्कालेशोऽपि।

एवमेव शास्त्रकारैर्यथाप्रसङ्गमन्येषामपि विषयाणां चर्चा कृता। तद्यथा बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्याऽभिधीयते सा बुद्धिः। अर्थप्रकाशो वा बुद्धिः। सा च द्विविधा– अनुभवः स्मरणं चेति। अनुभवोऽपि यथार्थाऽयथार्थरूपेण द्विधा। प्रत्यक्षादिप्रमाणजन्योऽर्थाविसंवादी यथार्थः। अर्थव्यभिचारी अप्रमाणजोऽयथार्थः। स त्रिविधः—संशयस्तर्को विपर्ययश्चेति। तत्रैकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः। संशयोऽपि त्रिविधः—समानधर्मदर्शनजः, विप्रतिपत्तिजः, असाधारणधर्मजश्चेति। विशेषादर्शने समानधर्मदर्शनजः। यथा—स्थाणुर्वा पुरुषो

In Public domain. Digitization Muthulakshmi Research Academy

वेति। कस्मिंश्चित्पुरोवर्तिनि द्रव्ये तन्निश्चायकं विशेषमपश्यतः समानधर्मं चापश्यतः पुरुषस्यैवंविधः संशयो भवति। विशेषादर्शने सति विप्रतिपत्तिजः। यथा—शब्दो नित्य उत अनित्य इति। तथा ह्येको ब्रूते नित्य इति, अपरो ब्रूतेऽनित्य इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुरुषस्य विशेषमपश्यतो भवति संशयः—'किमयं शब्दो नित्य उतानित्यः' इति। असाधारणधर्मदर्शनजस्तु संशयो यथा नित्यादनित्याच्च व्यावृत्तेन भूमात्रासाधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यत्वानित्यत्व-संशयः। अतस्मिंस्तद्ग्रहो विपर्यय आख्यायते। स एव भ्रम इति। स च पुरोवर्तिन्यरजते शुक्तिकादौ रजतारोपः, 'इदं रजतम्' इति। स्मरणमपि द्विविधम्—यथार्थमयथार्थं चेति। जाग्रदवस्थायां तद् द्विविधमपि भवति, स्वप्ने तु सर्वं ज्ञानं स्मरणमयथार्थं चेति, स्वप्ने दोषवशेन तदितिस्थाने इदमित्युदयात्।

ज्ञानं सर्वं निराकारमेव न तु ज्ञानेऽर्थेन स्वस्याकारो जन्यत इति नैयायिकाः। एवमेव साकारज्ञानवादितोऽप्याकारेणार्थानुमानं समर्थयन्तोऽपि विचारकाः स्वमतं तर्कैः स्थापितवन्तः। भारतीया रागद्वेषमोहान् दोषेषु परिगणितवन्तः। तेषु राग इच्छा द्वेषो मन्युः क्रोधो वा मोहो मिथ्याज्ञानम्।

भ्रमज्ञानस्य विपर्ययज्ञानस्य वा विवेचनं दार्शनिकसम्प्रदायैः पृथग्रीत्या कृतम्। तेन पञ्च ख्यातयः प्रसिद्धाः। यथा—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।
तथाऽनिर्वचनीयख्यातिरित्येतत् ख्यातिपञ्चकम्॥

तत्र प्रथमे द्वे बौद्धानाम्, तृतीया प्रभाकरानुयायिनां मीमांसकानाम्, चतुर्थी वेदान्तिनाम्, पञ्चमी च नैयायिकानामित्यलं विस्तरेण।

रसविषयेऽपि भारतीये साहित्यशास्त्रे भरतादारभ्य पण्डितराजजगन्नाथपर्यन्तैर्विद्वद्भिः पर्याप्ता विचारा उपन्यस्ताः। तैस्तर्कपूर्वकं समीक्षिताः—सञ्चारि-सात्त्विक-स्थायिभावा मानसशास्त्रा-न्तर्गता एव। ते च काव्यशास्त्रेभ्य ऊह्याः। अत्र विषये प्राच्यपाश्चात्त्यसिद्धान्तानां तौलनिकी समीक्षाऽर्वाचीनैर्विद्वद्भिः प्रस्तुता। सा चातीवोपयोगिनी विस्तरभयान्नात्र लिख्यते।

प्रस्तुतो ग्रन्थः सम्मान्यविद्वद्वर्याणामुत्तरप्रदेशराज्यस्थमुख्यमन्त्रिपदमलङ्कुर्वतां डा० सम्पूर्णानन्दमहोदयानां प्रेरणयैतः सप्तवर्षपूर्वमेव विरचित आसीत्। उत्तरप्रदेशराज्यस्य शिक्षा-विभागोऽस्य निर्मापयिता च। न तदा संस्कृते कोऽपि ग्रन्थोऽस्मिन् विषये विद्यमान आसीद् यमवलम्ब्यास्य रूपरेखा प्रस्तुता स्यात्। विषयस्य नवीनतया विचाराणामभिव्यक्तये आवश्यकाः शब्दा अपि नोपलब्धा आसन्। आधुनिकभारतीयभाषासु प्रयुक्ताः शब्दा न यथेष्टार्थावहाः कार्यसाधकाश्च जाताः। तदा डा० सम्पूर्णानन्दमहोदयानां निर्देशेन स्वयमेव पारिभाषिकशब्दानां निष्पत्तिः कृता। सन्तोषस्य विषयोऽयं यत् साम्प्रतमेव ते शब्दा भारतीयशासनशिक्षाविभागेन प्रकाशिते शब्दकोषे प्रायेण स्वीकृताः। मासषट्केन निर्मितः शीघ्रमेव च शिक्षाविभागेन प्रकाशनार्थं स्वीकृतोऽयं ग्रन्थ एतावत्कालपर्यन्तं राज्यशासनमञ्जूषाया एव शोभां वर्धयन्नासीत्।

In Public domain. Digitization Muthulakshmi Research Academy

साम्प्रतं वाराणसेयसंस्कृतविश्वविद्यालयस्य साहाय्येन तदनुसन्धानविभागस्य निर्देशने प्रकाशितमेव ग्रन्थमवलोक्य चेतः शान्तिमुपैति। भारतीयभाषासु प्रकाशिता ग्रन्था मुद्रणाशुद्धिपरिपूर्णा भवन्तीति पाठकानां विश्वासः। परमस्मिन्नशुद्धीनां संख्या नगण्यैव। तदर्थं शीघ्रमेव प्रकाशनाय चाचार्यवर्याः क्षेत्रेशचन्द्रचट्टोपाध्यायास्तत्सहयोगिनश्च धन्यवादार्हाः।

अस्य पुस्तकस्य भूमिकाभागः शिक्षाविभागस्यानवधानतया नष्टः। मूललेखस्याभावाच्छीघ्रतया पुनर्लिखितो न पूर्ववद्विस्तृतो विवेचनपरश्चेति नात्र ग्रन्थकर्ता दोषभागिति सुधीभिरवधेयम्।

संस्कृतभाषायामर्वाचीनमनोविज्ञानविषये प्रथम एवायं ग्रन्थः। तेनात्र बहवो दोषाः सम्भाव्यन्ते। बह्वन्वेषयताऽपि मया नास्मिन् विषये 'स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः' जनो कोऽप्युपलब्धः। अतोऽहं विदुषां कृपादृष्टेः सविशेषमधिकारीति मन्यमानस्तेषां समक्षं सादरं निबन्धमिमं प्रस्तौमि।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति साधवः॥

ग्वालियरनगरम्
२२-८-६३

सहृदयानां विदुषां प्रसादं कामयमानः
प्रभुदयालुः-अग्निहोत्री।

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमः

प्रास्ताविकम् क-ख

भूमिका ग-ठ

प्रथमोऽध्यायः

मनोविज्ञानस्य परिभाषा पृ० १–९

परिभाषा—विज्ञानशास्त्रयोरन्तरम्—मनोविज्ञानस्य प्रयोजनम्—मनोविज्ञानस्य विधयः—अन्तर्दर्शनम्—निरीक्षणम्—प्रयोगः—तुलनात्मको विधिः—विकासात्मको विधिः—विकृतमनोविज्ञानविधिः—इतिवृत्तात्मको विधिः।

द्वितीयोऽध्यायः

मनोविज्ञानस्य शाखाः पृ० १०–१३

विश्लेषणात्मकं मनोविज्ञानम्—विकासात्मकं मनोविज्ञानम्—पशुमनोविज्ञानम्—बालमनोविज्ञानम्—व्यक्तिमनोविज्ञानम्—समाजमनोविज्ञानम्—विकृतमनोविज्ञानम्—मनोविश्लेषणविज्ञानम्—शारीरिकं मनोविज्ञानम्—प्रयोगात्मकं मनोविज्ञानम्—मनोभौतिकं विज्ञानम्—व्यावहारिकं मनोविज्ञानम्।

तृतीयोऽध्यायः

मनोविज्ञानस्यान्यविज्ञानैः सह सम्बन्धः पृ० १४–१७

विज्ञानविभागाः—मनोविज्ञानभूतविज्ञाने—जीवविज्ञानेन सम्बन्धः—शारीरविज्ञानेन सम्बन्धः—नियामकविज्ञानेन सम्बन्धः—तर्कशास्त्रेण सम्बन्धः—नीतिशास्त्रेण सम्बन्धः—सौन्दर्यशास्त्रेण सम्बन्धः—दर्शनशास्त्रेण सम्बन्धः—समाजविज्ञानेन सम्बन्धः—शिक्षाशास्त्रेण सम्बन्धः।

चतुर्थोऽध्यायः

स्नायुसंस्थानम् पृ० १८–२८

मनःशरीरयोः सम्बन्धः—स्नायुसंस्थानम्—शरीरस्य जटिलता—आदातृण्यङ्गानि—संयोक्तारोऽवयवाः—स्नायुसमवायः—नाडीतन्त्रः—स्नायुतन्त्रस्य रचना—सुषुम्ना—मस्तिष्कपुच्छम्—लघुमस्तिष्कः—बृहन्मस्तिष्कः—स्नायवः—स्नायुकोशाः—स्नायुसन्धिः—स्नायुकोशानां कार्याणि—मस्तिष्के मानसिकव्यापराणां स्थानसीमनम्—स्वतन्त्रं स्नायुतन्त्रम्।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमोऽध्यायः

चेतना पृ० २९–३३

मनःशरीरयोः सम्बन्धः—चेतनाविषयका वादाः—पारस्परिकप्रतिक्रिया-वादाः—समानान्तरवादः—जडवादः–व्यवहारवादः—चेतनाया लक्षणानि—चेतनायाः स्तराः—चेतनाऽऽमचेतना च—चेतनावानात्मा ।

षष्ठोऽध्यायः

मानसिकप्रक्रियाः पृ० ३४–३६

चेतनाया मूलप्रकाराः—ज्ञानादीनां मिथः सम्बन्धः—ज्ञानस्य प्रकाराः—वेदनायाः प्रकाराः—चेष्टायाः प्रकाराः ।

सप्तमोऽध्यायः

अवधानम् पृ० ३७–४५

अवधानं नाम किम् ?—अवधानभेदाः—स्वतो निष्प्रयत्नम्—परतो निष्प्रय-त्नम्—अनुकूलं सप्रयत्नम्—प्रतिकूलं सप्रयत्नम्—अवधानहेतवः—प्रेरकबलम्—स्पष्ट आघातः—आघातावृत्तिः—वैषम्यम्—परिवर्तनम्—नावीन्यम्—कालावधिः—रुचिः—मूलप्रवृत्तयः—इच्छाः—संवेगाः — गतानुभवाः — प्रशिक्षणम् — सामाजिकः प्रभावः—वंशानुक्रमः—अवधानस्य विस्तारः—ध्यानावधिः—अवधानस्य प्रवृत्तयः—अनवधानता—अवधानस्य वशीकरणम् ।

अष्टमोऽध्यायः

संवेदना पृ० ४६–५९

संवेदनायाः स्वरूपम्—उत्तेजना—प्रतिक्रिया—संवेदनाधर्माः—प्रकारता—तीव्रता—कालः—व्याप्तिः—स्थानीयं चिह्नम्—उत्तेजनायाः सीमा—वेबरफेचनर-नियमः—संवेदनाभेदाः—गतिसंवेदना—दृष्टिसंवेदना –श्रवणसंवेदना—रससंवेदना—गन्धसंवेदना—त्वक्संवेदना ।

नवमोऽध्यायः

प्रत्यक्षीकरणम् पृ० ६०–७२

प्रत्यक्षीकरणस्य स्वरूपम्—प्रत्यक्षीकरण संवेदनयोरन्तरम्—प्रत्यक्षीकरणप्रक्रिया—प्रत्यक्षक्रियासु भिन्नता—प्रत्यक्षस्य याथार्थ्यम्—भ्रमः—संवेदनाजन्या भ्रमाः—परिमाण-भारनियमः—चित्रफलकयोर्नियमः—समानतायाः नियमः—सामीप्यनियमः—

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गतेर्नियमः—समानजातिवत्त्वनियमः—सातत्यनियमः—विचारजन्या विभ्रमाः—प्रत्यक्षीकरणस्य वैशिष्ट्यम्—प्रत्यक्षीकरणस्य भूमिकाः—सांवेदनिकानि चिह्नानि—आकृतेराधारस्य च प्रत्यक्षीकरणम्—प्रत्यक्षीकरणे सहायकानि तत्त्वानि—बाह्यजगतः प्रत्यक्षीकरणम्—शरीरस्य प्रत्यक्षीकरणम्—देशस्यावकाशस्य वा प्रत्यक्षीकरणम्—प्रत्यक्षीकरणं गत्यात्मकप्रतिक्रिया च ।

दशमोऽध्यायः

शिक्षणम् पृ० ७४–८४

शिक्षिताः सहजाश्च क्रियाः—शिक्षणविषयः—शिक्षणनियमाः—पशूनां शिक्षणम्—अन्तर्दृष्ट्या शिक्षणम्—पशुशिक्षणस्यान्यविषयः—मनुष्याणां शिक्षणम्—शिक्षण-प्रगतिः—शिक्षणसिद्धान्ताः ।

एकादशोऽध्यायः

स्मृतिः पृ० ८५–१००

स्मृतेर्महत्त्वम्—स्मृतेर्लक्षणानि—स्मृतेर्भेदाः—स्मृतेरङ्गानि—कण्ठस्थीकरणम्—स्मृतिविस्तारः—प्रपाठः—समग्रविधिः—सान्तरं कण्ठस्थीकरणम्—सार्थबोधं कण्ठस्थी-करणम्—विनिश्चयः—धारणा—विस्मृतिः — प्रत्याह्वानम्—स्मृतिः—प्रतिभा—प्रत्य-भिज्ञा—स्मृतेः प्रशिक्षणम्—प्रशिक्षणस्य स्थानान्तरणम् ।

द्वादशोऽध्यायः

कल्पनाक्रिया पृ० १०१–११०

प्रत्यक्षज्ञानम्—कल्पनाया महत्त्वम्—प्रत्यक्षकल्पनयोर्भेदः—स्मृतिकल्पनयोर्भेदः-प्रतिमाः—कल्पनाया भेदाः—कल्पनायाः प्ररूपाणि—स्वप्नाः—दिवास्वप्नाः—चिन्ता—भ्रमः-विभ्रमः—भ्रान्तिः—मनोराज्यम्—एकात्मीकरणम्—यौक्तिकीकरणम्-प्रक्षेपणम्—कल्पनाया आधारः—कल्पनाशक्तेरुन्नतिः—कल्पनाशक्तिपरीक्षा ।

त्रयोदशोऽध्यायः

विचारः पृ० १११–१२२

विचारणा—प्रत्ययनम्—दिवास्वप्नः—सप्रयोजना विचारणा—विचारस्य साध-नानि—प्रतीकाः—स्मृतिः —भाषा—चित्राणि—प्रत्ययाः—प्रत्ययसमष्टिः—समस्यानां समाधानम्—परिकल्पना—समस्यानां परिपालनम्—तर्कानुकूला विचाराः ।

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्दशोऽध्यायः

अनुभूतिः पृ० १२३–१२६

अनुभूतेः स्वरूपम्—चेष्टितक्रियाऽनुभूत्योरन्तरम्—ज्ञानसंवेदनाऽनुभूतीनामन्तरम्—अनुभूतेर्विभाः—सुखस्यानुभूतिः—अनुभूतेर्नियमाः—सहानुभूतिः—समानुभूतिः ।

पञ्चदशोऽध्यायः

संवेगाः पृ० १२७–१४३

संवेगानां स्वरूपम्—भयम्—क्रोधः—विनोदः—हर्षः—शोकः—अनुरागः—संवेगानामुत्पत्तिः—जेम्सलैङ्गसिद्धान्तः—शेरिङ्गटनकैननमतम्— कैननवार्डसिद्धान्तः—मैकेड्गलमतम्—जेम्सलैङ्गसिद्धान्तस्य समीक्षा—संवेगः—स्वतन्त्रं स्नायुतन्त्रम्—संवेगः—प्रणालीविहीनग्रन्थयश्च— गलग्रन्थिः — उपगलग्रन्थयः—पोषग्रन्थिः — प्रजनग्रन्थिः—संवेगानां लक्षणानि—संवेगानां वर्गीकरणम्—संवेगजन्याः संस्काराः—अभिवृत्तिः—मनोदशा—स्वभावः—सौन्दर्यस्य संवेगः—उदात्तस्य संवेगः—उपहासस्य संवेगः—नैतिकः संवेगः—धार्मिकः संवेगः—संवेगानामभिव्यक्तिः—संवेगजाः शारीरिकक्रियाः—संवेगजा विकाराः—स्थायिभावाः—संवेगानां परिणामः—संवेगानां प्रशिक्षणम् ।

षोडशोऽध्यायः

सहजाः क्रियाः पृ० १४४–१५२

प्रतिक्रियाः—प्रतिक्रियाभेदाः—स्वतश्चालिताः क्रियाः—प्रनियमिताः क्रियाः—प्रतिक्षेपक्रियाः—प्रतिक्षेपचापः—प्रतिक्षेपक्रियासाधनानि—प्रतिक्षेपगुणाः—नियन्त्रिताः प्रतिक्रियाः— विचारप्रेरिताः क्रियाः—मूलप्रवृत्तिः—सहजक्रिययोरन्तरम्—मूलप्रवृत्तीनां प्रकाशनम्—मूलप्रवृत्तीनां प्रकाराः—मूलप्रवृत्तीनामुद्भवः— क्रीडा ।

सप्तदशोऽध्यायः

ऐच्छिकानि कर्माणि पृ० १५३–१५७

इच्छा-क्षुधेच्छयोरन्तरम् —इच्छावेगयोरन्तरम्—इच्छासङ्घर्षः — विनिश्चयः—सङ्कल्पः—शारीरिकी क्रिया—ऐच्छिककर्मगुणाः—ध्यानम्—प्रेरकम्—आत्मसंयमः ।

अष्टादशोऽध्यायः

अर्जितः स्वभावः पृ० १५८–१६०

स्वभावस्वरूपम्—स्वभाववैशिष्ट्यम्—स्वभावविषयः — स्वभावपरिवर्तनम्—चरित्रम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एकोनविंशोऽध्यायः

बुद्धिपरीक्षा पृ० १६१–१६८

बुद्धिपरीक्षोपयोगः—उपलब्धिपरीक्षा—बुद्धिस्तस्या वितरणञ्च—बुद्धिपरीक्षा—विनेपरीक्षापद्धतिः—बुद्धिलब्धिः—टरमेनपरीक्षापद्धतिः—क्रियात्मिका परीक्षा—मनुष्यचित्रणपरीक्षा—सामूहिकीबुद्धिपरीक्षा—जनसंख्यासु बुद्धिवितरणम् ।

विंशोऽध्यायः

निद्रा स्वप्नश्च पृ० १६९–१७५

निद्रानाम किम् ? निद्राया उपयोगः—निद्राप्रकाराः—सम्मोहनम्—स्वप्नः—स्वप्नकारणानि—दिवास्वप्नाः—रात्रिस्वप्नाः—स्वप्नानां स्वरूपम्—स्वप्नानां व्याख्या ।

एकविंशोऽध्यायः

व्यक्तित्वम् पृ० १७६–१८६

परिभाषा—व्यक्तित्वस्य तत्त्वानि—शरीररचना—बुद्धिः—स्वभावः—संवेगशीलता च—सङ्कल्पश्चरित्रञ्च—सामाजिकता—शक्तिर्दृढता वा—जुङ्गमहोदयस्य वर्गीकरणम्—बहिर्मुखी प्रवृत्तिः—अन्तर्मुखी प्रवृत्तिः—व्यक्तित्वपरीक्षा-प्रश्नावलीपद्धतिः—मूल्याङ्कनम्—व्यवहारपद्धतिर्निस्पादनपद्धतिर्वा—मुक्तसाहचर्यं स्वप्नविश्लेषणञ्च—व्यक्तेरितिहासः—अभिक्षेपविधिः—व्यक्तित्वस्य विकासः ।

द्वाविंशोऽध्यायः

व्यक्तित्वभेदकारणानि पृ० १८७–१९७

शारीरिकानि कारणानि—स्नायुसंस्थानम्—रक्तसञ्चारः—ओषधयः—भोजनम्—रोगाः—अन्तरासर्गिग्रन्थयः—सामाजिकानि कारणानि—आचारानुकृतिः—पारिवारिकः प्रभावः—सामूहिकक्रीडादिप्रभावः—वंशानुक्रमस्य प्रभावः—वंशानुक्रमस्य स्वरूपम्—अर्जितस्वभावगुणानां सन्ततौ संक्रमणम्—वंशानुक्रमविषयकाः प्रयोगाः—कीटाणूनामबाधता—भेदोत्पत्तिः—शुद्धवंशानुक्रमस्य स्थायिता—साम्यभावः—वातावरणम् ।

त्रयोविंशोऽध्यायः

अचेतनं मनः पृ० १९८–२०४

अचेतनस्य मनसोऽन्वेषणम्—मनोविभागाः—अचेतनस्य मनसो वासनाः—गूढार्थचेष्टाः—अचेतनमनोरोगाः—द्वैधं व्यक्तित्वम्—बहुव्यक्तित्वम्—उन्मादः—अकारणं भयम्—अचेतना इच्छाः—मनश्चिकित्सा ।

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्विंशोऽध्यायः

अचेतनमनोविषयकं भारतीयं मतम् पृ० २०५–२०८

अचेतनमनस आविष्कारः—नियन्त्रकम्—उदात्तीकरणम्—उपभोगः—चिकित्स्य-चिकित्सकसम्बन्धः—सम्मोहनविधिः—स्वप्नविश्लेषणम्—संस्काराः—परिवेशः ।

पञ्चविंशोऽध्यायः

मनोविज्ञानस्येतिहासः पृ० २०९–२१६

मनोविज्ञानस्यारम्भः—ग्रीसदेशीया विचारकाः—षोडशी शताब्दी—साहचर्य-वादः—शक्तिवादः—मानसिकं रसायनम्—रचनावादः—सत्तावादः—पावलोव-प्रयोगाः—व्यवहारवादः—प्रयोजनवादः—सुखवादः—आकृतिवादः—बुद्धिपरीक्षा—अचेतनमनोवादः—साम्प्रतिकी स्थितिः ।

आङ्ग्लसंस्कृतशब्दसूची २१७–२३७

संस्कृताङ्ग्लशब्दसूची २३८–२५८

In Public domain. Digitization Muthulakshmi Research Academy

अभिनव-मनोविज्ञानम्

प्रथमोऽध्यायः

मनोविज्ञानस्य परिभाषा

परिभाषाः

मनसो विज्ञानं मनोविज्ञानं कथ्यते। यस्मिन् शास्त्रे मनसो विचाराणां व्यवहाराणां च विवेचनं भवति तत् 'मनःशास्त्रम्' इति निगद्यते। मानवव्यापाराणां कारणं मन एव। मानसिका विचारा एव क्रियाभिः प्रकाश्यन्ते। मनसि प्रतिक्षणं विचारा इच्छाश्चोत्पद्यन्ते। तेभ्यः क्रियोत्पत्तिर्भवति। एतस्य सर्वस्याध्ययनं मनोविज्ञानस्य लक्ष्यं भवति।

आङ्ग्लभाषायां 'सायकॉलाजी' इति शब्दो मनोविज्ञानपर्यायवाची। ग्रीकभाषायाः 'साइके' 'लोगस्' इत्यनयोः शब्दयोर्योगेन तस्य निष्पत्तिः। तत्र 'साइके' इति शब्दस्यार्थ आत्मा, 'लोगस्' इति शब्दस्य चार्थो विचार इति। प्राचीनकाले 'सायकॉलाजी' इति शब्द आत्मविज्ञानमित्यर्थे प्रयुज्यते स्म पाश्चात्त्येषु देशेषु। आत्मनोऽविज्ञातस्वरूपत्वात्तदध्ययने काठिन्यमनुभूतमभूत्। आत्मविषये किमपि निर्विवादतया वक्तुं न शक्यते। विज्ञानं च विवादविरहितं परीक्षितं सार्वकालिकं सत्यं भवति। अतः परवर्तिभिर्विचारकैरात्मानं परित्यज्य तत्स्थाने आत्मनो व्यक्तगुणस्य चेतनाया अध्ययनं प्रारब्धम्। चेतनायाः स्वरूपस्याप्यस्पष्टतया तस्या निश्चितरूपेण निरूपणाशक्यत्वादौत्तरकालिकैर्मनःशास्त्रिभिश्चेतनस्य मनसो[1] व्यवहाराणामध्ययनमारब्धम्। साम्प्रतिका मनोवैज्ञानिकाश्चेतनमचेतनञ्चेति मनसो भेदद्वयं कुर्वन्ति। अतश्चेतनस्याचेतनस्य च मनसो व्यापाराणां वैज्ञानिकरीत्याध्ययनं मनोविज्ञानविषयान्तर्गतं भवति। मनसो व्यापारा आन्तरिकाः परोक्षा वा भवन्ति, बाह्याः प्रत्यक्षा वाऽपि। परोक्षाणां व्यापाराणामध्ययनमनुभूत्या, प्रत्यक्षाणाञ्च निरीक्षणेन क्रियते। अतो मनोविज्ञानं चेतनस्याचेतनस्य च मनसः प्रत्यक्षाणां परोक्षाणां च व्यवहाराणामध्ययनं निगद्यते।

विज्ञान-शास्त्रयोरन्तरम्

अध्ययनस्य द्वे रीती—शास्त्रीया, वैज्ञानिकी च। तत्र शास्त्रीया रीतिर्वैज्ञानिक्या भिन्ना। शास्त्रीये विधौ प्रतिपादकस्य कश्चिद्विशिष्टः सिद्धान्तो भवति। तस्य प्रतिपादनं सोऽनेकाभिर्युक्तिभिः करोति, परमतञ्च खण्डयति। परमतखण्डनेन स्वमतं दृढं भवति। वैज्ञानिके विधौ तु सर्वमनुभवाश्रितम्। स्वानुभवो ह्यत्र प्रमाणम्, न त्वाप्तवाक्यम्। स्वानुभवस्याधारश्च प्रत्यक्षज्ञानम्। प्रत्यक्षज्ञानमपि परीक्षणाश्रितम्। नहि परीक्षणैः प्रयोगैर्वा विना वैज्ञानिकं ज्ञानमुपलभ्यते। वैज्ञानिकज्ञानस्य पञ्चाङ्गानि भवन्ति—

---

१. भारतीयास्तु मनोऽचेतनमेव मन्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

(१) सामग्रया[१] एकत्रीकरणम् ।
(२) तस्या वर्गीकरणम्[२] ।
(३) तदाश्रयणेन परिकल्पना[३] ।
(४) निरीक्षणम्[४], परीक्षणम्[५], प्रयोगो वा ।
(५) सिद्धान्तः[६] ।

एवं विज्ञानं कस्यापि विषयस्य सुनिश्चितं तन्त्रबद्धं ज्ञानं कथ्यते । तदर्थं कश्चिद्विशिष्टो विषयो गृह्यते । यथा वनस्पतिविज्ञानं वनस्पतिवृक्षादीन्, प्राणिविज्ञानञ्च प्राणिनो विषयीकरोति; एवमेव मनोविज्ञानस्य विषयो मानवमनःप्रक्रियास्तदनुभवस्तद्व्यवहारश्च । मनोविज्ञानार्थं मानसिकप्रक्रियाणां निरीक्षणम्, तासां परस्परं तुलना, तद्वर्गीकरणम्, यन्त्रसाहाय्येन प्रयोगश्चापेक्ष्यते । वैज्ञानिकः प्रथममेव स्वीकरोति यदस्य जगतो व्याख्या, ज्ञानं च बुद्ध्या शक्यम्; एवमेव मनसोऽपि व्याख्या बुद्ध्या शक्येति मनोवैज्ञानिकानां मूलभूता स्वीकृतिः । अतो मनोविज्ञानं प्राकृतिकं विज्ञानम्, न तु तत्त्वज्ञानस्याङ्गम् ।

पूर्वकाले विद्वांसो मनोविज्ञानमन्येभ्यः प्राकृतिकविज्ञानेभ्यो भिन्नं मन्यन्ते स्म । तेषां मतेनानुभवस्यान्तर्जगत्सम्बद्धत्वात् प्राकृतिकविज्ञानस्य च बाह्यजगदाश्रितत्वान्न मनोविज्ञानं प्राकृतिकविज्ञानसंज्ञां लभते । परमेषां भेदकल्पना न तर्कपुष्टा । अन्तर्दर्शनात्मिका बहिर्दर्शनात्मिका च सामग्री मूलतः एकैव, न तु भिन्ना । उभे च ते लोकस्य निरीक्षणमाश्रयतः । अन्तरं त्वेतदेव यदन्तर्दर्शनात्मिका सामग्री व्यक्तिविशेषनिरीक्षणाधीना भवति ; बहिर्दर्शनात्मिका चानेकजननिरीक्षणाधीना । तामनेके जना निरीक्षितुम्, निरीक्षणजन्यान्निर्णयान् परीक्षितुञ्च शक्नुवन्ति । व्यक्तेः स्वचेष्टानां स्वयं निरीक्षणमन्तर्दर्शनं कथ्यते । जनोऽन्तर्दर्शनेन यज्जानाति तत्सर्वमन्तर्दर्शनात्मिका[७] सामग्रीति[८] निगद्यते ।

मनोविज्ञानस्य प्रयोजनम्

अनवरतं परिवर्तनं विश्वस्य सामान्यः स्वभावः । अस्मिन् परिवर्तने मानवो न केवलमुदासीनो द्रष्टा भवति, अपि तु स स्वयं परिवर्तनं विदधाति । बाह्याः परिस्थितयः प्रतिक्षणं तस्य स्थितिं परिवर्तयितुम्, तस्य शक्तिसन्तुलनं[९] नाशयितुं वा चेष्टन्ते । मानवश्च प्राणपणेन शक्तिसन्तुलनं स्थिरीकर्तुं प्रयतते । शक्तिसन्तुलनस्थापनायै आत्मनो यथास्थानं स्थापनायै वा सोऽनेका व्यक्ता

---

१. Data.
२. Classification.
३. Hypothesis.
४. Observation.
५. Experiment.
६. Law.
७. Introspective.
८. Data.
९. Equilibrium.

In Public domain. Digitization Muthulakshmi Research Academy

अव्यक्ताश्च चेष्टाः करोति। मनोविज्ञाने एतासां चेष्टानामध्ययनं विधीयते ; तच्चातीवोपयोगि। साम्प्रतं पदार्थविज्ञानेनास्माकं ज्ञानं बाह्यवस्तुविषये विवर्धितम्, तथापि मनश्चेष्टास्वभावविषयकं ज्ञानमद्याप्यपूर्णमेव। मनोविज्ञानं मानवप्रकृतिचेष्टादिविषयकज्ञानोपार्जनस्य साधनम्। न च मानसिकक्रियाणां सम्यग्ज्ञानं विना तासु नियन्त्रणं शक्यम्। मनोवेगानां नियन्त्रणाय तेषां गूढानि कारणानि ज्ञातव्यानि। प्रातरुत्थाय भ्रमणार्थं गन्तुं कामयमानोऽपि जनः सूर्योदयानन्तरं यावत् शेते। परनिन्दाविरतिं चेष्टमानोऽप्यवसरे प्राप्ते परनिन्दामाचरति। कष्टपीडिताय किञ्चिद्दातुमिच्छन्नपि न शक्नोति दातुं केनाऽप्यन्तःस्थितेन वार्यमाण इव। क्रोधं जेतुमिच्छन्नपि समय उपस्थिते क्रोधाविष्टो भवति पुरुषः। सर्वस्यास्य कारणमन्तर्मनस्यन्वेष्टव्यम्। तच्च मनोविज्ञानेनैव सम्भवति। मनोविज्ञानेन शिक्षणस्य सरला उपायाः, धारणानियमाः, शिक्षितस्य सम्यगुपयोगः, कल्पनाशक्तिविकासः, अवधानस्य वशीकरणमित्यादि बहु नित्योपयोगि ज्ञायते। तेन जनः स्वचेष्टानां सुनियन्त्रणमात्मशक्तिविकासं च कर्तुं शक्नोति। अनेन जनस्य मनो विकृतिविहीनम्, स्वस्थम्, नीरोगं च भवति। सुघटितं व्यक्तित्वं मनोविज्ञानेनैव शक्यं भवति।

यथा मनोविज्ञानेनात्मविषयकं ज्ञानमुपार्ज्यते, तथैव परविषयकमपि। मानवस्वभावचेष्टाध्ययनमेव मनोविज्ञानस्योद्दिष्टम्। परमनोऽध्ययनेन व्यवहारदोषा दूरीभवन्ति। परेषां व्यक्ता अव्यक्ताश्च चेष्टा अवगता भवन्ति। 'कस्यां स्थितौ को मनुष्यः कथं व्यवहरिष्यति?, कथं च तेन व्यवहर्तव्यम्?' इत्यादि सर्वं मनोविज्ञानेनावगम्यते। तदवगमेन जनाः कुशलाः, राजनीतिज्ञाः, समाजसेविनश्च भवन्ति।

शिक्षाशास्त्रिणां तु मनोविज्ञानमतीवोपयोगि। न ते मनोविज्ञानं विना स्वकार्यं कुशलतया सम्पादयितुं शक्नुवन्ति। एवमेव पितृभ्यां मनोविज्ञानस्याध्ययनं बालानां सम्यक् परिपालनायावश्यकम्। बालमनोविज्ञानस्य, शिक्षामनोविज्ञानस्य च विषये बहूनि नवानि तथ्यानि मनोविद्भिरवगतानि; यैः प्राक्तना अनेके विचाराः खण्डितप्राया एव। अशिक्षिते परिवारे बालानां पालनं तथा भवति येन तेषां व्यक्तित्वं विशृङ्खलं जायते। बालानां प्रकृतिमविज्ञाय नहि कोऽपि तेषां विकासं निर्दोषं कर्तुं प्रभवति। यश्च शिक्षको बालस्वभावज्ञो न भवति, तेषां रुचिं वा पूर्णतया न विजानाति; नहि स स्वकीयं पाठं रुचिकरं विधातुं क्षमते। बालमनोविज्ञाः शिक्षकाः स्वल्पेन प्रयत्नेन यच्छिक्षयन्ति, न तस्य दशगुणेनापि प्रयत्नेन बालमनोऽनभिज्ञास्तच्छिक्षयितुं प्रभवन्ति। बालानां रुचयो बुद्धयश्च भिन्ना भवन्ति। नहि सर्वेभ्य एक एव विषयः समानं रोचते। कश्चिद् गणिते सफलो भवति, कश्चिद्यन्त्रविद्यायाम्। बुद्धिरपि नहि सर्वेषां समा भवति। कश्चिदेकेन दिनेन यत्कण्ठस्थीकरोति तदेवान्यस्त्रिभिर्दिनैः ; केचिदुद्दण्डा भवन्ति, केचिदन्यमनस्काः ; केचित्कोमलहृदयाः, केचिच्च कठोरप्रकृतयः ; केचित्परपीडनेन रमन्ते, केचित्परोपकारेण। बालानां प्रकृतिं बुद्धिञ्च सम्यक् परिज्ञाय यः शिक्षयति, स एव सफलो भवति शिक्षकः।

-मनोविज्ञानं स्वास्थ्यलाभसहायकम्। 'कैः संवेगैः स्वास्थ्यहानिर्भवति, कैर्वा स्वास्थ्यलाभः?' इत्येतदपि मनोविज्ञानं प्रकटयति। 'अनिद्रोन्मादात्मघातादिदोषाः कथं जायन्ते? कथं वा तेषां निराकरणं संभवति? मनोरोगाणां किं कारणम्? कश्च तेषां प्रभावः शरीरे भवति?' इति ज्ञानायाध्येतव्यं मनोविज्ञानम्।

राजनीतिज्ञाः कलाकाराश्च मनोविज्ञानेनैव स्वक्रियासु निपुणा जायन्ते। एकाकी मनुष्य एकान्ते कथं व्यवहरति, जनसम्मर्दे च कीदृशम्, का कलाकृतिः, किं काव्यम्, कीदृशं वा भाषणं

In Public domain. Digitization Muthulakshmi Research Academy

कस्य मनसि कीदृशं प्रभावमुत्पादयतीत्यवबुध्य कूटनीतिज्ञा राजनीतिकार्येषु साफल्यम्, कलाकाराश्च स्वकृतिभ्यः समादरं लभन्ते लोके ।

एवं दृश्यते यन्नास्माकं वैयक्तिकस्य सामाजिकस्य वा जीवनस्य किमप्यङ्गं मनोविज्ञानेनास्पृष्टम् । अतोऽस्याध्ययनं परमाय कल्याणाय भवतीति नात्र शङ्कालेशोऽपि ।

मनोविज्ञानस्य विधयः

मनोविज्ञानस्य त्रयो विधयः सामान्यतया विद्वद्भिर्वर्ण्यन्ते । ते च—अन्तर्दर्शनम्[१], निरीक्षणम्[२], प्रयोगश्चेति[३] । इमे तावन्मुख्याः ।

तुलना[४]-विकास[५]-विकृतमनोविज्ञान[६]-जीवनवृत्त[७]-सङ्घटनात्मकाः केचिद् गौणा अपि विधयः कदाचिदाश्रीयन्ते ।

अन्तर्दर्शनम्

तत्रान्तर्दर्शनं मनोविज्ञानस्य प्रथमो विधिः । तच्चान्तर्मुखं प्रत्यक्षीकरणमेव । मनसि जायमानानामनेकासां क्रियाणामध्ययनमन्तर्दर्शनेन क्रियते । मनोविज्ञानस्य सामग्री[८] मनस्येवोपलभ्या भवति, तदधिगमाय चान्तरेवान्विष्यते । स्वकीयञ्च मनः सर्वैरपि द्रष्टुं शक्यम् । स्वमनसि जायमानानां क्रियाणामध्ययनेन परमनःसु जायमानानां क्रियाणामध्ययनमपि सुकरं भवति । अन्तर्दर्शनमेव प्रत्यक्षं निरीक्षणम्, अन्यत्सर्वं निरीक्षणं तु परोक्षमेव । जीवविज्ञानवेत्तुर्जीवव्यवहारनिरीक्षणं यथा महत्त्वपूर्णम्, न तथा प्रत्यक्षनिरीक्षणं मनोवैज्ञानिकस्य । जीववैज्ञानिकस्योद्देश्यं जीवानां व्यवहारवर्णनम्, न तु मनोवैज्ञानिकस्य तथा । स तु बाह्यव्यवहारान्निरीक्ष्य तदाश्रयेण मानसिकीः क्रिया अनुमिनोति । अतो व्यवहारनिरीक्षणं मनोविज्ञानाध्ययनस्य परोक्षं साधनमेव । अन्तर्दर्शनं मनोविज्ञानस्यापूर्वो विधिरन्यविज्ञानेष्वप्राप्यः । मानसिकीनां प्रक्रियाणां सर्वदैव द्रष्टृसहचरितत्वेनान्तर्दर्शनस्य सुलभत्वमपि । निरीक्षणस्य प्रयोगस्य चाधारोऽन्तर्दर्शनम् ।

परमन्तर्दर्शने काठिन्यमपि भवति । मानसिकप्रक्रियाणां जडपदार्थापेक्षयाऽस्पष्टत्वात् तत्रावधानं दुष्करम् । जडवस्तुष्ववधानं तु मानसिकप्रक्रियापेक्षया सरलम् । अतस्तत्र ध्यानैकाग्र्यस्या[९] अधिकावश्यकता भवति । इदं काठिन्यमभ्यासेन दूरीभवति । अन्तर्दर्शनाय प्रत्याहारशक्ते[१०]रावश्यकता भवति । प्रत्याहारशक्तिश्चाभ्यासेनार्ज्यते ।

---

१. Introspection.
२. Observation.
३. Experiment.
४. Comparative method.
५. Genetic method.
६. Pathalogical method.
७. Case History method.
८. Data.
९. Concentration.
१०. Abstraction.

In Public domain. Digitization Muthulakshmi Research Academy

मानसिकप्रक्रियाः प्रकृतिचञ्चला भवन्ति । नहि तासामान्तरिकं प्रत्यक्षीकरणं सम्भवति । यदा अन्तर्दर्शनमारभ्यते तदा संवेगा विलुप्ता भवन्ति। विचारे प्रारब्धे भयक्रोधादयः संवेगा अदृश्या जायन्ते । नहि विद्यमानेषु तेषु तद्विषयकविचारस्य सम्भवः । लुप्तेषु च तेषु तद्विचारे आरब्धे नहि तेषां यथार्थज्ञानं सम्भवति । विचाराः, संवेगाः, प्रवृत्तयः, इच्छाश्च प्रतिक्षणं परिवर्तमाना नहि जडपदार्थवदध्ययनाय स्थिरीभवितुं शक्नुवन्ति । केनापि कारणेन कश्चित्पुरुषोऽतिक्रुद्धो जायते । यदि स तस्मिन् क्षणे मानसिकीं प्रक्रियामध्येतुं प्रयतते, तदा क्रोधो विलुप्तो भवति; यतो नहि क्रोधावेशे विचारः सम्भवति । यदि सोऽतीते क्रोधावेगे तस्या मानसिकप्रक्रियायाः प्रत्याह्वानाय चेष्टते, तदा परिवर्तितायां परिस्थितौ, परिवर्तिते चानुभवस्वरूपे स यथावत् प्रत्याह्वानेऽसमर्थो भवति । अतः स क्रोधस्यान्तरिके प्रत्यक्षीकरणेऽसफलो जायते । न च मन एककाल एव क्रोधे विचारे चेति क्रियाद्वये समर्थम् । स्मृत्याऽस्मिन् काठिन्ये विजयः सम्भवतीत्येके । यदा ध्यानेन काचिन्मानसिकी क्रिया लुप्ता भवेत्तदा स्मृतेः सहायता ग्राह्या । अन्तर्दर्शनेऽसफले सति प्रतीपदर्शनं[1] शक्यम् । मनसोऽतिजागरूकतया चञ्चलानामपि मानसिकक्रियाणामन्तर्दर्शनं सुकरम् । विशेषज्ञानां सहयोगोऽप्यत्र सहायको भवति । कतिपये मनोवैज्ञानिकाः स्वयमात्मीयानां चञ्चलमनोवृत्तीनां विवेचनं कृत्वा स्वानुभवानां परस्परं तुलनां कर्तुं शक्नुवन्ति ।

केचिच्चैवं वदन्ति यदन्येषु विज्ञानेषु बहवो वैज्ञानिका एकस्यैव वस्तुनो निरीक्षणं कर्तुं शक्नुवन्ति, न तु मनोविज्ञाने तत् सम्भवति । नहि द्वौ मनोवैज्ञानिकावेकस्या एव मनोवृत्तेर्निरीक्षणे समर्थौ । तौ स्वमनसोः समानस्य भयसंवेगस्य निरीक्षणं कुरुतः, स्वानुभवानां परस्परं तुलनाञ्च । परं नैकस्या भयमनोवृत्तेरनुभवमनेकानि मनांसि समकाल एव कुर्वन्ति । समानानां मनोवृत्तीनामनुभवस्तु शक्यः, परमनेकैर्मनोभिरेकस्या मनोवृत्तेरनुभवोऽशक्यः। सत्यमेतत् , तथापि विशेषज्ञानां सहायतया बाधेयं निराक्रियते । अनेके विशेषज्ञाः कस्याश्चिद्विशिष्टाया मनोवृत्तेरन्तर्दर्शनं परस्परं सहयोगपूर्वकं कर्तुं शक्नुवन्ति, मिलित्वा चान्तर्दर्शनपरिणामपरीक्षाम् ।

अन्तर्दर्शने मनो द्विधा विभक्तं भवति—द्रष्टृ, दृश्यं चेति । मन एव निरीक्षकम्, तदेव निरीक्ष्यञ्चेति । नैतत् सङ्गच्छते इति केचित् । कथं यदेव द्रष्टृ, तदेव दृश्यं भवितुं शक्नोति ? नहि कश्चिदेक एव जनः समकाल एव ज्ञाता ज्ञेयश्च भवितुं शक्नोति । इदं दौष्कर्यमवधार्य कॉम्टेप्रमुखा विद्वांसोऽन्तर्दर्शनमशक्यमेव मन्यन्ते । परमयं तर्कोऽनुभवेन विरुद्धः । सिद्धान्तरूपेणैकस्यैव जनस्यैकस्मिन् काले ज्ञातृत्वं ज्ञेयत्वञ्च सम्भवती प्रतीयेयाताम् ; परमनुभवेन यत्सत्यमवगम्यते न तत्तर्केण मिथ्या प्रतिपादयितुं शक्यते । हर्षशोकविषादादिमनोवृत्तीनामन्तर्दर्शनञ्चास्माकमनुभवः । हर्षशोकादीनां प्रभाव इन्द्रियेषु शरीरे च जायते । आत्मा च मनसाऽनुभवति, जानाति चाहमनुभवकर्तेति । अत एवाहमानन्दी चेतनावान् सुखी दुःखी वेति कथनं सङ्गच्छते । स्वचेतना हि मानवमनसो विशेषः । पुनश्च नान्तर्दर्शने स एव ज्ञाता च ज्ञेयश्च भवति । मनो ज्ञातृ, तद्वृत्तयश्च ज्ञेयाः । एवं ज्ञातृज्ञेयभेदोऽपि भवति । बाह्यवस्तुवन्मनो ह्यात्मवृत्तीरपि निरीक्षितुं क्षमते । अभ्यासेन मानसिकप्रक्रियाया अन्तर्दर्शनस्य सहभावः सम्भवति ।

ननु यस्मिन् काले बाह्यं वस्तु निरीक्ष्यते, तस्मिन् काले निरीक्षणसम्बन्धिमानसिकप्रक्रियाया

१. Retrospection.

In Public domain. Digitization Muthulakshmi Research Academy

अन्तर्दर्शनमशक्यम्, अन्तर्दर्शनकाले बाह्यवस्तुनो ध्यानस्यान्तरपसृतत्वादेकस्मिन् काले निरीक्षणान्तर्दर्शनरूपक्रियाद्वयस्यासम्भवाच्च। नहि बाह्यवस्तुनि प्रत्यक्षीकरणक्रियायाञ्च सदैवावधानं शक्यम्, एकस्मिन् काले बाह्यवस्तुनि मनोवृत्तौ चावधानस्य शक्यत्वात्, प्रथमं बाह्यवस्तुनस्ततोऽनन्तरमेव मनोवृत्तेर्निरीक्षणस्य सम्भवात्। अभ्यासेन मनोऽनुशासनेन चान्तर्दर्शनविषयिकाः सर्वा बाधा निराक्रियन्ते।

परमनोज्ञानमात्ममनोज्ञानपूर्वकमेव सुकरं भवति। मनुष्यः स्वमन एव सम्यग् ज्ञातुं प्रभवति। अन्तर्दर्शनत्रुटयश्च परानुभवसाहाय्येन दूरीकर्तुं शक्यन्ते। तेन "अन्तर्दर्शनं वैयक्तिकम्, तेनकस्यैव मनसो ज्ञानं प्राप्यते। नैकस्य मनसो ज्ञानेन सर्वमनोज्ञानं भवति। न च मनोविज्ञानविषयका नियमास्तेन स्थिरीकर्तुं शक्यन्ते" इत्यादयः शङ्का अपि निरस्ताः। सर्वोऽपि स्वानुभवेन सहान्येषामनुभवानां तुलनां करोति। यच्च सर्वेषां सामान्यं तदेव तथ्यमिति कृत्वा गृह्यते।

निरीक्षणम्

मनोविज्ञानस्य द्वितीयो विधिर्निरीक्षणमिति। निरीक्षणं सर्वेष्वपि विज्ञानेषु समानम्। आकारेणेङ्गितैश्चेष्टाभिर्भाषणेन च प्राणिनां मनोवृत्तयोऽवबुध्यन्ते। कस्यचिद्रक्तं मुखम्, वक्रे भ्रुवौ, बद्धं मुष्टिम्, रक्ते नेत्रे, चर्वितौ ओष्ठौ, भूमौ बलात्पादक्षेपं च निशम्य ज्ञायते–'स क्रुद्धः' इति। एवमेव पीतं मुखम्, सङ्कुचितं शरीरम्, कातरे अक्षिणी, द्रुततरां नाडीगतिम्, पलायनमुद्राञ्चावलोक्य प्रतीयते 'अयं भीतः'-इति। चेष्टानिरीक्षणेन मनःस्थितिर्ज्ञाता भवति। परमियं निरीक्षणजन्यानुमानप्रक्रिया स्वानुभवमूलैव भवति। 'यदाऽहं क्रुद्ध आसम्, तदाहमप्येवंविधा एव चेष्टा अकरवम्' इति स्मृतिर्गतानुभवस्यात्र सहायिका भवत्यनुमाने। अनुमानं च प्रत्यक्षमूलकम्; परमनःप्रक्रियाणां प्रत्यक्षासम्भवात्तदभिव्यञ्जकव्यापारचेष्टाजन्यानुमानेनैव तज्ज्ञानस्य सम्भवात्। एवं च निरीक्षणस्य त्रीण्यङ्गानि। तत्र प्रथमं तावद्व्यवहारदर्शनम्, द्वितीयं व्यवहारेण मनोवृत्तेरनुमानम्, तृतीयञ्च स्वानुभवाश्रयेणान्येषां व्यवहारस्यार्थग्रहणम्। नहि स्वानुभवं विना परव्यापाराणामर्थग्रहणं सम्भवति। अतो निरीक्षणमन्तर्दर्शनपूर्वकमेवोपादेयं भवति।

निरीक्षणे केचिद्दोषा अपि दृश्यन्ते। तत्र प्रथमः परानुभवानां स्वानुभवरूपेणार्थग्रहणम्। प्रायो जनः परव्यापारचेष्टा निरीक्ष्य ताभिः परमनस्यपि तथाविधा एव विचारानुभूतिप्रवृत्तीरनुमिनोति, यास्तस्य स्वकीये मनसि तस्यां परिस्थितौ भवितुं शक्नुवन्ति। अत एव पम्पासरसि मन्दं मन्दं सरन्तं बकं वीक्ष्य रामेणोक्तम् —

पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः।
मन्दं मन्दं पदं धत्ते जीवानां वधशङ्कया॥ इति।

बालमनोविज्ञाने सर्वाधिकं काठिन्यं त्विदमेव भवति यद् बालचेष्टा निरूप्यापि नहि मनोवैज्ञानिको बाल इवानुभवितुं पारयति, न वा बालको मनोविदिव स्वव्यापारविश्लेषणे समर्थो भवति। अतो मनोवित् स्वबाल्यावस्थां स्मारं स्मारमेव तदाश्रयेण बालचेष्टानामर्थं गृह्णाति। यत्र निरीक्षकनिरीक्ष्ययोर्मनसोरन्तरमधिकं भवति, तत्र वैषम्याधिक्येन मनोऽध्ययने काठिन्यमप्यधिकं भवति। अत एव बालमनस इव असंस्कृतस्य, असाधारणस्य वा जनस्य पशोश्च मनसोऽध्ययनं कष्टकरं भवति। अस्य दोषस्य निरासोऽनुमानेन, स्मृत्या, कल्पनया च भवति। पशुपक्ष्यादिक्षुद्र-

In Public domain. Digitization Muthulakshmi Research Academy

चेतनावतां चेष्टा नैसर्गिकप्रवृत्त्याश्रयेण, बालानां चाचेतनानुकरणेन च यथा व्याख्यातुं शक्यन्ते, नहि तथा बुद्धिविवेकादिना।

परचेष्टानामर्थग्रहणे पूर्वग्रहः[१], पक्षपातश्च[२] बाधको भवति। शत्रुं स्वाभिमुखमागच्छन्तं वीक्ष्य कलहायायमागच्छतीति, मित्रं प्रहरणायायान्तं समीक्ष्यापि शुभं वृत्तमयमानयतीति जना मन्यन्ते। स्वकीयानां बालानां दुष्टा अपि चेष्टा मनोहारिण्यो भवन्ति। ये च नारीनिन्दकास्ते राष्ट्रसेवाप्रवृत्तानामधीतवतीनां वा स्त्रीणामाचरणमपि सन्देहेन पश्यन्ति। अयं दोषो निष्पक्षाभिवृत्त्यैव दूरीकर्तुं शक्यते। वैज्ञानिकेन तु सर्वदा पूर्वग्रह-पूर्वमत[३]विमुक्तेनैव भाव्यम्। तेन निरीक्षणकाले आत्मा तस्यां परिस्थितौ स्थाप्यः, तत्प्रतिक्रियाश्चाभिलेख्याः।

अनेके जनाः सकपटव्यवहारैस्तथात्मानं निगूहयन्ति यथा तेषां शुद्धं स्वरूपं निरीक्षणेन नावगम्यते। केषाञ्चिदवलितानामपि बाह्यमाचरणमतिविनम्रं भवति, साधुचरितानाञ्चावलिप्तवत्। केचिदतिक्रूरा दयालव इवाचरन्ति, कृपणाश्चोदारा इव। एवं स्थितौ निरीक्षणेन भ्रामकोऽपि परिणामः सम्भवति। तन्निराकरणार्थं सावहिततया परिदर्शनं[४] सर्वतोमुखं निरीक्षणं चावश्यकं भवति।

प्रयोगः[५]

तृतीयश्च विधिः प्रयोगः। भौतिके विज्ञाने प्रयोगो हि मूलाधारः। तेनैव हि परिकल्पनायाः याथार्थ्यं परीक्ष्यते। भौतिकविज्ञानस्य शिक्षका बालानां शिक्षणकाले प्रयोगैर्नियमानां निर्दोषत्वं साधयन्ति। प्रयोगा यथा भौतिकविज्ञानस्याध्ययने क्रियन्ते तथैव मनोविज्ञानेऽपि। तथापि मनोविज्ञाने प्रयोगाणां क्षेत्रं न तथा विस्तृतम्। नहि क्षीबत्वावस्थायाः परीक्षायै कश्चित्क्षीबो विधातुं शक्यते। न वा शरीरमनःसम्बन्धस्थापनायै केचित्तथाविधाः प्रयोगाः कर्तुं शक्यन्ते, ये पीडाकराः स्युः। भौतिकविज्ञाने नैतादृशी बाधा; यतस्तत्र जडवस्तुषु प्रयोगाः क्रियन्ते। मनोविज्ञानाय प्राणिषु, विशेषतो मनुष्येषु न तथाविधाः प्रयोगा शक्याः, यैस्तेषां कापि मानसिकी कायिकी वा क्षतिः स्यात्। अतो मनोविज्ञाने प्रयोगाणां क्षेत्रं परिमितमेव भवति।

प्रयोगो नाम पूर्वतो निर्धारितासु परिस्थितिषु निरीक्षणम्। तदर्थमप्रासङ्गिक्यः[६] परिस्थितीरपसार्य प्रासङ्गिक्यः परिस्थितयो गृह्यन्ते। परीक्षात्मिकासु परिस्थितिषु[७] परमनोवृत्तीनां निरीक्षणं प्रयोगः कथ्यते। परीक्षकः परिस्थितीर्नियम्य तन्मध्ये मानसिकक्रियाणां निरीक्षणं करोति। तदर्थं स एकां परिवर्तयन्नन्याश्च स्थिरीकुर्वन् परिवर्तनपरिणाममभिलिखति। या परिस्थितिः

---

१. Prejudice.
२. Bias.
३. Pre-conception.
४. Circumspection.
५. Experiment.
६. Irrelevent.
७. Test conditions.

In Public domain. Digitization Muthulakshmi Research Academy

परिवर्त्यते सा स्वतन्त्रपरिवर्त्येति[१] कथ्यते, या च स्थिरीभवति सा चाश्रितपरिवर्त्येति[२]। आश्रित-परिवर्त्ये जायमानं परिवर्तनं स्वतन्त्रपरिवर्त्यकारणकं भवति।

मनोवैज्ञानिके प्रयोगे एकः प्रयोक्ताऽन्यश्च विषयो[३] भवति। विषयश्च स यमाश्रित्य प्रयोगः क्रियते। प्रयोक्ता स यः परीक्षणं करोति। प्रयोक्ता परिस्थितीर्निर्धारयति, तासु च विषयस्य प्रतिक्रियाणां निरीक्षणं करोति। स काञ्चिदुत्तेजनामुपस्थापयति या विषये प्रतिक्रियामुत्पादयति। विषयः प्रतिक्रियाया अन्तर्दर्शनं करोति। प्रतिक्रियाञ्च व्यवहारेण प्रकाशयति। प्रयोक्ता प्रतिक्रिया-रूपं विषयव्यवहारं निरीक्षते। यदा प्रयोक्ता बाह्यव्यवहारान् निरीक्षते, विषयः प्रतिक्रियारूपाणां स्वमनोवृत्तीनामन्तर्मुखं निरीक्षणं विधत्ते। एवं प्रयोगेऽन्तर्दर्शनस्य निरीक्षणस्य च योगो भवति। साम्प्रतं मनोविज्ञानस्यैका शाखा प्रयोगात्मकमनोविज्ञानाख्याऽपि प्रवर्तिता आस्ते। प्रयोगै-र्मानसिकप्रतिक्रियायाः शारीरिकप्रतिक्रियया सह सम्बन्धोऽपि ज्ञायते। क्रोधाभिधानस्य संवेगस्य प्रभावः शरीरे किंविधो भवति? कियान् वा? इत्यपि प्रयोगैर्निर्धारितं भवति। प्रयोगैर्बुद्धिपरीक्षाऽपि क्रियते, तस्याः परिमाणञ्चावगम्यते। निरीक्षणापेक्षया प्रयोगाणां क्षेत्रं व्यापकम्। प्रयोगा यथेच्छ-मनेकेषु प्राणिषु कर्तुं शक्यन्ते। विविधासु च परिस्थितिषु मनोवृत्तीनामध्ययनमनेन सम्भवति। नात्र स्मृतिदोषेणापि कापि हानिः; यतः प्रयोगफलं तत्काल एवोल्लिख्यते। प्रयोगैरेव मनोविज्ञानं यथार्थविज्ञानश्रेणौ प्रतिष्ठाप्यते।

परं प्रयोगविधावपि किञ्चित् काठिन्यं त्वस्त्येव। नहि स्थितिषु प्रयोक्तुर्नियन्त्रणं भवति मनोविज्ञाने। पदार्थविज्ञाने तत्सम्भवत्येव। नहि मनोविज्ञानप्रयोगे स्वतन्त्रपरिवर्त्यं यथाकामं परिवर्तयितुं शक्यम्। नहि विषये क्रोधस्य मात्रा निम्नतमात् स्थानादारभ्याधिकतमं स्थानं यावदुत्पादयितुं शक्या, येन क्रोधस्य परिमाणात्मकमध्ययनं सम्भवेत्। काश्चिद् मानसिकप्रक्रिया अक्षुब्धमनःस्थितावेवाध्ययनविषयीभवन्ति। विचारसाहचर्यविषयकाः[४] प्रयोगाः संवेगहीना-वस्थायामेव सम्भवन्ति। यदा च विषयो विजानाति यत्तस्य मानसिकप्रक्रियाणामध्ययनं क्रियते तदा तस्याचरणं कृत्रिमं जायते। बालानां मानसिकप्रक्रियाया अध्ययने विशेषत एवं भवति। कृत्रिममनःस्थितौ च कृताः प्रयोगा न यथेष्टं परिणामं जनयन्ति। अतो 'विषय'व्यवहार-निरीक्षणे प्रयोक्त्राऽतिसावधानेन परिदर्शनशीलेन च भाव्यम्।

तुलनात्मको विधिः[५]

मानवमनसोऽनेकाः प्रवृत्तयः पशुप्रवृत्तीनामध्ययनेन ज्ञायन्ते। अध्ययनस्यायं विधिस्तुल-नात्मकः कथ्यते। यतोऽस्माकं सहजक्रिया मूलप्रवृत्तयश्च पशूनां सहजक्रियाभ्यो मूलप्रवृत्तिभ्यो न भिन्नाः, अतस्तासां ज्ञानाय पशुस्वभावस्य ज्ञानमावश्यकम्। तुलनात्मकेनैव विधिना स्नायुतन्त्रस्य बुद्धेश्च विभिन्नमात्राणां तुलना क्रियते, मस्तिष्कभारस्य बुद्ध्या सह सम्बन्धोऽवगम्यते।

---

१. Independent variable.
२. Dependent variable.
३. Subject.
४. Association of Ideas.
५. Comparative Method.

In Public domain. Digitization Muthulakshmi Research Academy

विकासात्मको विधिः[1]

अनेन विधिना व्यक्तौ जातौ वा मनसो बुद्धेर्विकासस्य च क्रमोऽन्विष्यते। मनुष्ये च शैशवात् प्रौढावस्थां यावन्मनोविकासस्य क्रमो ज्ञायते। अनेनैव विशिष्टाया मनोवृत्तेर्मनः-कौशलस्य च ज्ञानं भवति। परिवेशस्याश्रयेण गुप्तानां शक्तीनामभिव्यक्तिः 'मानसिको विकासः' इत्युच्यते। परिवेशो मनसि परिवर्तनं जनयति, मनश्च परिवेशे। मनोविकासो वंशानुक्रमेण परिवेशेन च जायते।

विकृतमनोविज्ञानविधिः[2]

अयं मनोविश्लेषणविधिरपि कथ्यते। अस्य च प्रयोगो मनसोऽन्तःपटलस्याध्ययनाय भवति। अनेन मानवस्यादृश्यं मनो ज्ञायते। तेन च मनोरोगाणां ज्ञानं भवति, तेषां निराकरणं च सम्भवति। आवेशः, मिथ्याविश्वासः, सम्मोहनम्, द्विधा व्यक्तित्वम्, बहुव्यक्तित्वमित्यादि तस्य विषयो भवति।

इतिवृत्तात्मको विधिः[3]

येषां व्यवहारोऽसाधारणो भवति तेषामध्ययनायायं विधिः प्रयुज्यते। येषां विकासे मानसिक्यो बाधा भवन्ति, येषां व्यवहारः सामाजिकदृष्ट्या वाऽनुचितो भवति, तेषां जीवनेति-वृत्तस्य पुनर्निर्माणं क्रियते। तस्य भौतिकानि, मनोवैज्ञानिकानि, सामाजिकानि च कारणान्य-न्विष्यन्ते। अनेनैव विधिना समस्यारूपाणां बालकानामपराधवृत्तेः कारणान्यवगम्यन्ते॥

---

१. Genetic Method.
२. Pathalogical Method.
३. Case History Method.

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयोऽध्यायः

मनोविज्ञानस्य शाखाः

आधुनिके काले मनोविज्ञानविषयोऽतिव्यापको विस्तृतश्च जातः। पाश्चात्यदेशेषु तद्विषयकं बहु अन्वेषणं कृतं विद्वद्भिः। तत्परिणामस्वरूपास्तस्य बहवो विभागा जाताः। तद्विषये संक्षेपतः किञ्चिदधो लिख्यते।

विश्लेषणात्मकं मनोविज्ञानम्[1]

इदं सामान्यं मनोविज्ञानमपि कथ्यते। तच्च सामान्यानां प्रौढमानवानां मनसोऽध्ययनरूपम्। अस्मिन् विषये जटिलानां मानसिकप्रक्रियाणां सरलरूपेण विश्लेषणं कृत्वा विवेचनं क्रियते। सामान्यमनोरचनायाः, मनोव्यापाराणां च व्याख्याऽस्मिन् विषये क्रियते। तस्या विधयश्चान्तर्दर्शन-निरीक्षण-प्रयोगात्मिकाः पूर्वं वर्णिता एव। इदमेव मूलं मनोविज्ञानम्। अस्मादेवाधोवर्णिताः शाखाः प्रवर्तिताः सन्ति।

विकासात्मकं मनोविज्ञानम्[2]

मनुष्याणामाधुनिकः समाजः कालक्रमेण शनैः शनैर्विकासमाप्नुवन्निमां स्थितिं प्राप्तः। मनोविज्ञानस्य विकासात्मिका शाखा मानवमनसो विकासस्य व्यक्तिनिष्ठानि जातिनिष्ठानि च कारणान्यन्वेषयति। पशुबालकिशोरप्रौढमनोविज्ञानानामत्रैवान्तर्भावो भवति। यथा मानवस्याङ्गानां विकासो जायते, तथैव तस्य मनसोऽपि। मानवजातेरपि विकासस्तेनैव क्रमेण जायते। अनेन मनोविज्ञानेन मनोविकासे कारणभूताः संवेदनाः प्रारम्भिक्यः क्रियाश्च व्याख्यायन्ते।

पशुमनोविज्ञानम्[3]

मानवमनसोऽध्ययने प्रारब्धे सति विद्वद्भिरनुभूतं यदनेके प्रयोगा मनुष्येषु न सम्भवन्ति। तदर्थं तैः पशूनामध्ययनं कृत्वा तन्मनसा मानवमनसस्तुलनां कृत्वा मानवमनोज्ञानसम्पादनस्य यत्नः कृतः। पशुषु कृतैः प्रयोगैर्बहूनि मनोरञ्जकानि तथ्यान्युद्घाटितानि[4]। सहजप्रवृत्तीनां शिक्षणविधीनां चाध्ययने पशुमनोविज्ञानमतीवोपयोगि। पशुमनोवृत्तीनां परस्परं मानवमनोवृत्तिभिश्च तुलनयेदं तुलनात्मकं मनोविज्ञानमपि कथ्यते। 'पशूनां सहजप्रवृत्तयः काः? कीदृश्यो वा? अनुभवेनाभ्यासेन तत्र परिवर्तनं शक्यं किम्? अस्तु पशुष्वन्तर्दृष्टिः! किं ते प्रयत्नच्युतिविधिना शिक्षन्ते?' एतेषां सर्वेषां प्रश्नानामुत्तरं तुलनात्मकं मनोविज्ञानमेव दातुं शक्नोति।

---

१. Analytical Psychology.

२. Genetic Psychology.

३. Animal or comparative Psychology.

४. Contribution.

In Public domain. Digitization Muthulakshmi Research Academy

बालमनोविज्ञानम्[1]

बालानां मनोविकासस्याध्ययनमस्य विषयः। बालानां चलनस्य, भ्रमणस्य, भाषणस्य, अन्येषां व्यवहाराणां च व्याख्यानमिदं करोति। अस्य ज्ञानेन बालानां पालने पोषणे च साहाय्यमवाप्यते। पितॄणामस्य ज्ञानमत्यावश्यकम्। अनेन बालानां संवेदना-प्रत्यक्षीकरण-स्मृति-कल्पनादीनां ज्ञानं लभ्यते। अस्मिन्नेव परिवेशवंशानुक्रमांशदानानुशीलनं क्रियते। 'बालैः किं जन्मतः प्राप्यते? किं वा परिवेशाल्लभ्यते? काश्च तेषां सहजप्रवृत्तयः? कियान् तास्वनुभवेन परिवर्तनं जायते? किंस्वरूपा बुद्धिः? शिक्षणस्य को विधिः? कथं वा बालो शिक्षते?' इत्येतेषां प्रश्नानां विवेचनं बालमनोविज्ञाने भवति। बालमनश्च निरीक्षणेन, प्रयोगेण, स्वतन्त्रसाहचर्येण चाधीयते।

व्यक्तिमनोविज्ञानम्[2]

इदमनेकेषां जनानां मध्ये वैयक्तिकमन्तरं निरूपयति, तेषां निजं वैशिष्ट्यं चान्वेषयति। केचिज्जनाः संवेगप्रधाना भवन्ति, अन्ये विचारप्रधानाः, अपरे च कर्मशीलाः। केषुचिद् दृष्टि-प्रतिमानां[3] प्राचुर्यं भवति, अन्येषु ध्वनिप्रतिमानाम्, इतरेषु च गतिप्रतिमानाम्। केचिदन्तर्मुख-वृत्तयो[4] भवन्ति, केचिच्च बहिर्मुखवृत्तयः[5], अपरे चोभयमुखवृत्तयः। एवं सर्वोऽपि पुरुषोऽन्यस्माद् भिद्यते। यथैव प्रतिजनमन्तरं भवति तथैव प्रतिजात्यपि। सर्वस्या अपि जातेर्जनसमूहस्य च केचिद् विशेषा भवन्ति। भारतीयाः पारसीकेभ्यो न केवलमाकृतौ, स्वभावाचरणादिष्वपि भिन्नाः। व्यक्तिमनोविज्ञानं व्यक्तीनां, जातीनामलौकिकप्रतिभावतां मूढानां स्त्र्यादिलिङ्गानाञ्च मनोवृत्तेः, स्वभावस्य, प्रारूपस्य चाध्ययनाय चेष्टते।

समाजमनोविज्ञानम्[6]

इदं जनसमूहसम्बन्धि। सामाजिकस्य मनसोऽध्ययनमस्य विषयः। यथा समाजे व्यवहरति मनुष्यो न तथैकाकित्वे। 'काश्च मानववृत्तयः समाजस्योपयोगिन्यः? काश्च हानिकराः? कथं वा तासां विकासः? किं वा विविधास्ववस्थासु तासां रूपम्?' इत्येतेषां प्रश्नानां विवेचनं समाजविज्ञान-क्षेत्रान्तर्गतम्। सामुदायिकं मनो वैयक्तिकान्मनसो भिन्नमास्ते। ये नियमाः सामाजिकानां सम्बन्धानां नीतिव्यवहाराणाञ्चानुशासका भवन्ति तेषामन्वेषणं समाजमनोविज्ञानं करोति। निरीक्षणेन विदितमेतद्यद् जनसमुदायः पृथग्जनापेक्षयाऽल्पविचारवान्, चञ्चलः, अतिनिर्देशग्रहणशीलः, अतिसंवेग-शीलः, अनुत्तरदायित्ववाँश्च भवति। समाजमनोविज्ञानमस्य कारणानां नियमानाञ्चानुशीलनं विदधाति। लोकमनोविज्ञानं[7] तु समाजविज्ञानस्यैवाङ्गम्। समाजविज्ञानं सभ्यानां जनानां सामाजिकजीवनस्याध्ययनम्। लोकमनोविज्ञानञ्चाऽसभ्यानामादिकालिकानां जनानां जीवनस्याध्ययनम्।

---

१. Child psychology.
२. Individual Psychology.
३. Visual Images.
४. Introverts.
५. Extroverts.
६. Social Psychology.
७. Folk Psychology.

In Public domain. Digitization Muthulakshmi Research Academy

विकृतमनोविज्ञानम्[1]

असाधारणानां जनानां मनःस्थितेरध्ययनाय मनोविज्ञानस्य प्रवर्तिताऽन्यतमा शाखा विकृतमनोविज्ञानं नाम। केचिज्जना भ्रम-विभ्रम-दिवास्वप्न-स्वप्न-अनिद्रा-सम्मोहन-मूर्छादिवशं गता न सामान्यजनवद् व्यवहरन्ति। तेषां मनोऽवस्थाऽसामान्या रुग्णा च भवति। संवेगाना-मनास्थया बहवो दोषा मनसि जायन्ते। तैर्मनो विकृतभयविश्वासविक्षेपव्यक्तित्ववैविध्यगुप्तं भवति। काश्चिन्मनोविकृतयोऽस्थायिन्यः, काश्चिच्च स्थायिन्यो भवन्ति। विकृतमनोविज्ञानं मनोविकाराणां कारणान्यन्वेषयति, तन्निराकरणोपायाँश्च चिन्तयति। यथा यथा विज्ञानविस्तारो भवति, जीवनसङ्घर्षश्च वर्धते; तथा तथा कामनापूर्त्यवकाशोऽल्पीयान् जायते, ततश्च मनोविकारा उत्पद्यन्ते। वर्तमाने काले पूर्वकालापेक्षया मनोविकारग्रस्तानां सङ्ख्या ज्यायसी दृश्यते। अतः साम्प्रतं विकृतमनोविज्ञानस्यावश्यकतापि पूर्वकालापेक्षयाधिका।

मनोविश्लेषणविज्ञानम्[2]

संश्लेषिकायाः शक्तेर्न्यूनतयोपस्थितेषु परस्परं प्रतिद्वन्द्विषु कार्येषु मनो द्विधा विभक्तं भवति। तेन च मानसिकः समतोलो विनश्यति। चेतनाया मनसो वैकत्वं भग्नं जायते, चेतना च किञ्चिदपि निश्चेतुमसमर्था मिथो द्वयोर्विरोधिनोर्वर्गयोर्विभक्ता सती मनोरोगाणामुन्मादस्य वा पात्रं भवति। अस्य विज्ञानस्य प्रवर्तकः सिगमण्डफ्रायड(Sigmund freud) महोदयः [3]कामवासनाया बाल्यकालिकं दमनमस्य कारणं मन्यते। अतृप्तः कामो निगृहीतः सन्नप्यनष्टो मनसोऽन्तःप्रदेशं प्रविशति। तत्र गूढं तिष्ठन् मनोविकृतिजनकत्वमापद्यते। कश्चिस्त्वस्थापन-प्रवृत्तेः[4] अतृप्तिम्, कश्चित् कामं स्वज्ञापनप्रवृत्तिञ्च, अपरश्च दान्तं भयं मनोविकृतिकारणं मन्यत इत्यन्येदतत्।

शारीरिकं मनोविज्ञानम्[5]

मानसिकी प्रक्रिया शरीरेण तदङ्गैश्च सम्बद्धा भवति। मनसः प्रतिक्रियाः प्रायेण शारीरिकचेष्टाभिः प्रकाश्यन्ते। शरीरस्य प्रभावोऽपि मनसि न नगण्यः। शरीराङ्गविशेषजन्य-व्यापाराणां शारीरिकप्रक्रियाणां वाऽध्ययनं शरीरविज्ञानस्य कार्यम्, मनसो व्यापाराणाञ्चाध्ययनं मनोविज्ञानस्य। शारीरिकं मनोविज्ञानं मानसिकीनां शारीरिकीणाञ्च प्रक्रियाणां परस्परं सम्बन्धं विश्लेषयति। तच्च मनोवृत्तिस्नायुतन्त्रसम्बन्धविषयकं विज्ञानम्। मस्तिष्कव्यापाराणां सुषुम्णया, नाडीभिः, पेशीभिः, ज्ञानेन्द्रियैश्च यः सम्बन्धस्तस्य विचारः शारीरिकेण मनोविज्ञानेन क्रियते। मानसिकप्रक्रियासहचारिणीनां शारीरिकप्रक्रियाणामध्ययनेन केवलानां मनोव्यापाराणां विचारकान्मनोविज्ञानात्, केवलानां शारीरिकप्रक्रियाणां विश्लेषकाच्छारीरविज्ञानात् पृथक् शारीरिकमनोविज्ञानस्य सत्ता।

---

१. Abnormal Psychology.
२. Psycho-Analysis.
३. Libido.
४. Self-assertion.
५. Physiologial Psychology.

In Public domain. Digitization Muthulakshmi Research Academy

प्रयोगात्मकं मनोविज्ञानम्[1]

प्रयोगाणां सहायतया साम्प्रतिका मनःशास्त्रिणः पशुबालकिशोरप्रौढवृद्धादीनां मनोवृत्तेः परीक्षणं तद्विषयकमन्वेषणञ्च कुर्वन्ति। तेन मनोवृत्तीनां भेदास्तेषां कारणानि चावबुध्यन्ते। कियत्या उत्तेजनायाः कियती प्रतिक्रियेत्यपि प्रयोगैर्ज्ञायते। एवं प्रयोगात्मकं मनोविज्ञानं चेतनाया गुणात्मकं परिमाणात्मकं च विश्लेषणं विधत्ते। प्रयोगैर्जनस्य बुद्धियोग्यतामापः, व्यक्तित्वपरीक्षा, शिक्षणविधिज्ञानं च सम्भवति। साम्प्रतं सर्वेषामपि शास्त्राणां प्रवृत्तिः प्रयोगात्मिका आस्ते। नहि प्रयोगैः प्रत्यक्षं प्रतिपादितात् सत्यादृतेऽन्यत् स्वीकर्तुमिच्छन्ति विचारकाः। अतः प्रयोगात्मकस्य मनोविज्ञानस्य क्षेत्रं महत्ता च प्रतिदिनं वर्धमानमास्ते।

मनोभौतिकं विज्ञानम्[2]

'भौतिकोत्तेजनानां तज्जन्यसंवेदनानाञ्च मध्ये कः परिमाणात्मकः सम्बन्धः ?' इत्यस्यानुसन्धानमस्य विज्ञानस्य विषयः। यथा यथोत्तेजना प्रवर्धते तथा तथा संवेदना। एवमुत्तेजनासंवेदनयोः परिमाणात्मकः सम्बन्धः स्थिरो भवति। यथा शारीरिके मनोविज्ञाने मानसिकप्रक्रियाणां शारीरिकप्रक्रियाभिः सम्बन्धोऽनुसन्धीयते, तथैव मानोभौतिके विज्ञाने मानसिकप्रक्रियाणां बाह्यवस्तुभिः। प्रकाशपरिमाणे वर्धमाने यथा प्रकाशसंवेदनोत्तरोत्तरं तीव्रतरा भवति, तथैवान्यत्राप्यनुभूयते।

व्यावहारिकं मनोविज्ञानम्

मनोविज्ञानविषयकैः प्रयोगैरन्यैर्वा विधिभिश्च ये नियमाः स्थिरीकृता आसते, मनोविज्ञैस्तेषामुपयोगो जीवनेऽपि भवति। व्यवहारक्षेत्रानुसारेण व्यावहारिकस्य मनोविज्ञानस्यानेका उपशाखाः साम्प्रतं प्रसिद्धाः। तत्र शिक्षामनोविज्ञानम्, व्यापारमनोविज्ञानम्, औद्योगिकं मनोविज्ञानम्, विधिमनोविज्ञानम्, चिकित्सामनोविज्ञानं च साम्प्रतं शास्त्ररूपतां प्राप्तम्। तत्र शिक्षामनोविज्ञानस्योपयोगो बालानां शक्तेः सम्यग्विकासाय भवति। बालमनोविज्ञानञ्च तस्याधारः। व्यापारमनोविज्ञानं मनोविज्ञानस्य सामान्यानां नियमानामुपयोगं व्यापारकलायां करोति। विधिमनोविज्ञानं च न्यायाधीशानामधिवक्तॄणां साक्षिणाञ्च मनोवृत्तीनामध्ययनं करोति। चिकित्सामनोविज्ञानेन मनोरोगाणां गूढानि कारणान्यन्विष्य सम्मोहननिर्देशविश्रान्त्यादिभिः प्रकारैः रोगा दूरीक्रियन्ते॥

---

१. Experimental Psychology.

२. Psycho-Physics.

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयोऽध्यायः

मनोविज्ञानस्यान्यविज्ञानैः सह सम्बन्धः

विज्ञानविभागाः

आधुनिकैर्विद्वद्भिर्विज्ञानस्य त्रयो विभागाः क्रियन्ते। ते च भौतिकम्[1], जैविकम्[2], मानसिकं चेति। भौतिकविज्ञाने पञ्चभूतानामाकाशादीनां विषये विचारो भवति। तस्य च शाखा भौतिकी, रसायनम्, खगोलविज्ञानादयः। जैविकविज्ञानं जीवनगुणकर्मविषयकम्। तस्मिन् जीवानामुत्पत्तिसत्ताविकासादिविषयकमध्ययनं समाविष्टं भवति। शरीरविज्ञान-प्राणिविज्ञान-वनस्पतिविज्ञानादयो जैविकविज्ञानस्य शाखाः। मानसिकं विज्ञानं मनोधर्माध्ययनसम्बन्धि। मनोविज्ञानं विधायकं[3] विज्ञानम्। तस्य शाखाः तर्क-नीति-सौन्दर्यादिशास्त्राणि। तत्र तर्कशास्त्रमस्माकं विचारान्, नीतिशास्त्रं सङ्कल्पान्, सौन्दर्यशास्त्रञ्चानुभूतिमनुशास्ति। इदं नियामकं विज्ञानमपि कथ्यते। तर्क-नीति-सौन्दर्यशास्त्राणि क्रमेण सत्य-शिव-सुन्दराणां पुरस्कर्तॄणि भवन्ति। इमे विभागा विचाराणां स्पष्टावगमायैव कल्पिताः। सम्बन्धस्तु कस्यापि विभागस्यान्यैर्विभागैर्भवत्येव। एकस्य सम्यगध्ययनायान्येषामपि सामान्यं ज्ञानमपेक्षते। मनोविज्ञानस्यापि सम्बन्धोऽन्यैर्विज्ञानैर्भवत्येव। स च सम्बन्धः 'केन कीदृशः ?' इत्यधो निरूप्यते।

मनोविज्ञान-भूतविज्ञाने

मनोविज्ञानं नहि जगद् बुद्बुदवत् स्वीकरोति। नापि शाङ्करेऽद्वैतवादे तस्य आस्था। मनःप्रक्रिया ज्ञानानुभूतिचेष्टात्मिकाः। तत्र ज्ञानार्थं ज्ञातृज्ञेययोर्द्वैतभाव आवश्यकः। अनुभूतयोऽप्यनुभवितुः सत्ताऽनुभवविषयात् पृथक् स्वीकर्तव्याः। चेष्टार्थं व्यापारार्थं वा कर्तुः कार्यस्य च पृथक्त्वमावश्यकमिति नात्र सन्देहः। ज्ञानसंवेदनाचेष्टानां विषयः कश्चिद्भौतिक एव पदार्थो भवितुमर्हति। मनोविज्ञानस्य मानसिकप्रक्रियाभिः सम्बन्धः प्रत्यक्षः, तद्विषयैश्च परोक्षः। विषयास्तु मानसिकप्रक्रियाणां व्याख्यायां सहायका भवन्ति। मानसिकी प्रक्रिया प्रतिक्रिया च परिवेशजन्या[4] भवति। परिवेशस्तु भौतिक एव। भौतिकं विज्ञानं परिवेशविषयकमन्वेषणम्। परिवेशविषयिण्या जिज्ञासाया एव फलं तत्। तच्च व्यक्तेरनुभवस्य व्याख्यायां सहायकं भवति।

जीवविज्ञानेन सम्बन्धः

मनसः शरीरेणानिवार्यः सम्बन्ध इति सर्वेषां विदितमेव। अतो मानसिकप्रक्रियाणां शारीरिकप्रक्रियाभिरपि सम्बन्धो घनिष्ठः। मानसिक्यः प्रक्रियाः शरीरं प्रभावयन्ति। तासां बाह्यं प्रकाशनमपि शरीरचेष्टारूपेण भवति। परिवेशस्य प्रभावो मनसि ज्ञानेन्द्रियमार्गेण जायते।

---

१. Physical science.

२. Biology.

३. Normative.

४. Environment.

In Public domain. Digitization Muthulakshmi Research Academy

मनश्च पेशीमार्गेण परिवेशं परिवर्तयितुं चेष्टते । ज्ञानेन्द्रियाणि पेश्यश्च शरीरस्याङ्गानि । एवं मानसिकप्रक्रियाणां शरीरेण निकटः सम्बन्धः । केचिद्विद्वांसस्तु मनोविज्ञानमपि जैविकविज्ञानस्याङ्गं मन्यन्ते । वाट्सनप्रमुखाणां व्यवहारवादिनां मतेन मनोविज्ञानं जीवतां प्राणिनां व्यवहारस्य विज्ञानम् । ते मनसस्तत्प्रक्रियाणां च सत्तां न स्वीकुर्वन्ति । तन्मतेन नहि मनोविज्ञानमुत्तेजना-प्रतिक्रिययोर्विज्ञानादन्यत् ।

शरीरविज्ञानेन सम्बन्धः

मानसिकप्रक्रियाः शारीरिकप्रक्रियाभिः, स्नायुतन्त्रप्रक्रियाभिस्तु विशेषतः, सम्बद्धा इति प्रतिपादितमेव । अतो मानसिकप्रक्रियाणां व्याख्यार्थं तदध्ययनमावश्यकम् । नहि मानसिकप्रक्रियाऽसम्बद्धाभिः शारीरिकप्रक्रियाभिर्मनोविज्ञानस्य सम्बन्धो भवति । एवं सत्यपि मनोविज्ञानं शरीरविज्ञानाद् भिद्यते । मनोविज्ञाने व्यवहाराणामध्ययनं भवति । व्यवहाराश्चा-नुभवप्रकाशनरूपाः । नहि मनोविज्ञाने सर्वासां शरीरप्रक्रियाणामध्ययनं क्रियते । शारीरे विज्ञाने तु सर्वासां शारीरिकप्रक्रियाणामध्ययनं भवति । शारीरविज्ञाने सर्वेषामपि शारीरिकाङ्गानां व्यापाराणां विवेचनम् , मनोविज्ञाने तु मनःकारणकानामेव व्यापाराणामध्ययनं भवति । वाट्सन-प्रमुखा मनोविदो मनोविज्ञानमपि शरीरविज्ञानान्तर्गतमेव मन्यन्ते । ते व्यापारं व्यवहारं[1] वा सम्पूर्णस्य शरीरस्य प्रतिक्रियां मन्यन्ते, न त्वङ्गविशेषस्य । प्रतिक्रिया चोत्तेजनाजन्येति व्यक्तमेव । शारीरविज्ञाने च प्रत्यङ्गं पृथक् प्रतिक्रियाणामध्ययनं विधीयते । अयमेव शरीरविज्ञान-मनोविज्ञानयोर्भेदः ।

नियामकविज्ञानेन[2] सम्बन्धः

'मनसि ज्ञानसंवेदनासङ्कल्पादयः कथमुत्पद्यन्ते ? किञ्च तेषां स्वरूपम् ? कीदृशी तेषां शरीरे प्रतिक्रिया ?' इति मनोविज्ञानेन ज्ञायते । अत एव मनोविज्ञानं 'विधायकं विज्ञानम्' इति कथ्यते । न च तेन ज्ञानसंवेदनासङ्कल्पैः कीदृशैर्भाव्यमिति व्याख्यायते । तर्क-नीति-सौन्दर्यशास्त्राणि प्रति-पादयन्तीदम् । अतस्तानि नियमाकानि शास्त्राणीत्युच्यन्ते । मनसा कथं चिन्तयितव्यमिति विचारस्तर्कशास्त्रस्य, कथमाचरणीयमिति विचारो नीतिशास्त्रस्य, कथममुभवितव्यमिति विचारः सौन्दर्यशास्त्रस्य विषयः । मनोविज्ञानं वस्तुनो याथातथ्येन व्याख्यां प्रस्तौति, तत्र नियमनं तर्कादिशास्त्रान्तर्गतम् ।

तर्कशास्त्रेण[3] सम्बन्धः

तर्कशास्त्रस्य क्षेत्रं मनोविज्ञानान्न्यूनम् । मनोविज्ञानस्य विषयः सर्वा एव मानसिक-प्रक्रियाः, तर्कशास्त्रस्य तु केवलो विचार एव । विचारश्च ज्ञानस्य भेदः । नहि वेदनासङ्कल्पाभ्यां तर्कस्य सम्बन्धलेशोऽप्यस्ति । तस्य सम्बन्धस्तु प्रत्ययानुमाननिर्णयैरेव भवति । तथापि न विचारेण मनोविज्ञानस्य तादात्म्यम् । 'कथं चिन्तयामो विचारयामो वा वयम् ?' इति प्रश्नस्योत्तरं मनो-विज्ञानाल्लभ्यते । 'सत्योपलब्धये कथं चिन्तयितव्यम्' इति प्रश्नस्योत्तरं तर्कशास्त्रं प्रददाति ।

---

१. Behaviour.

२. Normative Science.

३. Logic.

In Public domain. Digitization Muthulakshmi Research Academy

नीतिशास्त्रेण[1] सम्बन्धः

नीतिशास्त्रादपि मनोविज्ञानस्य क्षेत्रं विशालम्। मनोविज्ञाने सर्वासां मानसिकप्रक्रियाणां विवेचनं भवति, नीतिशास्त्रे सङ्कल्पमात्रस्य। यथा संवेदनासङ्कल्पौ न तर्कशास्त्रान्तर्भूतौ, तथैव ज्ञानवेदने नीतिशास्त्रग्राह्यौ। यथा ज्ञानस्य तर्कशास्त्रेण न तादात्म्यम्, तथैव न सङ्कल्पस्य मनोविज्ञानेन तादात्म्यम्। 'सङ्कल्पः किङ्कारणकः ? किंस्वरूपो वा ?' इति मनोविज्ञानस्य विचारविषयः, 'सङ्कल्पेन किंस्वरूपेण भाव्यम् ?' इति च नीतिशास्त्रस्य। मनोविज्ञानं यथार्थं विज्ञानम्, नीतिशास्त्रं चादर्शात्मकम्।

सौन्दर्यशास्त्रेण[2] सम्बन्धः

सौन्दर्यशास्त्रादपि मनोविज्ञानस्य क्षेत्रं व्यापकम्; यतो सौन्दर्यशास्त्रमनुभूतिविषय एव विवेचनं करोति। मनोविज्ञानन्तु ज्ञानसङ्कल्पविषयेऽपि। पुनश्च केवला उदात्ताः सुन्दराश्च भावाः सौन्दर्यशास्त्रान्तर्गताः, न तु सर्वा वेदनाः संवेगाश्च। तर्क-नीतिशास्त्रे इव सौन्दर्यशास्त्रमपि नियामकम्, मनःशास्त्रन्तु विधायकम्। 'संवेदना कथं भवति ? तस्याः कारणं कार्यं स्वरूपञ्च किम्' इति मनोविज्ञानस्य विचारविषयः। 'किमपि वस्तु कथं सुन्दरं प्रतीयते, कथं वाऽसुन्दरम् ?' इति विवेचनं मनोवैज्ञानिकानां कार्यम्। 'सुन्दरं प्रतीयमानं वस्तु सुन्दरं न वा ? को वा भेदः सुन्दरासुन्दरयोः ?' इति सौन्दर्यशास्त्रस्य विवेचनविषयः।

दर्शनशास्त्रेण[3] सम्बन्धः

दर्शनशास्त्रस्य तावद् द्वे अङ्गे—ज्ञानमीमांसा[4], तत्त्वमीमांसा[5] चेति। द्वयोरपि मनोविज्ञानेन सम्बन्धो निकटस्थः। 'मनः कथं जानाति, किंस्वरूपं ज्ञानम् ?'—इति तत्त्वस्य विचारो मनोविज्ञानस्य विषयः। 'ज्ञानस्य प्रामाण्यम्, तदुद्गमः, तत्प्रामाण्यहेतवः, ज्ञानस्य क्षेत्रम्, तस्यानुभवेन बुद्ध्या च सम्बन्धः' इति सर्वं ज्ञानमीमांसान्तर्गतं भवति। मनोविज्ञाने ज्ञानस्याध्ययनं तत्त्वज्ञानरूपेण, दर्शनशास्त्रे च तत्प्रामाण्यानुसन्धानरूपेण क्रियते।

तत्त्वमीमांसाया अध्ययनविषय आत्मा, बाह्यं जगत्, ब्रह्म चेति। मनोविज्ञानं मन आत्मानं वा बाह्यं जगच्च स्वीकरोति। नहि ब्रह्मणा सह तस्य कोऽपि सम्बन्धः। ब्रह्मविचारो मनोविज्ञानाद् बाह्यम्। तत्त्वमीमांसया मनोविज्ञानस्याधारभूतयोरात्मविश्वयोर्ज्ञानस्य याथार्थ्यं परीक्ष्यते। पूर्वं मनोविज्ञानं तत्त्वमीमांसाया एवाङ्गविशेष इति स्वीक्रियते स्म। तच्चात्मनस्तत्त्वज्ञानरूपेणाधीयते स्म। आत्मनः स्वरूपव्यापारोद्देश्यानामध्ययनं मनोविज्ञानस्य लक्ष्यमासीत्। साम्प्रतमनुभवो हि मनोविज्ञानस्याधाररूपेण स्वीक्रियते। इदं मनसश्चेतनाया वा विज्ञानम्। मानसिकप्रक्रियाणामध्ययनमस्य विषयः। तस्मिन् भौतिकजगत्सम्बन्धिभ्यः प्रश्नेभ्य ऋतेऽन्येषां प्रश्नानां समावेशः।

---

१. Ethics.
२. Aesthetics.
३. Phylosophy.
४. Epistemology.
५. Metaphysics.

In Public domain. Digitization Muthulakshmi Research Academy

समाजविज्ञानेन[1] सम्बन्धः

मनोविज्ञानस्याध्ययनविषयो वैयक्तिकं मनः । व्यक्तिश्च समाजाद् बहु प्रभावं गृह्णाति । समाजोऽपि व्यक्त्या प्रभावितो भवति । एवं समाजस्य व्यक्तेश्च क्रियाप्रतिक्रियात्मको मिथः सम्बन्धो भवति । सामाजिकेन सम्पर्केण मनोविकासः सम्भवति । येषां सम्पर्कं जनो लभते, येभ्यश्च किञ्चिदाददाति, ते सर्वे मातृ-पितृ-भ्रातृ-बन्धु-बान्धव-सुहृत्-दुर्हृत्-पुत्र कलत्र-परिजनादयः समाजस्यैवाङ्गभूता भवन्ति । तैरेव तस्य सामाजिकः परिवेशो निर्मितो भवति । समाजविज्ञाने समाजस्योत्पत्तिविकासयोरध्ययनं विधीयते । तस्मिन् मानवस्यासंस्कृतावस्थाया आरभ्याद्यतनीमवस्थां यावद् विचार-स्वभाव-रीति-विश्वासादीनां विवेचनं भवति । समाजमनोविज्ञानस्याध्ययनविषयः सामूहिकं मनो भवति । 'समूहे मनः कथं व्यवहरति ?' 'कश्च विशेषो जने प्रादुर्भवति जनसम्मर्दे ?' इति विवेचनं मनोविज्ञानस्योद्देश्यम् । इदमेव मनोविज्ञानसमाजविज्ञानयोः सङ्गमभूमिः ।

शिक्षाशास्त्रेण[2] सम्बन्धः

शिक्षायास्त्वाधार एव मनोविज्ञानम् । छात्राणां शक्तेः सम्यग्विकासः, तेषामाचरणस्य चरित्रस्य च तथा निर्माणं यथा छात्राः समाजस्योपयोगिनो घटका अङ्गानि वा भवेयुरित्येव शिक्षाया उद्देश्यम् । न चैतत्कार्यं मनोविज्ञानं विना साधयितुं शक्यम् । मनोविज्ञानवेत्ता शिक्षको बालानां जन्मजाताः शक्तीः, तेषां मानसिकं विकासम्, परिवेशजन्यं प्रभावम्, चरित्रनिर्माणविधिं च परिज्ञाय तेषां निरीक्षणावधान-स्मृति-कल्पना-विचार-संवेग-सङ्कल्प-चरित्रादीनां विकासे तदुपयोगं करोति । शिक्षाशास्त्रेण सह मनोविज्ञानस्य तथा घनिष्ठः सम्बन्धो यथा मनोविज्ञानस्य शिक्षाविषयिणी पृथक् शाखैव साम्प्रतं प्रस्फुटिता विद्यते ॥

१. Sociology.
२. Education.

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थोऽध्यायः

स्नायुसंस्थानम्

मनःशरीरयोः सम्बन्धः

मनसः शरीरस्य च निकटतमः सम्बन्धः। बाह्यपदार्थानां ज्ञानं ज्ञानेन्द्रियैर्भवति। ज्ञानेन च संवेदनोत्पद्यते। संवेदना च चेष्टाजननी। ज्ञानसंवेदनाचेष्टानां प्रत्येकं शरीरेण सम्बद्धं वर्तते। ज्ञानं प्रत्यक्षीकरणजम्। प्रत्यक्षीकरणञ्च ज्ञानेन्द्रियार्थसन्निकर्षजन्यम्। ज्ञानेन्द्रियाणि शरीरस्याङ्गभूतानि। अस्माकं चक्षू रूपम्, कर्णो ध्वनिम्, नासा गन्धम्, रसना रसम्, त्वक्शीत-तापादिकं च गृह्णाति। नहि ज्ञानेन्द्रियेभ्य ऋते रूपरसादीनां ग्रहणस्य सम्भवः। संवेदना ज्ञानाधीनेति नात्र शङ्कालेशोऽपि। अतः संवेदनाऽप्यात्मसत्तायै ज्ञानेन्द्रियाण्येवाश्रयते। चेष्टा संवेदनाया उत्पद्यते। तस्या अपि साधनं शरीरमेव। मनसः सर्वा अपि बाह्याः प्रतिक्रियाः पेशीभिः स्पष्टा भवन्ति। सर्वेऽपि मानवसङ्कल्पाः पेशीगतिभिः प्रकाश्यन्ते। भयङ्करं शब्दं श्रुत्वा वयं सहसैव पलायामहे। अत्र पलायनरूपं सङ्कल्पं शरीरमेव साधयति। नहि स्तब्धे शरीरे सङ्कल्पानां पूर्तिः सम्भवति। एवं स्पष्टं यन्मनो ज्ञानेन्द्रियैः पेशीभिश्च स्वकार्यं सम्पादयति। तेन मनः-शरीरयोर्घनिष्ठः सम्बन्धः स्पष्ट एव।

शरीरबाधायां मनःप्रक्रियाः अपि बाधिता भवन्ति। आघातैः पीडया च चेतनाऽवसन्ना भवति। सुरादिमादकद्रव्याणि चेतनामाच्छादयन्ति। तेषां प्रभावः शरीरे मनसि च समानो भवति। एवमेव रोगैर्मनोदशा प्रभाविता भवति। दैर्घकालिकमजीर्णं कोष्ठबद्धता च मनुष्यं क्षिप्रक्रोधनं करोति। विषमज्वरो मनःशक्तिं निर्बलां विधत्ते। एवं शरीरस्य प्रभावो मनसि सुनिश्चित एव। मनसः प्रभावोऽपि शरीरे महान् दृश्यते। प्रसन्नेन चेतसा बहवो रोगाश्चिकित्सिता भवन्ति। केवलं मनःशक्त्या बहूनां रोगाणामुपचारो विधीयते। एवमपि शरीरमनसोर्निकटस्थः सम्बन्धः सिद्ध्यति।

'मस्तिष्कस्य विविधा अवयवाश्चेतनायाः क्षतिकारका वर्धका वा भवन्तीति तेषां ह्रासेन ह्रासः, वृद्ध्या च वृद्धिश्चेतनायाः' इति [1]रोगविज्ञानवेत्तारो वदन्ति। [2]शरीररचना-विज्ञानिनोऽप्येवमेव निरूपयन्ति। [3]शरीरव्यापारविज्ञानेन ज्ञायते यत्पशूनां मस्तिष्कस्य केषुचिद-वयवेषूत्तेजितेषु तेषां पेशीषु गतिरुत्पद्यते। छिन्नेषु च तेषु गतिर्निरुध्यते। चेतनायाः स्नायुतन्त्रस्य विकासः सहचारीति पूर्वं प्रतिपादितमेव। मनोविकासः स्नायुतन्त्रविकासमनुसरति। अतो मनःप्रक्रियाणामध्ययनाय स्नायुतन्त्रस्य ज्ञानमावश्यकमिति मत्वा स्नायुतन्त्रस्य वर्णनमति-संक्षेपेण प्रस्तूयते।

---

१. Pathology.

२. Anatomy.

३. Physiology.

In Public domain. Digitization Muthulakshmi Research Academy

स्नायुसंस्थानम्

स्नायुसंस्थानं यन्त्रवदाचरति। तदेव चेतनव्यापाराणां विधानं[१] नियन्त्रणञ्च करोति। यदा मानवः पश्यति, शिक्षते, विचारयति, कामयते वा; तदा स आदातॄणां पेशीनाम्, स्नायुमण्डलस्य चोपयोगं करोति। सर्वेषामपि जनानां सम्मुखमेकैव प्रमुखा समस्या प्रस्तुता भवति। सा च 'वातावरणेन सह प्रभावपूर्णविधिना व्यवहारं कथं कुर्याम' इति। तच्चादातॄणां[२] कार्यकारिणां चाङ्गानामधीना[३]। मनोविज्ञानाय तेषामध्ययनमावश्यकम्।



स्नायुसंस्थानस्य सामान्यं स्वरूपम्

---

१. Regulation.

२. Receptors.

३. Effectors.

In Public domain. Digitization Muthulakshmi Research Academy

स्नायविकानां क्रियात्मकानां चावयवानां त्रयो भेदा भवन्ति। तत्र (१) आदातारो बाह्याघातग्रहीतारः, तैरेवोत्तेजनानामिका क्रिया आरभ्यते प्राणिषु। (२) संयोक्ता स्नायुसमवायो वा संवेदनाप्रचारणशीलो द्वितीयः। (३) कार्यकारिणश्च प्रतिक्रियाजनयितारः। समवेता एते त्रयः 'प्रतिक्रियातन्त्रम्'[१] इत्याख्यां भजन्ते।

शरीरजटिलता

विकासक्रमेण मानवस्य स्थानं प्राणिषु सर्वोच्चैर्वर्तते, अमीवाख्यस्य क्षुद्रजन्तोश्च सर्वतो नीचैः। अमीवानामकस्य[२] जन्तोः शरीरमेकयैव कोशया[३] कोशाणुना वा निर्मितमस्ति। नहि तस्य शरीरे उत्तेजनादानप्रचारप्रतिक्रियाभ्यो पृथक्पृथगङ्गानि विद्यन्ते। बाह्योत्तेजनाभिः सोऽपि प्रभावितो भवति। प्रकाशमभिमुखमुपलभ्य सोऽपि परावर्तयत्यात्मानमन्यस्यां दिशि। स्पाञ्जनामकः[४] प्राणी तस्मादधिको विकसित आस्ते। तस्य शरीरं मांसपेश्याः कोशाणुरिव वर्तते। उत्तेजनां प्राप्य च प्रतिक्रियां विधत्ते। स तमेव कोशाणुमुत्तेजनादानाय प्रतिक्रियायै चाऽपि प्रयुनक्ति। एवंविधः कोशाणुः स्वतन्त्रं कार्यकार्यङ्गं[५] कथ्यते। एनोमीननामकः[६] सामुद्रिको जीवस्तदुत्तरः। तस्य शरीरं विकीर्णस्नायुजालयुक्त[७]मादातृकार्यकार्यङ्गोपेतं भवति। कीटपतङ्गादिशरीरं ततोऽप्युन्नततरं भवति। तस्मिन् केन्द्रीयस्नायुसमवायोऽप्युपलभ्यते। तत्रादातृ-संयोक्तृ-कार्यकार्यङ्गानि पृथग् वर्तन्ते। मानवेऽयमेव स्नायुसमवायोऽधिकतरजटिलो दृश्यते।

आदातृण्यङ्गानि

आदातृण्यङ्गानि बाह्योत्तेजनाग्रहणसाधनानि। तानि च त्रिविधानि—बाह्यानि[८], पूर्वान्त्यानि[९], अन्तर्वर्तीनि[१०] चेति। बाह्यानि यथा—नेत्रपुत्तलिकातले स्थिता आदातारः कोशाणवः। ते च सरलतया बाह्यजगतः प्रभावं गृह्णन्ति, शरीरतत्त्वं[११] प्रतिस्थानं व्याप्नुवन्ति च। पूर्वान्त्याश्च मांसपेशीस्थिताः संवेदनाकोशाणवः[१२], ये च जातायां गतावुत्तेजिता भवन्ति। अन्तवर्तिनश्चावयवा आन्त्राणामन्तःस्तरे आमाशये च प्राप्यन्ते। ते चान्तरवयवसंवेदनानां ग्राहकाः। सर्व इमे आदातारोऽवयवा ज्ञानवाहिनां नाडीतन्तूनां[१३] प्रान्तभागैः सम्बद्धास्तिष्ठन्ति।

---

१. Response Mechanism.
२. Amoeba.
३. Cell.
४. Sponge.
५. Independent Effector.
६. Anemone.
७. Neural net.
८. Extroceptors.
९. Proprioceptors.
१०. Introceptors.
११. Bodily tissues.
१२. Sensory cells.
१३. Afferent Neurones.

In Public domain. Digitization Muthulakshmi Research Academy

संयोक्तारोऽवयवाः (स्नायुसमवायो वा)

स्नायुसमवाय उत्तेजनाप्रतिक्रिययोः संयोजकत्वात् संयोक्तेति कथ्यते। तस्य रचना चातिजटिला। शरीरावयवक्रियाणां समन्वयोऽस्य कार्यम्। स्नायुसमवायस्य सुव्यवस्थितत्वेनैव सर्वं कार्यं सुकरं भवति। यदा भवान् मार्गे गच्छति तदा मस्तिष्को गन्तव्यं पन्थानं विचारयति, 'सम्मुखमागच्छताऽन्येन यानेन जनेन वा सङ्घर्षो मा भूदिति वामपार्श्वेन मया गन्तव्यम्' इति चिन्तयति, नेत्रे तदनुसारेणाग्रे पश्यतः, पादौ च मस्तिष्कनेत्रानुयायिनौ चलतः। अत्र चलने क्रियात्रयसमन्वयः संयोक्तृणामङ्गानामेव कार्यम्। पक्षाघातादिना रोगेण भ्रष्टे चास्मिन् समन्वये जना इच्छन्तोऽपि क्रियास्वसमर्था एव भवन्ति। यदा चिरमेकमुद्रं तिष्ठतः पादः सुप्तो भवति तदा प्रयत्नं कृत्वाऽपि न स तस्मिन् पादे भारं दत्वोत्थातुं शक्नोति, चलितुं वा; पादस्यावसन्नत्वात्।

स्नायविकावेगानाम्[1] अनेके प्रकाराः सन्ति। ते च यथा—

(१) वितरणम्[2]—काचिदेकोत्तेजना शरीरस्यानेकेष्वङ्गेषु प्रतिक्रियां जनयति। यथा शूकशिखायां पदे निविशमानायां जनः सहैव सम्पूर्णेन शरीरेणोत्क्षिपति। अङ्गानि च चालयति। सूचीनिक्षेपे, केनापि चिक्कणेनातिशीतेन वा वस्तुना स्पृष्टे कस्मिंश्चिदङ्गे सम्पूर्णं शरीरं चञ्चलं भवति।

(२) संसरणम्[3]—अनेकमार्गैरागच्छन्त्य उत्तेजनाः काञ्चिदेकामेव प्रतिक्रियां जनयन्ति कदाचित्। बालं शुना आक्रम्यमाणं नेत्राभ्यामवलोक्य कर्णाभ्यामाकर्ण्य च तत्क्रन्दनम्, एकामेवोपधावनक्रियां करोति जनस्तद्रक्षायै। अनेकासामुत्तेजनानां तथा संसारो येन क्रिया सम्भवेद् 'संसरणम्' इति कथ्यते।

(३) समष्टीकरणम्[4]—कदाचिदुत्तेजनानां समिष्टिरेव प्रतिक्रियां जनयति, न त्वेकोत्तेजना। क्रीडायां निमग्नं बालकं कश्चिदाह्वयति, न स उत्तरं ददाति। तदा स वारं वारमाह्वयति। अनेकदा आह्वानानन्तरं स प्रतिब्रवीति–'ओम्' इति। बालक आह्वानं प्रतिवारं शृणोति, परं सोऽधिके रुचिकरे कार्ये मग्नः सन्न तत्रावधानं करोति। बहूनामुत्तेजनानां समष्टिश्च कार्यार्थं प्रेरयति।

(४) सरलीकरणम्[5]—कदाचिदेकया क्रियया समकालमेवान्याङ्गेषु जायमानाः क्रियाः पूर्वां क्रियां बलवत्तरां कुर्वन्ति। शयानो जनः पादतले शीतं स्पर्शमवाप्य झटिति पादमपाकर्षति। अयमपाकर्षः प्रतिक्षेपक्रिया। परमपाकर्षेण सहैवातिसमीपे उच्चैः क्रियमाणे स्फोटशब्देऽपाकर्षणक्रिया तीव्रतरा जायते।

(५) निरोधः[6]—सामान्या जायमानाऽपि क्रिया कदाचित् स्वयमेव निरुद्धा भवति, यथा–शिङ्का, हिक्का, जृम्भा वा।

---

१. Neural Impulses.

२. Distribution.

३. Convergence.

४. Summation.

५. Facilitation.

६. Inhibition.

In Public domain. Digitization Muthulakshmi Research Academy

(६) सहकरणम्[१]—कदाचिदेकोत्तेजनैकस्मिन्नङ्ग एकां प्रतिक्रियां जनयति, अपरस्मिंश्चान्याम्। शूलनिवेश एकस्मिन् पादे उत्क्षेपं जनयति, द्वितीये च शरीरभारवहनरूपां प्रतिक्रियाञ्च।

सर्वा अपि मानसिकक्रियाः स्नायविकक्रिययाऽनुबद्धा[२] भवन्ति। पठनार्थं पुस्तक उद्घाट्यमानेऽविलम्बेनैव मस्तिष्के स्नायविकक्रिया जायन्ते। तेन शब्दानां प्रत्यक्षज्ञानमारभ्यते।

नाडीतन्तवः

स्नायुसमवायः सूत्रैरिवानेकैः सूक्ष्मतन्तुभिर्निर्मितोऽस्ति। ते च सूक्ष्मतन्तवो 'नाडीतन्तवः' अभिधीयन्ते। स्थूला नाड्योऽनेकैः सूक्ष्मनाडीतन्तुभिर्निर्मिता वर्तन्ते। ते च तन्तवस्तथाऽतिसूक्ष्मा यथा तेषां गणनाऽप्यतिदुष्करा। 'केवलं मानवमस्तिष्क एव ९०००,०००,०००,००० इति सङ्ख्याका नाडीतन्तवः, शरीरे तु तेषां बहुसहस्रगुणाः' इति शरीरविज्ञानवेत्तारो मन्यन्ते। नाडीतन्तुसमूहस्य त्रयो भागाः—कोशाणुशरीरम्, कोशालाङ्गूलम्, कोशालोम चेति।

स्नायुतन्त्रस्य रचनाः



मानवीयमस्तिष्कस्य रचना

स्नायुतन्त्रस्य[३] द्वौ भागौ—मस्तिष्कसुषुम्णाक्षः[४], स्नायुश्च। मस्तिष्कसुषुम्णाक्षस्याङ्गे द्वे। तत्र प्रथमम्—

---

१. Reciprocal Innervation.

२. Co-related.

३. Nervous System.

४. Cerebro Spinal Axis.

In Public domain. Digitization Muthulakshmi Research Academy

(१) सुषुम्णा[1]—श्वेतो मृदुश्च रज्ज्वाकृतिः पदार्थो मेरुदण्डान्तरवस्थितः[2] 'सुषुम्णा' इति कथ्यते। तस्यान्तरिको भागः स्नायुकोशाभिर्निर्मितः[3], बाह्यश्च स्थूलश्वेततररूपः स्नायुसूत्र[4]-मयश्च। अयं प्रतिक्षेपक्रियाणां केन्द्रः। अयमेव बोधावेगान्[5] कर्मावेगेषु[6] परिवर्त्तयति। सुषुम्णा-स्थाने बोधस्नायुकोशाः कर्मस्नायुकोशाश्च परस्परमतिसन्निकटस्थाः सन्तः स्वस्नायुतन्तुमार्गेण ज्ञानेन्द्रियैः पेशीभिश्च संयुक्ता भवन्ति। तेन कोऽप्यन्तर्गामी बोधावेगोऽनायासेन कर्मस्नायुषु गमनमार्गमुपलभते। ततश्चोत्तेजनायास्तात्कालिकी प्रतिक्रिया प्रतिक्षेपक्रियारूपोत्पद्यते। नैतदर्थं बोधावेगो मस्तिष्कसाहाय्यमपेक्षते।

(२) मस्तिष्कम् च[7] द्वितीयमङ्गं चतुर्षु भागेषु विभक्तं कपालान्तर्गतं वर्तते।



मस्तिष्कस्य मेरुदण्डस्य च स्वरूपम्

---

१. Spinal cord.
२. Spinal column.
३. Nerves cells.
४. Nerves fibres.
५. Sensory Impulse.
६. Motor Impulses.
७. Brain, Encephalon.

In Public domain. Digitization Muthulakshmi Research Academy

(अ) तत्र मस्तिष्कपुच्छं[१] सुषुम्णाया सुषुम्णाकन्दापरनामक[२] आयतो भागो मस्तिष्कं सुषुम्णया योजयति। मस्तिष्कपुच्छं सुषुम्णामस्तिष्कयोर्मध्ये संवहनक्रियाकारि बृहन्मस्तिष्क-गोलार्धयोर्मध्यस्थं श्वसनरक्तसञ्चरणनियन्त्रणकम्।

(इ) मस्तिष्कपुच्छोपरि स्नायुपदार्थसेतुरिव सेतुर्भवति[३]। स च लघुमस्तिष्कस्य खण्डद्वयं योजयति। सेतुमार्गेणैव स्नायुसूत्राणि बृहन्मस्तिकाच्छरीरस्य निम्नाङ्गान्युपगच्छन्ति। स्नायु-सूत्राणि बृहन्मस्तिष्कस्य दक्षिणाद् गोलार्धात् सेतुवामभागमार्गेण शरीरस्य वामभागपेशीरुप-गच्छन्ति, वामाद् बृहन्मस्तिष्कगोलार्धात् सेतुदक्षिणभागमार्गेण शरीरस्य दक्षिणभागपेशीश्च। अत एव बृहन्मस्तिष्कस्य दक्षिणगोलार्धे जात आघातः शरीरस्य वामभागपेशीः स्तम्भयति, वामगोलार्धाघातश्च दक्षिणाङ्गपेशीः।

(उ) लघुमस्तिष्कम्[४]—बृहन्मस्तिष्कस्य पृष्ठभागेऽवस्थित आस्ते। तस्य द्वे खण्डे। अनयोरन्तः शुभ्राणि स्नायुसूत्राणि भवन्ति शुभ्रकोशानां सूक्ष्मास्तरणेनाच्छादितानि। लघुमस्तिष्कं पेशीनां गतिषु समन्वयं शरीरे समतोलं[५] स्थापयति। इदमेव चलनस्थितिप्रभृतिसमन्वितानां गतीनां नियन्त्रकम्।

(ऋ) बृहन्मस्तिष्कम्[६]—अयं भाग ऐच्छिकीषु क्रियासु नियन्त्रणं निम्नकेन्द्रीयक्रियाणां नियमनमवरोधनं च करोति। सम्पूर्णस्य स्नायुतन्त्रस्य शरीरस्य च शासकोऽयम्। अयमेव संवेदना-विचारसंवेगस्मृतिसङ्कल्पानामधिष्ठानम्। अस्मिन्नेव विविधसंवेदनाऽधिष्ठानं बोधकेन्द्रः[७] स्थितो विद्यते। अस्मिन्नेव विविधचेष्टाकेन्द्रा[८] भवन्ति, यैरयं पैशिकगतीनामैच्छिकक्रियाणां वा नियन्त्रणं विधत्ते। अयमेवास्मान् शिक्षणविचारनिर्णयबोधस्मरणसमर्थान् करोति। इदमेव प्रज्ञाऽ-धिष्ठानम्[९]। हर्षविषादादिसंवेगानामनुभूतेः कारणं बृहन्मस्तिष्कमेव। अस्य विविधा भागा-श्चेतनाप्रकारैः सम्बद्धाः सन्ति। अस्य कश्चिद् भागो बोधक्षेत्रम्, स ज्ञानेन्द्रियेभ्यो बोधावेग-माददाति। अन्यश्च कर्मक्षेत्रम्, स कर्मावेगं पेशीः प्रति प्रेरयति। अन्ये च साहचर्यक्षेत्राणि[१०]। ते च समन्वयकारकाः[११] केन्द्राः। बृहन्मस्तिष्कस्य गोलार्धरूपौ द्वौ भागौ भवतः। तत्र कश्चित्पाटलः श्वेतश्च पदार्थस्तिष्ठति। श्वेतोऽन्तर्वर्ती, पाटलश्च बाह्यः श्वेतपदार्थप्रावरकश्च। पाटलपदार्थः 'त्वक्षः[१२]'

---

१. Medulla oblonagta.
२. Bulb.
३. Pons Varolii.
४. Cerebellum.
५. Balance.
६. Cerebrum.
७. Sensory Centres.
८. Motor Centres.
९. Seat of intellect.
१०. Association areas.
११. Co-ordinating Centres.
१२. Cortex.

In Public domain. Digitization Muthulakshmi Research Academy

इति कथ्यते। त्वक्षे च स्नायुकोशा वर्त्तन्ते। तैश्च मस्तिष्कस्य बोधाऽधिष्ठानम्[1], कर्माधिष्ठानं[2] च निर्मितं भवति।

स्नायवः[3]

अतिसूक्ष्मश्वेततन्तव इव स्नायवो भवन्तीति प्राक् प्रतिपादितम्। तेषु केचन मस्तिष्कात् प्रादुर्भवन्ति। ते च कपालस्नायवो[4] बृहन्मस्तिष्कस्नायवो[5] वा कथ्यन्ते। केचिच्च मेरुदण्डे स्थितायाः सुषुम्णायाः प्रादुर्भवन्ति, सुषुम्णास्नायवश्च 'स्पिनल नर्व्स' (Spinal nerves) निगद्यन्ते। कपालस्नायवः शिरःस्थितानि ज्ञानेन्द्रियाण्युपगच्छन्ति, सुषुम्णास्नायवश्च त्वचमान्तरिकाण्यङ्गानि पेशीश्चोपयान्ति। स्नायूनां द्वौ भेदौ भवतः—बोधस्नायवः, कर्मस्नायवश्च। तत्र पूर्वेऽन्तर्गामिनः, अपरे च बहिर्गामिनो बोधस्नायवः (Nervous Currents) स्नायविकीं धारां ज्ञानेन्द्रियेभ्यो मस्तिष्के सुषुम्णायाञ्च स्थितानि ज्ञानकेन्द्राणि नयन्ति, कर्मस्नायवश्च स्नायविकीं धारां सुषुम्णास्थेभ्यो मस्तिष्कस्थेभ्यश्च कर्मकेन्द्रेभ्यः पेशीः, ग्रन्थीश्च (Glands) प्रति नयन्ति।

स्नायुकोशाः

स्नायुतन्त्रं (Nervous System) कोशाभिर्निर्मितमास्ते। स्नायुकोशायाम् (Nerves Cell) अनेके तन्तवो भवन्ति। ते कोशावयवा एव। कोशापिण्डे एका न्यष्टिर्भवति (Nucleus)। न्यष्टयन्तरे चानेका लघुन्यष्टयो (Neucleoli) भवन्ति। ताभ्यश्चानेकाः शाखा निर्गच्छन्ति। तास्वेका शाखा कोशलोमनाम्नी लघुन्यष्टिसंयुक्तोत्तेजनाः गृह्णाति। अन्या चापि लघुन्यष्टिसम्बद्धा कोशालाङ्गूलनाम्नी। सा चोत्तेजनां बहिः प्रेषयति। सर्वास्वपि स्नायुकोशासु पिण्डम्, लोम, लाङ्गूलञ्चेति त्रीण्यङ्गानि भवन्ति।

द्वयोः स्नायुकोशयोः संयोगस्थानं 'स्नायुसन्धिः' (Synapse) इति कथ्यते। अत्रैकस्याः कोशाया लाङ्गूलं सूक्ष्मशाखानामन्त्यकूर्चेषु विभक्तं भवति। अन्त्यकूर्चानि चान्यस्याकोशाया लोमभिः सम्बद्ध्यन्ते। सन्धिलोम हि आदात्रङ्गं (Receptor) भवति, लाङ्गूलस्यान्त्यकूर्चं चोत्तेजकाङ्गम् (Stimulating organ)। सन्धिस्थले एकस्याः कोशाया लाङ्गूलान्त्यकूर्चमन्यस्याः कोशाया लोमान्युत्तेजयति।

पूर्णविकसितानां स्नायुतन्तूनां[6] संरचनाऽतीव जटिला भवति। स्नायोः केन्द्रतन्तुमक्षरम्भं[7] कथयन्ति। अयमेव यथार्थः स्नायुरावेगमेकप्रान्तादन्यं प्रान्तभागं यावन्नयति। अस्यैकं स्थूल-

---

१. Sensory area.

२. Motor area.

३. Nerves.

४. Carnial Nerves.

५. Cerebrial nerves.

६. Nerves fibres.

७. Axis cylinder.

In Public domain. Digitization Muthulakshmi Research Academy

मावरणं भवति। तच्च विभजिकञ्चुकं[१] कथ्यते। अस्योपर्येकमन्यत्सूक्ष्मावरणं स्नायुकञ्चुकसंज्ञकं[२] भवति।

स्नायुकोशानां[३] कार्याणि

स्नायुकोशासु कोशापिण्डानि, स्नायुतन्तवश्च भवन्ति। उद्दीप्यता[४], संवाहिता[५] च तेषां गुणौ। कोशापिण्डेषु प्राप्तस्नायविकावेगानामुद्दीपननिरोधयोः शक्तिर्भवति। तेषां क्रिया कदाचित् स्वतः प्रेरिता भवति। बाह्योत्तेजनां विनाऽपि ते स्नायविकावेगान् स्नायुतन्तून् प्रति प्रेरयन्ति। कोशापिण्डानि स्नायुकोशाः परस्परं संयुञ्जन्ति। स्नायुपिण्डानि स्नायुतन्तूँश्च पोषयन्ति।

स्नायुकोशानां त्रयो भेदा भवन्ति—बोधस्नायुकोशा, कर्मस्नायुकोशा, केन्द्रीया स्नायुकोशा चेति। तृतीया तु साहचर्यकोशा[६], अनुबन्धकोशा वाऽपि कथ्यते। बोधाकोशा किमपि बोधेन्द्रियं केनाऽपि बोधकेन्द्रेण संयुनक्ति। कर्मकोशा किमपि कर्मकेन्द्रं कयाचित् पेश्या सम्बध्नाति, केन्द्रीया कोशा च बोधकोशां कर्मकोशया युनक्ति। इयं तु समन्वयकारिणी कोशा।

मस्तिष्के मानसिकव्यापाराणां स्थानसीमनम्[७]

बृहन्मस्तिष्कस्य द्वे गोलार्धे—इति पूर्वमुक्तम्। तयोः प्रत्येकं चत्वारि खण्डानि। तेष्वग्रखण्डं[८] कपालस्याग्रिमे भागे मस्तिष्कस्याग्रभागात्केन्द्रीयं दरीस्थानं[९] यावद् विस्तृतमास्ते। पार्श्वखण्डं[१०] दरीपृष्ठात् प्रारभ्य शिरःपृष्ठभागे स्थितं पश्चखण्डं[११] यावद् विस्तीर्णम्। खङ्ख-खण्डं शङ्खक्षेत्रे, पृष्ठभागे च 'सिल्वियस[१२]' इत्यस्य दरीस्थानस्याधस्तिष्ठति। पश्चखण्डञ्च शिरसः पृष्ठभागे तिष्ठति। बृहन्मस्तिष्कस्यैतेषां भागानां मानसिकैर्व्यापारैरभिन्नः सम्बन्धः। दृष्ट्यधिष्ठानं[१३] पश्चखण्डे स्थितं विद्यते। तच्च दृष्टिस्नायुद्वारा नेत्राभ्यां संयुक्तम्। इदमेव दृष्टिसंवेदनानामधिष्ठानम्। श्रवणाधिष्ठानं[१४] खङ्खखण्डे स्थितम्। तच्च श्रवणस्नायवः कर्णाभ्यां योजयन्ति। इदं श्रवणसंवेदनानामधिष्ठानम्।

---

१. Medullary sheath.
२. Neurilemma.
३. Neurones.
४. Irritability.
५. Conductivity.
६. Association or co-relation Neurone.
७. Localisation.
८. Fronted lobe.
९. Central fissure.
१०. Parietal lobe.
११. Occipital lobe.
१२. Sylvius.
१३. Visual area.
१४. Auditory area.

In Public domain. Digitization Muthulakshmi Research Academy

घ्राण(Olfactory) रसना(Yustalory)धिष्ठाने ब्राह्यतो न दृश्येते। घ्राणाधिष्ठानं शङ्खखण्डा-वृत्तेः पृथक् स्थाने स्थितमास्ते। त्वग्बोधाधिष्ठानं (Somesthetic area) केन्द्रीयदर्याः पृष्ठभागे स्थितम्। तच्च स्पर्शस्नायुभिस्त्वचा सह संयुक्तम्। तच्च बोधस्नायुभिः पेशीस्थितैरिन्द्रियैरपि सह संयुक्तम्। इदं स्पर्शसंवेदनानामधिष्ठानम्। गतिसंवेदनानामप्यधिष्ठानमिदम्। चेष्टाधिष्ठानं केन्द्रीयदर्याः सम्मुखे तिष्ठति। इदं कर्मस्नायुभिः पेशीभिः सह संयुक्तम्। इदं पेशीगतीना-मैच्छिकानां वा क्रियाणामधिष्ठानम्। चेष्टाधिष्ठानस्योच्चैस्तमो भागो निम्नतमैरङ्गैः सम्बद्धः, निम्नतमो भागश्चोच्चैस्तमैरङ्गैः। वाण्याः क्रियाकेन्द्रश्चेष्टाधिष्ठानस्य निम्नतमे भागेऽवतिष्ठते।

पार्श्वाग्रपश्चखण्डेषु बोधाधिष्ठानानां मध्ये एकं बृहत्क्षेत्रम्। एवमेवाग्रखण्डे चेष्टा-धिष्ठानस्य पुरत एकं बृहत् क्षेत्रम्। इमे साहचर्यक्षेत्रे (Association area) अभिधीयेते। इमे बोधाधिष्ठानां चेष्टाधिष्ठानानां च क्रियासु सामञ्जस्यं स्थापयतः। तयोस्तु व्यापारः संश्लेषणात्मकः। एवं स्पष्टमेव मस्तिकस्य विविधा भागाश्चेतनाया विविधैः प्रकारैः सम्बद्धाः सन्ति।

स्वतन्त्रं स्नायुतन्त्रम्[1]

इदं सामान्यस्नायुतन्त्रस्यैको भागः। इदमैच्छिकान्नियन्त्रणात् स्वतन्त्रम्। अस्य निर्माणं श्वसन-रक्तसञ्चार-पाचनक्रियारतैः ग्रन्थि-चिक्कणपेशीनां संयोजकैः स्नायुभिर्भूतम्। स्वतन्त्रस्नायु-तन्त्रस्य स्नायवो हृदयम्, रक्तवाहिनीः, फुप्फुसम्, आमाशयम्, आन्त्रजालम्, आन्तरिकाण्यङ्गानि



स्वतन्त्रं स्नायुतन्त्रम्

च यावद् यान्ति। ते स्वेदग्रन्थीः, केशानां लघुपेशीः, नेत्रयोरुपतारे, चिक्कणपेशीः,अन्या ग्रन्थी-र्यावच्च गच्छन्ति। एषां निर्मितिरतीव सूक्ष्मैः स्नायुतन्तुभिर्भवति।

---

१. The Autonomic Nervous System.

In Public domain. Digitization Muthulakshmi Research Academy

स्वतन्त्रस्नायुतन्त्रस्य त्रयो विभागा भवन्ति—शीर्षम्, मध्यम्, निम्नञ्च। शीर्षविभागो[1] मस्तिष्कमुपतारायाः पेश्या योजयति। इदमेव तस्य सङ्कोचकारणम्। अयमेव मस्तिष्कपाद-लालाग्रन्थीनाञ्च योजकः। लालास्रावे च कारणमिदम्। शीर्षविभागस्यान्ये स्नायव आमाशयस्य पेशी ग्रन्थीश्च प्राप्यामाशयग्रन्थिषु जठररस[2]त्यागायोत्तेजनां जनयन्ति। ते चामाशयभित्ति-पेशीर्मन्थनक्रियार्थमुत्तेजयन्ति। अन्ये च स्नायवो हृदयं गच्छन्ति। तेषु हृदयगतेर्मन्दीकरणस्य शक्तिर्भवति। मध्यमो विभागः[3] सुषुम्णाया मध्यभागेन सम्पृक्तो वर्तते। माध्यमिकाः सहभाविनो वा स्नायवो वक्षःस्थलसमीपे सुषुम्णायाः प्रादुर्भवन्ति, हृदयगतिं वर्धयन्ति, आमाशयक्रियाञ्च निरुन्धन्ति। निम्नतमो विभागस्त्रैकविभागो[4]ऽपि कथ्यते। स च सुषुम्णां प्रजननाङ्गैर्मलमूत्रा-शयपेशीभिश्च योजयति, तेषां क्रियामुत्तेजयति च। सहभावी मध्यमो वा विभागस्त्रैकस्यैक-देशमाच्छादयति। श्रौणाङ्गेषु[5] तस्योत्तेजकं प्रभावं निरुणद्धि। सहभाविनां स्नायूनां क्रिया शीर्षण्यास्त्रैकनाडीनाञ्च क्रियाया विरोधिनी। प्रगण्डानां स्नायुकोशगुच्छानामेका पङ्क्तिः सुषुम्णासहगामिनी तिष्ठति। इमे प्रगण्डाः सुषुम्णया सह प्रगण्डपूर्वतन्तुभिः[6] संयुक्ता भवन्ति। प्रगण्डोत्तरतन्तवः[7] प्रत्येकं प्रगण्डात् पेशीर्ग्रन्थीश्च यावद्विस्तृता भवन्ति। ते उपतारां तारां च स्फारयन्ति, अश्रुग्रन्थिभ्योऽश्रूणि विमोचयन्ति; लालाग्रन्थीः, पाचकग्रन्थीः, आमाशयान्त्रपेशीश्च पाचनक्रियारोधायोत्तेजयन्ति, मलमूत्राशयपेशीभिर्मलमूत्रत्यागं कारयन्ति, स्वेदग्रन्थिभिः स्वेदं निष्कासयन्ति, रोमाणि च प्रहर्षयन्ति।

मध्यमः सहभावी वा विभागो भयक्रोधादिषु प्रबलसंवेगेषु सँल्लग्नो भवति। शीर्ष-विभागस्य त्रैकविभागस्य कश्चिदंशः शारीरिकविश्रामादिसुखदावस्थासु सँल्लग्नस्तिष्ठति। त्रैक-विभागस्यैकोंऽशः कामवासनायां कामोद्दीप्तौ च लग्नो भवति॥

१. Cranial Division.
२. Gastric juice.
३. Sympathatic Division.
४. Sacral Division.
५. Pelvic organs.
६. Pre-ganglionic.
७. Post-ganglionic.

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमोऽध्यायः

चेतना

मनःशरीरयोः सम्बन्धः

सामान्या जना मनःशरीरयोर्मध्ये घनिष्ठं सम्बन्धं मन्यन्ते। नहि मनसः स्थितिः शरीरेण विना, शरीरस्य स्थितिर्वा मनसा विना सम्भाव्यते। शरीरे नष्टे मनो नष्टं भवति, मनसि नष्टे च शरीरम्। अतः शरीरमनसोरविच्छेद्यः सम्बन्धः। पुनश्च विचाराणामिच्छानाञ्च प्रादुर्भावो मनसि जायते, परं तेषां सर्वेषां पूर्तिः शरीरेणैव सम्भवति। नहि विचाराणां कल्पनानां वा प्रभवस्य कारणं शरीरम्। इच्छाविचारकल्पनाद्यर्थं शरीरं मनोऽधीनं भवति। नहि मनसा विना शरीरं स्वतन्त्रं स्थातुं शक्नोति। मनसि श्रान्ते शरीरं श्रान्तं भवति, मनोविकृतौ शरीरे रोगा जायन्ते। एवमेव शरीरे श्रान्ते मनः श्रान्तं भवति, शरीरदोषे मनोदोषा उत्पद्यन्ते। रोगिणां मनोऽपि सम्यग्विचारयितुं न शक्नोति। मनसि प्रसन्ने शरीरसौन्दर्यं वर्धते, मनःशक्त्याऽनेके रोगा दूरीक्रियन्ते। इदमेव कारणं यत्सामान्या जना मनःशरीरयोरविच्छिन्नं सम्बन्धं मन्यन्ते।

घनिष्ठे सम्बन्धे सत्यपि मनःशरीरयोर्गुणस्वभावेषु महान् विरोधः। योरोपीयदर्शनेऽयं विरोधः प्रथमं डेकॉर्टमहोदयेन परिलक्षितः। तेन दृष्टम्—"शरीरं जडपदार्थैर्निर्मितम्, जडपदार्थाश्च क्रियाचेतनाहीनाः, अवकाशयुक्ताश्च। मनसो गुणास्त्वेतद्विरुद्धाः। मनः क्रियाशीलम्, चेतनमवकाशविरहितं च भवति" इति। तदनन्तरं योरोपीये दर्शने जडचेतनविरोधविषये दार्शनिकैर्बहु प्रतिपादितम्। क्रमेण योरोपदेशेऽस्मिन् विषये परस्परविरोधि मतद्वयं जातम्। केचिज्जडपदार्थानां सत्तामेव न स्वीकुर्वन्ति, ते सर्वमपि विश्वजातं चेतनसत्ताया अभिव्यक्तिमात्रं मन्यन्ते। अन्ये च चेतनपदार्थो जडपदार्थस्यैव सूक्ष्मं रूपमित्यभिदधति।

चेतनाविषयका विविधा वादाः

साम्प्रतं मनःशरीरयोर्विषये त्रयो विचाराः प्रामुख्येण प्रसिद्धाः। ते च—(१) पारस्परिकप्रतिक्रियावादः[१], (२) समानान्तरवादः[२], (३) जडवादः[३], व्यवहारवादश्च[४]।

(१) मनसः क्रियाणां प्रभावः शरीरे, शरीरस्य च क्रियाणां प्रभावो मनसि जायते। प्रसन्ने मनसि शरीरं क्रियाशीलम्, खिन्ने च मन्दं भवति। एवमेव स्वस्थं शरीरं स्वस्थान् विचारान् करोति। मनःस्वास्थ्यं शरीरस्वास्थ्याधीनम्। एवं शरीरस्य मनसश्च प्रतिक्रिया परस्परसम्बन्धिनी भवति। अयमेव पारस्परिकः प्रतिक्रियावादः।

---

१. Inter-acton.

२. Parallelism.

३. Meterialism.

४. Behaviourism.

In Public domain. Digitization Muthulakshmi Research Academy

(२) शरीरं मनश्च परस्परं स्वतन्त्रम्। न शरीरक्रियाणां प्रभावो मनसि भवति, नापि मनसः क्रियाणां शरीरे। परं सत्यप्यसम्बन्धे मनःशरीरे परस्परं सहगामिनी। वयं विचारयामो भाषामहे च। अत्र प्रथमा क्रिया मानसिकी, द्वितीया च शारीरिकी। सामान्या जना विचारणां कारणम्, भाषणं च कार्यं मन्यन्ते। परं समानान्तरवादिनां मते तयोर्मध्ये नैष सम्बन्धः। विचारणा पूर्वगामिनीनां मानसिकक्रियाणां फलम्, भाषणं च पूर्वगामिनीनां शारीरिकक्रियाणां फलम्। एतन्मतानुसारेण मनसः क्रियाणां कारणं पूर्ववर्तिनीषु मनःप्रक्रियास्वेवान्वेष्टव्यम्, न तु शरीरप्रक्रियासु।

(३) जडवादिनस्तु चेतनतां शरीरस्यैव विकारविशेषं मन्यन्ते। शारीरिकक्रियाः शरीरस्यैव नाडीतन्तुभिर्जायन्ते। विचारस्तु तासां ज्ञानमात्रं करोति। स तूदासीनो द्रष्टेव। अस्माकं शरीरे बहवः कोशाः[१] सन्ति। विचारणायामासु कोशासु परिवर्तनानि भवन्ति। परिवर्तनानामेव परिणामो विचारः। विचारः शरीरस्यान्यासां क्रियाणां सञ्चालनं करोति। एवं 'सर्वा अपि क्रिया मस्तिष्के[२] सुषुम्णायां[३] वा वर्तमानानां परिवर्तनानां परिणामः' इति जडवादिनः। नैतन्मतेन मनोरूपस्य कस्यापि चेतनपदार्थस्य स्वीकार आवश्यकः।

व्यवहारवादस्तु जडवादस्यैवापरं रूपम्। अस्य प्रवर्तको वाट्सनमहोदयः। तन्मते सर्वा अपि सरला जटिला वा क्रिया सहजक्रियाया एव परिवर्तितं रूपम्। यथा नासिकायां प्रविष्टेषु धूलिकणेषु शिङ्का भवति, यथा वा मण्डूकस्य पादे निविष्टायां सूच्यां तस्य पादे झटित्युत्क्षेपो भवति; तथैव सर्वा अपि जटिलाः क्रिया वातावरणेन सह सङ्घर्षाज्जायन्ते। नहि मनुष्ये इच्छाशक्तिनामकं किमपि स्वतन्त्रं वस्तु। तस्य सर्वा अपि क्रियाः स्वगता नियताश्च भवन्ति।

जडवादविपरीतश्चैतन्यवादो 'मस्तिष्कस्य शरीरस्य च समस्ताः क्रिया मनसो विचाराणामिच्छानां च परिणामः' इति मनुते। भारतीयाश्चैतन्यवादिन आत्मानममरं मन्यन्ते। आधुनिका भौतिकवैज्ञानिका अपीन्द्रियगोचरस्य जगतः परां कामप्यनिर्वचनीयां सत्तां स्वीकुर्वन्ति।

चेतनाया लक्षणानि

चेतना मनसः सारो यथा विस्तारो द्रव्यस्य सारः। विलियमजेम्समहोदयेनास्याः पञ्च लक्षणानि वर्णितानि। तानि चैतानि—

(१) चेतनायाः सम्बन्धः केनचिद् विशिष्टेन मनसा भवति। नह्येतादृश्याश्चेतनायाः सम्भवोऽस्ति, यस्याः सम्बन्धः केनापि मनसा न भवेत्। नहि कमप्यात्मानं किमपि मनो वा विना विचारो वेदना वा स्थातुं प्रभवितुं वा शक्नोति। अतः सर्वोऽपि विचारः कस्याश्चिद् वैयक्तिक-चेतनाया अंशो भवति।

(२) चेतनाऽन्तर्विचाराः सदा परिवर्तनशीला भवन्ति। मानसिकप्रक्रियासु सततं

---

१. Cell.
२. Brain.
३. Spinal cord.

In Public domain. Digitization Muthulakshmi Research Academy

परिवर्तनं जायते। संवेदनाऽपि प्रतिक्षणं परिवर्तते। प्रथमक्षणीया संवेदना द्वितीयक्षणीयाया भिन्ना भवति। एवमग्रेऽपि। एकदा आगतो विचारो न तेनैव रूपेण पुनरावर्तते।

(३) चेतना अविच्छिन्ना भवति, सरित्प्रवाहवत्। यथा निरन्तरं स्पन्दमाना लहर्यः परस्परमन्योऽन्यासु प्रवाहिताः प्रवाहसृष्टिं कुर्वन्ति, तथैव चेतनोर्मयः परस्परं मिलिता अविच्छिन्नं निरन्तरं चेतनाप्रवाहं रचयन्ति।

(४) विचारः स्वतो भिन्नेन केनचिद् वस्तुना सम्बद्धो भवति।

(५) चेतना चयनशीला भवति। सा सम्मुखस्थेषु वस्तुषु कानिचिच्चिनोति, कानिचिच्च परित्यजति।

'मनश्चेतनाप्रवाहः' इत्यपि जेम्समहोदयेन प्रतिपादितम्। वार्डमहोदयश्च चेतनामखण्डधारां निरूपयति। स्टाउटमहोदयस्य मतं यदस्माकं चेतनजीवनस्य घटकाः केनाऽपि चेतनास्वभावभिन्नेन वस्तुना पृथक्कर्तुं न शक्यन्ते। नापि त एवं विभाजयितुं शक्ताः, यथैको द्वीपोऽन्यस्मान्महासागरेण पृथक्क्रियते; यथैकः स्वरोऽन्यस्मान्मौनावकासेन पृथग्भवति। कस्यापि क्षणस्य ये केऽपि घटकाश्चेतनाया एकाकिन्यामवस्थायां प्रवेशं लभन्ते, ते झटिति परस्परं सँल्लग्ना भवन्ति। एवमेव क्रमिकावस्था अव्यवहितरूपेण सँल्लग्ना भवन्ति। एकस्याः समाप्तिरन्यस्याः प्रारम्भेणैकाकारा भवति!

चेतनायाः स्तराः

चेतनायास्त्रयः स्तराः सन्ति—

(१) चेतनायाः केन्द्रम्[1], (२) चेतनायाः सीमप्रदेशः[2], (३) अवचेतनः[3], अचेतनो[4] वा।

चेतनायाः केन्द्रे वस्तूनां स्पष्टा परस्परं पृथक् च संवेदना भवति। इदमवधानक्षेत्रं कथ्यते। इदं क्षेत्रं ध्यानावस्थितया चेतनया पूर्णं भवति। कश्चित्तडागं ध्यानेन पश्यति। तस्य तडागसम्बन्धिनी स्पष्टा, अन्यवस्तुभ्यः पृथक् च चेतना भवति। तडागज्ञानं तस्य चेतनाकेन्द्रे भवति। चेतनाकेन्द्रं परितश्चेतनायाः सीमप्रदेशो भवति। अयं वस्तूनामस्पष्टचेतनायाः प्रदेशो भवति। इदमनवधानक्षेत्रम्। तडागदर्शनकाले दर्शकस्तस्य समन्तात् स्थितान् वृक्षान् प्रत्यचेतनो न भवति। तेषामस्पष्टं ज्ञानं तु तस्य भवत्येव। तेऽपि चेतनायाः सीमप्रदेशेऽस्पष्टान् संस्कारान् त्यजन्ति। चेतनाद्वारस्याधस्तादधश्चेतनः स्तरो भवति। अस्य सत्ता प्रत्यक्षं न प्रतीयते। परोक्षप्रमाणैरेवायं सिद्ध्यति। अयं मनोभूमावन्तर्हितः कक्ष इवातीतानामनुभवानां भाण्डारः। अयं मानसिकप्रवृत्तीनां सङ्ग्रहालयः। फ्रायडमहोदय इममचेतनं वक्ति। अधश्चेतनाऽवस्था चेतनाद्वारवर्तिनी। नहि चेतनासीमप्रदेशेनास्याः सम्बन्धः। चेतनायाः सीमप्रदेशस्या-

---

१. Focus of consciousness.
२. Margin of consciousness.
३. Subconscious.
४. Unconscious.

In Public domain. Digitization Muthulakshmi Research Academy

स्पष्टं ज्ञानमस्माकं भवति, न त्वधश्चेतनस्य तथा। अधश्चेतनस्य न स्पष्टं, नाप्यस्पष्टं ज्ञानं भवति। तथाप्यधश्चेतनस्य सत्ता स्वीक्रियत एव मनोवैज्ञानिकैः। तत्र प्रमाणानि—

(१) स्मृतिः—वयमतीतकाले प्रत्यक्षीकृतानि वस्तूनि स्मर्तुं शक्नुमः; यतस्तान्यस्माकमवचेतनेऽधश्चेतने वा स्तरे तिष्ठन्ति।

(२) प्रत्यभिज्ञाऽपि तस्य सत्तायां प्रमाणम्। प्रत्यभिज्ञायां प्रत्यक्षज्ञानं चेतनास्तरमागतया प्रतिमया संयुक्तं भवति। अतः प्रत्यभिज्ञाऽधश्चेतनस्य सत्तामपेक्षते।

(३) ये प्रश्नाः शयनात् पूर्वमसमाहिता भवन्ति तेऽप्यनेकदा स्वप्नावस्थायां समाहिता भवन्ति। अत्र मनसोऽधश्चेतनाक्रियैव समस्यासमाधानकारणम्।

(४) रात्रौ ब्राह्ममुहूर्ते जागरणस्य सङ्कल्पं कृत्वा सुप्तो जनो ब्राह्ममुहूर्ते जागर्ति। अत्राऽप्यधश्चेतनैव कार्यपरा भवति।

(५) अज्ञातप्रेरणाऽकस्मान्निर्देशाश्चापि कविभिरन्यैश्चालौकिकप्रतिभाशालिभिः प्राप्यन्ते। ते च मनोऽन्तस्तलादागच्छन्ति। अधश्चेतनशक्तेः प्रमाणभूता भवन्ति।

(६) एवमेवार्जितः स्वभावः, भावना, स्वप्नाः, जनेषु राष्ट्रेषु च सहसा परिवर्तनान्यप्यधश्चेतनस्य साधकानि सन्ति। नह्यधश्चेतनं विनैषां स्थितिः सम्भवति।

चेतना, आत्मचेतना[१] च

चेतना वस्तूनां ज्ञानम्। सा च स्वभावतो बहिर्मुखी। कश्चिच्चन्द्रमसं पश्यति, तस्य चन्द्रमसश्चेतना भवति। दर्शनानन्तरं चन्द्रं प्रत्यनुरागसंवेगस्यानुभूतिर्भवति। अयमपि चेतनाया एव प्रकारः। परं यदा तस्य 'अहं चन्द्रं पश्यामि', 'मया चन्द्रः स्निह्यते' इति तथ्यस्य चेतना भवति, तदा सा 'आत्मचेतना' इति कथ्यते। इयं चेतनायाश्चेतना।

चेतनावानात्मा

चेतना व्यक्तिनिष्ठा भवति। तस्याः सम्बन्धः केनापि प्राणिना आत्मना वा भवति। आत्मा चेतनो द्रष्टा[२]। तस्य चेतनायाः पूर्वं सत्ता स्वीकर्तव्या। चेतना तु द्रष्टुर्दृश्यं प्रति प्रतिक्रिया। नहि द्रष्टारं विना चेतनायाः सत्ता सम्भवति। व्यक्तित्वञ्च द्रष्टुरनुभवानां समष्टिः। अयमेव द्रष्टा विशुद्धात्मा[३] अहङ्कारपदवाच्यो वा। विशुद्धात्माऽनुभवेऽन्तर्निविष्टो भवति, परं नासावनुभवविषयः। नहि विशुद्धाहङ्कारस्य द्रष्टुर्वाऽनुभवमूलकेनाहम्भावेन[४] तादात्म्यं सम्भवति। अनुभवमूलकात्मनि सर्वेषामपि चेतनान्तर्गतानां वस्तूनां समावेशो भवति, यानि तस्य ममपदवाच्यानि। मनुष्यस्यानुभवमूलकोऽहङ्कारः। तस्य सर्वेषामपि तेषां वस्तूनां महायोगः, यानि स आत्मीयानीति वक्ति। तेषु तस्या भौतिकाहङ्कारः शरीराङ्ग-वस्त्र-गृह-

---

१. Self-consciousness.
२. Subject.
३. Pure-self.
४. Empiricel self.

In Public domain. Digitization Muthulakshmi Research Academy

सम्पत्ति-वैभवादिरूपः, सामाजिकोऽहङ्कारः पुत्रकलत्रमित्रेष्टमानापमानरूपः, आध्यात्मिकश्चाहङ्कारो मानसिकशक्तिप्रवृत्तिरूपोऽन्तर्भूतोऽस्ति । एवमनुभवमूलके आत्मनि, द्रष्टर्वहङ्कारे वा भौतिकसामाजिकाध्यात्मिकानामात्मनां योगो भवति। अनुभवमूलकादात्मनः क्रमेण विशुद्धात्मनो विकासो भवति। वार्डमहोदयेन विकासस्य तिस्रो भूमिका वर्णिताः। प्रथममात्मा संवेदनानामादाता, तृष्णानामनुभविता च भवति—इयं तस्य प्रथमा भूमिका। ततः स कल्पनेच्छावान् भवति; कल्पनां करोति, पूर्वमेव वस्तूनां विचारं करोति, तानि प्राप्तुं चेष्टते च—इयमात्मनो द्वितीया भूमिका। अस्यामेव स विचारवान् सङ्कल्पशीलश्च भवति। तृतीयायां भूमिकायां भाविकालिकीं स्थितिं विचारयति, लक्ष्यं स्थिरयति, तत्प्राप्त्यै कृतिशक्तेश्च[1] प्रयोगं करोति ॥

1. Will power.

In Public domain. Digitization Muthulakshmi Research Academy

षष्ठोऽध्यायः

मानसिकप्रक्रियाः

चेतनाया[१] मूलप्रकाराः

चेतनायास्त्रीणि मुख्यकार्याणि—ज्ञानम्[२], वेदना[३], चेष्टा[४] च। चेतनायाः सम्पर्कः पदार्थेन जायते। अयं सम्पर्कस्त्रिप्रकारकः। तया मनो वस्तुविषये किञ्चिद् ज्ञानं प्राप्नोति। तस्याकारप्रकारोपयोगविषये किञ्चिज्जानाति। ततस्तत्सम्पर्केण मनसि कोऽपि संवेग उत्पद्यते, सुखस्य दुःखस्य वा वेदना जायते। वेदनाया एवान्यन्नामानुभूतिरिति। ततो मनसि तत्सम्बद्धं किञ्चित्कर्तुं प्रवृत्तिरुदेति। मनस्तत्स्वीकर्तुमस्वीकर्तुम्, परित्यक्तुं परिवर्तितुं वा प्रवृत्तं भवति। एवं चेतना प्रकारत्रयेण क्रियाशीला दृश्यते। ते च प्रकाराः—(१) ज्ञानं बोधो वा, (२) वेदनाऽनुभूतिर्वा, (३) चेष्टा, मनसः क्रियाशीलता वा। कश्चिद् गङ्गायास्तटं दशाश्वमेधं पश्यति। दर्शनेन तस्य तद्विषयकं ज्ञानं भवति। दर्शनेन तस्य मनसि सुखमुत्पद्यते। सा चानुकूलवेदना। ततस्तत्र विहर्तुं स्थातुं वा प्रवृत्तिर्भवति। एतास्तिस्रोऽपि प्रक्रियाः परस्परं पृथक् स्वतन्त्राश्च। नह्येतासामेकस्या अप्यन्यस्यामन्तर्भावः शक्यः। एवं ज्ञानम्, वेदना, चेष्टा चेति चेतनायास्त्रयो मूलप्रकाराः[५]।

ज्ञानादीनां मिथः सम्बन्धः

सर्वास्वपि मूर्तासु[६] मानसिकप्रक्रियासु[७] ज्ञानवेदनाचेष्टात्मकानि त्रीणि तत्त्वानि भवन्ति। परं कस्याञ्चित्प्रक्रियायां ज्ञानतत्त्वस्य प्राधान्यं भवति, कस्याञ्चिच्च वेदनायाश्चेष्टाया वा। यस्यां दशायां ज्ञानस्य प्रामुख्यं सा ज्ञानदशा कथ्यते। एवमेव वेदनायाश्चेष्टाया वा प्राधान्येन वेदनादशा चेष्टादशा वाभिधीयते। ज्ञानाद् वेदना, वेदनायाश्च चेष्टोत्पद्यते। मार्गे गच्छन् कोऽपि सुहृदं पश्यति। अवलोकनेन सुहृदो ज्ञानं भवति। ज्ञानाच्च सुखं जायते। ततो मित्रमालिङ्गितुमिच्छा जायते। चेष्टा च वेदनापूर्विका जायते। पूर्वं ज्ञानम्, ततो वेदना, ततश्चेष्टा—इत्ययमेव क्रमः साधारणः। न त्वेष नियमः। कदाचिच्चेष्टाया अपि वेदनोत्पत्तिर्भवति। मित्रालिङ्गनादपि सुखं जायते। चेष्टाऽसाफल्यं च दुःखजनकं भवति।

नहि ज्ञानं वेदनाहीनं भवति। ज्ञानेन सुखं दुःखं वा सम्पृक्तं भवत्येव। यदा ज्ञानमभीष्ट-वस्तुसम्बद्धं भवति तदा रुचिकरम्, यदा चाप्रियवस्तुनिबद्धं भवति तदा अरुचिकरं जायते। सुन्दरं

---

१. A consciousness.
२. Cognition.
३. Affection.
४. Condition.
५. Fundamental modes.
६. Concrcte.
७. Mental processes.

In Public domain. Digitization Muthulakshmi Research Academy

वस्त्ववलोक्य सुखं जायते,असुन्दरं चावलोक्याऽसुखम् । सुन्दरे वस्तुन्यवधानं भवति । अवधानं तु चेष्टैव । एवं ज्ञानं वेदनया चेष्टया च सम्पृक्तमिति स्पष्टम् । तत्र कदाचिद्वेदना तीव्रा, चेष्टा च क्षीणेत्यन्यदेतत् ।

एवमेव वेदनाऽपि चेष्टया ज्ञानेन च सम्पृक्ता भवति । वेदनाश्च सुखदुःखहर्षशोक-क्रोधप्रसादादिकाः । यत्र वेदनातत्त्वं प्रधानम्, तत्रापि गौणतया ज्ञानचेष्टे विद्येते एव । मार्गे गच्छन् यदा सर्पः पादसमीप एव सरन् दृश्यते, तदा भयस्य तीव्रवेदना सञ्जायते । परमियं वेदनाऽपि सर्पदर्शनतद्दंशसम्भाव्यानिष्टज्ञानजन्यैव । भयवेदना च पलायनरूपां क्रियां प्रेरयति ।

चेष्टायामपि ज्ञानवेदने सन्निहिते एव तिष्ठतः । चेष्टा ह्यैच्छिकं कर्म । नहि लक्ष्यसाधनयो-र्ज्ञानं विनैच्छिकं कर्म सम्भवति । नहि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तते । सर्वस्या अपि सङ्कल्पजनितचेष्टायाः पूर्वज्ञानमपेक्षितं भवति । एवमेव चेष्टा वेदनायाः परिणामो भवति । पिपासा जलं पातुम्, बुभुक्षा भोजनम्, बिभीषका पलायनम्, सौन्दर्यमवधानम्, कुत्सितं जुगुप्सां च प्रेरयति । ज्ञानं स्वतो निष्क्रियम्, वेदना हि क्रियाजननी ।

यथा ज्ञानवेदनाक्रियाः परस्परमुपकुर्वन्ति, तथैव विरुध्यन्तेऽपि । ज्ञानस्य प्राधान्यं वेदना-चेष्टयोरभिभवेनैव सिद्ध्यति । वेदनापि ज्ञानचेष्टे अभिभूयैव प्रामुख्यं लभते । तथैव ज्ञानवेदने गौणत्वं प्रापय्य चेष्टा मुख्यं पदं लभते । यदा च कोऽप्यध्ययने, मनोरमैतिहासिकदृश्यस्या-वलोकने, प्रवचनश्रवणे वा मग्नो भवति तदा वेदनाक्रिये स्थगिते एव भवतः । एवमेव चित्रघट-पटादिनिर्माणकाले ज्ञानवेदने अभिभूते भवतः । प्रियसङ्गहर्षितो वियोगव्यथितो वा ज्ञानशून्यो निष्क्रिय इव तिष्ठति । अत एव कथ्यते यन्महान्तश्चिन्तका भावनावेगशून्या अव्यावहारिकाः शान्ताः क्रियाविरहितास्तिष्ठन्ति । जरन्मीमांसक-वृद्धवैयाकरण-शुष्कतार्किकेत्यादिव्यङ्ग्यवचनानां मूलेऽयमेव विश्वासः । कवयो न विचारकाः कर्मण्या वेति प्रायो जना मन्यन्ते । ते त्वतिसंवेग-प्रवणाः । एवमेव श्रमिका न चिन्तनपरा भावुकाश्च भवन्ति । अपवादस्तु सर्वत्र सम्भवत्येव ।

ज्ञानस्य प्रकाराः

ज्ञानस्यानेके प्रकाराः—तत्र संवेदना[१]-प्रत्यक्षीकरण[२]-स्मृति[३]-कल्पना[४]-विचारादयो[५] मुख्याः । संवेदना तु निर्विकल्पकं ज्ञानम् । यथा बालकः प्रकाशपुञ्जमवलोकयति । तस्य प्रकाशसंवेदना भवति, न तु 'प्रकाश' इति ज्ञानम् । संवेदना ह्युत्तेजनया मनसि जनितं संस्कार-मात्रम् । प्रत्यक्षीकरणं संवेदनाया अर्थग्रहणम् । यदा च दर्शकः प्रकाशोऽयमित्यवबुध्यति, तदा प्रत्यक्षीकरणं भवति । तच्च संवेदनौत्तरकालिकम् । अतीतानुभवानां तेनैव क्रमेण पुनरुत्पादः स्मृतिः । अतीतानुभवाश्रयेण मनसि कस्यचिन्नवस्य वस्तुन उत्पादनं कल्पना । स्मृतिकल्पना-श्रयेण कस्यचित्तथ्यस्यानुसन्धानं तर्कः, विचारो वा ।

---

१. Sensation.
२. Perception.
३. Memory.
४. Imagination.
५. Thinking.

In Public domain. Digitization Muthulakshmi Research Academy

वेदनायाः प्रकाराः

वेदनाया अपि कतिपये प्रकारा भवन्ति। तत्र वेदना[१]-संवेग[२]-भावनाः[३] मुख्याः। वेदना तु संवेदनाजन्यं सुखम्, दुःखम्, प्रियः, अप्रियो वाऽनुभवः। संवेगो वेदनापेक्षया जटिलसहज-प्रवृत्तिप्रेरकस्य कस्यचिद् वस्तुनः प्रत्यक्षीकरणेन, स्मृत्या, कल्पनया वा जायमानोऽनुभूतिविशेषः। भावना च स्थायिनी संवेगात्मिका प्रवृत्तिः। न तु मानसिको व्यापारः। भावना संवेगमयः स्वभावः।

चेष्टायाः प्रकाराः

चेष्टायाः कर्मणो वाऽप्यनेके भेदा भवन्ति, यथा—संवेदनाप्रेरितम्[४], विचारप्रेरितम्[५], सहजप्रवृत्त्यात्मकम्[६], ऐच्छिकम्[७], अभ्यासजनितं[८] च। तत्र संवेदनाप्रेरितं कर्मोत्तेजितेन ज्ञानेन्द्रियेण मनसि जनितायाः संवेदनाया प्रतिक्रियारूपम्; यथा--कण्ठे निरुद्धो ग्रासः कासं जनयति। क्रियाया विचारेण जायमानाऽनायासा क्रिया विचारप्रेरिता क्रिया भवति; यथा—कमपि हसन्तं दृष्ट्वा हसनम्, पलायमानं वा दृष्ट्वा पलायनम्। उद्देश्यस्य स्पष्टज्ञानं विनैव जायमानानि सोद्देश्यानि कर्माणि सहजप्रवृत्त्यात्मकानि कथ्यन्ते; यथा—लूतया जालविस्तारः, पक्षिणा चाण्डजननात् पूर्वं नीडनिर्माणम्। ऐच्छिकं कर्म सङ्कल्पपूर्वकं भवति। तच्च सप्रयोजनं ज्ञानपूर्वकं च। तत्र लक्ष्यसाधन-हिताहित-शक्यत्वादिविचारोऽन्तःसन्निहितो भवति। अभ्यासजनितं कर्म यन्त्रचालितवत् पौनःपुनिकैच्छिक-कर्मणो परिणामः। नात्र चेतनानेतृत्वमावश्यकम्। चलनम्, भाषणम्, वाचनमित्यादीनि सर्वाण्यभ्यास-जनितकर्माणि। पुनः पुनः क्रियमाणानि सहजप्रवृत्त्यात्मकानि कर्माण्यप्यभ्यासजनितानि जायन्ते॥

---

१. Feeling.
२. Emotion.
३. Sentiment.
४. Sensory-motor-action.
५. Ideo-motor-action.
६. Instinctive action.
७. Voluntary action.
८. Habitual action.

In Public domain. Digitization Muthulakshmi Research Academy

सप्तमोऽध्यायः

अवधानम्

अवधानं नाम किम्[1] ?

'सावधानाः शृणुत', 'सावधानेन त्वयेदमनुष्ठातव्यम्', 'अनवधानतयेदं विनष्टं सर्वम्' इत्यादीनि वाक्यानि वयं प्रतिदिनं शृणुमः। 'नहि मे ध्यानमेकाग्रं भवति, कथं मे ध्यानं स्थिरं भवेत्' इत्यपि वयमनेकदा चिन्तयामः। अत्र स्वाभाविकः प्रश्नो भवति किमिदमनवधानं नाम ? को नाम ध्यानमित्यस्याभिप्रायः ? अथास्मिन् प्रसङ्गेऽवधानचर्चैवारभ्यते।

कस्मिंश्चिद्वस्तुनि मनस एकाग्रीकरणमवधानम्। तच्च मनसः सक्रियत्वम्, चेष्टा वा। अस्मिन् मनो वस्तुविशेषे केन्द्रितं भवति। तस्मिन्नेव वस्तुनि मनसः क्रिया प्रेरिता भवति। इदं वस्तुना मनसः समायोजनम्। स्वपरिवेशान्तर्गतं पदार्थविशेषं प्रति सजागरत्वं वाऽवधानम्। जाग्रदवस्थायां मनस्यसङ्ख्यानां बाह्यानामाभ्यन्तरिकाणां च शक्तीनामाघातो भवति, परं मनसः प्रतिक्रियाशक्तिः परिमिता। नहि मनः सर्वमाघातकं प्रत्याकृष्टं सत्प्रतिक्रियायां शक्तम्। अतः पुरुषः परिवेशात् किञ्चिदावश्यकतमं वस्तु कस्मैचित् क्षणाय चित्वा तत्प्रेरणां प्रति प्रतिक्रियां करोति। उत्तेजनां निर्धार्य तां प्रत्याकर्षणस्य क्रिया 'अवधानक्रिया' कथ्यते।

ध्यानं क्रियाविशेषः, न तु मनसः शक्तिविशेषः। नावधानं मनःशक्तिः, यस्याः प्रयोगं मनः स्वेच्छया कर्तुं प्रभवेत्। प्राक्तनानां मतेनावधानं काचिच्छक्तिः, यां वयमिच्छानुसारेण किञ्चिद् वस्तु प्रति प्रेरयितुं कस्माच्चिच्च निवर्तयितुं शक्ताः। अवधानेनैव पुरुषो दूषितां प्रवृत्तिं परित्यज्य साध्वीं गृह्णाति। परमाधुनिका मनोवेत्तार इदं मतमसमीचीनं मन्यन्ते। तन्मते नावधानम्, नापीच्छा नाम कापि मनसः शक्तिः। यथेच्छा नैसर्गिकीणामर्जितानाञ्च रुचीनां समष्टिः, तथैवावधानं पुरुषस्य केन्द्रीकृता निर्देशिता च क्रिया; यथा—काश्चिदुत्तेजनाः सरलतयाऽन्तःप्रविश्य पुरुषस्य प्रतिक्रियायन्त्रमधिकुर्वन्ति। द्वितीये क्षणे मानसिके शारीरिके च विन्यासे जातेन स्वाभाविकेन परिवर्तनेनाऽन्या उत्तेजनाः स्वाधिकारं स्थापयन्ति। यदा वयं कस्मिंश्चिद् ग्रन्थे कञ्चिदभीष्टं प्रसङ्गमन्वेषयामः, तदाऽस्माकं दृष्टिः सत्स्वप्यन्येषु रसमयेषु प्रसङ्गेषु न तत्र तिष्ठति, न वा तानवलोकयति। साऽभीष्टासु पङ्क्तिस्वेव स्थिरा भवति। तं प्रसङ्गं पठित्वा सन्तुष्टा वयमन्यत्रापि पश्यामः। तस्मिन् क्षणेऽस्माकं शारीरिको मानसिकश्च विन्यासस्तथा व्यवस्थितो भवति यथा स प्रसङ्गविशेषः सरलतयान्तः प्रविशति, तद्भिन्नं सर्वमनवलोकितं च भवति। अत्रैतदपि ज्ञेयं यन्न शरीरमनसोर्विन्यासेनावधानक्रिया सदा सम्भवत्येव। कदाचिद् वयमध्ययनाय सन्नद्धास्तिष्ठामः, पुस्तकमुद्घाट्य नेत्रे उन्मील्य मुखेन सस्वरं पाठं कुर्वन्तः; परमन्ते पश्यामो यन्न किमपि पठितम्।

---

१. Attention.

In Public domain. Digitization Muthulakshmi Research Academy

अवधानभेदाः

अवधानस्य प्राथमिकौ द्वौ प्रकारौ–(१) **निष्प्रयत्नम्**[१], (२) **सप्रयत्नं** च[२]। यदा विनाऽपि प्रयत्नेन काचिदुत्तेजना ध्यानमाकृष्य क्षणाय प्रतिक्रियायन्त्रेऽधिकारं स्थापयति, तदाऽवधानं निष्प्रयत्नं कथ्यते। सप्रयत्ने चावधाने प्रयत्नापेक्षा भवति। निष्प्रयत्नावधानस्योदाहरणानि–जलदरसितम्, सिंहगर्जनम्, व्योम्नि विद्युत्प्रकाश इत्यादीनि। नास्माकमिन्द्रियाणीमा उत्तेजना ग्रहीतुं प्रस्तुतानि भवन्ति। तास्तु स्वयमेव बलाद् ध्यानमाकर्षन्ति।

निष्प्रयत्नमवधानं द्विप्रकारकम्—(१) **स्वतो निष्प्रयत्नम्**[३], (२) **परतो निष्प्रयत्नं**[४] च। स्वतो निष्प्रयत्नावधानस्य कारणमस्माकमर्जिता रुचयः स्वभावा वा। केषाञ्चिद् ध्यानं सङ्गीतं प्रति स्वत एवाकृष्टं भवति, केषाञ्चिच्च क्रीडाः प्रति। अत्र सङ्गीतक्रीडाः प्रत्यर्जिता रुचिरेवावधानकारणम्। न च सङ्गीते क्रीडासु च स्वतो ध्यानाकर्षकता। सभायां जायमाने सङ्गीते केचिच्छृण्वन्ति सावधानम्, अन्ये चान्यत् किञ्चिच्चिन्तयन्ति। तत्रैव च यस्य रुचिः परद्रव्यापहरणे स निभृतं कञ्चुकनिहितस्य परेषां द्रव्यस्यापहरणेऽवहितो भवति। हट्टे पित्रा सह गच्छतो बालकस्यावधानमापणे विक्रीयमाणेषु क्रीडनकेषु भवति, पितुश्चान्येषु व्यवहार्यवस्तुषु। परतो निष्प्रयत्नावधानं तत्र, यत्रावधाने प्रयासो नापेक्ष्यते। परमवधानकारणं किञ्चिद् बाह्योत्तेजनं भवति, न त्वात्मप्रेरणा। यथाऽध्येतुर्ध्यानं बलीवर्दनिनादं श्रुत्वा पुस्तकमपहाय निनादकेन्द्रितं भवति, यथा कार्यसँल्लग्नः कश्चिच्छीतलं स्पर्शमनुभवन् कार्यं त्यक्त्वा स्पर्शावधानपरो जायते, एवंविधमवधानं स्वल्पकालिकमेव भवति। यद्यप्येतादृशा उत्तेजना बलात् प्रतिक्रिया जनयन्ति, नहि जनः समग्रशक्त्या ता निरोद्धुं प्रभवति, तथा समाप्तायामुत्तेजनायां पुनः कार्यसँल्लग्नतायां न काऽपि बाधा भवति। सप्रयत्नेऽवधाने कश्चित् प्रयास इष्यते। एवंविधेऽवधाने प्रयत्नावश्यकतायाः कारणं क्रियाया रुचिकरत्वाभावः शरीरमनोविन्यासेऽशक्तता वा भवति।

सप्रयत्नमवधानमपि द्विप्रकारकं भवति—(१) **अनुकूलं सप्रयत्नम्**, (२) **प्रतिकूलं सप्रयत्नं** च। तत्र प्रथमे यद्यपि प्रयत्नोऽपेक्ष्यते, तथापि प्रयत्नो रुचेरनुकूलो भवति। सङ्गीतप्रियाः सङ्गीतशिक्षणेऽवधानप्रयत्नं कुर्वन्ति। तत्रावधानं प्रयत्नजन्यं रुचिकरं च। एवंविधेऽवधाने प्रयत्नः प्रसन्नताहेतुः। कदाचिदरुचिकरोऽपि विषयः केनचिदन्येन प्रसादकरेण विषयेण सम्बद्धः सन् रोचको जायते। रोगिणः परिचर्या कष्टप्रदैव, परं परिचर्या यदेष्टजनसम्बद्धा भवति तदा रुचिमुत्पादयति। एवमेव बाल्यकालेऽध्ययनश्रमो भाविकालिकेन सुखेन सम्बद्धो नायासकरः प्रतीयते। प्रतिकूलं सप्रयत्नमवधानं सदा कष्टकरमुन्नतिविरोधि च। यदा जीविकोपार्जनाय रुचिविरुद्धं कार्यं कर्तुं विवशो भवति जनस्तदाऽवधानाय बहुः प्रयत्नोऽपेक्ष्यते। प्रगतिश्च स्वल्पा भवति। एवम्प्रकारकेऽवधाने मनोऽपि शीघ्रमेव श्राम्यति। स्टाउटमहोदयेनावधानभेदविषये लिखितम्—"यावदवधानमवधानस्य व्यक्तयेच्छया क्रियते, तावत्तदैच्छिकं कथ्यते, यच्चैवं नारभ्यते तदनैच्छिकम्। यदा त्ववधानस्य व्यक्तेच्छया, परमिच्छा-

---

१. Non-volitional.
२. Volitional.
३. Spontaneous.
४. Enforced.

In Public domain. Digitization Muthulakshmi Research Academy

विरोधानवधानं क्रियेत तदा तन्न केवलमनैच्छिकम्, प्रत्युतेच्छाविरुद्धमेव कथयितुं योग्यम्।" (मनोविज्ञानम्, पृ० ६२६,१६१०)

विषयानुसारेण—अन्तरवधानम्[1], बहिरवधानं[2] चेत्येतावपि भेदाववधानस्य भवतः। बहिरवधानमिन्द्रियगम्यपदार्थविषयकम्। यथा नदीवाणीतडागविषयकमवधानम्। अन्तरवधानं विचारप्रत्ययसंवेगेच्छाविषयकम्। मानसप्रत्यक्षविषयसम्बन्धि वा। बालाः प्रथमं बाह्यपदार्थानां प्रतिमा गृह्णन्ति। तेषामवधानमपि प्रथमं बाह्यं भवति, क्रमेण चान्तरं निष्पद्यते।

स्थितिभेदेनावधानस्य—अव्यवहितम्[3], अर्जितं[4] चेति भेदद्वयमपि वक्तुं शक्यते। यदावधान-विषयः स्वतो रोचकस्तदाव्यवहितमवधानम्; यथा—सङ्गीतक्रीडानृत्यादिविषयकम्। यदा च वस्तु केनाप्यन्येन वस्तुना संलग्नं सद्रोचकं भवति न स्वात्मना, तदा तद्विषयकमवधानम् 'अर्जितम्' कथ्यते। परीक्षोत्तीर्णतायै गणिताद्यभ्यासे, पुरस्काराय सङ्गीतक्रीडाद्यभ्यासे वाऽवधानमर्जितम्। बालानामवधानं प्रायेणाव्यवहितमेव भवति। अनैच्छिकमवधानं प्रायेणाव्यवहितं भवति, ऐच्छिकं चार्जितम्।

व्यापारभेदेनावधानं विश्लेषणात्मकम्[5], संश्लेषणात्मकं[6] च भवति। यदाऽवधानेन मनः किञ्चिद्वस्तुनोऽवयवान् विश्लेषयति तदा विश्लेषणात्मकमवधानम्; यथा—गां निशाम्य तस्या हस्तपादादिकेष्वङ्गेषु विश्लेषायावधानम्। संश्लेषणात्मकं चैतद्विरुद्धम्; यथा—मूलस्कन्धशाखा-पत्रादिवृक्षघटकविषयकमवधानं वृक्षैकत्वनिरूपणाय। ऐञ्जिलमतेन सर्वस्मिन्नप्यवधाने मात्राभेदेन संश्लेषणविश्लेषणे उभे अप्यन्तर्भवतः।

अवधानहेतवः[7]

अवधानस्य हेतवो वस्तुगताः[8], आत्मगताश्च[9] भवन्ति। परिवेशे उत्तेजनायाः शक्तिर्वस्तु-गतो हेतुः। अवधानपूर्ववर्ती मानसिको हेतुरात्मगतश्च कथ्यते। वस्तुगता हेतवोऽधोवर्णिताः—

(१) प्रेरकबलम्[10]—अन्येषु कारणेषु तुल्येषु प्रबलः प्रेरको निर्बलापेक्षयाऽधिकं ध्यानमाकर्षति। प्रखरतरः प्रकाशः, नादः, गन्धो वा बलादिन्द्रियाण्याकर्षति। कक्षायां पाठयत्याचार्ये ध्वनिविस्तारकशब्दः[11] छात्राणां ध्यानं पाठकात् प्रविचाल्य स्वं प्रत्याकर्षति, तेषां चेतनां चाधिकरोति।

---

१. Ideational.
२. Sensory.
३. Immediate.
४. Derived.
५. Analytical.
६. Synthetical.
७. Condition.
८. Objective.
९. Subjective.
१०. Strength of the stimulus.
११. Loudspeaker.

In Public domain. Digitization Muthulakshmi Research Academy

(२) दृश्यवस्तुनः आकाराः[१]—यानि वस्तूनि दृश्यानि तेषु बृहत्तराकृतिवन्त्युत्तरोत्तरं बलाद् ध्यानमाकर्षन्ति। चलचित्रनिर्मातारो नाट्यप्रयोक्तारोऽत एव चित्रनाट्यविज्ञापनं दीर्घाक्षर-मुद्रणेन कुर्वन्ति। जनसम्मर्दे दीर्घः पुरुषो लोकदृष्टिविषयो भवति, न तु साधारणः।

(३) प्रेरकस्य वैचित्र्यम् साधारणपदार्थापेक्षया विशिष्टोऽवधानकारकः। यस्मिन् पदार्थे कश्चिद् गुणविशेषो गुणातिरेको वा भवति, स सरलतयाऽवधानकारकः सिध्यति। यथा पुरुषेषु विचित्रवेषवान् विकलाङ्गः, रागेषु मन्दापेक्षया तीव्रा रक्तनीलहरितादयः।

(४) स्पष्ट आघातः—सुस्पष्टो निश्चितश्च प्रेरकोऽस्पष्टापेक्षया बलवान् भवति, ध्यानञ्चा-कर्षति। यदा कस्यचित् पाठभाषा स्पष्टा न भवति, काव्ये विचारग्रन्थे वा विचाराः स्पष्टा न भवन्ति; तदा पाठः काव्यं वा तन्द्रामेवोत्पादयति। सुस्पष्टं नोच्चारयतां पाठकानां कक्षायां छात्रा निद्रालव एव जायन्ते।

(५) आघातावृत्तिः—वारं वारं कथितं वस्तु, पुनः पुनश्च मार्गे मिलितो जनोऽवधानं जनयति। अनेनैव कारणेन ग्रामगीतेषु कस्यचिच्चरणस्य, परिहासे च कस्यचिच्छब्दस्य वाक्यस्य वा आवृत्तिर्मुहुर्मुहुः क्रियते।

(६) वैषम्यम्—दृश्यमाने कस्मिंश्चिद् वस्तुनि गुणाकारैस्तद्विरोधि पृथग् दृश्यते। 'चित्रे जनाः सर्वाङ्गेषु दृष्टिं निक्षिपेयुः' इति परस्परविरोधिनो वर्णा एकत्र समाह्रियन्ते। चित्राणां पृष्ठभूमिरपि विरोधिवर्णमयी क्रियते। एतदुद्दिश्यैव गौर्यो नार्यः कृष्णवर्णाः शाट्यो धारयन्ति, कृष्णाश्च श्वेतवर्णाः। महतो वृक्षस्याधस्तात् स्थितः खर्वस्तरुरपि दृष्टिविषयो भवति। पुरुषमध्ये च वामनः।

(७) परिवर्तनम्—प्रेरकस्य परिवर्तनं ध्यानाकर्षकमिति प्रतिक्षणमनुभूयत एव। उच्चैः शब्दोऽपि बहुकालमपरिवर्तितो नावधानकरो भवति। परं यदि तस्मिन् केनापि प्रकारेण परिवर्तनं विधीयेत, तदा स प्रभावकारी भवेदिति वुडवर्थमहाशयैर्निरूपितम्। एतदेव कारणं यद् गतिशीलं वस्तु स्थिरापेक्षया शीघ्रं ध्यानमाकर्षति। गतिः स्वयमेव परिवर्तनकारणम्। किञ्चिदपि यानं यदा स्थितं भवति तदा तन्न कोऽपि पश्यति, यदा च गतिमज्जायते तदा सर्वेऽपि पश्यन्ति। विक्रेतारः स्ववस्तुविज्ञापकं पट्टं गतिशीलया विद्युता प्रकाशयन्ति। पिल्सबरीमहोदयानां कथनं यद् वन्याः पशवः स्थितादाखेटकान्न बिभ्यति, चलन्तञ्च तं समीक्ष्य पलायन्ते।

(८) नावीन्यमपि ध्यानकारणं भवति। परिहितवस्त्रापेक्षाया नवं वस्त्रम्, परिचितवक्त्रा-पेक्षयाऽपरिचितो वक्ता, तथैव च नवं स्थानम्, नवं पुस्तकम्, नवोऽध्यापकः, नवश्छात्रो ध्यानाकर्षणकारणं भवति।

(९) कालावधिः—उत्तेजना यदि स्वल्पकालमेव तिष्ठति, तदा सोपेक्षिता भवितुं शक्नोति, न तु दैर्घकालिकी तथा। यो याचको विस्तरेण बहुकालं च याचते, तस्मै किञ्चिद प्रदीयते। व्यापारवाणिज्यप्रतिनिधयोऽनयैव प्रणाल्या विक्रये कृतकार्या भवन्ति।

अवधानस्यात्मगता हेतवोऽधस्ताद्वर्ण्यन्ते—

(१) रुचिः[२]—ध्यानं तेष्वेव वस्तुषु केन्द्रितं भवति येष्वस्माकं रुचिर्भवति। राजनीति-

---

१. Size of visible objects.
२. Interest.

In Public domain. Digitization Muthulakshmi Research Academy

प्रणयिनो राजनीतिचर्चायां रुचिं प्रदर्शयन्ति। सङ्गीतप्रेमिणः सङ्गीतचर्चां सावधानतया शृण्वन्ति, स्त्रियश्च गृहव्यवस्थावार्तासु लीना भवन्ति। व्यापारपरेभ्यो व्यापारवृत्तं रोचते। रुचिर्ध्यानमाकर्षति। यस्मिन् पदार्थे वयं ध्यानमेकाग्रमिच्छामस्, तस्मिन् रुचेः प्रवर्धनमावश्यकम्। रुचिश्च प्रायः प्रवृत्त्याश्रिता[1], स्वभावाश्रिता च। महत्त्वाकाङ्क्षिणो जना राजनीतौ सामाजिकेषु च कार्येषु रुचिं प्रदर्शयन्ति, भावप्रवणाश्च कलासु। जेम्समहोदयेनोक्तम्—जनानां रुचेर्हेतुस्तेषां प्रवृत्तिरेव। प्रतिद्वन्द्विनीषु संवेदनासूपस्थितासु प्रथमं स्थानं कस्यै प्रदेयमित्यस्य निश्चायिका प्रवृत्तिरेव भवति। प्रवृत्तेर्निर्माणं जन्मना ततोऽनन्तरं मानसिकेन विकासेन च भवति। नादसङ्कुले स्थाने, यत्रोच्चैरुच्चारितोऽपि शब्दो नाकर्ण्यते, प्रणयी स्वप्रियतमाया मन्दोच्चारितमपि नाम श्रोतुं प्रभवति।

(२) मूलप्रवृत्तयः[2]—अवधानस्य नेत्र्यः। बुभुक्षितस्य ध्यानं खाद्ये, पिपासितस्य पानीये, कामुकस्य प्रणयिन्यां केन्द्रितं भवति, न चैतदर्थं बाह्यप्रयत्नस्यावश्यकतानुभूयते। हिंसकमायान्तं निशाम्य प्राणिनोऽवश्यं पलायन्ते, प्राणरक्षोपायान् वा मृगयन्ति। यद् वस्तु सहजप्रवृत्तिं जागरयति तद्वस्तु प्रत्यवधानं प्रेरयति सहजप्रवृत्तिः।

(३) इच्छाः[3]—अभावज्ञानमिच्छां जनयति। ज्ञानस्य मयि न्यूनतेति भावना ज्ञानमर्जयितुमिच्छामुत्पादयति। धनाभावश्च धनमर्जयितुमिच्छाम्। अनेकेषु च वस्तुषु तच्छीघ्रं मन आकर्षति यस्येच्छा मनसि प्रबला भवति। तासु वार्तासु जनानामवधानं शीघ्रं भवति यास्तेषां काञ्चिदिच्छां पूरयितुं क्षमा भवन्ति, काञ्चिदुद्देश्यान् वा साधयन्ति। बधिरा स्वविषयिणीं वार्तां शीघ्रं शृण्वन्ति।

(४) संवेगाः[4]—संवेगोऽप्यवधानकरणम्। स्नेहशोकानन्दभयघृणादयः संवेगाः। ते च यत्सम्बद्धा भवन्ति तदवधानविषयतां भजन्ते। शत्रोर्दोषाः, प्रियस्य च गुणा ध्यानमाकर्षन्ति। स्वस्थो जनः परगुणैराकृष्टो भवति।

(५) गतानुभवाः[5]—अस्माकमतीतानुभवा वस्तुविशेषविषये रागं द्वेषं वा द्रढयन्ति। दुग्धदग्धा मार्जारी तक्रमप्याघ्रायैव पिबति। अनुभवेनास्माकं मतं दृढं भवतीदं वस्तु मे हिताय, इदञ्चाहिताय। ड्रीमहोदयेन स्वकीये 'मनोविज्ञानस्य भूमिका' इत्याख्ये ग्रन्थे लिखितम्—"येषां पदार्थानां शुभाशुभपरिणामा विज्ञाता भवन्ति ते झटित्येव ध्यानकेन्द्रमधिकुर्वते। य आखेटकः सर्पस्यार्थं विजानाति तस्य ध्यानं सर्वानपि शब्दानुपेक्ष्य सर्पसरणशब्दे एव संलग्नं भवति। तस्य श्रोत्रं सरणध्वनिमेव गृह्णाति, न त्वन्यान् शब्दान्" इति।

(६) प्रशिक्षणम्[6]—इदमप्यवधाननिर्धारकम्। यो यस्मिन् विषये प्रशिक्षितो भवति स तस्मिन् विषयेऽधिकं ध्यानं ददाति। संगीतज्ञं गीतध्वनिराकर्षति, कविं काव्यपङ्क्तिः, द्यूतकरमक्षः,

---

१. disposition.
२. Instincts.
३. Desire.
४. Emotion.
५. Past experiences.
६. Training.

In Public domain. Digitization Muthulakshmi Research Academy

नृत्यकुशलं नूपुररसितम्। प्रशिक्षणेन स्वभावो निर्मीयते। स्वभावश्च नरं पूर्वानुभवदिशा व्यवहर्तुं प्रेरयति।

(७) सामाजिको[१] वंशानुक्रमजश्च[२] प्रभावः—अपि ध्यानैकाग्र्यकारणे भवतः। सामाजिकः प्रभावो जनेषु स्पष्ट एव। समाजस्य प्रभावो न केवलं जनानां विचारेषु, चिन्तनपद्धतावेव वा, कार्येषु व्यवहारेषु चापि भवति। नैतिकी मर्यादा, धार्मिकी श्रद्धा, कौटुम्बिकाश्च सम्बन्धाः समाजेन प्रभाविता भवन्ति। यस्य परिपोषणं यस्मिन् समाजे भवति स प्रायस्तनुशिष्टो भवति। समाजचिन्ताऽप्यवधानकरणं भवति। चरित्रेऽवधानं समाजभियेति विदितमेव। परीक्षायां प्रथमां श्रेणीं प्राप्तुमिच्छन् छात्रोऽनवरतं परिश्रमं करोति, नाट्यप्रयोक्ता प्राणपणेन रूपकं समायोजयति, सर्वचित्तेन चाभिनयं करोति। सर्वमेतत्सामाजिकीं प्रशंसां लब्धुमिच्छयैव सम्पाद्यते। समाजकीर्तिलिप्सैवात्रावधानकारणम्। एवमेवाव्यवहितो वंशानुक्रमोऽवधाननिश्चायको भवति। मूलप्रवृत्तयो यस्य कारणानि निरूपितानि पूर्वम्, तदवधानं वंशानुक्रमेण प्रभावितं जायते। संगीतज्ञस्य पुत्रः सङ्गीतेऽवधानपरो भवति। तक्षणः पुत्रस्य ध्यानं तक्षणे सारल्येन सँल्लग्नं भवति। सत्यमेवोक्तं पिल्सबरीमहोदयेन 'मनोविज्ञानस्य मूलतत्त्वानि' नामके स्वपुस्तके—"यदि कश्चित् पृच्छेत् कथं पुरुषोऽवसरविशेषे पदार्थविशेषं प्रत्यवहितो भवतीति? तदोत्तरं दातुं शक्यते बाह्यवस्तूनां स्वभावेन, तत्कालस्य मनोदशाभिः, गतानुभवेनान्ते च तस्य वंशानुक्रमेण" इति।

वस्तुगता आत्मगताश्च हेतवोऽवधाने परस्परं सहयोगेन व्यवहरन्ति। रुचयोऽवधान-सञ्चालिका भवन्ति। तासां सन्तुष्ट्यै वस्तुषु ध्यानं दीयते। तथापि स्वगता हेतवो वस्तुगतान् हेतून् शासति। आत्मगतान् हेतून् विना वस्तुगता हेतवः प्रभावहीना भवन्ति। अत एव कदाचिदात्मरता जनास्तीव्रं मेघरसितमपि नाकर्णयन्ति। बाह्यावधानविरतिविषये स्थिरप्रज्ञानां विदेहादीनां कथास्तु सुप्रसिद्धा एव।

अवधानस्य विस्तारः[३]

अस्माकं ज्ञानेन्द्रियाण्येकस्मिन् क्षणे एकामेवोत्तेजनां ग्रहीतुं सन्नद्धानि भवन्ति। अतो वयमेकस्मिन् क्षणे एकामेवोत्तेजनां प्रत्यवधानक्रियां कर्तुं शक्नुमः। एकदा वयमेकस्मिन्नेव वस्तुनि ध्यानं केन्द्रितं कर्तुं पारयामः। नहि कदाप्यस्मन्मनःसम्मुखमेकतोऽधिका विषया भवन्ति। यदा वयं गां पश्यामस्तदाऽस्माकं ध्यानं समष्टौ भवति, न त्ववयवेषु। यद्यापाततः प्रतीयते यद् वयमेकवारं बहुवस्तुषु ध्यानं दद्मः, परमियं भ्रान्तिरेव। एवमेव शतावधानित्वकल्पनाऽपि भ्रान्तैव। भ्रान्तेश्च कारणं दक्षता। यथा यथा पुरुषः स्वव्यवसाये दक्षो जायते, तथा तथा क्षिप्रमेकस्माद्वस्तुनोऽन्यद् वस्तु प्रति ध्यानमपसारयितुं शक्नोति। यदा चैकः पुरुषो लेखनभाषणश्रवणक्रियाः सहैव कुर्वन् दृश्यते, तदापि न स एताः क्रिया सह करोति। एकां परित्यज्यान्यस्याः प्रारम्भस्तथा क्षिप्रं भवति यथा विरामकालो न परिलक्ष्यते, तथापि क्षणशतांशकालं क्रिया निरुद्धा भवत्येव। क्रियानिरोधकालस्तु दक्षताभेदेन भिद्यते।

---

१. Social influence.
२. Heredity.
३. The span of attention.

In Public domain. Digitization Muthulakshmi Research Academy

एकवारं जनः कति वस्तूनि द्रष्टुं शक्नोति, कति च श्रोतुमिति विषये वैज्ञानिकैर्बहु परीक्षणं कृतम्। दृष्ट्यवधान[1]-मापाय[2] अनेकानि वस्तूनि सहैव नेत्राग्रे उद्घाट्यन्ते।टेचिस्टॉस्कोप[3] नामकयन्त्रसहायतया च तथा व्यवस्था क्रियते यथा दर्शको वस्तुषु दृष्टिं निधातुं शक्नोति, परं नाक्षिणी चालयितुं नापि वस्तूनि गणयितुम्। वस्तूद्घाटनावधिश्चात्यल्पो भवति, सेकण्डस्य शततमभागात्पञ्चमभागं यावत्। उद्घाटितानि वस्तूनि स्पष्टानि सरलानि च भवन्ति। यथा बिन्दव, रेखाः, अङ्काः, अक्षराणि वा। कदाचिच्च जटिलानि; यथा—त्रिभुजाकृतिः, शब्दा वा। प्रयोगैः स्पष्टं यज्जना एकवारं चतुर्षुपञ्चसु वा वस्तुषु ध्यानं दातुं शक्नुवन्ति। एवमेव श्रवणविस्तारपरीक्षया विदितं यज्जन एकवारमष्टौ ध्वनीन् श्रोतुं समर्थोऽस्ति। मायर्समहोदयेन 'प्रायोगिकं मनोविज्ञानम्' नामके स्वग्रन्थे प्रतिपादितम्—"यदा घण्टा सेकण्डस्य चतुर्थभागानन्तरं प्रतिवारं शब्दं करोति, तदा पुरुषोऽष्टौ ध्वनीन् ग्रहीतुं शक्नोति। तदनन्तरं तस्य निर्णयोऽविश्वसनीयो जायते" इति। पिल्सबरी-महोदयमतेन "लयविहीना अष्टौ घण्टाशब्दा एकवारं श्रोतुं शक्यन्ते, लययुक्ताश्च चत्वारिंशदष्टानां ध्वनीनां पञ्च समूहा वा"इति।

ध्यानावधिः[4]

ध्यानस्यावधिरत्यल्पो भवति। कस्मिंश्चिदेकस्मिन् वस्तुनि, बिन्दौ, रेखायां वाऽस्माकं ध्यानमेकं सेकण्डं यावत् स्थिरं भवति। एकं वस्त्वस्माकं चेतनाकेन्द्रे नैकस्मात् सेकण्डादधिकं तिष्ठति। ततः समीपादन्यत् किञ्चिद्वस्तूपसृत्य पूर्ववस्तु चेतनाकेन्द्रादपसारयति, स्वयञ्चाधितिष्ठति। नेत्रे पूर्व-वस्तुनि स्थिरे भवतः पूर्ववदेव, परं ध्यानमन्यत्र भवति। एवं ध्यानं स्थिरं भवत्यपसरति च। अस्य प्रमाणं दूरस्थिताया घटिकायाः शब्दः। दूरस्थिता घटिका 'टिक् टिक्'शब्दं करोति। स शब्दः क्षणं श्रूयते, ततोऽपयाति। पुनर्यदा ध्यानं दीयते तदा पुनरपि श्रूयते। अस्य कारणं ध्यानस्य विचलनमेव[5]। कस्यचिद् विषयस्यावयवेषु ध्यानं क्रमेण परिवर्तमानं तस्मिन् विषये बहुकालं तिष्ठति। यदा वयं पुस्तकं पठामस्तदा प्रतिशब्दमुत्तेजनायां परिवर्तनं भवति, प्रतिपङ्क्ति, प्रतिवाक्यम्, प्रत्यनुच्छेदम्, प्रतिपृष्ठञ्च। अतो नावधानभङ्गप्रतीतिर्भवति।

एवं ध्यानं द्विप्रकारकं व्याख्यातुं शक्यते—स्थिरम्[6], चलं च[7]। कस्मिंश्चिद्वस्तुनि मनसः स्थिरीकरणे ध्यानं स्थिरं भवति। यथा वयं कस्याञ्चित् कथायां ध्यानं स्थिरं कुर्मः। परमवधानं स्वभावतश्चञ्चलं भवति। तदेकं वस्तु त्यजद् द्वितीयमुपगच्छति। इदं चलं ध्यानम्। नानयोः परस्परं विरोधः। यथा पुस्तकं पठतो दृष्टिः शब्दाच्छब्दान्तरं याति, परं पङ्क्तौ स्थिरा भवति, तथैव पठ्यमानायां कथायामवधानं प्रतिक्षणं परिवर्तमानमपि कथायां स्थिरं भवति। तत्र स्थिरावधानस्यान्तर्गतं चलमवधानं भवति।

---

१. Visual attention.
२. Measurement.
३. Tachistoscope.
४. Duration of attention.
५. Shifting.
६. Sustained.
७. Shifting.

In Public domain. Digitization Muthulakshmi Research Academy

अवधानस्य वैशिष्ट्यम्[1]

(१) नावीन्यमवधानस्य पृष्ठभूमिः। नवे एव वस्तुन्युपस्थितेऽवधानं भवति। नवीनता चाऽनुसन्धानप्रवृत्तिं प्रेरयति। नवमविदितं भवति, अविदितस्यैवानुसन्धानं क्रियते।

(२) तन्निरन्तरं विदितादविदितं धावति।

(३) अवधानं सदा कुत्रचित्सँल्लग्नं भवति। प्रतिक्षणं पलायमानमपि तद् यत्किञ्चिदाश्रयत्येव। न च कदाचिन्निराश्रितं तिष्ठति।

(४) परमवधानाश्रयेण रुचिकरेण भाव्यम्। नारोचके वस्तुनि मनस्तिष्ठति। येषु वस्तुषु स्वीया रोचकता न सम्भवति, तेषु अन्यवस्तुयोगेन कृत्रिमा रोचकतोत्पाद्यते; यथा—स्वास्थ्यलाभलोभेन व्यायामे रुचिवर्धनम्। कालान्तरेण तद्विषये प्रतिक्रियाऽभ्यासो दृढो जायते।

(५) ध्यानं चयनात्मकं[2] भवति। तद् बहुषु रोचकतमं निर्वाचयति।

(६) तत्परिवर्तनशीलमप्यस्ति। एकस्माद्वस्तुनो वस्त्वन्तरं पलायते। परमाघातानां क्रमः[3] तमेकेन यथा नेतुं समर्थो भवति। अत एवैकस्मिन् विषये प्रतिक्षणं परिवर्तमानमप्यवधानं स्थिरं प्रतीयते।

(७) एकस्मिन् क्षणे ध्यानस्य क्षेत्रमतिसङ्कुचितं भवति।

(८) अवधानेनाघातचित्रं स्पष्टं भवति। प्रत्याघात[4]सन्नद्धताघातं चेतनाकेन्द्रे प्रमुखतया स्थापयितुं चेष्टा। तदाघातविषयका क्षुद्रा अपि विशेषाः प्रामुख्यमाप्नुवन्ति। तस्य महत्त्वमपि वर्धते। नहि तस्मिन् कोऽपि प्रतिद्वन्द्वी आघातस्तं चेतनाकेन्द्रान्निष्कासयितुं समर्थो भवति। तदा तीव्रशब्देन च तद्विषयकाण्यस्माकं मतानि शुद्धतमानि भवन्ति।

(९) अवधानस्य प्रभावोऽस्माकं गतिसमायोजनेऽपि[5] भवति। अवधानमुद्रा[6] ज्ञानेन्द्रियाणां केनचिद्वस्तुना समायोजनाय भवति; दृश्येन नेत्रयोः, ध्वनिना श्रोत्रयोः समायोजनं यथा। यानि च ज्ञानेन्द्रियाणि समायुक्तानि न भवन्ति, तान्यपि नियन्त्रितानि जायन्ते; यथा श्रवणयोः समायोजनं भवति, परं नेत्रेऽपि ध्वनिदिशायां परिवर्तिते भवतः।

(१०) अवधानकालेऽनावश्यकाघातानां प्रतिरोधस्य[7] प्रवृत्तिर्भवति। अस्थिलेहनव्यग्रः सारमेयः परिचितबालैरपि कृतस्पर्शो गुरगुरायते।

---

१. Characteristic.

२. Selective.

३. Succession of stimuli.

४. Response.

५. Motor-adjustment.

६. Attitude of being attentive.

७. Resistance.

In Public domain. Digitization Muthulakshmi Research Academy

अनवधानता

यदा जनः किमपि वस्त्ववधानविषयं करोति तदा तस्य मनस्तस्माद्वस्त्वन्तरं पलायते। इयं पलायनक्रियाऽवधानभङ्गोऽनवधानता वा कथ्यते। नात्रास्वाभाविकं किञ्चित्। यदा शिक्षकः शिष्यमनवधानतायै निर्भर्त्सयति तदापि शिष्यस्यावधानं रोचकतरे वस्तुनि भवत्येव। यतो नहि ध्यानस्य नितान्तमभावो निरवधानता नाम। एकस्मिन् वस्तुन्यनवधानताऽन्यस्मिन् वस्तुन्यवधानमेव साधयति। तदाऽवधानमनिष्टे वस्तुनि भवति। अत एव क्षोभजनकम्। "अवधानाभावस्तु कदाचिदेव भवति यथा तीव्रावेशाघाते, सुषुप्त्युपक्रमे च। जाग्रदवस्थायामवधानं यत्र कुत्रचिदाश्रितं भवत्येव। दुर्लभायामपि पूर्णानवधानतायामांशिक्यनवधानाताऽस्माकं जीवने भवत्येव। तादृशानि वस्तून्यस्माकं चेतनायां विद्यमानानि सन्ति, येष्वस्माकं ध्यानं केन्द्रितं न जायते। यतो मनः पूर्वमेवान्यस्मिन् वस्तुनि सँल्लग्नं तिष्ठति" इति स्टाउटमहोदयेन 'मनोविज्ञानस्याधारः' इति नामके स्वग्रन्थे प्रतिपादितम्।

अवधानस्य वशीकरणम्

यदा वयमेकाग्रचित्तेनाध्येतुं तिष्ठामस्तदा मित्राणां वार्तालापोऽवधाने विघ्नमुपस्थापयति। यदा वयं सुहृद्भिः सह वार्तालापं कुर्मस्तदा समीपस्थगृहवाद्यध्वनिर्बलादस्माकं कर्णकुहराण्याक्रामति। अवधाने च काठिन्यमुत्पादयति। कथमेतत्सर्वं विघ्नकारकं भवति? अत्र बुडवर्थमहोदयस्य मतम्—"ध्यानभङ्गस्य कारणं तद्वस्तु यद्ध्यानाकर्षणाय प्रतियोजनां विधत्ते। तत्पक्षे कानिचिदनुकूलकारणानि भवन्ति। तद्बलेन च तत्स्थिरावधानविरुद्धमाचरति" इति।

ध्यानविक्षेपः[1] कतिभिश्चिदुपायैर्विजेतुं शक्यते। यत्कार्यं सम्पूरयितुं यत्नः क्रियते तत्र पूर्वापेक्षयाऽधिकायाः शक्तेरुपयोगः कार्यः। नाट्ये यदि जनानां पारस्परिकेण सम्भाषणेन पात्रस्यावधाने विघ्नो जायते तदा तेन तीव्रतरस्वरेण भाषितव्यम्। एवमेव छात्रैरेवंविधे विघ्ने उपस्थिते द्वाराणि पिधाय तारस्वरेण पठितव्यम्, विघ्नानुपेक्षितुमभ्यासश्च कार्यः। वारं वारमागता विघ्ना उपेक्षितुं शक्यन्ते। येषां गृहाणि मार्गसमीपे भवन्ति ते वाहनादिध्वनिं कोलाहलं च सोढुमभ्यस्ता जायन्ते। एतच्च निषेधात्मकं समायोजनम्। उपस्थितेषु विघ्नेषु, रुचिकरेषु कार्येष्ववधानं देयम्; विघ्नाश्च विस्मर्तव्याः। विघ्नचिन्तया विघ्नेष्ववधानं भवति। कदाचिद् विघ्नं कर्तव्येन संयोज्यापि तस्मिन् विजयोऽवाप्यते। यथा कश्चित् पुरुषो वीणावादनेन सह गीतालापान् शिक्षते। यदा स आलापमभ्यस्यति तदा वादनं बाधकं भवति, यदा च वादनं शिक्षते तदा गीतालापो बाधको भवति। परमभ्यासेन स द्वावपि समकाले सम्पादयितुमभ्यस्तो भवति। विघ्नानां स्वल्पा मात्रा कार्यक्षमतां वर्धयति। विघ्नास्तु प्रेरणादायका एव भवन्ति यदि जने तान् विजेतुं शक्तिर्भवति। यदा च ते बलवत्तरा जायन्ते, मनश्च तत्प्रतिरोधेऽसमर्थं भवति, तदैव श्रान्तिरनुभूयते, अवधानं च नश्यति। अवधानाय शारीरिकं मानसिकं स्वास्थ्यमप्यावश्यकम्। शरीरेण शक्तानामपि मनो रुग्णं भवति। मनसा च शक्तानां शरीरं निर्बलं भवितुं शक्नोति। एतयोर्द्वयोरपि स्वास्थ्यं प्रथममावश्यकम्॥

1. Distraction.

In Public domain. Digitization Muthulakshmi Research Academy

अष्टमोऽध्यायः

संवेदना[1]

संवेदनायाः स्वरूपम्[2]

मनसः प्रथमं सरलतममश्लिष्टं ज्ञानं संवेदना। तच्च निर्विकल्पं निर्विशेषं वा ज्ञानमपि कथ्यते। तच्चेन्द्रियाणां बाह्यपदार्थैः सह सम्पर्काज्जायते। यदाऽस्माकं किमपि ज्ञानेन्द्रियं बाह्यपदार्थेन सम्पृक्तं जायते, यद्वा यदा ज्ञानेन्द्रियार्थसन्निकर्षो भवति, तदा तत्रस्था ज्ञानवाहिन्यो नाड्य उत्तेजिता भवन्ति। ज्ञानेन्द्रियोत्तेजना च सुषुम्णामार्गेण मस्तिष्ककेन्द्रं प्राप्नोति। तदा विशिष्टमिन्द्रियजं ज्ञानमुत्पद्यते। एवं स्पष्टं यदुत्तेजना बोधेन्द्रियस्याग्रिमे भागे प्रतिक्रियां करोति। तज्जन्यं संस्कारं बोधस्नायवो मस्तिष्के स्थितं बोधकेन्द्रं प्रापयन्ति। ततो मनसि संवेदना जायते। उत्तेजनाश्च द्विविधा भवन्ति—बाह्यस्थाः, अन्तःस्थाश्चेति। कोऽपि बाह्यः पदार्थो बाह्योत्तेजनां जनयितुं शक्नोतीन्द्रियसन्निकर्षमवाप्य। अन्तःस्था उत्तेजनास्तु क्षुत्पिपासाश्रान्तिपीडादयः। ताः शरीरस्यान्तरिकीभ्यो दशाभ्य उत्पद्यन्ते। नहि तासां किमपि ज्ञानेन्द्रियं भवति, गन्धादीनां नासादिवत्। संवेदना अज्ञातार्थः संस्कारः। ज्ञातेऽर्थे संवेदना प्रत्यक्षज्ञाने परिणमति। वार्ड महोदयस्य कथनं यद् विशुद्धा संवेदना मनोवैज्ञानिककल्पनैव। नहि प्रौढानां विशुद्धा संवेदना सम्भवति। नवजातः शिशुः संवेदनानामर्थं न विजानाति। स मृदङ्गशब्दं शृणोति, न च जानाति 'मृदङ्गशब्दोऽयम्' इति। तस्य संवेदना विशुद्धा। प्रौढास्तु ध्वनिं निशम्य सद्य एव मृदङ्गस्यान्यस्य कस्यापि वा वाद्यस्यायं ध्वनिरित्यर्थं गृह्णन्ति। अतस्तस्य सविकल्पकमेव प्रत्यक्षं सम्भवति। यदा वयं किमपि पदार्थं पश्यामस्तदा तदभिज्ञानात् पूर्वं निरर्थकं ज्ञानं चक्षुरिन्द्रियोत्तेजनेन भवति। इदं ज्ञानं 'संवेदना' कथ्यते। यदा च स पदार्थः परिचीयते तदा सैव संवेदना प्रत्यक्षज्ञानं सम्पद्यते। दूरादागच्छतो ध्वनेः प्रथमे क्षणे ज्ञानं संवेदना। यदा च ज्ञायते इदम्प्रकारकोऽयं ध्वनिस्तदा प्रत्यक्षं भवति। संवेदना विकल्पक्रियारहितमन्यज्ञानासम्बद्धं निष्प्रकारकं ज्ञानम्; प्रत्यक्षं च सप्रकारकम्, सविकल्पकमन्यज्ञानसम्बद्धं ज्ञानमिति भेदः।

उत्तेजना[3]

उत्तेजना संवेदनाया जननी। सा च परिवेशस्थितसरलपदार्थरूपा। उत्तेजना आदात्रङ्गं ज्ञानेन्द्रियं वा प्रभावितं करोति, तत्र क्रियां जनयति; यथा—ध्वनिः श्रोत्रेन्द्रिये क्रियां करोति, शब्दस्य संवेदनां चोत्पादयति। उत्तेजना भौतिके जगति स्थितं किमपि वस्तु। उत्तेजनानां समष्टिः 'परिस्थितिः' कथ्यते। परिस्थितिश्च प्रत्यक्षीकरणस्य विषयः। प्रत्यक्षीकरणेन परिस्थितेर्ज्ञानं भवति।

---

१. Sensation.

२. Nature.

३. Stimulus.

In Public domain. Digitization Muthulakshmi Research Academy

उत्तेजनाभेदः संवेदनाभेदजनको भवति । प्रकाशरश्मीनां तरङ्गायाम[1]वैविध्यं वर्णसंवेदनावैविध्यकारणम्। एवमेव ध्वनितरङ्गा अपि रचना[2]याम[3]वैपुल्य[4]भेदेन ध्वनिसंवेदनाभेदजनका भवन्ति । नासाकलायां[5] प्रभावं जनयन्तो गन्धमयपदार्थनिर्मिता वायुकणा[6] गन्धसंवेदनाजनकाः। शरीरान्तःस्था उत्तेजनाः शरीराभ्यन्तरे जायमानानि शारीरिकाणि परिवर्त्तनानि। आमाशयभित्तिषु जायमानः पेशीसङ्कोचः क्षुत्संवेदनाजनयिता भवति। तालोः शुष्कता पिपासासंवेदनाजनयित्री। पेशीनां गतयो गतिसंवेदना जनयन्ति। एवमेव विविधा उत्तेजना विविधाः संवेदना जनयन्ति।

प्रतिक्रिया[7]

व्यवहारवादिनो मनोविज्ञानं व्यवहारविज्ञानमिति मन्यन्ते । तन्मतेनोत्तेजनाजन्या प्रतिक्रियैव व्यवहारः। सर्वाप्युत्तेजना शरीरे प्रतिक्रियां जनयति। उत्तेजना परिवेशादागच्छति, प्रतिक्रिया च परिवेशं प्रति गच्छति। अयमेव क्रिया-प्रतिक्रियानियमः, घात-प्रतिघातनियमो वा कथ्यते। परिवेशादागच्छन्त्य उत्तेजनाः प्रतिक्रियारूपेण जनं गतये प्रेरयन्ति। गत्या च परिवेशे परिवर्तनं जायते। ज्ञानेन्द्रियोत्तेजनायाः प्रतिक्रिया पैशिकगतिषु ग्रन्थिस्रोतं[8] च परिणमति। पेश्यो ग्रन्थयश्च कार्यकारीण्यङ्गानि भवन्ति। पेशीनां द्वौ भेदौ स्तः—राजीवा, अरेखा च। राजीवाः पेश्य इच्छायाः शासने वर्तन्ते। ता बाहू, पादौ, पिण्डम्, जिह्वाम्, स्वरयन्त्रं च चालयन्ति। अरेखाः पेश्यो नेच्छाधीनाः। तासां शासनं रक्तवाहिनीषु, आन्त्रेषु, पायूपस्थयोश्च भवति। अतो वाट्सनमहोदयेन—"प्रतिक्रिया ह्युत्तेजनाजन्यं राजीवारेखापेशीनां ग्रन्थीनाञ्च परिवर्तनम्" इति प्रतिक्रियालक्षणं स्वीकृतम्।

संवेदनाधर्माः[9]

संवेदनानां केचित् प्रमुखा गुणाः प्रकारभेदेन शक्तिभेदेन चोल्लिख्यन्ते।

तत्र प्रथमः प्रकारता । संवेदनासु जातिमूला भिन्नता[10] दृश्यते । शब्दसंवेदना रूपसंवेदनया भिन्ना भवति। एवमेव घ्राणसंवेदना रससंवेदनया भिन्ना । एवंविधो भेदः प्रकारभेदोऽभिधीयते। भिन्नानां संवेदनानामप्यवान्तरभेदा भवन्ति। यथा रूपसंवेदनायाः श्वेतनीलपीतरक्तादिवर्णभेदेन भेदाः। अस्य च कारणम्—सर्वासामपि संवेदनानां पृथगुत्तेजना

---

१. Wave-lengthes.
२. Composition.
३. Length.
४. Amplitude.
५. Nosal membrane.
६. Gaseaus.
७. Response.
८. Glandular reaction.
९. Attributes.
१०. Generic differences.

In Public domain. Digitization Muthulakshmi Research Academy

भवन्ति, पृथक् चेन्द्रियाणि। तत्र वर्णसंवेदना अक्षिगोलकस्य[१] दृष्टिपटले[२] व्योमतरङ्गाणां[३] क्रिययोत्पद्यते।

तीव्रता च द्वितीयो धर्मः। संवेदनानां द्वितीयो गुणस्तीव्रताभेदजन्यः। ध्वनेः संवेदना ध्वनेस्तीव्रमध्यममन्दादिभेदेन भिन्ना भवति। मन्दं ताडितेन वाद्ययन्त्रेण यो ध्वनिः प्रसूयते न स तीव्रं ताडितेन। एवमेव प्रकाशोऽपि मन्दस्तीव्रश्च भवति। गन्धोऽपि तीव्रो मन्दश्च। तीव्रेण प्रकाशेन प्रकाशस्य तीव्रा संवेदनोत्पद्यते, मन्देन च मन्दा। उत्तेजनायास्तीव्रत्वमन्दत्वपरिमाणानुसारेणैव संवेदनाऽपि तीव्रा मन्दा वा भवति।

तृतीयश्च धर्मः कालः। सर्वस्या अपि संवेदनाया विशिष्टः संवेद्यः कालो भवति। कञ्चिदेव कालं संवेदना मनस्यवतिष्ठते। स्थितिकालभेदेन संवेदनाभेदो भवति। दश कला यावन्मनसि तिष्ठन्ती संवेदना विंशतिः कला यावत्तिष्ठन्त्याः संवेदनाया भिन्ना भवति।

व्याप्तिः संवेदनायाश्चतुर्थो धर्मः। दृष्टि-स्पर्शे संवेदने व्याप्तिमत्याविति सर्वं एव स्वीकुर्वन्ति। वृक्षं दृष्ट्वा लतां पश्यन् जनो द्वे भिन्ने संवेदने अनुभवति। ययोः प्रथमा द्वितीयस्या अधिकव्याप्तिमती। एवमेव कराग्रेण वस्तुनः स्पर्शे या संवेदना भवति सा समग्रेण करेण स्पर्शाद् जायमानाया संवेदनाया भिन्ना। द्वितीयाया व्याप्तिः प्रथमाया अधिका।

स्थानीयचिह्नं[४] संवेदनायाः पञ्चमो धर्मः। यदि कश्चिदेकमेव वर्त्तिकाग्रं समानबलेन कपोले, नासिकायाम्, कपाले च निदध्यात्; तदा तत्स्पर्शसंवेदना गुणदृष्ट्या, तीव्रतादृष्ट्या च सदृश्यो भवन्त्योऽपि स्थानीयवैशिष्ट्ययुक्ता भविष्यन्ति। त्वचो दृष्टिपटलस्य वा भागविशेषगता संवेदनाऽन्यभागगताया भिद्यते। अयं विशेषः 'स्थानीयचिह्नम्' इति कथ्यते।

उत्तेजनायाः सीमा

या उत्तेजना अस्माकं ज्ञानेन्द्रियेष्वाघातं कुर्वन्ति तासां तीव्रता न समाना भवति। काचिदुत्तेजना तीव्रा भवति, काचिच्च मन्दा। तीव्राया उत्तेजनायाः संवेदनाऽपि तीव्रा भवति, मन्दायाश्च मन्दा। यथा यथा प्रातःकाले प्रकाशोऽभिवर्धते, सायङ्कालेऽन्धकारो वा; तथा तथा प्रकाशान्धकारयोः संवेदनाऽपि तीव्रतरा जायते। परं यदि प्रकाशोऽतिमन्दोऽन्धकारश्च वातिमन्दो भवति, तदा नहि कापि संवेदनोत्पद्यते। अतिमन्दे प्रकाशे संवेदनाजननसामर्थ्यं न भवति। एवमेव स्वादस्पर्शादिविषयकोत्तेजनाविषये ज्ञातव्यम्। नहि स्पर्शातिमन्दतायां संवेदना भवति। एवमेवोत्तेजनाया अतितीव्रतायां संवेदना न जायते। अतितीव्रोत्तेजना पीडाकरी भवति। अतितीव्रः प्रकाशः, गन्धः, स्वादः, स्पर्शो वा पीडामेव जनयति, न तु संवेदनाम्। उत्तेजनातीव्रतायाः परिमाणं यत्रोत्तेजना संवेदनाजननसामर्थ्यवती भवति 'संवेदनाद्वारम्[५]' कथ्यते। यतोऽ

---

१. Eye-ball.

२. Ratina.

३. Ether weves.

४. Local sign or local colour.

५. Linen or threshold of sensibility.

In Public domain. Digitization Muthulakshmi Research Academy

नन्तरं सा संवेदनाजननेऽसमर्था भवति, पीडामेव जनयति; तत्परिमाणं 'संवेदनाया ऊर्ध्वसीमा'[१] इति कथ्यते। निम्नोर्ध्वयोर्मध्यगतोविस्तारः 'संवेद्यताविस्तारः'[२] अभिधीयते।

वेवर-फेचनरनियमः

निम्नसीम्न ऊर्ध्वसीम्नश्च मध्ये यथा यथोत्तेजनायास्तीव्रता वर्धते, तथा तथा संवेदनाप्युत्तरोत्तरं तीव्रा भवति। विपरीते च स्थितिर्विपरीता जायते। परं वृद्धेरपि काचित् सीमा भवति, यत उत्तरं तीव्रतराऽप्युत्तेजना न तीव्रतरां संवेदनां कर्तुं समर्था भवति। उत्तेजनायां वृद्धिः कदाचिदल्पा भवति, येन तज्जन्या संवेदनावृद्धिर्ध्यानं नाकर्षति। न सा संवेद्यान्तरं[३] जनयति। संवेद्यान्तरस्य जननायोत्तेजनावृद्धेः काचिन्मात्रा निश्चेतव्या। ययाऽल्पतमया वृद्धिमात्रया संवेदनाया वृद्धिमात्रा संवेद्या भवति, सा मात्रा 'ज्ञेयान्तरस्य न्यूनतमा[४] मात्रा' कथ्यते। येनोत्तेजनाया मात्रा वर्धते, तेन मूलोत्तेजनाया एव विशिष्टेनांशेन भाव्यम्। उदाहरणार्थं भारसंवेदनाया वृद्धये उत्तेजनाया विंशतितमो भागोऽधिकोऽपेक्ष्यते। विंशतिसेटकानां भारं शिरसि वहन्नेकस्य सेटकस्य वृद्धावेव भारसंवेदनाया अन्तरं संवेत्ति, न तु ततो न्यूनस्य भारस्य वृद्धौ। हस्ते सुवर्णस्य शतं तोलान् धारयन् जनः पञ्चतोलेभ्यो न्यूने सुवर्णेऽधिके निहिते नहि भारेऽन्तरमनुभवति। एवमेव ध्वनिसंवेदनवृद्धिसंवेदनायै मूलध्वनेस्तृतीयांश आवश्यको भवति। उज्ज्वलतावृद्धिसंवेदनायै च शततमोंऽशः। उत्तेजनायामतो न्यूनांशस्य वृद्धया नहि संवेदनायामन्तरमुत्पद्यते। अयं नियमो जर्मनीदेशीयशरीरशास्त्रिणा वेवरमहोदयेन पुरस्कृतो 'वेवरनियमः' इति ख्यातः।

फेचनरमहोदयस्यापि नियमोऽस्मिन् विषयेऽतिप्रसिद्धः। स चेत्थम्—"संवेदनायास्तीव्रतायां समानान्तरवृद्धये[५] उत्तेजनायां गुणोत्तरया[६] वृद्धया भाव्यम्", "संवेदनोत्तेजनायाश्छेदाया[७] अनुपातेन वर्धते" इति च।

अस्य सिद्धान्तस्य परीक्षाऽनेकैर्विद्वद्भिः कृता, परं न पूर्णतया सन्तोषप्रदः परिणामो निरीक्षितः। 'अयं नियमोंऽशत एव सत्यः' इति प्रायेण मनोविदो मन्यन्ते।

संवेदनानां भेदाः, आङ्गिकी संवेदना च

संवेदानानां त्रयो मुख्या भेदाः—आङ्गिक्यः संवेदनाः, गतिसंवेदनाः, विशिष्टसंवेदनाश्च। क्षुत्पिपासादिका आङ्गिक्यः संवेदनाः, गमनस्पन्दनादयो गतिसंवेदनाः, दृष्टिश्रवणादिकाश्च विशिष्टसंवेदना भवन्ति। आङ्गिक्यः संवेदनाः शरीरस्यान्तरङ्गदशाभ्य उत्पद्यन्ते। क्षुत्पिपासयो-

---

१. Height of sensibility.

२. Renge of sensibility.

३. Appreciable difference.

४. Difference threshold.

५. Arithmetical progression.

६. Geometrical Progression.

७. Logarithm.

In Public domain. Digitization Muthulakshmi Research Academy

रुत्पत्तिस्थानं कारणञ्च पूर्वं निरूपितम्। श्रान्तिविश्रान्त्यादीनां [1]जीवनवेदनानामुत्पत्तिः समग्रस्य शरीरस्य सामान्यस्थितेर्भवति, न त्वङ्गविशेषदशायाः। अन्यासां शिरःपीडादीनां संवेदनानां स्थानं निश्चितं भवति। एताः शरीरस्वास्थ्यास्वास्थ्यसूचिकाः सन्ति। एतासां जन्म बाह्योत्तेजनाभ्यो न भवतीति स्पष्टम्। न चासां किमपि विशिष्टं ज्ञानेन्द्रियम्।

गतिसंवेदनाः

गतिसंवेदनानां सम्बन्धो न केवलं पेशीभिरेव भवति, प्रत्युत कण्डराभिः[2] सन्ध्यङ्गैश्चापि। तत्र पेश्यो द्विविधाः—ऐच्छिक्यः, अनैच्छिक्यश्च। ऐच्छिकपेशीषु कृतिशक्तेः[3] शासनं भवति। बाह्याङ्गानामास्यस्य कबन्धस्य च पेश्यः स्वैच्छिक्यः। आमाशयभित्तेः, आन्त्राणाम्, हृदयस्य चानैच्छिक्यः। न तासु कृतिशक्तेर्नियन्त्रणं भवति। कर्मस्नायुकोशानां प्रान्ताः पेशीषु भवन्ति। शक्तिः कर्मस्नायुकोशाभ्य आगच्छति, पेशीः स्पन्दयति च। मस्तिष्कः पेशीनां गतेः सूचनां बोधस्नायुकोशाभिः प्राप्नोति। गतिसंवेदना पेशीनाम्, कण्डराणाम्, सन्धीनाञ्च भाराक्रान्ततया जायते। गतिसंवेदनासु त्वगपि भाराक्रान्ता भवति। गतिसंवेदना त्रिविधा—स्थितेः संवेदना, स्वच्छन्दगतेः[4] संवेदना, प्रतिरुद्धगतेः[5] संवेदना चेति। कम्पं विना बाहौ आयते स्थिते स्थितिसंवेदना भवति। शून्येऽग्रतः पृष्ठतश्च सञ्चालिते बाहौ स्वच्छन्दगतिसंवेदना भवति। भारे चोद्गृहीते प्रतिरुद्धगतेः संवेदना जायते। गतिसंवेदनाभिर्द्रव्याणामाधारभूताः धर्मा विस्तारावेध्यतास्थितिदूरत्वदिग्भारादयो ज्ञायन्ते। तासां वेदनात्मकं महत्त्वमपि नाल्पम्।

दृष्टिसंवेदना

असामान्याः ज्ञानेन्द्रियसम्बन्धिन्यो या संवेदनास्ता नेत्र-श्रोत्रेन्द्रियादिभेदेन पञ्चविधाः। तत्र दृष्टिसंवेदना[6] प्रथमा। तदर्थं स्वस्थं चक्षुरुचितं वाहनमुत्तेजकं चापेक्ष्यते। बाह्योत्तेजकं सूर्यमरीचयः सप्तवर्णाः। सप्तानामपि वर्णानां संयोगेन शुभ्रस्य प्रकाशस्य ज्ञानं भवति। प्रकाशस्त्वस्माकं चक्षुः प्राप्नोति तरङ्गरूपेण। प्रकाशतरङ्गा दृष्टिपटले क्रियामाघातं वा कुर्वन्ति। तेन यः प्रभावस्तत्र जायते तं दृष्टिस्नायवो मस्तिष्कं प्रापयन्ति। अक्षि वर्तुलाकारं भवति। तस्य त्रीणि पटलानि[7] सन्ति। प्रथमं दृढं बाह्यं शुक्लपटलम्[8], येन सम्बद्धाः षड् बाह्यपेश्यो भवन्ति। ता अत्र स्पन्दनं जनयन्ति। तदभ्यन्तरे मध्यं पटलं[9] घनकृष्णवर्णपूरितं भवति। नास्यान्त-

---

१. Vital feelings.
२. Tendon.
३. Will power.
४. Free movement.
५. Impeded movement.
६. Visual sensation.
७. Coats.
८. Sclerotic.
९. Choroid.

भागेन प्रकाशः प्रवेष्टुं शक्नोति । प्रकाशस्तु कनीनिकया[१] तारया च प्रविशति । मध्यपटलाभ्यन्तरे दृष्टिपटलं[२] शलाकाभिः[३] शङ्कुभिश्च[४] निर्मितं तिष्ठति । दृष्टिपटलमेव दृष्टियोग्यमिन्द्रियम् । प्रकाशः कनीनिकया प्रविश्य भुजायितो[५] भवति । ततः स नेत्ररसादग्रतो गच्छन्[६] तारायाम्, ततश्चाक्षिगोलके प्रविशति । ततस्ताले[७] काचरसे[८] च प्रविश्यान्ते दृष्टिपटलं समासादयति, तत्र च स स्नायविकं परिवर्तनं जनयति । परिवर्तनं च दृष्टिस्नायवो मस्तिष्कं प्रापयन्ति । ततो मनसि वर्णसंवेदना भवति ।



चक्षुरिन्द्रियचित्रम्

दृष्टिसंवेदनाया द्वौ भेदौ—(१) उज्ज्वलतायाः संवेदना, (२) वर्णसंवेदना च । उज्ज्वलतायाः संवेदना विविधविस्तारवतां प्रकाशतरङ्गाणां संयोगेन भवति । वर्णसंवेदना च समरूपेभ्यः समविस्तारवद्भ्यो वा प्रकाशतरङ्गेभ्यो जायते । वर्णस्य विशुद्धता प्रकाशतरङ्गाणां समरूपताया अधीना । प्रकाशतरङ्गाणां विस्तारे समाने वर्णो विशुद्धोऽन्यवर्णामिश्रितो वा भवति । यदि प्रकाशतरङ्गाणां विस्तारः समानो न भवति, तेषु केचित्तरङ्गा दीर्घाः, केचिच्च

१. Cornea.
२. Retina.
३. Rods.
४. Cones.
५. Refracted.
६. Aqueous humour.
७. Lens.
८. Vitreous humaus.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

तदपेक्षया ह्रस्वा भवन्ति; तदा वर्णसङ्करसंवेदना जायते। नहि कापि वर्णसंवेदना विनोज्ज्वलतां संवेदनां तिष्ठति। वर्णसंवेदनायास्तीव्रता च प्रकाशतरङ्गाणां विपुलताऽधीना[1]। व्योम्नो[2]ऽति-लघुकम्पनानि प्रकाशतरङ्गा उच्यन्ते। तेषां विस्तार-विपुलता-रूपभेदेन भेदा भवन्ति।

वर्णास्तु नील-हरित-पीत-रक्तादिभेदेन बहवो भवन्ति। तेषु चतुर्णां नील-हरित-पीत-रक्तानां संवेदना मौलिक्यः[3]। एषां मात्राभेदेन मिश्रणं बहून् वर्णानुत्पादयति। यथा रक्त-पीतयोर्मिश्रणेन नारङ्गवर्णः, रक्तनीलाभ्यां जम्बूवर्णः, नीलहरिताभ्यां मयूरपक्षवर्णः सञ्जायते।

कृष्णश्वेतौ वर्णव्यतिरिक्तौ मौलिकौ दार्ष्टिकौ गुणौ। कृष्णश्वेतयोः पृथक् संवेदने भवतः। तयोर्न केष्वपि वर्णेष्वन्तर्भावः।

वर्णानां सत्ताऽस्माकं चेतनायां भवति। तेषां मिश्रणमशक्यम्। मिश्रणं तु केवलं प्रकाश-तरङ्गरूपाणां बाह्योत्तेजनानां भवति, येन मनसि बहुविधा वर्णसंवेदना उत्पद्यन्ते।

नीलपीतयो रक्तहरितयोश्च परस्परं विरोधो[4] भवति। रक्तो वर्णो हरितसान्निध्येन रक्ततरः प्रतिभाति। एवमेव नीलपीतौ परस्परसामीप्येन गाढत्वमापद्येते। रक्तसंवेदनासु पूर्वोत्तरविरोधोऽपि[5] दृश्यते। यदि कोऽपि वर्णः पूर्वमुज्ज्वले धरातले दृष्टो भवति, ततो न तथोज्ज्वले मध्यमे शुभ्रे वा तदा कृष्णः प्रतीयते। एवमेव मध्यमशुभ्रे दर्शनानन्तरमुज्ज्वले धरातले दृष्टो वर्णः शुभ्रः प्रतीयते। नीलपीतौ परस्परं पूरकौ रागौ।

केचिज्जना रागान्धा भवन्ति। नहि ते नीलपीतादिवर्णभेदं सम्यक् पश्यन्ति। वर्ण-स्थाने ते शुभ्रताया एव विविधा मात्राः पश्यन्ति। अयं पदार्थः श्वेतः, धूसरः, कृष्णो वेत्येव संवेदना तेषां भवति। तेष्वपि केचित् पूर्णरागान्धाः केचिच्चांशतोऽन्धाः। स्त्रियः प्रायेण रक्तहरितान्धा भवन्ति।

दृष्टिसंवेदना उत्तरप्रतिमा जनयन्ति। ताश्चानुरूपप्रतिरूपभेदेन द्विविधाः। यदि कश्चित् क्षणाय नेत्रे निमील्योन्मीलयेत्, दृष्टिञ्च तीव्रे प्रकाशे स्थिरीकुर्यात्, किञ्चित्कालानन्तरञ्च पुनर्नेत्रे निमीलयेत्, तदा कानिचित् क्षणानि यावत्तमेव प्रकाशं नेत्रयोः सम्मुखं द्रक्ष्यति। इयञ्च प्रकाशस्योत्तरप्रतिमा। स च दृष्टिपटले जाताया उत्तेजनायाः परिणामः। इयञ्चानुरूपोत्तरप्रतिमा। प्रतिरूपोत्तरप्रतिमाऽस्या विपरीता। तस्यां प्रकाशोऽन्धकारे परिणमति, वर्णश्च स्वानुपूरके वर्णे। अनुपूरकश्च[6] श्वेतस्य कृष्णः, रक्तस्य हरितः, पीतस्य च नीलः। यौ द्वौ वर्णौ परस्परमन्योऽन्यस्य संवेदनां नाशयतः, तौ परस्परमनुपूरकौ भवतः। अनुरूपप्रतिमाऽनुभवानन्तरमेव दृश्यते। प्रतिरूप-प्रतिमा च कतिपयक्षणानन्तरम्। यदि कश्चिद्रक्तं वर्णं कानिचित् क्षणानि दृष्ट्वा श्वेतां भित्तिं पश्यति, तदा स तत्र रक्तवस्तुसमाकारं किञ्चिद्धरिताभं स्थलमेव पश्यति। एवमेव नीलं वस्तु दृष्ट्वा

१. Amplitude.
२. Ether.
३. Primary colour sensation.
४. Colour contrast.
५. Successive contrast.
६. Complementary colours.

In Public domain. Digitization Muthulakshmi Research Academy

श्वेतवस्त्ववलोकने तत्र पीतं स्थलं दृश्यते । इयं प्रतिरूपोत्तरप्रतिमा । प्रतिरूपोत्तरप्रतिमाराग उत्तेजनारागस्य पूरको भवति ।

श्रवणसंवेदना[१]

शब्दस्य ज्ञानेन्द्रियं श्रोत्रम्[२]। श्रोत्रस्य त्रयो भागाः सन्ति—बाह्यम्[३],मध्यम्[४],आन्तरिकञ्च[५]। बाह्यश्रोत्रं संग्राहकं[६] ध्वनितरङ्गानेकत्रीकरोति, मध्यकर्णं प्रेषयति च । मध्यकर्णः परिवर्तकः[७] ।



श्रवणेन्द्रियचित्रम्

आन्तरिकः कर्णः संवेदनशील आदाता[८] । मध्यमो भागः कर्णपटहोऽपि कथ्यते । ध्वनितरङ्गास्तं स्पृशन्ति, तस्मिन् कम्पं च जनयन्ति । कर्णपटहो गतिमस्थिकापर्यन्तं[९] नयति । अस्थिका त्रयाणामस्थीनां समूहः । इमान्यस्थीनि मध्यकर्णादन्तःकर्णं गच्छन्त्येकस्मिन् क्षुद्रे विवरे कम्पनं केन्द्रितं कुर्वन्ति । एवं मध्यकर्णस्य यान्त्रिकी रचनाऽन्तःकर्णस्थे तरलपदार्थे कम्पोत्पादाय भवति । अन्तःकर्णः कपालास्थीनामेकतमाया अन्तःस्थितो गुहारूपः । इयं गुहा अति-

---

१. Auditory Sensations.
२. Ear.
३. External-Auricle.
४. Middle-Tympanum.
५. Internal-Labyrinth.
६. Collector.
७. Transformer.
८. Sensitive receptor.
९. Ossicles.

In Public domain. Digitization Muthulakshmi Research Academy

क्षुद्रा जटिला च । अस्यां मध्य एकमन्तर्द्वारम्[1],एकश्च भ्रमिमयो[2] मार्गः कोकलाख्यो भवति । द्वारे बहिर्निःसरन्त्यस्तिस्रोऽर्धचक्राकारा नाल्यो भवन्ति । भ्रमिमार्गे ध्वन्यादात्र्यः कोशा भवन्ति । आसु कोशासु ध्वनिकम्पग्रहणाय सूक्ष्मरोमकोशाः सन्ति । इमाः कोशाः क्रियाशीलाः सत्यः श्रवणस्नायु[3]निकटवर्तिनस्तन्तूनुत्तेजयन्ति[4] । तदा हि स्नायुसंवेगो मस्तिष्कमनुधावति । ज्ञानकोशा[5] आधारकलायां[6] स्थिताः सन्ति । आधारकलाया एकः प्रान्तो-(Syspathetic Vibrations)ऽनुचार्यावेपनग्रहणाय प्रस्तुतस्तिष्ठति, तस्या अवशिष्टश्च भागो मन्दकम्पनग्रहणार्थम् । श्रवणस्नायुभिः प्रापितेऽनुचार्यावेपने मस्तिष्के श्रवणसंवेदना जायते ।

श्रवणसंवेदना वायुकम्पनजा कर्णप्रतिक्रिया । श्रवणसंवेदना द्विविधा—तानः (Tone), कोलाहल(Noise)श्च । तानः सङ्गीतमयो ध्वनिः, कोलाहलश्च सङ्गीतरहितः । तानो नियमितैर्नैयतकालिकैर्वायुकम्पनैर्जायते, कोलाहलस्तद्विपरीतैः । ध्वनीनां त्रयो गुणा भवन्ति—उच्चैस्त्वम् (Pitch), तीक्ष्णत्वम् (Intensity), माधुर्यम् (Quality) च । अयं भेदो ,बाह्योत्तेजनाधीनः । वायोः स्पन्दनमेव सर्वेषां ध्वनीनां जनकम् । तानः प्रतिसेकण्डं विंशतिस्पन्देभ्यः प्रारभ्य चत्वारिंशतः पञ्चाशतो वा सहस्रेभ्यः स्पन्दनेभ्यो जायते । अतोऽधिकेषु स्पन्दनेषु स्वरज्ञानं न सम्भवति । सर्वाण्यपि वाद्यानि प्रतिसेकण्डं चतुःषष्टिस्पन्देभ्य आरभ्य चत्वारि पञ्च वा सहस्राणि स्पन्दनान्यपेक्षन्ते । ध्वनेरुच्चैस्त्वमावेपनसंख्याधीनम् , तीक्ष्णत्वं तद्विस्ताराधीनम्, माधुर्यञ्च ध्वनितरङ्गाकाराश्रितं भवति ।

तानेषु तारता (Pitch), वैयक्तिकत्वम् (Timbre), समस्वरता (Harmony), विस्वरता (Discord) चेत्येते गुणाः सन्ति । तारता तानस्यारोहणमवरोहणं वा । सा च वायुकम्पनानामावृत्तिसंख्याया (Rate of Frequency) अधीना । वैयक्तिकत्वं वाद्ययन्त्रभेदेन जन्यते । वीणातूर्यमानवकण्ठाः समानतारतावैपुल्यमयं स्वरमुत्पादयितुं शक्ताः । परं वैयक्तिकगुणैस्ते सरलतया पृथक् पृथगभिज्ञायन्ते । वैयक्तिकश्च गुणो वायुतरङ्गाणां जटिलताऽधीनः, यदा मूलस्वराणाम्(Ground tone) उपस्वरै(Over tones)रांशिकस्वरैः (Partiol tones)श्च मिश्रणं भवति, तदा मिश्रणमात्राभेदेन ताने वैयक्तिकगुणा उत्पद्यन्ते । वैयक्तिकेन गुणेन परिचीयते–'अयं तानोऽमुकस्य' इति । केचित्तानाः परस्परं मिलितास्चेतनायां रुचिकरं प्रभावं जनयन्ति । अयं संध्वनिः (Consonance), स्वरसाम्यं (Harmony) वा कथ्यते । ये च तानाः परस्परमसमन्विता, अमिलिता वा तिष्ठन्ति, तेऽसमञ्जसाः कर्णकटवः स्वरवैषम्यं प्रकटयन्ति । ध्वनेर्व्याप्तिर्ध्वनिकारकवस्तुन आकारमनुसरति । ध्वनिकारको यदि विशालाकृतिर्भवति तदा ध्वनिरपि व्यापको भवति । अत एव मानवापेक्षया व्याघ्रशब्दो व्यापको भवति ।

श्रवणसंवेदना भाषया ज्ञानार्जने सहायिका, सङ्गीतानन्दसाधिका, अतीवोपयोगिनी ।

---

१. Vestibule.

२. Cochlea or snail.

३. Auditory nerve.

४. Fibres.

५. Sense-cells.

६. Basiler membrane.

In Public domain. Digitization Muthulakshmi Research Academy

रससंवेदना[1]

भक्षणपानादि-प्रयोगैरिदं सिद्धं यद् बहवः स्वादा न विशुद्धाः। तेंऽशरूपेणैव 'स्वाद' इत्याख्याभाजः सन्ति। यदि कश्चित् स्वकीयां नासिकां तथा गृह्णीयाद्येन गन्धो गन्धादातृण्यज्ञानि[2] न स्पृशेत्, तदा स 'कॉफी' इत्याख्ये पेये 'कुनैन' इति नाम्नि भेषजे च स्वादभेदं कर्तुं न शक्नुयात्। तयोरुभयोरपि स्वादः कटुर्भवति। कटुतैव तयोः सदृशी। एवमेवान्येषामपि बहूनां पदार्थानां यः स्वादो जनैर्मन्यते, सः स्वादस्तेषां न भवति। यं जना भोजनस्वादं मन्यन्ते, तस्मिन् भोज्यस्य पेयस्य तापमानोऽपि सम्मिलितो भवति। मुखस्यान्तस्त्वगिन्द्रियं भवति, रसनेन्द्रियं च। तिक्ते[3] स्वादेंऽशतः पीडा, मृदौ चांशतः स्पर्शसंवेदनान्तर्भवति। भोजनं पेयं च मुखं गत्वा कण्ठमार्गेण, नासिकां गच्छता पृष्ठमार्गेण च घ्राणेन्द्रियमुत्तेजयति। भोजनस्य स्वादस्तद्गन्धेनापि प्रभावितो भवति।

जिह्वातले ये क्षुद्रा उद्गता अङ्कुरा[4] भवन्ति तेषु कतिपये स्वाददातारो[5] भवन्ति। ते च त्वचः सांवेदनिकस्थानसदृशाः सन्ति। केचिदङ्कुराः केवलमेकामेव स्वादसंवेदनां गृह्णन्ति, केचिद्द्वे, तिस्रो वा। कटुः स्वादः प्रायेण जिह्वायाः पृष्ठभागे, मधुरोऽग्रभागे, अम्लः पार्श्वयोर्निकटस्थभागे, लवणश्चाग्रभागे, पार्श्वनिकटस्थभागे चानुभूयते। मूलस्वादास्तु चत्वार एव भवन्ति—कटुमधुराम्ललवणभेदात्। मधुमयः कटुर्द्रवो यदि केनाऽपि साधनेन जिह्वाग्रं स्पृशेत्, तदा मधुर एव ज्ञास्यते, परं जिह्वापृष्ठे स्पृष्टः कटुरेवानुभूयते। वास्तविकाः स्वाददातारो जिह्वातलान्नीचैर्विस्तृतेषु क्षुद्रगह्वरेषु भवन्ति, न तु जिह्वातले। ते च 'स्वादकलिका[6]' अप्युच्यन्ते। स्वादकलिका ज्ञानकोशासमूह एव। कोशायाः सूक्ष्मोऽग्रभागो गर्ते[7] प्रक्षिप्तस्तिष्ठति। अत्रैव सम्मुखमुपस्थितेन स्वादुवस्तुना सम्पर्कं लभते। एवं प्रबुद्धा ज्ञानकोशा ज्ञानस्नायुतन्तुं प्रबोधयति, ज्ञानस्नायुतन्तुश्च कोशाया आधारस्य समन्ततो निबद्धो भवति। एवं बोधस्नायुभिः सह सरन्तः स्नाय्वावेगा मस्तिष्कं प्राप्नुवन्ति। तेन च रससंवेदना भवति।

बुण्ड्टमहादयो धात्वीयं क्षारीयं चापि स्वादं स्वीकरोति। परं धात्वीये स्वादे गन्धगतिसंवेदनयोरपि संयोगो भवति, तीव्रः क्षारश्च जिह्वायां चिक्कणतामुत्पाद्य तत्पृष्ठे विकारं जनयति; अतो नैतौ मौलिकौ स्वादौ। 'मधुराम्ललवणकटव एव मौलिकाः स्वादाः' इति साम्प्रतिका मनोवैज्ञानिका मन्यन्ते। तिक्तकषायौ तु स्वादगतिसंवेदनानां मिश्रणेनानुभूयेते, अतो मधुराम्ललवणतिक्तकटुकषायाः षड् रसाः—इति प्राचां मतं खण्डितमेव।

स्वादसंवेदना अपि परस्परं विरोधिन्यो भवन्ति। लवणास्वादानन्तरं पीतं शुद्धं जलं मधुरं प्रतीयते। मधुरो न तथा लवणविरोधी भवति, यथा लवणो मधुरविरोधी। एवं-

१. Taste sensation.
२. Olfactory receptors.
३. Biting.
४. Protuberances or Papillae.
५. Taste receptors.
६. Taste buds.
७. Pit.

In Public domain. Digitization Muthulakshmi Research Academy



जिह्वाचित्रम्

(स्वादकलिका अ, उ इति चिह्नितस्थानयोरेव, नान्यत्र ।)

विधो विरोधो लवणाम्लयोर्मधुराम्लयोर्मध्येऽपि भवति । कटौ विरोधिनो रसस्य प्रभावो न जायते । स्वादस्य ज्ञानात्मकं महत्त्वमल्पमेव भवति । वेदनात्मकं मूल्यं तु महत् ।

गन्धसंवेदना[1]

गन्धादातारो नासिकायाः पृष्ठभागे एकस्यां क्षुद्रगुहायामेकान्तस्थाने तिष्ठन्ति । त्वचो जिह्वाया इव वा तेषां सम्यक् परीक्षणं न सुकरम् । इमा आदातृकोशा नासिकाच्छिद्रतले विस्तृतासु श्लैष्मिककलासु[2] जटिता भवन्ति । तासां सूक्ष्माग्रभागाश्च नासिकाच्छिद्रे

1. Olfactory sensation.
2. Mucous membrane.

In Public domain. Digitization Muthulakshmi Research Academy

सततं वायुसम्पर्के तिष्ठन्ति। वायौ विद्यमाना ये गन्धमयाः पदार्थाः श्वासेनान्तर्निविशन्ते, ते आदातृकोशाग्रभागै रासायनिकीमुत्तेजनां प्राप्नुवन्ति। अर्वाचीना मनोवैज्ञानिकाः 'षट् प्रमुखा गन्धाः' इति मन्यन्ते; परं ते मौलिका मिश्रिता वेत्यद्याप्यनिश्चितम्।

हेनिङ्गमहोदयेन गन्धानां वर्गीकरणमित्थं कृतम्–(१) लवङ्गहरिद्रादि[1]वर्णमयगन्धाः, (२) यूथिकादिपुष्पाणां सुगन्धाः[2], (३) द्राक्षादिफलानां तैलस्य च दत्तुगन्धाः[3], (४) देवदारुपत्रजन्यः, तारपीनादितैलजन्यश्च रालगन्धः[4], (५) गलिततां गतेभ्यो जीवांशेभ्यो[5] निर्गच्छन्तो दुर्गन्धाः— इमे 'हाइड्रोजन सल्फाइड'-नामके पदार्थे प्राप्यन्ते, (६) दग्धपदार्थेषु विद्यमाना गन्धाः। इमे तु प्रमुखा गन्धाः। केचिन्मध्यवर्तिनोऽपि गन्धा भवन्ति। भुक्ते कॉफीति नामके पदार्थे राल-दग्धपदार्थयोर्मध्यवर्ती गन्धो भवति। एवमेव पिपरमिण्टेत्यस्य गन्ध ईथरवर्णमयानां मध्यवर्ती गन्धो भवति। षड् गन्धा अपि मात्राभेदेन परस्परं मिश्रिता बहुविधतां भजन्ते। सामान्यतया मिश्रिता एव गन्धा उपलभ्यन्ते। सामान्यास्तु क्वचित्। अन्यसंवेदनाभिरपि गन्धानां मिश्रणं भवति। स्वादैर्मिश्रिता गन्धास्तान् वासितान् कुर्वन्ति। एवमेव कर्पूरस्य गन्धः शीतलसंवेदनासमो भवति। केचिद् गन्धाः रासायनिकैः पदार्थैर्मिलिता पीडा-संवेदनां जनयन्ति।

वर्णेष्विव घ्राणेऽपि पश्चात्प्रतिमा भवन्ति। नष्टायामपि गन्धोत्तेजनायां पश्चात् संवेदनारूपा गन्धसंवेदना कानिचित् क्षणान्यस्माकं चेतनायां तिष्ठत्येव। गन्धसंवेदनासु पूर्वोत्तर-विरोधप्रभावोऽपि दृश्यते। दुर्गन्धानन्तरं सुगन्धस्यानुभूतिस्तीव्रतरा भवति। एवमेव दुर्गन्धा-नन्तरं सुगन्धस्य।

घ्राणसंवेदना अतिप्राचीना। सा च सारमेयमधुमक्षिकादिषु क्षुद्रेष्वपि प्राणिषु शक्तिमती भवति। सारमेयानां घ्राणसंवेदना तु मनुष्येभ्योऽपि तीव्रतरा। पशवस्तु गन्धस्य साहाय्येन पदार्थानामन्तरं विजानन्ति। गन्धानां वेदनात्मकं महत्त्वम्। भोजनस्य सुगन्धः, मद्यादीनां सुवासः, पुष्पाणां सुरभिर्मनुष्याणां सौन्दर्यानुभवं वर्धयति। घ्राणेन्द्रियं गन्धेन समायोजनं करोति। चिरकालं दुर्गन्धं जिघ्रतो जनस्य दुर्गन्धसंवेदना न भवति। अत एवैकस्मिन् स्थाने एको दुर्गन्धपीडामनुभवति, परमपरो वेदनाशून्यस्तिष्ठति।

त्वक्संवेदना

शुष्काद्रोष्णशीतकण्डूदंशनादयस्त्वग्जन्याः स्पर्शसंवेदनाः। अस्तु, काश्चित् संवेदना जटिलाः, काश्चिच्च ततः सरलाः। यदि वर्तिकाग्रं शनैः शनैर्यत्र तत्र त्वचि निधीयते; तदा कुत्रचित् केवला स्पर्शसंवेदना भवति, अन्यत्र च शीतसंवेदना। करस्य पृष्ठभागे स्वल्पेऽपि क्षेत्रे

१. 'मसाला' इति हिन्दीभाषायाम्।

२. Fragrance.

३. Etheral or fruity smell.

४. Resinous smell.

५. Organic matter.

In Public domain. Digitization Muthulakshmi Research Academy

एवंविधानि बहूनि 'शीतस्थानानि[१]' सन्ति। एवमेव कानिचित् स्थानानि सरलतयोष्णताया अनुभवं कर्तुं शक्तानि 'उष्णतास्थानानि[२]' कथ्यन्ते। यदि किञ्चित्तीक्ष्णाग्रं वस्तु त्वचि निधीयते तदा कुत्रचित् स्वल्पा, कुत्रचिच्चाधिका पीडा भवति। इमानि 'पीडास्थानानि[३]' भवन्ति। एवमेव यदि किञ्चिन्नमनीयं मृदु वस्तु, यथा कचः, त्वचि निधीयते तदा केवलं स्पर्शोऽनुभूयते; न तु पीडादि। ईदृशानि स्थानानि, यत्र पीडाया एव निश्चिता संवेदना भवति, 'स्पर्शस्थानानि[४]' भवन्ति। त्वचः शीतोष्णतापमानस्थानानां[५] सङ्ख्या पीडास्पर्शस्थानानामपेक्षयाऽल्पा अस्ति। उष्णतास्थानानि शीतलस्थानेभ्योऽल्पानि सन्ति। एवं शीतलतोष्णतास्पर्शपीडा मूलत्वक्-संवेदनाः। कण्डूदर्शनपीडास्तु पीडाया एव प्रकाराः। गुद्गुदस्तु स्पर्शस्यैव प्रकारः। स्पर्शे मार्दवम्, कर्कशत्वं च वस्तूनामेव गुणौ, न तूत्तेजनायाः। तयोः प्रत्यक्षीकरणमेव भवति, न तु संवेदना। एवमेव चिक्कणादिविषयेऽपि बोध्यम्।

स्पर्शकाले त्वचोऽवनमनेनोत्तेजना गृह्यते। अवनमनस्य क्रियाऽन्तर्बहिः कस्मिन्नपि स्थाने बहुषु वा स्थानेषु सहैव भवितुं शक्नोति। पीडाकर्युत्तेजना यान्त्रिकी, तापीया, रासायनिकी, वैद्युतिकी वा भवति। यान्त्रिकी यथा—सूचीनिवेशेन, तापीया यथा—शीतस्योष्णस्य वा जलस्य स्पर्शेन, रासायनिकी यथा—दाहकक्षारस्पर्शेन[६], वैद्युतिकी चोत्तजना विद्युदेव। सर्वथाऽप्युत्तेजनया तथा बलवत्या भाव्यं यथा त्वचि घातः सम्भवेत्। अल्पसंवेदनशीलाः पीडाया आदातारस्त्वचि शक्तिशालिनीमुत्तेजनामपेक्षन्ते।

शरीरस्यान्तरिकस्तापमानः स्वास्थ्यदशायां ९८° तापांशमयो (फारेनहाइट) भवति, परं त्वक्तलस्य तापमानः ८५° तापांशतो ९०° तापांशपर्यन्तं भवितुं शक्नोति। अस्मिन् तापांशे त्वक्तलं नोष्णताम्, नापि वा शैत्यमनुभवति; यतस्तस्य तापमानवेत्तॄणि स्थानानि नोत्तेजितानि भवन्ति। अस्मिन् काले यदि किञ्चिदुष्णतासंवाहकं वस्तु त्वचि निधीयते, तच्च त्वचा उष्णतरं भवति, तदा त्वक्तलस्य तापमानो वर्धते। यदुत्तेजना त्वचस्तापमानादेकांशेनाऽप्यधिका भवति, तदोष्णतायाः संवेदना जायते। यदि चैकांशेन न्यूना भवति तदा शैत्यसंवेदना भवति। तापमापकयन्त्रमिव त्वगपि शैत्यौष्ण्यसूचिकाऽस्ति। उत्तरोत्तरे शीतवस्तुस्पर्शे शीतलतायाः संवेदनाऽप्युत्तरोत्तरं तीव्रतरा भवति, उष्णस्पर्शे चोष्णतरा। अन्ते च सैव शीतोष्णवेदना पीडायां परिणमति।

स्पर्शज्ञानेन्द्रियं तापज्ञानेन्द्रियं च समायोजनं[७] स्थापयतः। सङ्कुचितं वस्त्रं शरीरे परिहितं कञ्चित् कालं पीडकं भवति, ततस्तत्संवेदनाऽवलुप्यते।

---

१. Cold spots.

२. Warmth spots.

३. Pain spots.

४. Touch spots.

५. Temperature spots.

६. Acids.

७. Adaptation.

In Public domain. Digitization Muthulakshmi Research Academy

त्वगिन्द्रियस्य त्रयः स्तरा भवन्ति—(१) अधिचर्म[1], संवेदनाहीनो बाह्यस्तरो वा, (२) निचर्म[2], संवेदनशीलो मध्यस्तरो वा, (३) [3]वसानिर्मित आभ्यन्तरिकः स्तरश्च। स्नायुतन्तवो मध्यस्तरात् प्रादुर्भवन्ति। अधिचर्मणोऽधःस्थाच्छङ्क्वाकारा[4] अङ्कुरा भवन्ति। तेषां मध्ये कतिपयेषु स्पर्शदेहाणुनाम्नीभिः[5] कोशाभिर्निर्मितानि लघून्यण्डाकाराणि पिण्डानि तिष्ठन्ति। स्नायुतन्तव एभिः पिण्डैः सम्पृक्ता भवन्ति।

'स्पर्शेन्द्रियं सर्वप्राचीनम्' इति विद्वांसो मन्यन्ते। अन्यज्ञानेन्द्रियाणां विकासोऽस्मादेव बभूव। अस्य ज्ञानात्मकं मूल्यमत्यधिकम्।

---

१. Epidermis.
२. Dermis.
३. Fat.
४. Conical papillae.
५. Touch corpuscles.

In Public domain. Digitization Muthulakshmi Research Academy

नवमोऽध्यायः

प्रत्यक्षीकरणम्[1]

प्रत्यक्षीकरणस्य स्वरूपम्

ज्ञानेन्द्रियाणामुपयोगेन वस्तूनां तद्विशेषाणाञ्च ज्ञानस्य प्रक्रिया प्रत्यक्षीकरणं कथ्यते। तच्च संवेदनानामर्थग्रहणरूपम्। प्राणिनि बहूनां बाह्यशक्तीनामाघातः प्रतिक्षणं भवति। यदा कोऽपि जनस्तिष्ठति तदा तस्य सम्मुखमुपस्थितानि बहूनि वस्तूनि तस्य ध्यानमाक्रष्टुं प्रयतन्ते। कक्षायां पठतश्छात्रस्य सम्मुखमध्ययनकक्षस्य भित्तयो भूमितलं गुरोरासनं पुस्तकानि सहपाठिनस्तेषां वस्त्राणीत्येवं बहूनि वस्तूनि भवन्ति। तेषामाघातस्तस्य नेत्रयोर्भवति। परं क्षणविशेषे तेषु किञ्चिदेकमेव वस्तूत्तेजनास्वरूपं प्राप्नोति। तदेवोत्तेजकं भवत्तस्य ध्यानमाकर्षति। ध्यानाकर्षणरूपेयं क्रिया 'अवधानम्' इति कथ्यते। प्रतिपादितं चेदं विस्तरशोऽवधानप्रकरणे। अनेकाः संवेदना अवधानस्य कारणं भवन्ति। संवेदनायाश्च जनन्युत्तेजना। नह्युत्तेजनाया अनुपस्थितौ संवेदनायाः स्थितिः सम्भाव्यते। शूलनिक्षेपेण पीडा जायते। अत्र शूलनिक्षेप उत्तेजना। पीडा च संवेदना। यया क्रियया प्राणी संवेदनानामर्थग्रहणं करोति, सा क्रिया प्रत्यक्षीकरणं नाम। तस्य चाधारः सञ्चितोऽनुभवः। स एव संवेदनानामर्थग्रहणे सहायको भवति। उद्याने तिष्ठतः पृष्ठे कश्चित् पतनशब्दो भवति। दूरस्थितः स 'नारिकेलपतनशब्दोऽयम्' इति विजानाति। अत्र 'नारिकेलशब्दोऽयम्' इति ज्ञाने बहवः प्रक्रिया अन्तर्विशन्ति। प्रथमा तु तत्र बाह्यजगति नारिकेलपतनक्रिया। द्वितीया तस्मिन् क्षणे शब्दप्रभावग्रहणाय मनसः प्रस्तुतता। तृतीया नारिकेलपतनेन श्रवणेन्द्रियस्योत्तेजनम्। चतुर्थी प्रक्रिया मस्तिष्के शब्दस्य संवेदना। पञ्चमी शब्दं प्रति श्रोतुरवधानम्। षष्ठी प्रक्रिया च गतानुभवाश्रयेण प्राप्तायाः संवेदनाया अर्थग्रहणम्। गतानुभवस्त्वेवम्प्रकारकः—'अस्मिन्नुद्याने आम्रामलकीबदरीनारिकेलफलानि। नहि नारिकेलादृतेऽन्यफलपतनशब्द एतादृशो महान्। पूर्वं सर्वाणि फलानि पतन्ति दृष्टानि, तेषां शब्दस्तु मन्द एव। नारिकेलस्यैवाकारमहत्त्वादेवंविधः शब्दः पूर्वमनुभूतश्च। अतोऽनेन ध्वनिना नारिकेलपतनजेन भाव्यम्' इति गतानुभवसनाथं प्रत्यक्षज्ञानम्। तच्च सत्यमसत्यं वा भवितुमर्हति। नहि प्रत्यक्षीकरणेनार्थसाधुत्वे वा कोऽपि सम्बन्धः। प्रत्यक्षीकरणं संवेदनानामर्थग्रहणस्य प्रक्रियामात्रम्। 'प्रत्यक्षक्रियाऽनेकक्रियापूर्विका भवति' इत्युपर्युक्तोदाहरणेन सिद्धमेव। परं पूर्वं जायमाना उत्तेजना-संवेदनाऽवधानक्रियास्तथा झटिति भवन्ति। विश्लिष्य पृथक् पृथक् तेषां ज्ञानं कठिनम्। तास्तु सर्वाः सदैव घटमानाः प्रतीयन्ते।

प्रत्यक्षीकरण-संवेदनयोरन्तरम्

अत्र संवेदना-प्रत्यक्षयोरन्तरं स्पष्टमगवन्तव्यम्। संवेदना[2] वस्तुनः परिचयमात्रम्। प्रत्यक्षं तद्विषयकं ज्ञानम्। ध्वनेः श्रवणं संवेदना। रूपरसगन्धादिभ्योऽयं पृथग् नारिकेलपतनजन्य-

---

१. Perception.

२. Sensation.

In Public domain. Digitization Muthulakshmi Research Academy

श्चेति सप्रकारकं ज्ञानं प्रत्यक्षम्। संवेदनाऽज्ञातार्थस्य वस्तुनः प्रथमः संस्कारः, निर्विकल्पं ज्ञानं तु प्रत्यक्षीकरणम्। तत्र संवेदना-प्रत्यभिज्ञयोः संयोगो भवति। नवजाते शिशौ गतानुभवानामभावेन वस्तुतः संवेदनैव सम्भवति। अर्थबोधसमर्थे च तस्मिन् संवेदना प्रत्यक्षक्रियास्वरूपं लभते। संवेदनायां त्वक्षस्य संवेदनाविषयको ज्ञानेन्द्रियसम्पृक्त एव भाग उत्तेजितो भवति, प्रत्यक्षक्रियायां तत्सहचारिप्रदेशोऽपि। संवेदनाऽमिश्रा विशुद्धैका क्रिया। प्रत्यक्षक्रिया सम्मिश्रा। तत्र संवेदनानुभवानां मिश्रणं भवति।

प्रत्यक्षीकरणप्रक्रिया[1]

यदा शिशवे प्रथमं जम्बूफलं दीयते, न च तस्य तद्विषयकः कोऽपि गतानुभवो भवति, तदा स इन्द्रियजन्यैराघातैस्तस्य परिचयाय प्रयतते। 'सर्वमपि ज्ञानमिन्द्रियैरेव सम्पाद्यते' इत्यत्र नास्ति किमपि वक्तव्यम्। जम्बूफलं गृहीत्वा स प्रथमं स्पर्शसंवेदनां प्राप्नोति। तद् दृष्ट्वा च वर्णाकृतिसंवेदने उपलभते। मुखे निदधच्च घ्राणविषयिकीं संवेदनां विन्दते। तद्भक्षणेन स्वादसंवेदनामधिगच्छति। यदि तद्रसस्य कोऽपि बिन्दुर्नेत्रे पतति तदा पीडाऽपि संवेद्यते। इदं सर्वं मिलित्वैव शिशोर्जम्बूफलविषयकं ज्ञानं भवति। अस्मिन्नवसरे जम्बूवृक्षविषये जम्बूफलोपयोगविषयेऽपि च कश्चित् तं बोधयितुं शक्नोति। इदं बाह्यतः प्राप्तं ज्ञानं तस्येन्द्रियजन्यज्ञानेन मिलित्वैकं भवति। यदा चाऽन्यस्मिन्नवसरे कश्चित्तं जम्बूफलविषये किञ्चित् पृच्छति, तदोत्तरार्थं सर्वमपि तद्विषयकं ज्ञानं क्रमेणोपस्थितं भवति। इयं ज्ञानस्यैकीकरणप्रक्रिया भवति। यदा वयं किञ्चित् पश्यामः, शृणुमः, स्पृशामः, जिघ्रामः, आस्वादयामो वा; तदा तद्विषयकोऽनुभवोऽस्माकं गतानुभवने सहैकीभावं गच्छति। दूरत एव जम्बूफलं दृष्ट्वाऽन्यस्मिन्नवसरे स शिशुर्वक्ति—'मधुराम्लं नीलवर्णं सरसमिदं जम्बूफलम्'। तस्यैवं कथनस्याधारस्तस्य पूर्वानुभव एव। नहि तद्वर्णनाय स्पर्शादेरावश्यकता भवति। एवं गतानुभवेन, सङ्केतेन वाऽल्पसमयेनैव बहु ज्ञातं भवति।

प्रत्यक्षक्रियासु भिन्नता

प्रत्यक्षक्रियया तत्काले तत्र स्थितानामेव च पदार्थानां तत्र जायमानाया वा क्रियाया अनुभवः प्राप्यते। यस्य प्रत्यक्षं संवेदना न भवति, यच्च कल्पनाया भाजनम्, नहि तत्प्रत्यक्षान्तर्गतं भवति। तेषामेव पदार्थानां क्रियाणां वा प्रत्यक्षं प्राणिनो भवति, येषां संवेदनां स केनापि ज्ञानेन्द्रियेण लभते। अत एव दर्शन-श्रवण-घ्राणास्वाद-स्पर्श-पीडा-चेष्टाद्यात्मकानां प्रत्यक्षाणां वर्णनं श्रूयते। वस्तुतस्तु न प्रत्यक्षक्रियेन्द्रियविशेषजा, तस्याः सम्पूर्णस्त्वक्षः क्रियाशीलो भवति। नहि वारं वारं तदेव प्रत्यक्षं भवति। ह्योऽपराह्णे कृतात् सूर्यस्य प्रत्यक्षादद्यतनमापराह्णिकं तत्प्रत्यक्षं सर्वथा भिन्नं सदपि भिन्नं न भासत इति; तस्य कारणं तु सूर्ये प्रत्यक्षात्मकपरिवर्तनस्याभावः। नहि सूर्ये किञ्चित्परिवर्तनं दृष्टिगोचरं भवति, तेन प्रत्यक्षेऽपि भेदो न प्रतीयते। वस्तुतस्तूत्तेजनया त्वक्षे प्रतिक्षणं परिवर्तनं विधीयते। तेन पूर्वंगता प्रत्यक्षक्रिया परवर्तिन्याः प्रत्यक्षक्रियाया भिन्ना भवति।

---

1. Perceptual process.

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षस्य याथार्थ्यम्

अनेकेषां दार्शनिकानां मतेनास्माभिर्मानसिकानामेव पदार्थानां प्रत्यक्षीकरणं क्रियते, न तु भौतिकानाम्। यतो वयमिदं जगत् स्वानुभवाश्रयेणैव जानीमः। यस्य पदार्थस्य यादृशोऽनुभवोऽस्माकं भवति तादृश एवानुभवो नान्येषाम्। एकस्यैव पदार्थस्यानुभवो भिन्नानां जनानां भिन्नो भवति। अतः प्रत्यक्षीकृतस्य पदार्थस्य स्वरूपमनुभूतस्वरूपादभिन्नमेव भवति। सत्यमेतत्। तथापि सर्वेषामपि मानसिकपदार्थानां कश्चिद् भौतिक आधारोऽवश्यं भवति। भवति च तस्य स्वतन्त्रा सत्ता। भौतिकविज्ञानशास्त्रिणां मतं यद् भौतिकपदार्थानां स्वरूपं यद् दृश्यते तस्माद् बहु भिन्नं भवति। किञ्चिद्वस्तु बाह्यतो दृढं दृश्यते एकं च, परं तस्य निर्मितिस्तस्य मूलतत्त्वं परितो भ्रमद्भिरणुभिरेव भवति। कस्यचित्पदार्थस्य तदीयः प्रतीयमानो वर्णस्तस्मात् प्रक्षिप्यमाणस्य प्रकाशस्य गुणो भवति, न तु तदीयः। एतेनानुमीयते यदस्माकं सर्वं प्रत्यक्षज्ञानं भ्रान्तमेव भवति। परं नायमस्माकं विचारविषयः। पदार्थस्वरूपस्य याथार्थ्यायाथार्थ्ये भौतिकविज्ञान-शास्त्रिभिर्विचारणीये। 'प्रत्यक्षीकृतं वस्तु सत्यं वा मिथ्या वा ?' इति विवेचनं दार्शनिकानां कार्यम्। प्रत्यक्षक्रियाया मनोवैज्ञानिकं विश्लेषणं प्राणिनः संवेदना-क्षेत्रे स्थितानां पदार्थानां तेषु जायमानानां क्रियाणां च केवलं मानसिकं स्वरूपं तद्विषयिण्यः स्नायविकक्रियाश्च विवेचयति।

भ्रमः[1]

गतानुभवानामाश्रयेणेन्द्रियजन्यानां संवेदनानामर्थग्रहणं प्रत्यक्षीकरणमिति प्रतिपादितम्। संवेदना च वस्तुनः क्रियाया वा भवति। वस्तुनोऽर्थो यदा तस्य स्वरूपानुसारेण गृह्यते तदा गृहीतं ज्ञानं 'प्रत्यक्षम्' इति कथ्यते; परं यदानया प्रक्रिययोपार्जितं ज्ञानं वस्तुनः सत्यस्वरूपाद्विपरीतं भवति, तदा तज्जन्यं ज्ञानं भ्रमसंज्ञां लभते। प्रत्यक्षज्ञानं तु यथार्थानुभव एव। तद्विपरीतोऽयथार्थो भ्रमः। यद्यपि प्रत्यक्षज्ञानमस्माकं सामान्योऽनुभवः, भ्रमश्चासामान्यः कादाचित्कः; तथापि मनो-विज्ञानानुसारेणास्माकं प्रत्यक्षज्ञाने भ्रमस्य स्वल्पोऽधिको वांऽशस्तिष्ठत्येव। 'अस्माकं ज्ञाने कियत् सत्यं कियाँश्च भ्रमः' इति विश्लेष्य वक्तुं कठिनम्। भौतिकविज्ञानिनस्तु प्रकाशे श्वैत्यप्रत्यक्षमपि भ्रान्तिमेव मन्यन्ते। तन्मतेन श्वेतः प्रतीयमानः प्रकाशोऽनेकानां विविधानां वर्णतरङ्गानां मिश्रणेन तादृक् प्रतिभाति। परं नात्र मनोवैज्ञानिका भ्रान्तिं स्वीकुर्वन्ति। मनोवैज्ञानिकास्तु तदेव प्रत्यक्ष-ज्ञानमयथार्थं मन्यन्ते यन्मानवमस्तिष्कस्य गत्यात्मकवैशिष्ट्येनायथार्थं भवति। प्रकाशस्य तथा प्रतीतेस्तु कारणं बाह्यजगत्येव तिष्ठति, न तु मानवमस्तिष्के। प्रत्यक्षे भ्रान्तेरुदाहरणानि प्रतिदिनं लभ्यन्ते। द्वयोः सह गच्छतोः पुरुषयोर्यद्येको दुर्बलो भवति, द्वितीयश्च स्थूलः; तदा दुर्बलो जनो दीर्घतरो दृश्यते। एवमेवैकस्यैव वर्णस्य वस्त्राण्याशिरोपादं धारयञ्जनो दीर्घतरो दृश्यते। समान-दैर्घ्ययोर्दम्पत्योर्मध्ये नारी दीर्घतरा दृश्यते। अस्य कारणं तस्याः परिधानैकत्वमेव। मनोविज्ञान एवंविधा भ्रमा अपि नहि विचारक्रियामपेक्षन्ते। यदा यथार्थे वस्तुनि तद्विषयके प्रत्यक्षज्ञाने च वैषम्याधिक्यं भवति, तदैव प्रत्यक्षज्ञानं 'भ्रम' इति निरूप्यते।

भ्रमस्य द्वौ प्रकारौ भवतः—संवेदनाजन्यः, विचारजन्यश्च। संवेदनाजन्यभ्रमस्य कारणमिन्द्रियज्ञानदोषः। तेन पदार्थानामाकार-दूरत्व-भारादिनिर्धारणे दोषो जायते। यथार्थ-परीक्षणे शक्तेरभाव एवास्य कारणम्। अभ्यासेनैवंविधा दोषा प्रभवन्ति।

१. Illusion.

In Public domain. Digitization Muthulakshmi Research Academy

संवेदनाजन्या भ्रमाः

संवेदनाजन्यानां भ्रमाणां केचिन्नियमास्तेषां कानिचिदुदाहरणान्यधो लिख्यन्ते—

(क) परिमाणभारनियमः[1]—(१)—यदि पट्टे समानविस्तारवत्यौ द्वे रेखे आलिख्येताम्, तयोरेकाऽधोलम्बमाना, अन्या च तन्मध्यादुपरि गता । तदा समानेऽपि दैर्घ्येऽधःस्थिताया रेखाया अपेक्षयोपरि स्थिता सरला रेखा दीर्घतरा प्रतीयते । (द्र०–प्रथमा आकृतिः) ।

(१)



(२) समानयोर्द्वयोरेखयोर्यस्या प्रान्तभागकोणोऽन्तर्मुखो भवति सा बहिर्मुखप्रान्तभागापेक्षयाऽल्पतरा प्रतीयते । (द्र०–द्वितीया आकृतिः) ।

(२)



(३) तिरश्चीनानां रेखाणां मध्याद्गच्छन्ती सरलाऽपि रेखा वक्रा दृश्यते । (द्र०–तृतीया आकृतिः)

(३)



१. Size-weight Illusion.

In Public domain. Digitization Muthulakshmi Research Academy

(४) रिक्तस्थानापेक्षया तावदेव पूर्णं स्थानमल्पतरं प्रतिभाति। (द्र०—चतुर्थ्याकृतिः)



(४)

(५) द्वयोः समानयोश्चित्रयोरुपरिस्थमल्पम्, नीचैःस्थं च दीर्घं दृश्यते। (द्र०—पञ्चम्याकृतिः)



(५)

(६) वक्राणां रेखाणां मध्याद् गच्छन्त्य उपरितो नीचैर्लम्बमानाः समानान्तरा अपि रेखा वक्रा दृश्यन्ते। (द्र०—षष्ठ्याकृतिः)

(६)

इयं परिमाणभारभ्रान्तिः कथ्यते। तस्य च मूलमयं सिद्धान्तो यत्कस्यापि समग्रस्य वस्तुनोऽङ्गानां गुणास्तस्य वस्तुनो गुणानाश्रयन्ते। अत्र प्रस्तुतेषु चित्रेषु प्रत्येकं समग्रं दृष्ट्वा तद्गुणाश्रयेण भ्रामकाणां सम्बन्धानामनुमानं क्रियते। सर्वेषामपि चित्राणामवयवगुणास्तदवयवानां प्रतीयमानेभ्यो गुणेभ्यो भिन्नाः सन्ति। तृतीयायां चतुर्थ्यां चाकृतौ सरला अपि रेखा आकृत्यङ्गभूतत्वाद् बहिरन्तश्च नमन्त्यो दृश्यन्ते।

(ख) चित्रफलकयोर्नियमः[१]—यथा चित्राय फलकं पृष्ठभूमिर्वाऽपेक्ष्यते, तथैव ज्ञानेन्द्रिय-सम्बद्धाय चित्राय काचित् संवेदना आवश्यकी भवति। श्रवण-घ्राण-स्पर्शादि-चित्राणि कारण-

१. Law of figure and ground.

In Public domain. Digitization Muthulakshmi Research Academy

विशेषेण मस्तिष्के प्रभावविशेषं जनयन्त्यः संवेदना एव। यथा पृष्ठभूमिं विना चित्रस्य प्रत्यक्षीकरणं न सम्भवति, तथैव नहि संवेदनासमूहं विना ज्ञानेन्द्रियचित्राणां सम्भवः। किञ्चदपि क्षेत्रम्, यस्मिन् संवेदनासमूहेऽवधानक्रिया केन्द्रिता भवति, तच्चित्रं कथ्यते। अवशिष्टं च क्षेत्रं तस्य चित्रस्य पृष्ठभूमिर्भवति। ज्ञानेन्द्रियभेदेन चित्राणां पृष्ठभूमिरपि भिद्यते। अवधानक्रिया च सततं परिवर्तते। तेन पूर्वस्मिन् क्षणे यच्चित्रं भवति तदेवाऽन्यस्मिन् क्षणे पृष्ठभूमिः। पृष्ठभूमिश्च चित्रतामापद्यते। नीचैरालिखिते चित्रे यदि कृष्णभागेऽवधानं क्रियते तदा कृष्णो भागश्चित्रम्, बिन्दुमान् भागश्च पृष्ठभूमिः फलकं वा प्रतिभाति। बिन्दुमति भागे चावधाने कृते कृष्णो भागः पृष्ठभूमिः, बिन्दुमानंशश्च चित्रं प्रतीयते। यदि कानिचित्क्षणान्येकस्मिन्नेव भागेऽवधानं क्रियते तदा ततोऽनन्तरं स्वयमेव दृष्टिरन्यं भागं प्रति चलति। तेन पूर्वक्षणे प्रतीयमानं चित्रमपरस्मिन् क्षणे फलकं जायते। इदं प्रत्यक्षस्य चाञ्चल्यमपि निगद्यते।



अस्मिन् चित्रे पूर्वं समग्रस्य वृत्तस्य प्रत्यक्षं भवति। ततो यो भागः प्रथमं ध्यानमाकर्षति स चित्रम्, अवशिष्टश्च पृष्ठभूमिर्भवति। अन्यस्मिंश्च स्थितिर्विपरिवर्तते। नहि सुघटिते चित्र एतत्सम्भवति। तत्र चित्रं चित्रं भवति, फलकं च फलकमेवावतिष्ठते। तत्र समग्रस्य फलकस्य महत्त्वपूर्णमङ्गं चित्रम्, गौणं च पृष्ठभूमिर्भवति। चित्रस्य सृष्टिरपि केषाञ्चिन्नियमानामधीना। ते च चित्रस्य निर्धारका नियमाः कथ्यन्ते। ते च इमे—

(१) समानताया नियमः[१]—समानान्यङ्गानि समन्वितानि भवन्ति, यथा—केनचित् स्वरविशेषेण गायतां बहूनां गायकानां स्वराः समन्विता भवन्ति।

(२) सामीप्यस्य नियमः[२]—देशविशेषे कालविशेषे च परस्परं समीपस्थितान्यङ्गानि समन्वितानि जायन्ते।

(३) सङ्गतेर्नियमः[३]—सुसङ्गतान्यङ्गानि समन्वितानि भवन्ति। साम्येन सामीप्येन वा सङ्गतेः प्रभावस्य व्यापकत्वं वर्धते।

(४) समानजातिमत्त्वनियमः[४]— समानतीव्रत्ववन्ति समानदीप्तिमन्ति वाङ्गानि

---

१. Law of similarity.
२. Law of proximity.
३. Law of symmetry.
४. Law of homogeneity.

In Public domain. Digitization Muthulakshmi Research Academy

समन्वितानि सुघटितानि वा भवन्ति। समष्टिरूपेणैते चत्वारः श्रेष्ठत्वनियमा उच्यन्ते, येषु पदार्थेष्वेवंविधं श्रेष्ठत्वं भवति, ते चित्ररूपे सुघटिताः समन्विता वा जायन्ते।

(१) सातत्यनियमः[1]—प्रत्यक्षक्रियायां सातत्यनियम आश्चर्यकरः। सर्वस्यापि दृष्टस्य पदार्थस्य प्रतिमाऽस्माकमन्तःपटले जायते। तस्याः प्रतिमायाः प्रत्यक्षमस्माकं भवति। द्रष्टव्यः पदार्थोऽस्माकं समीपे, दूरे, दक्षिणे, वामे वा पार्श्वे तिष्ठति। भिन्नास्वासु स्थितिषु पदार्थस्य प्रभावोऽपि भिन्नो भवति, यतः स्थितिभेदेन नेत्रे पदार्थप्रतिमा भिद्यते। पदार्थे समीपस्थे सति तस्य प्रतिमा विशाला, दूरस्थे चोत्तरोत्तरं सा क्षुद्रा सञ्जायते। एवमेव दक्षिणे पार्श्वे भिन्ना, वामे च भिन्ना भवति। तथापि यावत् स पदार्थोऽतिदूरं न नीयते, तावत्तस्याकृतौ भेदो न परिलक्ष्यते। नहि समीपस्थस्य जनस्याकृतौ द्विशतहस्तान्तरे स्थितस्य तस्याकृतेर्भेदो लक्षितो भवति। सत्यं त्वेतद् यद् दूरस्थः स यथा यथा भवन्तमुपसर्पति तथा तथा तदाकृतिचित्रं भवन्नेत्रयोरन्तःपटले परिवर्धमानं भवति। समीपागतस्य तस्य चित्रं पूर्वापेक्षया बहु वर्धितं भवति। तथापि नहि तत्प्रत्यक्षेऽन्तरं दृष्टं भवति। सातत्यनियमेनास्य कारणं स्पष्टं भवति। अस्माकं प्रत्यक्षक्रियान्तर्गतेषु पदार्थेषु सातत्यं तिष्ठति। आदातृभिः प्राप्यमाणा आवेगा यद्यपि परिस्थित्यनुसारेण भिन्ना भवन्ति, तथापि मस्तिष्कं प्राप्य ते तथा व्यवस्थिता भवन्ति यथा प्रत्यक्षजगता सह तेषामापेक्षिके सम्बन्धेऽन्तरं न प्रतिभासते। एकेनोदाहरणेनास्य लाभः स्पष्टीक्रियते—वृक्षपत्राणि हरितानि, सुधावलिप्ता भित्तिश्च धवला दृश्यते। नहि प्रकाशप्रकर्षापकर्षयोस्तेषु कोऽपि प्रभावो जायते। सुधाधवलं गृहं चन्द्रिकायां यथा धवलं दृश्यते, तथैव सूर्यालोकेऽपि। यद्यपि सूर्यालोकश्चन्द्रिकायास्तीव्रतरो भवति। यदि प्रकाशप्रकर्षापकर्षौ दीप्तिप्रत्यक्षभेदकारणे भवेताम्, तदा बहूनां पदार्थानां प्रत्यभिज्ञानमपि कठिनं भवेत्। मध्याह्नं यावद्वर्धमाने सूर्यालोके पदार्थानां धवलिमाऽपि वृद्धिमाप्नुयात्, मध्याह्नानन्तरञ्चापकर्षम्; परन्न तथा भवति। पदार्थास्तु मध्याह्नेऽपि तथैव धवला अवलोक्यन्ते यथा सूर्यास्तमनवेलायाम्। दीप्तिसातत्यस्य कारणद्वयम्। तत्र प्रथमं पूर्वपरिचयः, द्वितीयं च छायाप्रकाशस्थितेर्ज्ञानम्। यं पदार्थं वयं श्वेतं रक्तं वा जानीमः, तं सदा तथाविधमेव पश्यामः। अयमस्माकं स्वभावः। दीप्तिनिर्णये पृष्ठभूमेरपि प्रभावो महान् भवति। तेन छायायां दृश्यमानस्य पदार्थस्य दीप्तेरनुमानं प्रकाशेऽपि तथाविधमेव भवति।

विचारजन्या विभ्रमाः

विचारेच्छोद्वेगा विचारजन्यानां विभ्रमाणां कारणानि भवन्ति। यदाऽस्माकं मस्तिष्कं कैश्चिद् विचारैः पूर्णो भवति, तथा बाह्यस्य पदार्थस्य प्रत्यक्षं भ्रमपूर्णं भवति। चिन्तयन् जनः सम्मुखस्थं पुरुषमाह्वयन्नप्यन्यस्य कस्यचिन्नामोच्चारयति। नामभ्रान्तेरनुभवस्त्वस्माकं सर्वेषामस्त्येव। पुस्तकं सम्मुखं संस्थाप्य पठन् सम्मुखस्थानामक्षराणां स्थानेऽन्यदेव किञ्चित् पठति। मुद्रणकाले पुस्तकेऽशुद्धीर्निरीक्षमाणोऽशुद्धीर्न पश्यति। तस्य मनोऽर्थविचारे सँल्लग्नं भवति। अर्थानुसारेण च शब्दान् पठितुमारभते। नह्यक्षरविन्यासे तस्य मनः केन्द्रितं भवति, तेन चाक्षरविन्यासेऽशुद्धयो नावलोक्यन्ते। पुस्तकं चाशुद्धमेव मुद्रितं भवति। यश्च लिखितस्यार्थग्रहणेऽसमर्थोऽक्षरविन्यासशुद्धीः शोधयति, स एव शोधकः सफलो भवति।

१. Law of constancy.

In Public domain. Digitization Muthulakshmi Research Academy

उद्वेगा अपि भ्रमहेतवो भवन्ति। कापुरुषाः सदा भीतमनस एव रात्रावितस्ततश्चरन्ति। सम्मुखस्थं स्थाणुमपि प्रेतं पिशाचं वा मन्यन्ते। प्रतीक्षापि भ्रममुत्पादयति। चिरं मित्रागमनं प्रतीक्षमाणोऽन्यमपि गृहागतं क्षणाय मित्रमेव मन्यते, न तं यथावत् प्रत्यभिजानाति। अनेकदा निराधाराः समाचाराः प्रचलिता भवन्ति। तेषां कारणं तद्विषयिणी चिरप्रतीक्षैव। पूर्वग्रहोऽपि भ्रममुत्पादयति। या धारणा पूर्वतो मनसि भवति तदनुकूलमेव घटमानं सर्वं प्रतीयते। अनेनैव कारणेन कस्यचित्पक्षस्य समर्थका राजनीतिज्ञा अन्यपक्षेण कृतं सर्वमपि दूषितं पश्यन्ति।

विचारजन्या भ्रमा विभ्रमाः[1] कथ्यन्ते। भ्रमाणामुत्पत्तिर्बाह्योत्तेजनाभ्यो भवति। विभ्रमाणां च ततोऽन्यतः। विभ्रमा दृष्टिसापेक्षा भवन्ति। तेषामाधारो मस्तिष्ककेन्द्रम्, न तु बाह्यवस्तूनि। विभ्रमा विक्षिप्तेष्वधिकतयोपलभ्यन्ते।

प्रत्यक्षीकरणस्य वैशिष्ट्यम्

स्टाउटमहोदयानां मतेन प्रत्यक्षीकरणस्य षड् विशेषगुणा भवन्ति। ते यथा—

(१) **एकता, अविच्छिन्नता च**—इयं तु प्रत्यक्षीकरणस्य सामान्या विशेषता। कदाचित् प्रत्यक्षं क्षणिकम्, सरलम्, क्षणिकायाः रुचेस्तर्पकं च भवति। किञ्चित् प्रत्यक्षं चिरस्थायि, बहुप्रत्यक्षनिर्मितमेकं जटिलं च भवति। सूच्यां सूत्रप्रवेशनम्, उच्चावचे शिलाखण्डे आरोहणम्, द्विचक्रयानसमतोलनमित्यादौ प्रत्यक्षशृङ्खला भवति, सा चैकाऽविच्छिन्ना च। नेमे सरलाः क्षणिकाश्च व्यापाराः। तत्र शारीरिकशक्त्याश्रिता बाह्योत्तेजनाऽधीना चैका संस्कारपरम्परा[2] भवति।

(२) **ध्यानम्**—प्रत्यक्षीकरणे निरन्तरं परिवर्तमानासूत्तेजनासु ध्यानमावश्यकं भवति। आगामिनीभिरुत्तेजनाभिर्ज्ञानेन्द्रियाणां पूर्वसमायोजनं[3] च। मूषकं प्रतीक्षमाणा मार्जारी भाव्युत्तेजनाभ्यः पूर्वमेव श्रोत्रे अक्षिणी च समायोजयति। नहि ध्यानादृते इन्द्रियसंस्कारसङ्केतानामर्थो ज्ञायते। अपरिचितानां वस्तूनां प्रत्यक्षीकरणे तु ध्यानस्याधिका मात्राऽपेक्ष्यते।

(३) **प्रयत्नपरिवर्तनसहगामिनी[4] दृढता**—अनेकदा प्रत्यक्षीकरणे सहजप्रवृत्त्यात्मको[5] व्यापारोऽपि निविष्टो भवति। तस्मिंश्च परिवर्तमानेन प्रयत्नेन सह दृढताऽपेक्षिता भवति। कस्यचिदपि वस्तुनः प्रत्यक्षीकरणे पशुः प्रथमं बह्वीषु गतीषु तिष्ठति, ततः प्रयत्ने साफल्यं लभते। मार्जारी किञ्चिन्नवं खाद्यं प्राप्य ध्यानेन तस्य निरीक्षणं करोति, अनुसन्धानं च। ततस्तदितस्ततश्चालयति, सारयति, पश्यति, जिघ्रति, खण्डयत्यास्वादयति च। इदं प्रत्यक्षीकरणं प्रयत्न-च्युतिप्रक्रिया। अत्र प्रयत्नपरिवर्तनेन सह दृढता समीह्यते।

(४) **परिस्थितिभिः समायोजनम्**[6]—प्रत्यक्षीकरणमुत्तेजनानां स्थानपरिवर्तनेन सह समायोजनं समीहते। उत्तेजनाः स्वस्थानं परिवर्तयन्ति, कदाचित् समीपे भवन्ति ततो दूरं यान्ति,

---

१. Hallucination.
२. Impressions.
३. Pre-adjustment.
४. Persistency with varied effort.
५. Instinctive.
६. Adaptation to Conditions.

In Public domain. Digitization Muthulakshmi Research Academy

दूराद्वा समीपमायान्ति। परिवर्तनशीलाभिरुत्तेजनाभिर्गतैः समायोजनमावश्यकं भवति। पूर्वोक्तायां दृढतायां नहि प्रत्यक्षस्य विषयः परिवर्तते। स तु तथैव संस्थितो भवति। अत्र तु वस्तुनः स्थितौ, दूरत्वे, दिशायां वा जातं परिवर्तनं दृष्ट्वा गतौ समायोजनं क्रियत इति विशेषः।

(५) **अनुभवेन शिक्षणम्**—प्रत्यक्षीकरणे गतानुभवस्य वर्तमानानुभवने संयोगो भवति। सर्वेषामपि वस्तूनां प्रत्यक्षानन्तरं तद्विषयकः संस्कारो मनस्यवशिष्यते। सः संस्कारस्तत्सदृशस्य तस्य वा वस्तुनोऽन्यदा प्रत्यक्षं प्रभावयति। अयमेव 'अर्थोपलब्धिः[1]' इति कथ्यते।

(६) प्रत्याह्वानम्[2]—प्रत्यक्षीकरणसाहचर्यमन्तर्निविष्टं[3] भवति। एका संवेदनाऽन्याभिः संवेदनाभिः संयुक्ता भवति। आम्रं दृष्ट्वा वयं तत् स्पृशामः, जिघ्रामः, आस्वादयामश्च। तत्र दृष्टिस्पर्शघ्राणास्वादसंवेदनाः संयुक्ता भवन्ति। संवेदनाश्च स्मृतिप्रतिमाभिः[4] संयुक्ता भवन्ति। केनचिद् हिमखण्डं दृष्टं स्पृष्टं च। तस्य श्वेतवर्णसम्बन्धिनी दृष्टिप्रतिमा[5] शीतलतायाः स्पर्शसंवेदनया[6] संयुक्ता। ततोऽनन्तरं दृष्टे हिमखण्डे शीतलताऽपि विचारितैव प्रत्यक्षीभवति। अत्र दृष्टिसंवेदनया स्पर्शसंवेदना प्रत्याहूयते। इदञ्च संवेदनानां जटिलीकरणम्[7], तच्च सर्वेषु व्यवहितेषु प्रत्यक्षेष्ववाप्यते।

प्रत्यक्षीकरणं यथार्थसंवेदनानां संयोगः, स्मृतिभिस्तासां संयोजनं चेत्यपि वक्तुं शक्यते।

प्रत्यक्षीकरणस्य भूमिकाः[8]

मेलोनमहाशयेन प्रत्यक्षीकरणस्य तिस्रो भूमिका वर्णिताः। ताश्च—

(१) प्रत्यभिज्ञां विना प्रत्यक्षीकरणम्, (२) स्पष्टविचारैर्विना प्रत्यभिज्ञा, (३) स्पष्टविचारैः सह प्रत्यभिज्ञा चेति।

क्षुद्राः पशवः प्रत्यभिज्ञां विनाऽपि प्रत्यक्षं कुर्वते। केचिन्मत्स्या गन्धेनैवाहारं मृगयन्ति, केचिच्च केवलया दृष्ट्या। केचिन्निकटमागच्छतः पदार्थस्याभासं स्वयमेव लभन्ते। साधारणो मत्स्यः प्रकाशान्धकारस्वादगन्धानां प्रत्यक्षं कर्तुं क्षमते, न च भिन्नाः संवेदनाः संयोजयितुम्। न सोऽनुभवने शिक्षितुं शक्नोति। नहि तस्य स्मृतिप्रतिमाः स्पष्टा भवन्ति। न च तस्य प्रत्यक्षीकरणे प्रत्यभिज्ञा भवति। शलभस्य प्रत्यक्षीकरणमपि प्रत्यभिज्ञारहितं भवति। दग्धोऽपि स दीपशिखाया न बिभेति। "मानसिकजीवनस्य प्रारम्भावस्थायामतीतकालस्य बहवोऽपि समाना अनुभवा नहि प्राणिनां व्यवहारेऽन्तरं जनयन्ति" इति मेलोनमहाशयानां

---

१. Acquirement of meaning.
२. Reproduction in Perception.
३. Association.
४. Memory images.
५. Visual images.
६. Tactual Sensation.
७. Complication.
८. Stages.

In Public domain. Digitization Muthulakshmi Research Academy

मतम्। व्यवहितेऽर्जिते वा प्रत्यक्षे संवेदना विचाराणामस्पष्टतया जटिला जायन्ते। हिमं शीतलम्, आम्रं मधुरम्, तैलञ्च वासितं दृश्यते। अत्र दृष्टिसंवेदनाः पूर्वानुभूतस्पर्शस्वादगन्धानामनश्यता प्रभावेण जटिलाः जाताः। न तु गतानुभवस्मृतिप्रतिमाः सुस्पष्टं पुनर्जीविताः। स्पष्टविचारयुक्ता प्रत्यभिज्ञा तु तत्र, यत्र स्मृतिकल्पनयोर्विचारा गतानुभवानामस्पष्टतां विमुच्य वर्तमानपरिस्थितिभिः सम्बद्धा भवन्ति। अत्र गतानुभवानां संस्कारास्तथा प्रबला भवन्ति, यथा ते वर्तमानानुभवेभ्यो भिन्नान् स्पष्टान् विचारानुत्पादयन्ति। वर्तमानानुभवेभ्यः स्वतन्त्राश्च भवन्ति। दूरात् किञ्चित्पिण्डं दृष्ट्वा जनः कदाचित्तत्स्तम्भं मन्यते, कदाचित्पुरुषम्। अत्र प्रत्यक्षं गतानुभवेन जायमानौ द्वौ मिथोविरोधिनौ विचारावनिश्चिततां नयतः। यदा समीपं गच्छति, तदा मनुष्यम्, ततोऽपि समीपं प्राप्य मित्रमिति विजानाति। अत्र दृष्टिसंवेदना गतानुभवस्मृतिजन्यविचार-विशिष्टीकृता भवति। मित्रमिति परिज्ञाने तु प्रत्यभिज्ञा स्पष्टैव।

सांवेदनिकानि चिह्नानि[1]

यदा जनः किञ्चिदवलोकयति, तदा न केवलं [2]दृश्यवस्तुक्षेत्रमेवावलोकयति। अवलोकनं गुणसम्बन्धयुक्तस्य वस्तुनो भवति। वस्तुनोऽवलोकने तस्य स्थितिः, परिमाणम्, वर्णः, स्थानकृतं दूरत्वम्, गतयः, परिवर्तनानि वावेक्ष्यन्ते। इदं वस्तुगतायाः[3] परिस्थितेरवलोकनं भवति। प्रत्यक्षीकरणं पूर्वानुभवाश्रितं भवति। प्रत्यक्षीकरणे शिक्षणे चान्योन्याश्रितः सम्बन्धः। निरीक्षणाच्छिक्षणम्, शिक्षणाच्च निरीक्षणमिति नात्र विवादः। कदाचित् कस्यचिद्वस्तुनश्चिह्नं दृष्ट्वा तद्वस्तु प्रत्यक्षीक्रियते। चिह्नस्यार्थोऽवज्ञायते, तेन वस्तुज्ञानं भवति। दूरतो भूमिं विलोक्य जना वदन्ति 'आर्द्रेयं भूमिः' इति, नह्यार्द्रता नेत्राभ्यां द्रष्टुं शक्यते। अयं तु स्पर्शजन्यानुभवविषयः। आर्द्रताचिह्नं भूमौ दृष्ट्वा कथितं भवति 'अस्त्यत्रार्द्रता' इति। अत्रातीतं स्पर्शजं[4] प्रत्यक्षमनुस्मृत्य तदाश्रयेणार्द्रताया दार्ष्टिकचिह्नानामर्थो गृह्यते। बुभुक्षितः सारमेयो भोजनात् पूर्वं प्रतिदिनं घण्टाशब्दं शृण्वन् घण्टाशब्दश्रवणसमकालमेव लालास्रावं कर्तुमारभते। अत्र घण्टाध्वनिर्भोजनचिह्नं जाता। एवमेव भूमेः परिवर्तिता आकृतिरतीतानुभवाश्रयेणार्द्रताया बोधिका भवति।

यथा दूरे स्थितस्य मित्रस्य चित्रं सम्मुखस्थमित्रस्यापेक्षया लघीयो भवति। नहि सूक्ष्माणि परिचायकानि चिह्नानि[5] तस्मिन् विशदतया दृश्यन्ते, तथापि ज्ञायत एव मित्रमिदमिति। एवमेवान्याकृतयोऽपि सूक्ष्मपरिमाणा अल्पविशेषयुक्ता अपि सरलतयाऽभिज्ञायन्ते। नहि प्रह्रासिताः[6] सङ्केता अर्थबोधे बाधका भवन्ति। चिह्नं प्रह्रासितः सङ्केत एव।

---

१. Sensory Signs.

२. Field of view.

३. Objective situation.

४. Tactual.

५. Visual sign.

६. Reduced cue.

In Public domain. Digitization Muthulakshmi Research Academy

आकृतेराधारस्य[1] च प्रत्यक्षीकरणम्

वयं कस्यापि वस्तुनः प्रत्यक्षं नहि तस्यावयवसमूहरूपेण कुर्मः। वस्तुनः प्रत्यक्षे नावयवानां समूहस्य प्रत्यक्षीकरणं भवति। तत्र समग्रस्याखण्डस्य वस्तुनः समष्ट्याकृतेरेव प्रत्यक्षं क्रियते। समष्टेः प्रत्यक्षीकरणं नैसर्गिकमेव भवति, न तु शिक्षितम्। एवं घटप्रत्यक्षीकरणे घटस्यैव प्रत्यक्षं भवति, न तु कपालयोः। आकृत्याधारयोरपि मध्ये आकृतिः शीघ्रं ध्यानमाकर्षति। सास्माकं सम्मुखमुपस्थितेव भवति। आधारस्तु तस्याः पृष्ठे भागे विस्तीर्णः। आकाशस्य पृष्ठभूमौ पर्वतो दृश्यते, भित्तिरूपायां पृष्ठभूमौ चित्रं दृश्यते। आकाशं भित्तिश्चाधारौ, पर्वतश्चित्रं चाकृती। "नह्याकृतिराधारश्च दृष्टिसंवेदनामात्रस्य विशेषः। आकृतिरूपः सङ्गीतमयमृदङ्गशब्दोऽल्पस्पष्टः कोलाहलः पृष्ठभूमेः पृथक् श्रूयते। त्वचि कस्यचिद्वस्तुन उपसरणं रिङ्गणं वा स्पर्शसंवेदनापुञ्जात् पृथगनुभूयते। गेस्टाल्टमनोवैज्ञानिकैराकृतेराधारस्य चायं भेदो ज्ञातः" इति बुडवर्थमहोदयः।

प्रत्यक्षीकरणे सहायकानि तत्त्वानि

समीपस्थितेषु बहुषु वस्तुषु कस्यचित् प्रत्यक्षीकरणमन्यान्युपेक्ष्य भवति। द्वे समीपस्थिते वस्तुनी न सहैव प्रत्यक्षीक्रियेते। तत्रैकं तूपेक्षितमेव भवति। यस्य प्रत्यक्षीकरणं प्रथमं भवति तस्मिन् भवति विशेषः कश्चित्। एतदनुचिन्त्य मनोविद्भिः प्रत्यक्षीकरणे सहायकानि कारणान्यन्विष्टानि। तानि च सप्त; यथा—

(१) अव्यवस्थितं निहितानां वस्तूनां मध्ये परस्परं समीपस्थानि समूहबद्धानि वस्तूनि शीघ्रं प्रत्यक्षीभवन्ति। तेन सामीप्यं[2] तत्त्वानि सरलतया समूहबद्धानि करोतीति ज्ञायते।

(२) तत्त्वानां साम्यमपि[3] तेषां समूहीभवनेऽनुकूलं भवति। सम्मुखस्थितेषु भिन्नवर्णाकृतिषु पदार्थेषु समानवर्णाकृतयः पूर्वं सदैव च प्रत्यक्षीक्रियन्ते।

(३) वस्तुनोऽविच्छिन्नता[4] तत्त्वानां निश्चितसमष्टिषु ग्रथने सहायिका भवति। सरलायां वक्रायां वा रेखायां स्थिता बिन्दवः सरलतया संमष्टिषु समूहबद्धा भवन्ति।

(४) पदार्थस्यान्तरावेशिताऽपि[5] सुविधाप्रदा भवति। कश्चिदवयवी सर्वानपि स्वावयवानन्तरावेशयति, कस्यचिच्चावयविनः केचिदवयवा बहिः प्रक्षिप्ता भवन्ति। एवं स्थिते पूर्वोऽवयवी सरलतया प्रत्यक्षीकृतो भवति। अवयवापेक्षया समूहस्य प्रत्यक्षीकरणं सरलं भवति।

(५) वस्तुनः परिचयोऽपि सुविधाकरो भवति। अपरिचितानां मध्यात् परिचिताकृतिः शीघ्रं प्रत्यक्षीकृता जायते।

(६) तत्परताऽपि प्रत्यक्षीकरणे सहायकं तत्त्वम्। यदि कश्चित् काञ्चिदाकृतिं द्रष्टुम्, गीतं वा श्रोतुं तत्परो भवति, तदा सोऽक्लेशेन तत्प्रत्यक्षीकरणे सफलो भवति।

---

१. Figure & ground.

२. Proximity.

३. Similarity.

४. Continuity.

५. Inclusiveness, Undifferentiated whole.

In Public domain. Digitization Muthulakshmi Research Academy

(७) समष्टेः प्रत्यक्षीकरणेन तत्सामञ्जस्यमयानामवयवानां प्रत्यक्षीकरणे सौकर्यं भवति

प्रत्यक्षीकरणं निर्धारणरूपा संयोजनरूपा वा क्रिया भवति । बहूनां पदार्थानां मध्ये कञ्चिदेकमवच्छित्य तदवयवेषु ध्यानं क्रियते । ते च समष्टिरूपे समूहबद्धाः क्रियन्ते । एवं प्रत्यक्षीकरणस्य तिस्रः कोस्यो भवन्ति—(१) समावयवा समष्टिः[१], (२) पृथग्भूताः संवेदनाः, (३) समाकलिता आकृतिश्चेति ।

बाह्यजगतः[२] प्रत्यक्षीकरणम्

देशकालावच्छिन्नानां बाह्यपदार्थानां चेतनोपलब्धिः[३] प्रत्यक्षीकरणम् । वस्तुनः प्रत्यक्षीकरणे इन्द्रियोपलब्धसंवेदनानां संश्लेषणं भवति । प्रत्यक्षीकृतं वस्तु स्वतन्त्रमपि भवति । समाप्तायामपि प्रत्यक्षीकरणक्रियायां प्रत्यक्षीकृतस्य वस्तुनः सत्ताऽवशिष्यते । प्रत्यक्षीकृतानां वस्तूनां गुणा द्विविधा भवन्ति—मुख्याः, गौणाश्च । तत्र [४]सान्द्रत्व-विस्ताररूप-परिमाण-दिग्दूरत्व-गति-स्थैर्याणि मुख्याः, वर्णध्वनि-गन्ध-स्वाद-तापमानादयश्च गौणा गुणाः । नहि सान्द्रत्वविस्तारादिप्रत्यक्षं विना वर्णध्वन्यादीनां तत्र प्रत्यक्षं भवति । मौलिकानां गुणानां प्रत्यक्षं [५]पैशिकसंवेदनाभिर्भवति । न च पैशिकसंवेदना बाह्यवस्तूनां गुणाः । वर्णध्वनिस्वादादयो बाह्येन्द्रियसंवेदना बाह्यवस्तूनामिन्द्रियज्ञेया गुणा एव । आसु संवेदनासु जायमानानि परिवर्तनानि गतिसंवेदनाभ्यः[६] पृथगनुभूयन्ते । स्टाउटमतेन सर्वप्रथमं बाह्यतायाः[७] प्रत्यक्षीकरणं सोद्देश्यचेष्टागते गतिसमायोजनावसरे भवति, बाह्यवास्तविकतायाः प्रत्यक्षीकरणं सचेष्टगतेरनुभवमवलम्बते ।

शरीरस्य प्रत्यक्षीकरणम्

शरीरस्य तद्रूपाकारयोश्च ज्ञानं प्रत्यक्षीकरणसाहचर्ययोः फलम्, न तु सहजम् । शिशुः स्वशरीरस्यानुसन्धानं करोति । स शरीरस्य गतिभिर्गतिसंवेदनाम्, विभिन्नाङ्गानां स्पर्शेन स्पर्शसंवेदनाञ्च प्राप्नोति । नहि शिशोः स्वाङ्गानां स्पष्टो बोधो भवति । शरीरस्य प्रत्यक्षीकरणं क्रमेण स्पर्श-गति-साहचर्य जन्यानुभवकालेऽर्ज्यते । यदा बालको बाह्यपदार्थं स्पृशति, तदैकैव स्पर्श-संवेदनाऽनुभूता भवति । यदा स्वयं स्वाङ्गानि स्पृशति, तदा द्वयोः स्पर्शयोः संवेदनाऽनुभूयते । द्वयोः सम्पर्कयोः स्पर्शसंवेदना शरीरप्रत्यक्षीकरणे सहायिका भवति । परं नहि सक्रियः स्पर्श एव केवलः शरीरप्रत्यक्षीकरणे कारणम् । स्पर्श-गतिसंवेदनायुक्ता दृष्टिस्तस्य प्रत्यक्षीकरणेऽतिसहायिका । शरीराङ्गानां गतयो गतिसंवेदनाः प्रयच्छन्ति । बालकः शीघ्रमेव ताभिः परिचितो जायते । स बाहू पादौ च चालयति, चलतश्च तान् पश्यति । क्रमेण दृष्टितो भिन्नाया गतिसंवेदनाया अर्थं स जानाति । दृष्टेः सहायतां विनाऽपि स शरीराङ्गानां गतिं जानाति । एवं द्वयोः सम्पर्कयोः स्पर्शसंवेदनायाः, दृष्टिसंवेदनायाः, गतिसंवेदनायाश्च संयोगेन शरीरस्य प्रत्यक्षीकरणं भवति ।

---

१. Integrated pattern.
२. External Reality.
३. Apprehension.
४. Solidarity.
५. Muscular.
६. Motor Sensations.
७. Externality.

In Public domain. Digitization Muthulakshmi Research Academy

[1]बाह्यदेशस्यावकाशस्य वा ज्ञानम्

पदार्थज्ञानं देशकालज्ञानेन सहैव भवति। अत्र केचित् कथयन्ति 'नहि देशकालयोर्बुद्धि-व्यतिरिक्ताऽस्ति सत्ता। इमौ तु वस्तुज्ञानस्याङ्गभूतावेव। बुद्धौ स्थितिर्देशकालयोर्न तु पदार्थेषु।' अत्र विवादो दार्शनिकस्य कार्यम्। मनोवैज्ञानिकास्तु देशकालयोर्ज्ञानं कथं भवतीत्यनेनैव सम्बद्धाः। स्टाउटमहोदयानां मतेनावकाशस्य भावना जन्मजाता, परमस्या वृद्धिरनुभवेन सहैव भवति। अवकाशज्ञानवृद्धौ बहूनीन्द्रियाणि सहायकानि भवन्ति। मुख्यतस्तु त्वङ्नेत्रे। केषाञ्चिन्मतेन श्रोत्रमपि साधनमवकाशज्ञानस्य। अवकाशज्ञानस्य चत्वार्यङ्गानि—दिशाज्ञानम्, दूरत्वज्ञानम्, आकारज्ञानम्, आकृतिज्ञानञ्चेति। तत्र दिग्ज्ञानस्याधारः स्पर्शः, गतिज्ञानम्, दर्शनम्, श्रवणम्, घ्राणञ्चेति। नेत्रयोस्तु विशेषोपयोगः। किमपि वस्तु कुत्र तिष्ठतीति ज्ञानाय नेत्रे तत्र परिवर्त्येते। नेत्रचालनेनैव दिशो ज्ञानं भवति। श्रोत्रयोरपि महत्त्वं दिग्ज्ञाने नाल्पम्। ध्वनितीव्रताऽपि दिग्बोधिका भवति। श्रोत्रे स्पृशञ्छब्द एकं श्रोत्रं तीव्रतया स्पृशति, द्वितीयञ्च मन्दतया। तेन दिग्बोधो भवति। यदा च ध्वनिः समानतीव्रतयोभे अपि श्रोत्रे स्पृशति, तदा ध्वनिदिग्भ्रमो भवति। घ्राणेनापि दिशो ज्ञानं भवति। निम्नकोटिकेषु प्राणिषु घ्राणेन दिग्ज्ञानस्य शक्तिरधिका भवति। दूरत्वज्ञानं स्पर्शेन, गत्या, नेत्राभ्याम्, श्रोत्राभ्याञ्च जायते। यस्य वस्तुनः स्पर्शाय यावच्चलनमावश्यकं भवति, तावदेव दूरस्थं तद् भवति। अल्पेन गमनेन प्राप्तं ज्ञानमल्पं दूरत्वबोधकं भवति। नेत्राभ्यां दूरत्वज्ञानस्य शक्तिर्बालके क्रमेण वर्धते। नहि स प्रथमतो वस्त्वत्यवलोक्य दूरत्वं विजानाति। प्रौढो जनो नेत्राभ्यामवलोक्यापि दूरत्वज्ञानं प्राप्नोति। (Monocular factors of space perception) दूरत्वज्ञानमेकेनाक्ष्णाऽपि भवति, द्वाभ्यामपि। एकेनाक्ष्णा वस्तुज्ञाने बहूनि साधनानि भवन्ति। तेषु—

(१) वस्तुनः परिमाणं[2] प्रथमम्। परिचितस्य वस्तुन आकारो यदि सत्यादाकाराद् अल्पीयान् प्रतीयते तदा वस्तु दूरस्थितं कल्प्यते। यदा आकाश उड्डीयमानं वायुयानं लघ्वाकृति दृश्यते, तदाऽतिदूरस्थितं तदिति मन्यामहे वयम्। अस्माकं नेत्रपुत्तलिकायां सम्मुखस्थानां पदार्थानां प्रतिबिम्बं जायते। यद् वस्तु दूरस्थं भवति, तस्य प्रतिबिम्बमपि लघु भवति।

(२) पदार्थाकृतिरपि[3] दूरत्वज्ञापिका भवति। दूरस्थं वस्तु विषमभुजं विषमाकृति वाऽपि वर्तुलं प्रतिभाति; यथा—चन्द्रः।

(३) यदैकं वस्तु द्वितीयमाच्छादयति, तदा आच्छादकं समीपस्थम्, आच्छाद्यं च दूरस्थं मन्यते। अल्पीयानपि पदार्थो दृष्ट्या महान्तमावृणोति। तेन सामीप्यमनुमीयते पदार्थस्य। सामान्योऽपि मनुष्यः समीपे गच्छन् वृक्षं दृष्टिव्यवहितं करोति। तेनावरणमपि[4] दूरत्वज्ञाने सहायकमिति मन्तव्यम्।

---

१. External objects.

२. Size.

३. Shape.

४. Super imposition.

In Public domain. Digitization Muthulakshmi Research Academy

(४) पदार्थाना गतिरपि[1] दूरत्वज्ञापिका दृश्यते। रेलयाने गच्छन् पुरुषः समीपस्थान् वृक्षान् क्षिप्रं विपरीतदिशि गच्छतः पश्यति, दूरस्थाँश्च मन्दम्।

(५) पदार्थानामस्पष्टतया ज्ञायते यद् वस्तु दूरे, समीपे वेति। दूरस्थाः पर्वता अस्पष्टा दृश्यन्ते, समीपस्था वृक्षाः स्पष्टाः। एकनेत्रापेक्षया द्वाभ्यां नेत्राभ्यां[2] दूरत्वज्ञानं सरलं भवति। द्वाभ्यां नेत्राभ्यां दृश्यमाने एकस्मिन् पदार्थे तत्र दृष्टिर्मिलति। यदि पदार्थः समीपस्थो भवति, तदा दृष्टिसंयोगाय पुत्तलिकाचालने भूयानायासोऽपेक्ष्यते, दूरस्थे पदार्थे चाल्पीयान्। इदं पुत्तलिकाचालनं दूरत्वज्ञानकारणं भवति।

वस्तुनः प्रसारस्त्रिविधो भवति—विस्तारः, आयामः, स्थौल्यञ्च। एकेनाक्ष्णा वस्तुनो विस्तारस्यायामस्य च ज्ञानं निर्दोषं भवति, परं स्थौल्यज्ञानाय तस्यापरोऽपि प्रान्तोऽवलोकनीयः। यदाऽस्माकं द्वे अपि नेत्रे सदैव क्रियारते भवतः, तदा पदार्थस्य त्रयः पार्श्वभागाः सहैवावलोकिता भवन्ति। यदा वयं द्वाभ्यामपि नेत्राभ्यां सहैवावलोकयामः, तदा द्वयोः पुत्तलिकयोः पदार्थस्य द्वे आकृती प्रतिबिम्बिते भवतः। परं पश्चात् उभे अपि मिलिते सम्मिलितैकाकृतेर्ज्ञानं मस्तिष्क उत्पादयतः।

नेत्राभ्यामिव कर्णाभ्यामपि दूरत्वज्ञानं भवति। परिचितस्य पदार्थस्य मन्दं स्वरं श्रुत्वा तस्य दूरत्वं विज्ञायते।

यथेन्द्रियैः पदार्थाकृतेर्देशस्य च ज्ञानं भवति, तथा कालस्याऽपि। समयस्य ज्ञाने सर्वाण्यपीन्द्रियाणि साधनानि भवन्ति। समयस्य ज्ञानं घटनानुसारेण भवति। स्वल्पोऽपि समयस्तस्मिन् घटमानानां घटनानामनुसारेण दीर्घः प्रतीयते। यदि घटना अल्पा भवन्ति, तदा समयोऽपि स्वल्प एव ज्ञायते। दीर्घश्च कालो घटनापूर्णः सन्नल्पः प्रतीयते, घटनाविरहितश्च दीर्घः।

प्रत्यक्षीकरणम्, गत्यात्मकप्रतिक्रिया च

प्रत्यक्षीकरणं प्रत्यक्षीकृतं पदार्थं प्रति गत्यात्मिकां प्रतिक्रियामुत्पादयति। उद्याने पुष्पस्य प्रत्यक्षीकरणं तस्य ग्रहणाय प्रेरयति। एवं प्रत्यक्षीकरणं गत्यात्मकप्रतिक्रियायाः पूर्वं भवति। तथ्यस्य वस्तुनो वा यद्रूपं तेनैव रूपेण समायोजनं प्रत्यक्षीकरणम्, तेषां परिवर्तनोपक्रमश्च गत्यात्मकं समायोजनम्। प्रत्यक्षीकरणे परिवर्तनं नान्तर्निविष्टं भवति। तत्तु पदार्थस्य यथास्थितस्य ग्रहणम्। गतिः पदार्थं परिवर्तयति, तस्मिन् नवं वा किञ्चिदुत्पादयति। प्रत्यक्षीकरणं गत्यात्मकप्रतिक्रियायाः पूर्ववर्ति। छात्रा अपराह्णघण्टाशब्दं श्रुत्वोत्तिष्ठन्ति; समाहतायां च घण्टायां त्यजन्ति वर्गकक्षम्।

मस्तिष्के चतस्रः प्रतिक्रिया भवन्ति–(१) उपक्रमसंवेदना, (२) वस्तुनः प्रत्यक्षीकरणम्, (३) कार्यार्थं व्यवस्थितं सज्जत्वम्,(४) चेष्टाधिष्ठानस्य[3] निम्नकर्मकेन्द्रैः[4] पेशीषूत्तेजनां जनयित्वा पेशीभिस्तैश्च कार्यनिष्पादनम्।

---

१. Movement.

२. Binocular factors.

३. Motor area.

४. Lower motor-centres.

In Public domain. Digitization Muthulakshmi Research Academy

दशमोऽध्यायः

शिक्षणम्

शिक्षिताः सहजाश्च क्रियाः

लोके प्राणिनां याः काश्चित् क्रिया दृश्यन्ते तासां मूलं पौर्वकालिकोऽनुभव[१] एव। एताः क्रिया द्विविधाः—एका नैसर्गिक्यो जन्मना सहजाताः, अपराश्च शिक्षिताः। स्वतः स्फूर्ताः[२], अनियमिताः,[३] उत्क्षिप्ताश्च[४] क्रियाः सहजप्रवृत्तयः[५]; वेदनानां[६] संवेगानां[७] चानायासा अभिव्यक्तयः 'जन्मजाताः क्रियाः' कथ्यन्ते। जन्मजाताः क्रियाः सर्वेषां शिक्षितानां व्यापाराणामाधारः। निम्नकोटिकेषु प्राणिषु जन्मजाता क्रियाक्षमता उच्चकोटिकेभ्यो प्राणिभ्योऽधिका भवति। शशकशावका जन्मन आरभ्यैव धावितुमारभन्ते। वत्सतरा जन्मनो दिवसत्रयानन्तरं जले तर्तुं शक्नुवन्ति; परं मानवशिशवो जन्मनो द्वादशमासानन्तरं तु चलितुमपि न क्षमन्ते, का कथाऽन्यव्यापाराणाम्! मानवशिशुष्वस्ति कश्चिदन्यो विशेषः। ते विलम्बेन शिक्षितुमारभन्ते, परं तेषां शिक्षणशक्तिः पशुभ्योऽतितरां विस्तृता। मानवशिशूनां जन्मजातायां शिक्षणशक्तायनुभवेन महत् परिवर्तनं शक्यम्। न पशूनां शिक्षणशक्तौ तथा समुन्नतिः सम्भवति। शिक्षणाय धारणाशक्तौ, स्नायविकेषु च मार्गेषु [८]परिवर्तनीयत्वमावश्यकं भवति। तन्न पशुषु मानवैस्तुल्यम्।

अशिक्षिताः क्रिया जन्मजाताः, शिक्षिताश्चार्जिताः कथ्यन्ते। अर्जनं प्रयत्नच्युतिविधिनाऽनुकरणेनान्तर्दृष्ट्या[९] च भवति। यया क्रियया मनुष्ये विकासो जायते, या च तस्य भाविव्यवहारेऽनुभवे च परिवर्तनं विदधाति, सा क्रिया शिक्षणं कथ्यते।

शिक्षणविधयः

शिक्षणस्यानेके प्रकाराः। ते यथा—

(१) सर्वं शिक्षणं प्रतिक्रियाद्वारा भवति। निरीक्षणे, कण्ठस्थीकरणे, कौशलार्जने च

---

१. Experience.
२. Automatic acts.
३. Random acts.
४. Reflexes.
५. Instincts.
६. Feelings.
७. Emotions.
८. Modifiability.
९. Insight.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिक्रिया भवन्ति । ताश्च सक्रियाः । नहि निष्क्रियाभिः प्रतिक्रियाभिः किञ्चित् शिक्ष्यते । नहि शिक्षणं निष्क्रियभावेनात्मसात्करणमात्रम् । तत्र प्रयत्नोऽपेक्ष्यते ।

(२) शिक्षितमभ्यासेन पुष्टं भवति । शरीरे स्नायुमार्गा नैसर्गिका भवन्ति । तेऽभ्यासेन पुष्णन्ति । कुक्कुटशावकेषु चञ्चुनाऽन्नकणानां संग्रहणस्य प्रवृत्तिः स्वाभाविकी । तेषां स्नायुमार्गः स्वभावेनैव व्यापाराय सन्नद्धो भवति, अभ्यासेन च पुष्णाति । अन्नकणानां साम्मुख्यं तेषां प्रतिक्रियामुत्पादयति । मानवबालोऽप्येवमेव चलितुं शिक्षते ।

(३) सर्वाप्युत्तेजना जन्मजातां प्रतिक्रियामुत्पादयति । सा प्रतिक्रिया तस्याः [1]स्थानापन्नयोत्तेजनयाऽप्युत्पादयितुं शक्यते; यथा—रसनया भोजनसम्पर्क उत्तेजना, तस्याः स्वाभाविक्या प्रतिक्रियया मुखे लालास्रावो भवति । यदि वारं वारं भोजनसम्पर्कवेलायां कश्चिच्छब्दः क्रियते, तदा केवलः शब्दोऽपि कालान्तरे लालास्रावरूपां प्रतिक्रियां जनयितुं शक्ष्यति । अतः प्रतिक्रियां स्थानापन्नयोत्तेजनया संयोज्य तस्या नियन्त्रणमपि शिक्षणविधिरूपेण प्रयुज्यते । पावलोव-महोदयेनैष विधिः सुष्ठु परीक्षितः ।

(४) चतुर्थो विधिस्तृतीयस्माद्विपरीतः । सर्वाऽप्युत्तेजना काञ्चिन्नैसर्गिकीं प्रतिक्रियां जनयति । तस्या नैसर्गिक्याः प्रतिक्रियायाः स्थानापन्ना काचिदन्या प्रतिक्रिया भवितुं शक्नोति । अस्य विधेर्दृष्टान्तः प्रयत्नच्युतिविधिना शिक्षणम् । कस्या अप्युत्तेजनाया स्वाभाविकी प्रतिक्रिया यथेष्टं फलमुत्पादयितुं न क्षमते, तदाऽन्याः प्रतिक्रियाः परीक्ष्यन्ते । तासु काचिदकस्मात् सफला जायते । तस्याः पुनरावृत्तयः क्रियन्ते, अभ्यासेन च सा दृढा भवति । काचित् पिञ्जरे बद्धा मार्जारी क्षुधातुरा सती बहिर्गन्तुं प्रयतते । न सा लौहशलाकानां मध्यान्निःसर्तुं शक्नोति प्रयत्नशतेनापि । सहसा पिञ्जरस्यैका शलाका तयोन्नाम्यते । शलाकोन्नामेन सा बहिर्गन्तुं स्थानं प्राप्नोति । एषा सफला क्रियाऽभ्यासेन दृढा भवति । एवं सा शलाकोन्नामरूपया क्रियया बहिर्गन्तुं शिक्षते ।

(५) सरलानां क्रियाणां जटिलक्रियाभिर्योगेनापि शिक्षणं भवति । चलनम्, धावनम्, तरणम्, मुद्रलेखश्चैवमेव शिक्ष्यते । यतः सर्वाः सरलाः क्रिया जटिलानां क्रियाणामवयवा एव । ताः स्थानापन्नोत्तेजनया, स्थानापन्नप्रतिक्रियाया वा विधिना अर्ज्यन्ते । जटिलाः क्रियाः सरलक्रियाणां जटिलक्रियाभिः सहयोगेनैव सिध्यन्ति ।

(६) उत्तेजनाभिस्तथाविधः स्नायविकः प्रवाह[2] उत्पाद्यते, यः सुषुम्नायां मस्तिष्के वा स्थितं केन्द्रं प्रति गच्छति, कैश्चित् स्नायुमार्गैश्च बहिरागच्छति । एवं जायमाना गतयोऽनियमिता गतयः कथ्यन्ते । तासु काश्चिल्लाभकर्यो भवन्ति । अतस्तासां पुनरावृत्तिः क्रियते । सा च पुनरावृत्तिः शरीरे स्वभावरूपेण दृढा भवति । तस्य परिणामोऽयं भवति यद् या उत्तेजना आदौ निरुद्देश्यमेव गतीरुत्पादयन्ति, ता एव पश्चात् तद्गतीस्तत्काल एव जागरिताः कर्तुमारभन्ते । एवमनियमिताभिर्निरुद्देश्याभिर्विविधाभिर्गतिभिः शनैः शनैर्नियन्त्रितानां गतीनां प्रादुर्भावो भवति । शिक्षणस्यैतेषां विधीनां परस्परमन्योन्येषु सङ्करो भवत्येव ।

---

१. **Substitute stimulus.**
२. **Nervous current.**

In Public domain. Digitization Muthulakshmi Research Academy

इदं तु स्पष्टमेव यज्जनानां निर्माणं परिवेशशक्तिभिर्निष्क्रियरूपेण न भवति। जना उत्तेजनाः प्रति सचेष्टं प्रतिक्रियाः कुर्वन्ति। प्रतिक्रियाभिरेव यत्किञ्चिदपि शिक्षन्ते। क्रियाशीलताया अभ्यासो मांसपेशीनां तन्तून्, मस्तिष्कस्य स्नायुकोशानपि च बलवतः करोति। शिक्षणं न कस्यापि क्रियाया बलवत् साधकमेव। तन्तुशिक्षणभागस्यानुभवकोशे कस्यचिन्नवस्य वस्तुनोऽभिवृद्धिः। शिक्षणं कस्यचिन्नवस्य वस्तुन आत्मसात्करणम्। इदमप्यावश्यकं यच्छिक्षितं वस्तु स्मृतिकोशेऽवधृतं भवेत्, तथा क्रियमाणेषु कार्येषु गोचरीभवेत्।

शिक्षणनियमाः[1]

(१) उपयोगनियमः[2]—जन्मजाताः क्रिया अभ्यासेन पुष्टिं यान्ति। अभ्यासेन चलन-ग्रहण-तरण-पठनादिकासु क्रियासु क्षिप्रतापेशलतासारल्यविश्वासाः समुत्पाद्यन्ते। कस्या अपि प्रतिक्रियाया वारं वारमुपयोगस्तां सबलां करोति। अयमुपयोगनियमः शिक्षणेऽत्यर्थं सहायको भवति।

(२) पुनरावृत्तिनियमः[3] — पुनरावृत्तिरुपयोगेन सम्बद्धा। यद्येका प्रतिक्रिया परिवेशप्रतिक्रिययोः सम्बन्धं द्रढयेत्तदा द्वे प्रतिक्रिये तं सम्बन्धमधिकतरं द्रढीकर्तुं शक्नुयाताम्, तिस्रश्च ततोऽप्यधिकतरम्। अतः सुस्पष्टमेव यद् यावानधिकोऽभ्यासो भविष्यति तावदेव दृढत्वं सम्बन्धे स्थापयिष्यते। अयमभ्यासनियमः कथ्यते।

(३) अनुपयोगनियमः[4]—यस्याः शिक्षणप्रतिक्रियाया अभ्यासः कञ्चित्कालं न भवति, सा शनैश्शनैः क्षीणा जायते। उपयोगस्तु परिवेश[5]प्रतिक्रिययोः[6] सम्बन्धं पुष्णाति। अनुपयोगश्च तं शिथिलयति। अर्थहीना सामग्री, निरर्थकाः शब्दाः, अङ्काश्चात एव शीघ्रं विस्मर्यन्ते; नहि सार्थका कविता तथा विस्मृता भवति। अनेनैव गतिसंयुक्तानि कार्याणि, मुद्रलेखाभ्यासो द्विचक्रयान-चालनं वा न शीघ्रं विस्मर्यते।

(४) नवतानियमः[7]—अनुपयोगनियमो नवतानियमेन सम्बद्धः। यावान् नवः सद्यः सम्पन्नो वाऽभ्यासो भवति, परिवेशप्रतिक्रिययोः सम्बन्धस्तावानेव सबलो भवति। अनुपयोगे स सम्बन्धो निरन्तरं क्षीणो भवति।

(५) प्राथमिकतानियमः—प्रारम्भिका अनुभवाः, प्रथमानि कार्याणि च तदुत्तरेभ्योऽनुभवेभ्यः कार्येभ्यश्चाधिकां शक्तिं लभन्ते। नवत्वेन तानि ध्यानमाक्रष्टुं क्षमाणि। तानि शीघ्रं मनः प्रभावयन्ति। पाठशालायाः, युद्धस्य, प्रणयस्य च प्रथमं दिनं जनैर्वार्धक्यपर्यन्तं स्मर्यते।

(६) तत्परतानियमः[8]—कार्यपरे स्नायुमार्गे प्रतिक्रिया शीघ्रमेव भवति। आलस्यपरे च

---

१. Laws of learning.
२. Law of use.
३. Law of frequency.
४. Law of disuse.
५. Environmemt.
६. Reaction.
७. Law of recency.
८. Law of readiness.

In Public domain. Digitization Muthulakshmi Research Academy

स्थितिर्विपरीता। श्रान्ताः स्नायवो न कार्यलग्ना भवन्ति। अतः कस्या अपि प्रतिक्रियायाः शिक्षणस्य मूलाधारो बोधक्रियास्नायूनां[1] तत्परता।

(७) साफल्यनियमः – सफला प्रतिक्रिया सन्तोषदायिनी, पुनरावृत्तिप्रवृत्तिजनिका, स्वभावेन स्थायिनी च भवति। अफला प्रतिक्रिया क्षोभं जनयति, निरोधाय प्रवर्तयति, लुम्पति च। सफलायाः प्रतिक्रियाया आवृत्तयः स्वेच्छयैव वारं वारं विधीयन्ते। लोके दृश्यते यद् यानि कार्याणि सन्तोषं ददति तानि दार्ढ्यं यान्ति मनसि। मनोवैज्ञानिकैरेतस्मिन् विषये पशुषु बहवः प्रयोगाः कृताः। तैरनेके मूषका बहुमार्गवति स्थाने बन्दीकृताः, बहिर्गन्तुं प्रेरिताश्च। तत्रैकैर्मार्गैर्बहिर्गमने भोजनं प्राप्यते स्म, अन्यैश्च गमने विद्युदाघाताः। मूषकास्तैरेव मार्गैर्गमनं शिक्षितवन्तः, येषु भोजनसामग्री प्राप्यते स्म। बालास्तदेव प्रसन्नतया शिक्षन्ते यस्य फलं मनस्तोषकरं भवति, न पीडाकरम्।

पशूनां शिक्षणम्

शिक्षणे मनोवैज्ञानिकैः कृतान् पशुविषयकान् प्रयोगान् दृष्ट्वा जना आश्चर्यान्विता भवन्ति, पृच्छन्ति च 'कथं मनोवैज्ञानिकानां पशुष्वेतावती रुचिः ? अस्ति पशुषु शिक्षणयोग्यता ?' इति। प्रयोगैरेतत्सिद्धं यदुच्चश्रेण्याः पशवः पर्याप्तं शिक्षन्ते। निम्नश्रेणीकेषु पशुष्वपि स्वल्पा शिक्षणयोग्यता भवति।

सत्यप्येवं जिज्ञासा भवति 'कथन्नाल्पबुद्धीन् पशूनुपेक्ष्य विकसितबुद्धीनां मानवानामध्ययनं शिक्षणयोग्यताज्ञानाय प्रथमं क्रियते ?' इति; परमस्त्यत्र हेतुः। शिक्षणस्याधाररूपाः प्रक्रियाः पशुषु स्पष्टं निरीक्ष्यन्ते सरलतया च। तत्र तासां स्वरूपमपि पुरुषापेक्षया सरलम्। श्रेष्ठबौद्धिकप्रक्रिया मानवेषु शिक्षणप्रक्रियां जटिलां विदधति। अतो मानवेषु शिक्षणप्रयोगाः कठिनतरा भवन्ति।

नास्माभिः शिक्षणक्रियां निरीक्षमाणैः पशुषु मानवत्वारोपः कार्यः। 'कस्याञ्चित् स्थितौ यथा मनुष्यश्चिन्तयति करोति वा तथा पशुरपि' इति न मन्तव्यम्। पशूनां सरलेषु व्यापारेषु मानवीया विशेषा नान्वेष्टव्याः। पशुव्यापाराणां निरीक्षणमध्ययनं च वस्तुनिष्ठतया[2] कार्यम्। एतद्विषये लायडमार्गनमहोदयस्य[3] मतमुल्लेख्यम्—"यदि काचित्क्रिया निम्नमनोवैज्ञानिकशक्तेरुत्पादरूपेणावगन्तुं व्याख्यातुं वा शक्या स्यात्, तदा सा कदापि नोच्चतरमनोवैज्ञानिकशक्तेरुत्पादरूपेणावगन्तव्या, व्याख्यातव्या वा" इति। यदि वयं कमपि सारमेयं स्वमुखाग्रेण द्वारश्शृङ्खलामपसार्योद्घाटयन्तं पश्येम, तदा नाऽस्माभिर्झटिति मन्तव्यं यत् श्वा समस्यायाः समाधानं विचारपूर्वकं कृतवान्। अस्माभिः स श्वा ग्रहीतव्यो य इदं चातुर्यं न जानाति। ततः शिक्षणस्य प्रक्रियायां सँल्लग्नोऽवलोकयितव्यः। मार्गनमहोदयैस्तथैव कृतम्। तैः स्वीयः श्वा परीक्षितः, न च तस्य व्यवहारे वितर्कोपयोगो दृष्टः। वितर्कपूर्वकं कार्ये

१. Sensory & motor neurones.

२. Objectively.

३. Loyd Morgan's Cannon.

In Public domain. Digitization Muthulakshmi Research Academy

बुद्धेरधिकः प्रयोगो भवति। समस्यां समाधातुमावेगस्य शीलतायाश्चोपयोगोऽल्पो भवति। पशुः पूर्वं काश्चित् वैशिका गतीः करोति। कतिपया ज्ञानेन्द्रियसम्बन्धिनीरुत्तेजनाः प्रति प्रतिक्रियाः कर्तुं चेष्टते। उच्चकोटिकः पशुः कस्यचित् स्थानस्यानुसन्धानं कृत्वा स्थानविषयकं ज्ञानं प्राप्तुं चेष्टते। स वस्तिवतस्ततश्चालयित्वा तज्ज्ञातुमिच्छति, येन तस्य गत्यात्मको[1] व्यवहारः प्राप्ताभिरुत्तेजनाभिः प्रत्यक्षतया प्रशासितो न स्यात्, अर्जितेन ज्ञानेन चानुशासितं भवेत्।

थार्नडाइकमहोदयः[2] पशूनां शिक्षणविधेर्निरीक्षणायानेकान् प्रयोगान् कृत्वा पशवः प्रयत्नच्युतिविधिना[3] शिक्षन्त इति निश्चितवान्। अस्मिन् विधौ प्रेरणा[4], अनियमिताः प्रतिक्रियाः, भ्रान्तानां प्रतिक्रियाणां त्यागः, "[5]प्रेरकतृप्तिं यच्छन्तीनां प्रतिक्रियाणां स्थिरीभवनमित्येतत् सर्वं समाविष्टं भवति। थार्नडाइकमहोदय एकां मार्जारीं पिञ्जरे बन्दीकृतवान्। पिञ्जरस्य द्वारमेकस्याः शलाकायाः सारणेनोद्घाट्यते स्म। पिञ्जरसमीप एव भोजनसामग्री निहिता, यां मार्जारी सरलतयाऽवलोकयितुं शक्ता आसीत्। भोजनं प्राप्तुं मार्जारी बह्वीर्निष्फला गतीः कृतवती। सा लौहशलाकानां मध्याद्बहिर्निर्गन्तुं प्रायतत। सा नखैः पिञ्जरभित्तिं खनितुमचेष्टत। किञ्चित्कालानन्तरं संयोगवशेन शलाकाऽपसृता, द्वारमुखमनावृतं जातम्, सा च बहिर्निर्गता। तथापि सा द्वारोद्घाटनविधिं न शिक्षितवती, पुनरपि यदा सा बन्दीकृता तदाप्यनेकासामनियमितानां गतीनामनन्तरं संयोगेनैवान्ते सफलां प्रतिक्रियां कर्तुमशक्नोत्। तदनन्तरं प्रतिवारमुत्तरोत्तरमल्पीयोभिः प्रयत्नैरेव सा सफलीभूता। अन्ततस्तया बन्दीकरणसमकालमेव शुद्धा प्रतिक्रिया आरब्धा। ताञ्चैवं द्वारमुद्घाटयन्तीं दृष्ट्वाऽप्यन्या समीपस्था मार्जारी न किञ्चिदपि शिक्षितवती। एवं 'पशुः क्रमेण शिक्षते, न तु सहसैव' इति सिद्धम्। शिक्षणस्य गतिः पण्डितैर्वक्ररेखया[6] प्रदर्श्यते। सा चानियमितां क्रमिकां प्रगतिं लक्षयति। न च तयाऽज्ञानाज्ज्ञानं प्रत्यकस्मात् सङ्क्रमणस्य सङ्केतो लभ्यते। यदि पशुरुपस्थिते प्रश्ने तर्कं वितर्कं वा कर्तुं प्राभविष्यत्तदा कस्मिंश्चिद्विशिष्टे काले तस्य समाधानविधिमवश्यमज्ञास्यत्, पश्चाच्च तं विधिं स्मरन् सदा निर्दोषमेव प्रयत्नमकरिष्यत्। अतस्थार्नडाइकमहोदयेन प्रतिपादितं यत्पशवो न तर्कवितर्काभ्याम्, नाप्यनुकरणेन शिक्षन्ते। ते क्रियया शिक्षन्ते; न तु निरीक्षणेन, नापि विचारेण। ते परिस्थितिं प्रत्यनेका गत्यात्मिकाः प्रतिक्रिया विदधति। अनन्तरं कयाचिद् घुणाक्षरन्यायप्रतिपन्नया प्रक्रिययाऽसफलानां प्रतिक्रियाणां लोपो जायते, सफला प्रतिक्रिया च दृढतामापद्यते, परिस्थित्या दृढतरं सम्बध्यते च। एष विधिः प्रयत्नच्युतिमूलकः कथ्यते। बुडवर्थमहोदयानुसारमस्मिन् विधावधस्तनाः प्रक्रिया अपेक्ष्यन्ते—

(१) लक्ष्यं प्रति तत्परता।

(२) लक्ष्यं प्रापयितुर्मार्गस्य स्पष्टदर्शनेऽयोग्यता।

---

१. Impulsiveness.
२. Thorndike.
३. Learning by trial & error.
४. Motivation.
५. Motive.
६. Learning Curves.

In Public domain. Digitization Muthulakshmi Research Academy

(३) स्थितेरनुसन्धानम् ।

(४) लक्ष्यं प्रापयितॄणां सम्भाव्यमार्गाणामवलोकनम् ।

(५) मार्गाणां परीक्षणम् ।

(६) एकस्मिन् मार्गे बाधां दृष्ट्वा तस्मात् प्रत्यावर्तनम्, अन्येन गमनोपक्रमश्च ।

(७) सुकरमार्गप्राप्तिः, सुकरेण मार्गेण लक्ष्यपर्यन्तं गमनञ्च ।

मार्गनमहोदयेन कश्चिच्छ्वा गृहाङ्गणे बन्दीकृतः । अङ्गणं चतसृष्वपि दिक्षु भित्तिभिः परिवृतमासीत् । श्वाऽङ्गणान्निष्क्रम्य राजमार्गं गन्तुं तत्परोऽभवत् । एषा उत्कण्ठा 'लक्ष्यतत्परता[१]' कथ्यते । भित्तौ द्वारमासीत्, द्वारं च शृङ्खलया पिहितमासीत् । श्वा प्राकारच्छिद्रेषु नासां प्रवेशयितुमारेभे । क्रमेण च द्वारेऽपि नासां प्रावेशयत् । संयोगवशाच्छृङ्खलाऽपसृता, द्वारं चोद्घाटितम् । श्वा बहिर्गन्तुं शशाक । ततः कतिचिद्दिनानि यावद् बन्दीकृतः स द्वारसमीपमेवागत्य प्रयत्नमारभत । अन्ते स इतस्ततो न भ्रान्त्वा प्रथममेव द्वारसमीपमागत्य, शिर उन्नमय्य, शृङ्खलां चापसार्य द्वारमुद्घाटयितुं शिक्षितवान् । एतेन लक्ष्यते यत् सारमेयेन प्रथमं 'कुत्र प्रयासः कर्तव्यः' इति शिक्षितम् । ततः 'कस्मिन् विशिष्टे स्थाने' इति च । इदं 'स्थानशिक्षणम्[२]' इति मानसशास्त्रज्ञा व्यवहरन्ति । ततस्तेन 'शृङ्खला कथमपसार्या' इति शिक्षितम् । इदं 'वस्तुशिक्षणम्[३]' साधनशिक्षणं कथयितुं शक्यते । एतच्छिक्षणं प्रयत्नच्युतिविधिनैव जातम् ।

मेरुदण्डविहीनेभ्यः पशुभ्य ऋते सर्वेऽपि प्राणिनः प्रथमं स्थानस्यान्वेषणं कुर्वन्ति, स्वगतेरपव्ययं न कृत्वा स्वाधिष्ठिते स्थाने भ्रमितुमारभन्ते । यदा कश्चिन्मूषकः कुत्रचिद्बन्दीक्रियते तदा स भयस्य सतर्कतायाश्च चिह्नानि प्रकटयति । स प्राणपणेनापि ततो निष्क्रमितुं चेष्टते, भयार्तो वा भूत्वा तत्स्थानैककोणे आत्मानं गोपयितुम् । स्वल्पेन कालेन स्वस्थप्रायामवस्थामापद्यते, तत् स्थानं सम्यक् परीक्षितुमारभते । अन्येद्युर्यदि पुनरपि तत्रैव बन्दीक्रियते तदा न तथा विभ्यन् दृश्यते, नापि संवेगात्मिकामशान्तिं तथाऽनुभवति । स तत्स्थानगतं सर्वं जिघ्रन् स्वैरमितस्ततो भ्रमति । यदि तत्र किञ्चित् खाद्यं न प्राप्नोति, तदाऽग्रिमे दिने तस्य चेष्टा मन्दतराः सञ्जायन्ते । व्यवहारे च तथा परिवर्तनं दृश्यते येनैतदनुमातुं सुकरं भवति यत्तेन किमपि शिक्षितमिति । तस्येदं शिक्षणं 'निषेधात्मकं समायोजनम्[४]' इत्यभिधीयते । मूषकेन तेन स्थानेनात्मा समायोजित इति ज्ञायते । प्रथमं स भयप्रतिक्रियाया मोचितवानात्मानम्, ततश्चानुसन्धानात्मिकायाः । तस्येदं कारणं यद् भयप्रदानां वस्तूनामप्राप्त्या भयप्रतिक्रियायाः परिपोषो न जातः । रुचिकरवस्तुलाभाभावेन चानुसन्धानात्मिकानां प्रतिक्रियाणां पुष्टिर्बभूव ।

निषेधात्मकं समायोजनं प्रतिकूलवेदनीयाभ्यः प्रतिक्रियाभ्यः प्राणिनं रक्षति । एवं स व्यर्थमेव कष्टं न सहते । इदं प्रथमं प्रशिक्षणम् । निषेधात्मकेन समायोजनेनाश्वः सन्नाहेऽभ्यस्तो

---

१. Goal set.

२. Place learing.

३. Thing or tool learing.

४. Negative adaptation.

In Public domain. Digitization Muthulakshmi Research Academy

भवति, श्वा च गृहे मार्जारं सोढुमारभते। पशुः स्पर्शस्य बन्धस्य चाभ्यस्तो जायते। यद् वस्तु प्रथमं मार्गे ध्यानमाकर्षति तदेवं साधारणं प्रतीयते। यासु परिस्थितिषु मनुष्यः पूर्वमात्मानमरक्षितं भयभीतं वा मनुते, ताभिः सह निषेधात्मके समायोजने जाते भयप्रतिक्रियाणां लोपो भवति। एवमेवानुसन्धानात्मिकानां प्रतिक्रियाणां विषये मन्तव्यम्।

प्रयत्नच्युतिविधौ वस्तुनिरीक्षणस्य शारीरिकगतीनां च अतिमहत्त्वम्। पशुर्निरीक्षणेन शिक्षते, गमनप्रतिगमनाभ्याञ्च। स यथेष्टं मार्गं निरीक्षितुम्, इष्टां गतिं वाऽनुलब्धुं शिक्षते। पूर्वं सोऽनेका गतीः करोति, बहून् मार्गाननुसरति च। क्रमेणानिष्टान् मार्गान् परित्यजति, अभीष्टमनुसरति, लक्ष्यं च प्राप्नोति। समस्यापेटिकानां[1] शिक्षणे मार्जारीषु कृताः प्रयोगा दर्शयन्ति यत्ता निरीक्षणेन यथा शिक्षन्ते, न तथा गतिभिः। विविधमार्गाणामन्वेषणाय गतिरावश्यकी, परं गतिपरिणामस्य निरीक्षणं तत्कारणादतिरिच्यते। मार्जार्यः परिस्थितेः सूक्ष्ममन्वीक्षणं तत्रस्थानि वस्तूनीतस्ततश्चालयित्वा वस्तूनां सावधानतयावलोकनेन कुर्वन्ति। यदा च ता वस्तुभिः परिस्थित्या च प्रभाविताः सञ्जायन्ते, तदा कार्यसाधिका गतीरारभन्ते। यदा मार्जारी पिञ्जरान्तर्गतायाः शलाकायाः शक्तिं जानाति, शलाकामपसार्याहं बहिर्गन्तुं शक्नोमीति, तदैव गतिं करोति। एवं गत्यात्मिकायाः क्रियाया अपेक्षया निरीक्षणस्य महत्त्वमधिकतरमिति स्पष्टमेव। मूषकोऽपि बहुमार्गमये पिञ्जरे यदा सुखदमार्गग्रहणम्, कष्टकरमार्गत्यागं चाभ्यस्य तत्र शिक्षितो भवति तदैवोपयुक्तां गतिशृङ्खलामारभते। गतीनां सङ्घठनेनेयं कुशलता प्राप्यते। एवं शिक्षणस्य द्वौ भागौ—(१)परिस्थितेः परिवेशस्य वा निरीक्षणं कृत्वा शिक्षणम्, (२) गतीनां संयोजनं कृत्वा च शिक्षणमिति। इदमेव विद्वांसो निरीक्षणात्मकं गत्यात्मकं च शिक्षणं ब्रुवन्ति।

अन्तर्दृष्ट्या पशूनां शिक्षणम्

जर्मनीदेशनिवासिना कोहलर(Kohlor)नाम्ना विदुषोच्चकोटिकेषु पशुषु केचन प्रयोगाः कृताः। तेन च प्रतिपादितम् 'मनुष्यकल्पाः चिम्पैञ्जीत्याख्या वानरविशेषाः प्रयत्नच्युतिविधिना न शिक्षन्ते' इति। ते त्वन्तर्दृष्ट्या शिक्षन्ते। परमेतदर्थं मार्गः स्पष्टतया तेषां गोचरो भवेत्। तेनैकश्चिम्पैञ्जी दारुमये बृहति पिञ्जरे बन्दीकृतः। पिञ्जराद् बहिः किञ्चिद् दूरे चैकं कदलीफलं स्थापितम्। वानराय चैका यष्टिः प्रदत्ता। वानरो यष्ट्या कदलीफलमाक्रष्टुं प्रायतत। परं न शशाकाक्रष्टुम्। ततस्तेन तस्मै काचिदन्या यष्टिः प्रदत्ता। अस्या यष्ट्या अभ्यन्तरे रन्ध्रमासीत्, येन पूर्वा यष्टिरस्या अन्तरे प्रवेष्टुं शक्यते स्म। कदलीफलं तथा दूरे आसीद्यथा द्वयोरकतराऽपि यष्टिस्तत्स्प्रष्टुं नाशक्नोत्। घण्टापर्यन्तं चिम्पैञ्जी यष्ट्या फलं ग्रहीतुमचेष्टत, परं न सफलतामापद्यत। ततः स गत्वा पिञ्जरस्य पृष्ठभागे स्थितो द्वाभ्यामपि यष्टिभ्यां क्रीडितुमारब्धवान्। संयोगवशात् स एकस्या यष्टेरग्रभागमन्यस्याः पृष्ठभागे धृतवान्, प्रथमां च स्थूलतरायाः रन्ध्रान्तरे प्रवेशितवान्। ततः स आनन्दातिरेकादुत्पतितः, पिञ्जरस्याग्रभागं प्रधावितश्च। तत्र स्थितः संयुक्ताभ्यां यष्टिभ्यां कदलीफलं ग्रहीतुमारब्धवान्। अदृष्टे यष्टी वियुक्ते, तेन पुनः संयोजिते, फलं च गृहीतम्। फलं खादित्वा स पिञ्जरे समीपे धृतमन्यदपि सर्वं वस्तु ग्रहीतुमुपचक्रमे। अन्यस्मिन् दिने तस्यामेव स्थितौ स काश्चिदेवानुपयोगिन्यः क्रिया व्यधत्त, कतिपयेष्वेव च क्षणेषु पूर्ववद् यष्टी संयोज्य फलं गृहीतवान्। अस्मिन् प्रयोगे विना बुद्धिप्रयोगं संयोगवशात्

---

1. Puzzle box.

In Public domain. Digitization Muthulakshmi Research Academy

संयुक्तयोर्यष्ट्योः स्वार्थसाधने प्रयोगेण, द्वितीये दिने च्युतीनां प्रायोऽभावेन, पशोर्यष्टिसंयोजने रुचि-प्रदर्शनेन च तस्यान्तर्दृष्टेरनुमानं सम्भवति।

अन्तर्दृष्टेः[1] स्वरूपद्वयम्–अग्रदृष्टिः[2], प्रतीपदृष्टिश्च[3]। संयुक्ते यष्टी अग्रे प्रेषयन् कदलीफ्सु-र्वानरः पूर्वदृष्टिं प्रायुङ्क्त। यतस्तस्मिन् क्षणे तस्य साफल्यपूर्वाभास आसीत्। स लक्ष्यं प्राप्तमिवा-मंस्त। प्रयत्नच्युतिव्यवहारे पश्चाद्दृष्टिरेव प्रयुज्यते। पिञ्जरस्था मार्जारी साधुं मार्गं न जानाति। सानेकान् मार्गाननुसरति, तेषु चैकमिष्टसाधकं प्राप्नोति। एतच्च प्रयत्नानन्तरं भवति। एषा पश्चाद्दृष्टिः। अनुसरणात् पूर्वमेव लक्ष्यप्रापकस्य मार्गस्य दर्शनं पूर्वदृष्टिः, अनुसरणानन्तरं च मार्गसाधुताविनिश्चयः पश्चाद्दृष्टिः कथ्यते।

पशुशिक्षणस्यान्यविधयः

पशूनां शिक्षणस्य केचिदन्येऽपि विधयो भवन्ति। तत्र निषेधात्मकं[4] समायोजनम्, नियन्त्रित-प्रतिक्रिया[5] च विशेषत उल्लेख्ये। नियन्त्रितप्रतिक्रिया सम्बद्धप्रतिक्रियाऽपि कथ्यते। आवश्यकी-ष्वुत्तेजनास्वभ्यस्तासु सतीषु पशौ व्यर्थानां प्रतिक्रियाणां निरासो जायते। लूता यदा स्वजालान्तर्गता भवति तदा तत्समीपे कृते ध्वनिविशेषे सा भीता भवति, जालतन्तुमाश्रित्य लम्बते च। एषा ध्वनिं प्रत्यात्मगोपनात्मिका प्रतिक्रिया। एतामेव प्रतिक्रियां साऽनेकवारान् करोति ध्वनिं श्रुत्वा। परमन्ततस्त्यजति भयं तत्प्रतिक्रियाञ्च। अग्रिमे दिने ध्वनिं श्रुत्वा पुनरपि तथैवाचरति। शनैः शनैः सा ध्वनिना सह निषेधात्मकं समायोजनं विदधाति। पालिताः पशवोऽपि निषेधात्मकेन समायो-जनेन शिक्षन्ते। बलीवर्दाः पूर्वं यानि वस्तूनि दृष्ट्वा पलायन्ते, तेषामेवाभ्यस्ता भवन्ति पश्चात्। मार्जारीषूपस्थितास्वपि सारमेया गृहे तूष्णीं तिष्ठन्ति। शुका मानवहस्तस्पर्शं सहन्ते। निषेधात्मकेन समायोजनेन तेषां निरर्थकानां प्रतिक्रियाणां लोपः सञ्जायते। नियन्त्रितप्रतिक्रियाभिरपि पशवः शिक्षन्ते। काचित् प्रतिक्रिया कयाचित् सम्बद्धया स्थानापन्नया वोत्तेजनयोत्पादयितुं शक्यते, यथा–लालास्रावो ध्वनिविशेषेण। सैवोत्तेजना काञ्चिद्भिन्नां प्रतिक्रियामुत्पादयति; यथा–किञ्चिद्विचित्रं वस्तु दृष्ट्वा कदाचिद् दूरपलायनरूपा प्रतिक्रिया भवति, न तु समीपगमनरूपा। प्रतिक्रिया नियन्त्रि-तया स्थानापन्नया वोत्तेजनया संयुक्ता भवति, सैवोत्तेजना काञ्चित् स्थानापन्नां प्रतिक्रिया-मुत्पादयति वा।

मनुष्याणां शिक्षणम्[6]

मनुष्यः पशूनां शिक्षणविधिमुपयुङ्क्ते। तेन स लाभान्वितो भवति। अत एव मानव-शिक्षणार्थं पशूनां शिक्षणविधेरध्ययनमावश्यकम्। शिशवोऽपि पशुवत् प्रयत्नच्युतिविधिना बहु

---

१. Insight.

२. Foresight.

३. Hindsight.

४. Negative adaptation.

५. Conditioned response.

६. Human-learning.

In Public domain. Digitization Muthulakshmi Research Academy

शिक्षन्ते। अन्तर्दृष्ट्याऽपि तैर्बहु शिक्षितं भवति। निरुद्देश्या गतीर्विदधानास्ते संयोगवशात् काञ्चित्कार्यसाधिकां गतिमवगच्छन्ति। अन्तर्दृष्ट्या ते कस्यचित् सार्थकस्य कार्यस्य तथ्यस्य वा निरीक्षणं कुर्वन्ति, तथ्येषु वा कञ्चित् सम्बन्धं पश्यन्ति। यथा यथा ते वर्धन्ते तथा तथा प्रयत्न-च्युतिविधिस्थाने विचारात्मकं[1] बुद्ध्यात्मकं[2] च विधिमवलम्बन्ते। बाला नियन्त्रितप्रतिक्रियाभि-रपि शिक्षन्ते। पूर्वं तैश्चित्राणां साहाय्येनाक्षराणि परिचीयन्ते। प्रथमं तेऽक्षरैः सह चित्राण्यु दृश्यापि प्रतिक्रियां विदधति। नियन्त्रितप्रतिक्रियाभिस्तेऽक्षरसङ्केतानामर्थं विदन्ति। एवमेव च ते आर्द्रां भूमिं पश्यन्ति। प्रथमं ते स्पर्शेनार्द्रतायाः प्रत्यक्षं कुर्वन्ति, परं कालेऽतीतेऽवलोकनमात्रे-णैवार्द्रतायाः प्रत्यक्षीकरणे समर्था जायन्ते। मानवा निषेधात्मकेन समायोजनेनापि शिक्षन्ते। ते महत्त्वहीनाभिरुत्तेजनाभिः सह निषेधात्मकं समायोजनं स्थापयन्ति। किञ्चित्कालानन्तरं तेषां प्रतिक्रिया अपि मन्दा भवन्ति। मानवा निरीक्षणेन पशुभ्योऽधिकं शिक्षन्ते। तेषां निरीक्षण-शक्तिः पशुभ्योऽधिका भवति। ते परिस्थितेर्वस्तूनाञ्च साङ्गोपाङ्गं सूक्ष्ममध्ययनं निरीक्षणं च द्रुतं कर्तुं शक्नुवन्ति। लक्ष्यसिद्धये च ते वस्तूनामुचितमुपयोगं कर्तुं प्रभवन्ति।

बुडवर्थमतानुसारं मनुष्यः—

(१) पशुभ्यः श्रेष्ठतरो निरीक्षकोऽस्ति। स वस्तूनां जनानां परिवेशस्य च तान् विशेषान् निरीक्षितुं प्रभवति, यान् निरीक्षितुं पशुरशक्तः।

(२) स समस्यानां समाधानेऽधिकस्य चिन्तनस्य, विचारस्य, व्यवस्थितेः, संयमस्य चोपयोगं करोति।

(३) स शिक्षणे संज्ञाशब्दानाम्, संख्यावाचकानाम्, भाषायाश्चोपयोगं प्रायो-ऽधिकं करोति।

(४) यदा चिन्तनसामग्री तत्समक्षे प्रस्तुता न भवति, तदा स भाषायाः साहाय्येन समस्यायाः समाधानविषये चिन्तयितुं क्षमते। विचारणाशक्तिः पशोरपेक्षया मनुष्यस्याधिका विकसिता भवति।

शिक्षणप्रगतिः[3]

विद्वद्भिः शिक्षणस्य गतिर्वक्ररेखाभिः प्रदर्श्यते। यथा यथा शिक्षणं वर्धते तथा तथा रेखोर्ध्वं गच्छन्ती दृश्यते। एवं विरच्यमानासु रेखासु प्रायो बहवो भागाः समा भवन्ति। एतत्प्रगतिरोधस्य परिचायकं भवति। तदनन्तरं वेगेनोन्नतिर्भवति। निरोधावस्थास्वेव प्रयत्नोऽ-पेक्ष्यते। कदाचित् साऽवस्थाऽपि भवति यस्यां प्रयत्नशतेनाऽपि नोन्नतिः सम्भाव्यते। एतत्सूचकः समतलो भाग 'पठारः' इति कथ्यते। अपर्याप्ता प्रेरणा[4], सरलानामभ्यासानां कठिनैरभ्यासैः सह

---

१. Rational.

२ Intelligent.

३. Plateau of learning.

४. Motivation.

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गठनाभावः, प्राचीनेषु नवेषु च स्वभावेषु सङ्घर्षः–इत्येतानि कारणानि शिक्षणावरोधस्य भवन्तीति मनमहोदयस्य मतम् । बुडवर्थमतेनायं शिक्षणविषयिकायाः शरीरशक्तेः[1] सीमाऽपि भवितुमर्हति। पश्चाद् भवित्री प्रगतिश्चोन्नतविधीनां परिणामो भवितुं शक्नोति । अस्मिन् काले पुरातनाः सम्बन्धाः, अपूर्णाश्च स्वभावा दृढा भवन्ति। कस्यामपि प्रगतावियं स्थितिरनिर्वार्या । अयं निरोधकालः शिक्षितस्य दृढीकरणाय[2] भाविन्याः प्रगतेरुपक्रमाय च भवति ।

शिक्षणसिद्धान्ताः

थार्नडाइकमहोदयानां मतेन सर्वस्मिन् शिक्षणेऽभ्यासस्य परिणामस्य च नियमा अवलम्ब्यन्ते । अभ्यासनियमेषूपयोगः, अनुपयोगः, पुनरावृत्तिः, नवतेत्येतेषां नियमानां समावेशो भवति । अभ्यासेन गत्यात्मिका प्रतिक्रिया पुष्टा भवति, अनभ्यासेन च क्षीणा । गत्यात्मिकायाः प्रतिक्रियाया यावन्त्यः पुनरावृत्तयो भवन्ति तावत्येव सा शक्तिमती जायते । सद्यो जाता प्रतिक्रिया पौर्वकालिक्याः प्रबलतरा भवति। परिणामनियम इदं सूचयति यद्रुचिकरी प्रतिक्रिया स्वेच्छया पुनः पुनरावर्त्यते, सरलतया च स्वभावे परिवर्तते । नारुचिकरी प्रतिक्रिया सरलतया दृढा भवति । सफला क्रिया तृप्तिजनिका भवति, अत एव तस्या आवृत्तयः क्रियन्ते । असफला प्रतिक्रिया क्षोभमेवोत्पादयति, अतस्तस्या आवृत्तयो न भवन्ति, आवृत्त्यभावे दृढत्वाभावात् सा विनष्टा भवति ।

विद्वद्भिरेतस्मिन् विषये प्रयोगः कृतः। तैः पञ्चत्रिंशत् चत्वारिंशद्वा मूषका भ्रमपिञ्जरे गृहीताः । ते च वर्गत्रये विभाजिताः, पिञ्जरे स्थानविशेषं प्रति प्रधाविताश्च । मूषकेभ्यः प्रतिदिनमेकवारं धावितुमवसरः प्रदत्तः । येन ते निश्चितं स्थानं गन्तुं मार्गं शिक्षेरन् । प्रथमवर्गीयैर्मूषकैः प्रतिवारं धावनानन्तरं भोजनं प्राप्तम् । द्वितीयवर्गीयैर्दश वारान् धावित्वाऽपि किमपि खाद्यं न प्राप्तम् । यदा ते भोजनं समीपं प्राप्नुवन्ति स्म, तदा भोजनमपसार्यते स्म । ततस्तेभ्यो दशवारानन्तरं च भोजनं प्रदातुमारब्धम् । भोजनप्राप्त्यनन्तरं तैर्भोजनमार्गः शीघ्रमेव शिक्षितः । पूर्वं ते निश्चितं स्थानं न प्राप्तुं शक्ता अभवन् । तृतीयवर्गीयैः प्रथमेषु दशवारेषु भोजनं प्राप्तम् , ततो न किमपि । ततस्ते शीघ्रं पुनरनुसन्धानमारब्धवन्तः । एतेन स्पष्टं यत्सुखदस्य परिणामस्य प्रतिक्रिया सुखदा भवति । या च क्रिया सुखं प्रददाति तस्यावृत्तिः सरलया क्रियते ।

व्यवहारवादी[3] वाट्सनमहोदयो नैतत् स्वीकरोति । तन्मतेन सर्वाः प्रतिक्रिया यन्त्रवद्भवन्ति । न तत्र चेतनाकारणम् । अतो यदि स परिणामनियमं स्वीकुर्यात् , तदा सुखदुःखमूलां चेतनामपि स्वीकर्तुं विवशो भवेत् । अतः शिक्षणस्य व्याख्यां पुनरावृत्तेर्नवतायाश्च नियमैः करोति । तन्मतेन नियन्त्रणीकरणमेव शिक्षणम् । काचित् प्रतिक्रिया कयाचित् स्थानापन्नयोत्तेजनया सम्बध्यते । कस्याश्चित् प्रतिक्रियायाः स्थानं काचित् स्थानापन्ना प्रतिक्रिया वा गृह्णाति । शिक्षणमविचारपूर्वं यान्त्रिकञ्च भवति ।

---

१. Physiological limit.

२. Consolidation.

३. Behaviourist.

In Public domain. Digitization Muthulakshmi Research Academy

प्रयोजनवादिसम्प्रदायप्रवर्तकश्च[१] मैकडूगल(Mcdougell)महोदयो मन्यते यत् सर्वं शिक्षणं बुद्धिपूर्वकं लक्ष्यपरञ्च। तत्र सफलताऽसफलतयोरस्पष्टा चेतना भवत्येव। सफलता-प्रदस्यानुसरणम्, असफलताप्रदस्य च त्याग इत्येषा नैसर्गिकी प्रवृत्तिः प्राणिनाम्। सर्वो व्यापारः सप्रयोजनः। प्रयोजने लक्ष्यस्य ज्ञानं तत्प्राप्तेरिच्छा च सन्निविष्टैव भवति। मैकडूगलमहोदयः पूर्वं दृष्टेरपेक्षया सोद्देश्यं प्रयत्नमधिकतरं महत्त्वपूर्णं मन्यते। कोफ्का(Kofca)-कोहलर-(Kohlar)प्रभृतयो गेस्टाल्टविचारानुसारिणो मनोवैज्ञानिका मन्यन्ते यच्छिक्षणमबुद्धिपूर्विका यान्त्रिकी प्रक्रिया नास्ति, तस्मिन्नन्तर्दृष्टिः परिस्थितीनां वस्तूनां च सम्बन्धान्वेषणं समाविष्टं भवति। अतः सर्वं शिक्षणमन्तर्दृष्ट्या सम्पद्यते।

शिक्षणविषये विचारैक्यं साम्प्रतमपि नास्ति मनोवैज्ञानिकेषु ॥

*

१. Hormic.

In Public domain. Digitization Muthulakshmi Research Academy

एकादशोऽध्यायः

स्मृतिः[1]

स्मृतेर्महत्त्वम्

अस्माकं जीवने स्मृतेर्महत्त्वं सुविदितम्। नहि कापि शिक्षा, कोऽप्यभ्यासो वा स्मृतिं विना साफल्यं भजते। यदि पूर्वं वृत्तं स्मृतं न स्यात्तदा सर्वं कार्यजातमवरुद्धं भवेत्। [2]विचारस्याऽप्याधारः स्मृतिरेव। नहि कश्चित् पुरातनानामनुभवानां[3] स्मरणादृते विचारं कर्तुं प्रभवति। प्रत्यक्षानुभवेऽपि स्मृतिः सहायिका। नहि पूर्वानुभवानां विस्मृतौ वस्तुदर्शनेन शब्दश्रवणेन वा कोऽप्यर्थावगमः सम्भवति। अत एव सर्वोऽपि जनः स्मृतिशक्तिं कामयते। सा च स्मृतिः सर्वेषु जनेषु नैसर्गिकी।

स्मृतेर्लक्षणानि

नहि सर्वेषां स्मृतिशक्तिः समाना। येषां स्मृतिर्बलवती भवति, ते सकृदेव किञ्चिद् दृश्यमवलोक्य, वार्तां वा श्रुत्वा, पाठं वा पठित्वा स्मरन्ति। एवंविधा जना मेधाविनो गण्यन्ते। मन्दबुद्धयस्तु बहुवारान् दृष्ट्वा श्रुत्वा पठित्वा वापि न स्मर्तुं प्रभवन्ति। स्वल्पकालेन कण्ठस्थीकरणं[4] साधुस्मृतेः प्रथमं लक्षणम्।

केचिद् वस्तूनि शीघ्रं स्मरन्ति, शीघ्रमेव विस्मरन्ति च। न तेषां स्मृत्या लाभविशेषः। स्मृतस्य वस्तुनो दीर्घकालं यावद् धारणा[5] स्मृतेर्द्वितीयं लक्षणम्।

धारणायां सत्यामपि यदि कार्यकाले उपस्थिते वस्तु झटिति न स्मर्यते, तदा को लाभस्तया स्मृत्या? अतः स्मृतस्य वस्तुनः समये प्रत्याह्वानं[6] साधुस्मृतेस्तृतीयं लक्षणम्।

एतदनुचिन्त्यैवोक्तम्—

पुस्तकेषु च या विद्या परहस्तगतं धनम्।
कार्यकाले समापन्ने न सा विद्या न तद्धनम्॥ इति।

अनावश्यकानां वस्तूनां विस्मरणमपि[7] सुस्मृतेर्लक्षणम्। येषां मनसि क्षुद्राण्यपि दृष्टानि

---

१. Memory.
२. Thinking.
३. Experiences.
४. Memorizing.
५. Retention.
६. Recalling.
७. Forgetting.

In Public domain. Digitization Muthulakshmi Research Academy

वस्तूनि, श्रुतानि वा वृत्तानि पुनः पुनः सञ्चरन्ति, ते महत्त्वपूर्णानि वस्तूनि विस्मरन्ति। स्मृतिरिव विस्मृतिरपि सर्वेषु नैसर्गिकी। सा चात्यन्तमुपयोगिनी। तदभावेऽप्रियाणामिष्टवियोग-वैफल्य-निधनानां सततस्मरणेन समग्रमपि जीवनं दुःखाकीर्णं जायते।

स्मृतिभेदाः

स्मृतयोऽनेकप्रकारा भवन्ति। तासु प्रथमा तात्कालिकी[1]। किञ्चिद्वस्तु स्वल्पकालायैव स्मर्यते। दूरभाषस्य क्रमाङ्का दूरस्थजनसम्भाषणकाल एव स्मर्यन्ते, पश्चाच्च विस्मर्यन्ते। लौह-पथविश्रान्तिस्थलेषु नियुज्यमानस्य भारवाहकस्य क्रमाङ्कान् स्मर्तुं तावदेवावश्यकता भवति यावत् स्वकीयो भारो यथास्थानं प्रापितो न भवति। द्वितीया तु कण्ठस्थीकरणसम्बद्धा[2]। कदाचित् कश्चित् पाठ्यांशः केनचिद्विशिष्टेनाभिप्रायेण निश्चितकालाय स्मर्यते, कार्ये निष्पन्ने च विस्मर्यते; यथा—अभिनेत्रा नाट्यगतं सम्भाषणम्, साम्प्रतिकैः परीक्षार्थिभिर्वा पाठ्यपुस्तकांशाः। अपरा च स्मृतिरन्यविषयसम्बद्धा[3]। सा चैकस्य वस्तुज्ञानस्यान्यवस्तुज्ञाननिबन्धिका; यथा—कश्चित् कस्माच्चिद् वृद्धाद् 'विदर्भप्रदेशीयः कार्पासः श्रेष्ठः' इति निशम्य स्मरति। न तस्य तत्स्मरणेन कोऽपि लाभः। परं यदा स एतज्ज्ञानम् 'कार्पासेन वस्त्राणि निर्मीयन्ते, तद्बीजविकारस्तैलं भवति, तैलेन वानस्पतिकं घृतं क्रियते' इत्यादिनाऽन्येन ज्ञानेन सम्बद्धं करोति, तदोपयोगि भवति। तदैव च पूर्वोक्तवृद्धवाक्यस्मरणेन कश्चिदर्थः सिद्ध्यति। अन्या स्मृतिर्दृढनिबद्धेति कथ्यते। एतया एकदा स्मृतानि वस्तूनि अन्यदा प्रयत्नसमकालं स्वनामेव जिह्वाग्रस्थानि भवन्ति। कानिचिद्वस्तूनि तथाविधान्यपि येषां सुष्ठु ज्ञानं नावश्यकम्, परं बहूनां मध्येऽनायासेन तत्परिचयो यथा स्यात्तथा तत्संस्कारदृढतामपेक्षन्ते। यथा मार्गे गच्छञ्जनस्तन्मार्गस्थानां सर्वेषां वस्तूनां सूक्ष्मज्ञानं नोपार्जयति, मार्गस्थानां महद्वस्तूनां स्थूलं परिचयमेव पर्याप्तं मन्यते। एतासु स्मृतिषु काश्चिद्विशेषेणोपयोगिन्यो भवन्ति, काश्चिच्च सामान्येन। न चैताः परस्परं भिन्नाः। एतासु प्रत्येकमन्योऽन्यसङ्करोऽस्त्येव।

स्मृतेरङ्गानि

स्मृतेस्त्रीण्यङ्गानि—(१) कण्ठस्थीकरणम्[4], (२) धारणा[5], (३) प्रत्याह्वानं[6] च। यदा कश्चिच्छ्लोकः स्मर्यते तदा तस्य पौर्वकालिकं कण्ठस्थीकरणम्, एतावन्तं कालं यावद् धारणा च स्पष्टैव। स्मरणस्यापि प्रकारद्वयम्—प्रत्याह्वानम्, प्रत्यभिज्ञा[7] च। एकदा कण्ठस्थी-

---

१. Temporary.

२. Rote memory.

३. Associative memory.

४. Memorizing.

५. Retention.

६. Recalling.

७. Recognition.

In Public domain. Digitization Muthulakshmi Research Academy

कृतस्य वस्तुनोऽन्यदा स्मरणं 'प्रत्याह्वानम्' कथ्यते। कदाचित् कण्ठस्थीकृतं वस्तु प्रयत्नेनापि पुनः प्रत्याह्वातुं न शक्यते, परं बहुषु वस्तुषु प्रत्यभिज्ञायते। एतत्पुनः स्मरणं 'प्रत्यभिज्ञा' इत्यभिधीयते।

कण्ठस्थीकरणम्

स्मृतेः प्रथममङ्गं कण्ठस्थीकरणम्। आधुनिकैर्मनोविज्ञानविशारदैरेतद्विषयेऽनेके प्रयोगाः[१] कृताः। तैरंशतोऽपरिचिता, अंशतश्च परिचिता सामग्री गृहीता; यस्यां केचिन्निरर्थकाः शब्दाः, निरर्थका रेखाकृतयः, शब्दानाम् अङ्कानां मालाश्च सम्मिलिता आसन्। दीर्घे पाठे सार्थिकायाः सामग्र्याः; अन्यथा निरर्थिकाया व्यवहारः कृतः। परीक्षणस्य फलरूपेण तैः केचित्सिद्धान्ताः पुरस्कृताः, येषां सम्यग्ज्ञानेन कण्ठस्थीकरणे साहाय्यं प्राप्यते; यथा—कण्ठस्थीकरणाय स्मृत्या रुचेः सम्बन्ध आवश्यकः। रुच्या तात्कालिकी स्मृतिः स्थायिनी जायते। आवृत्तिभिर्वस्तु स्मर्यते, परं नहि रुचिं विना स्मरणसंस्कारा दृढा भवन्ति। नापि च तां विना कार्येषु दक्षताऽवाप्यते। यद्येकस्मिन् वस्तुनि कस्यचिद्रुचिः स्यात्तदा तत्सम्बद्धेऽन्यस्मिन्नपि वस्तुनि तस्य रुचिः सञ्जायते। इममेव सिद्धान्तमनुसृत्य बालाः प्रारम्भे—'आ' आम्रस्य, 'उ' उष्ट्रस्य, 'ग' गर्दभस्य इत्येवं पाठ्यन्ते। तेषां रुचिराम्रेषूष्ट्रेषु गर्दभेषु च सुतरां भवति। वारं वारमुच्चार्यमाणेषु तेषु तत्सम्बन्धेन 'आ, उ, ग' इत्येतेष्वपि निरर्थकेषु वर्णेषु तेषां रुचिः क्रमश उत्पद्यते। द्वयोः सार्थकनिरर्थकवस्तुनोर्मुहुर्मुहुः सह चिन्तनेन तयोर्मध्ये विशिष्टः स्नायविकः सम्बन्धः स्थापितो भवति। नियन्त्रितासु[२] उत्क्षेपक्रियास्वप्ययमेव सिद्धान्तः क्रियाशीलो दृश्यते। शुनः सम्मुखं मांसक्षेपणकाले, कृते कस्मिंश्चिद्विशिष्टे शब्दे, श्वा तं शब्दं मांसक्षेपणसम्बद्धं मन्यते। सम्मुखे क्षिप्तं मांसमवलोक्य तन्मुखाल्लाला स्रवति। पश्चाद्विना मांसक्षेपणं केवले शब्दे क्रियमाणेऽपि मांसक्षेपणकाल इव तन्मुखाल्लालास्रावो भवति। मांसक्षेपणकालजनितायामनर्थिकायां शब्दक्रियायां मांसक्षेपणक्रियाऽर्थो जनितः। कण्ठस्थीकरणविषयेऽप्यस्य सिद्धान्तस्योपयोगो भवति।

स्मृतिविस्तारः[३]

सर्वस्यापि जनस्य स्मरणशक्तिविस्तारः सीमितो भवति। किञ्चिद् श्रुत्वा दृष्ट्वा वा तस्य यावन्तमंशं कञ्चित् पुनः श्रावयितुं शक्नोति, तावानेव तस्य स्मृतिविस्तारो मन्यते। स च शैशवादारभ्य यौवनं यावद्वर्धते, पश्चाच्च स्थिरो भवति। स्मृतिविस्तारसीमाऽपि स्मर्तव्यसामग्रीभेदेन भिद्यते। एकदाऽङ्कषट्कं स्मर्तुं शक्तो जनः सार्थकस्य पाठस्याधिकतरमंशं स्मर्तुं शक्नोति। सुप्रसिद्धेन मनोवैज्ञानिकेन मार्गनमहोदयेनात्र परीक्षणानि कृत्वैषा सारिणी[४] प्रस्तुता, यया आयुर्भेदेन स्मृतिविस्तारभेदः स्पष्टं परिलक्ष्यते। सा चैवम्—

---

१. Experiments.

२. Conditioned reflex.

३. Memory span.

४. Table.

In Public domain. Digitization Muthulakshmi Research Academy

बालस्यायुः	कण्ठस्थीकरणे सामर्थ्यम्	कण्ठस्थीकरणे सामर्थ्यम्
त्रीणि वर्षाणि	त्रयाणामङ्कानाम् (यथा २४७ इत्येषाम्)	वाक्यगतानां षण्णां पदानाम्
चत्वारि वर्षाणि	चतुर्णामङ्कानाम्	,, द्वादशानां ,,
षड् वर्षाणि	,, ,,	,, षोडशानां ,,
सप्त वर्षाणि	पञ्चानामङ्कानाम्	,, अष्टादशानां ,,
दश वर्षाणि	षण्णामङ्कानाम्	,, विंशतेः ,,
चतुर्दश वर्षाणि	सप्तानामङ्कानाम्	,, चतुर्विंशतेः ,,
षोडश वर्षाणि	,, ,,	,, अष्टाविंशतेः ,,

कण्ठस्थीकरणस्यानेके विधयः प्रसिद्धाः सन्ति। तेषु विशेषेणोपयोगिनः केचिदत्र उल्लिख्यन्ते—

(१) प्रपाठः[१]—साधारणतया छात्रा यं पाठं स्मर्तुमिच्छन्ति, तं पुनः पुनः पठन्ति। अनेकाभिरावृत्तिभिः स्मृतिः स्थिरा भवति। स्मृतो स्थिरश्च पाठः पुस्तकमदृष्ट्वैव शुद्धरूपेण श्रावयितुं शक्यते। तथापि नास्य कण्ठस्थीकरणस्य प्रभावः स्थायी भवति। स्वल्पे कालेऽतीते स विस्मृतो भवति। अतो दीर्घतरकालव्यापिन्यै स्मृतये प्रपाठपद्धतिराश्रयणीया। पुस्तकाश्रयेण द्वौ वारौ त्रीन् वारान् वा पाठं पठित्वा ततो विनैव पुस्तकाश्रयं मनसि पुनः पुनः पाठः 'प्रपाठः' कथ्यते। प्रपाठे यत्र काठिन्यं भवेत्, असाफल्यं वा जायेत, तत्र पुस्तकस्य यत्किञ्चित्साहाय्यं गृहीत्वा प्रपाठं कुर्यात्। एवं कैश्चित् प्रपाठैः पाठो दृढो भवति। अल्पीयसैव च कालेन कण्ठस्थो जायते। यदि स्मर्तव्योंऽशः सार्थकः स्यात्तदा ततोऽप्यल्पीयसा कालेन कार्यं सिध्येत्। मौनरूपोऽपि प्रपाठः फलप्रदः; परं यदि शब्दानुच्चार्य सस्वरं प्रपाठः क्रियते, तदा स्वल्पेनैव कालेन परिणामो यथेष्टं जायते। प्रपाठस्य महत्त्वमधोनिर्दिष्टया सारिण्या व्यक्तं भविष्यति—

कण्ठस्थीकरणेऽपेक्षितः समयः	अध्ययनसामग्री			
	षोडश निरर्थकाः शब्दाः		पञ्च लघुजीवनवृत्तानि येषु सप्तत्यधिकं शतं शब्दाः प्रयुक्ता आसन्	
	प्रतिशतं स्मृतम्		प्रतिशतं स्मृतम्	
	तात्कालिकम्	घण्टाचतुष्टयानन्तरम्	तात्कालिकम्	घण्टाचतुष्टयानन्तरम्
यदा सम्पूर्णः समय आवृत्तिषु प्रयुक्तः	३५	१५	३५	१६
यदा १/५ ,, ,, ,,	५०	२६	३७	१९
यदा २/५ ,, ,, ,,	५४	२८	४१	२५
यदा ३/५ ,, ,, ,,	५७	३७	४२	२६
यदा ४/५ ,, ,, ,,	७४	४८	४२	२६

१. Recitation.

In Public domain. Digitization Muthulakshmi Research Academy

एष [1]प्रयोगोऽष्टमवर्गस्य छात्रैः कृतः। प्रतिवारं नवमिनटाः प्रयोगार्थं दत्ताः। यदा सम्पूर्णः समय आवृत्तिषु व्यतीतः; तदा प्रतिशतं पञ्चत्रिंशदेव शब्दाः कण्ठस्थीभूताः। त एव शब्दा यदा प्रपाठपद्धत्या कण्ठस्थीकृताः, तदा परिणामः प्रकृष्टतरो जातः। वयस्कैः कृतेषु प्रयोगेष्वपि परिणामस्तथाविध एव लब्धः।

(२) **समग्रविधिः**—कण्ठस्थीकरणे समग्रविधिराश्रयणीयः, खण्डविधिर्वा ? पाठे दीर्घे सति तं खण्डेषु विभज्यावृत्तिद्वारा प्रपाठद्वारा वा प्रतिवारं खण्डमेकं कण्ठस्थीकृत्य पाठस्य स्मरणम् 'खण्डविधिः' कथ्यते। दीर्घमपि पाठं प्रतिवारं सम्पूर्णं पठित्वा वारं वारं प्रपाठेनान्यविधिना वा सदैव सम्पूर्णस्य पाठस्य कण्ठस्थीकरणविधिः 'समग्रविधिः' कथ्यते। अनयोः खण्डविधिः, तात्कालिकस्मृतेः समग्रविधिश्च स्थायिस्मृतेरुपयोगी। मानसशास्त्रज्ञैरेतद्विषये कृतेषु परीक्षणेषु जनानां द्वितृतीयांशौ समग्रपद्धत्या, एकतृतीयांशश्च खण्डपद्धत्या श्रेष्ठपरिणामः प्राप्तः। एष्वपि वयस्काः समग्रपद्धत्या बालाश्च खण्डपद्धत्या विशेषेण साफल्यं लेभिरे। बालाः पाठं दीर्घं दृष्ट्वा कदाचिन्निरुत्साहा जायन्ते, अतस्तद्विषये खण्डपद्धतेराश्रयणे न कापि हानिः। विञ्चमहोदयेनास्मिन् विषये यानि परीक्षणानि कृतानि, तदनुसारं छात्रा वयसो द्वादशवर्षपर्यन्तं खण्डविधिना पाठान् शीघ्रं कण्ठस्थीकृतवन्तः। यासु कवितासु विचाराणां पूर्णमैक्यमासीद्, याश्छन्दोदृष्ट्या समावयवा वा आसन्; तासां कण्ठस्थीकरणेऽल्पवयस्का अपि समग्रविधिनाऽधिकतरं साफल्यं समाप्नुवन्। बालापेक्षया किशोराणां मनांसि दीर्घतरकालं स्थिरीभवितुं शक्नुवन्ति, सक्रियाणि च स्थातुम्, अतस्तैः समग्रविधिरेवाश्रयणीयः। समग्रविधेः समर्थनेऽत्रैकमुदाहरणं नासङ्गतं स्यात्। कश्चिद् युवा कस्यचित् काव्यस्य पङ्क्तीनां चत्वारिंशदुत्तरं शतद्वयं कण्ठस्थीकरणाय गृहीतवान्। पूर्वं तेन ताः खण्डविधिना, ततः समग्रविधिना कण्ठस्थीकृताः। उभयोः परिणामोऽधो निर्दिष्टः—

अध्ययनविधिः	अपेक्षितानि दिनानि	अपेक्षिता मिनटाः
१—प्रतिदिनं त्रिंशत् पङ्क्तयः कण्ठस्थीकृताः, ततः समग्रः पद्यांशः—येन तस्य प्रपाठः सम्भवेत्	१२	४३१
२—समग्रः पद्यांशः प्रतिदिनं त्रिवारं पठितः, येन तस्य प्रपाठः सम्भवेत्	१०	३४८

अनेन स्पष्टं यत्समग्रपद्धत्या त्र्यधिकाशीतिमिनटानां लाभोऽभूत्। स च प्रतिशतं विंशतेः समयभागानाम्। समग्रविधावधिकस्य कौशलस्य संयमस्य चावश्यकता भवति। ये च खण्डविधिमेव सुकरं मन्यन्ते, तैरपि पाठस्य खण्डानि यथासम्भवं दीर्घाणि विधेयानि। एतदपि ज्ञेयं यत् खण्डशः कण्ठस्थीकृतानां छन्दसां प्रपाठे जनाः प्रायः खण्डानां प्रारम्भिकमंशमेव विस्मरन्ति।

(३) **सान्तरं कण्ठस्थीकरणम्**—प्रायशश्छात्राः पाठानां पौनःपुनिकां निरवकाशामावृत्तिं कुर्वन्ति। विना विरामं पाठं मुहुर्मुहुः पठन्ति। तावच्चावृत्तीः कुर्वन्ति, यावत् पाठः कण्ठस्थो न जायते। परं परीक्षणेनैतत्सिद्धं यन्निरवकाशावृत्त्यपेक्षया सावकाशा आवृत्तयोऽधिकतरं फलमुत्पादयन्ति। कश्चिज्जनो विंशतेरङ्कानामेकां सूचीं[2] कण्ठस्थीकरणाय गृहीतवान्। स

1. Experiment.
2. List.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिवारं त्रिंशत्सेकण्डानामन्तरेण तां सूचीं पुनः पुनः पठितवान्। एवमेकादश वारान् पठित्वा स तां सूचीं तथा कण्ठस्थीकृतवान्, यथा स तस्याः प्रपाठं कर्तुमशक्नोत्। पश्चात् स तादृशीमेवाङ्क-सूचीमेकां पञ्चमिनटानामन्तरावकाशं प्रतिवारं दत्वा पठितुमारब्धवान्। एवं स षड्वारपाठेनैव तस्याः प्रपाठे शक्तो बभूव। ततो दशमिनटानामन्तरावकाशे प्रदत्ते तेन तादृश्येवान्या सूची पञ्चवारं पठित्वैव कण्ठस्थीकृता। ततः परीक्षणार्थं तेनैका सङ्ख्यावली दिवसद्वयस्यान्तरं दत्वा कण्ठस्थीकर्तुमारब्धा। एवमपि पञ्चवारेणैव सा कण्ठस्थीजाता। एतेन स्पष्टं यन्निरन्तरपाठापेक्षया सान्तरः पाठोऽधिकः फलप्रदः। परं दीर्घो मध्यावकाशो नाधिकलाभाय। स्थायिन्यै स्मृतये सान्तरः पाठो लाभजनकः, तात्कालिक्यै स्मृत्यै निरन्तरपाठेनापि न काचिद् हानिः।

अन्यैर्मनोवैज्ञानिकैः कृतं परीक्षणमपि पोषकमस्यैव सिद्धान्तस्य। एकस्यां प्रयोगशालायां कस्यचित् परीक्षार्थिनः सम्मुखं निरर्थकानां द्वादशशब्दानां सूची समुपस्थापिता। सूच्याः शब्दाः क्रमानुसारेण, प्रतिशब्दं मिनटद्वयस्यावकाशेन च परीक्षार्थिनं प्रदर्श्यन्ते स्म। एकदा शब्दावल्यां



शिक्षणानन्तरः कालः

पूर्णायां षण्णां सेकण्डानामन्तरेण पुनस्तेनैव क्रमेण (प्रतिशब्दं सेकण्डद्वयस्यान्तरं दत्वा) सा सूची प्रदर्श्यते स्म। प्रयोगशालायां द्वात्रिंशच्छात्रेष्वेष प्रयोगः कृतः। एवं पञ्चदशप्रयासैः सा सूची कण्ठस्था जाता। पुनश्चैष एव प्रयोगो मध्ये मध्ये मिनटद्वयस्यान्तरं दत्वा कृतः। छात्रा मिनटद्वयस्यान्तरावकाशं पठितसूच्या आवृत्तिकरणे न व्यतीयेयुः, अतोऽवकाशकाले तेऽन्यस्यां कस्याञ्चिद्वार्तायां नियुज्यन्ते स्म। एवं ते एकादशप्रयासैरेव तां शब्दावलीं कण्ठस्थमकुर्वन्। ततोऽस्मिन् प्रकारेऽन्यो विशेषः कृतः। प्रतिशब्दं सेकण्डद्वयस्य स्थाने सेकण्डचतुष्टयस्यावकाशो दत्तः, सूच्यामेकदा पूर्णायां पुनस्तदारम्भे मध्ये षण्णां सेकण्डानाञ्च। एवं छात्रैः सा सूची सप्तभिरेव प्रयासैः कण्ठस्थीकृता। प्रयोगत्रयस्यापि सम्यग्विवेचनायामिदं सुस्पष्टं भवति यत् प्रतिशब्दं सेकण्डचतुष्टयावकाशस्योपयोगश्छात्रैः पठितस्य पुष्टीकरणे विहितः। मध्ये मध्येऽल्पावकाशः

In Public domain. Digitization Muthulakshmi Research Academy

मनसि नवोत्साहं नवां शक्तिं च जनयति। अतो मध्येऽन्तरं दत्वा कण्ठस्थीकरणमेव सुष्ठुतरो विधिः। शीघ्रपठने शब्दानामर्थो मनसा न गृह्यते। निरर्थकानां शब्दानां पौनःपुनिकेन पेषणेन नापेक्षितो लाभो भवति। पुनरावृत्तीनां मध्ये मिनटादारभ्य चतुर्विंशतिघण्टापर्यन्तोऽवकाशो दातुं शक्यते। सार्थकस्य दीर्घस्य च पाठस्यावृत्तीनां मध्येऽधिकोऽवकाशो देयः, येन नवेनोत्साहेन नवावृत्तेः प्रारम्भः सम्भवेत्।

(४) **सार्थबोधं कण्ठस्थीकरणम्**—यस्य पाठस्यार्थो न स्पष्टो भवति स स्मृतौ शीघ्रं नावतिष्ठते। स्मृतो वापि त्वरितं विस्मर्यते। अतो यथाशक्यमर्थमवबुद्ध्यैव पाठः कण्ठस्थीकर्तव्यः। एवं कण्ठस्थीकृतः पाठो दीर्घकालं स्मृतोऽवतिष्ठते। यत्र नार्थोऽवगम्यते, तत्रापि येन केन प्रकारेणाऽर्थसङ्गतिः स्थापनीया। कृत्रिमार्थसङ्गतिपुरःसरं कण्ठस्थीकरणमपि सरलतायै भवति। तदर्थं कदाचित् सामग्र्याः खण्डेषु विभाजनं श्रेयः। ३९७१९५६ इत्येतेषामङ्कानां ३९७ तथा च १९५६ इति वर्गद्वये विभाजनेन त्रयो देवाः, नवग्रहाः, सप्तर्षयः, खिस्ताब्दाश्चेति कृत्रिममर्थमुपकल्प्याङ्काः सरलतया कण्ठस्थीकर्तुं शक्यन्ते। एवमेव नवानां दशपर्यन्तं गुणितं स्मर्तुं नियमाः कर्तुं शक्यन्ते, यथा—(१) गुणितस्य प्रथमोऽङ्को गुणकादेकेन न्यूनो भवति, (२) द्वितीयश्चाङ्को नवभ्यः गुणितप्रथमे गृहीतेऽवशिष्टस्तिष्ठति, (३) गुणिते द्वयोरङ्कयोर्योगो नवैव भवति। एतच्चाधः परीक्षितुं शक्यते—

९ × १ = ९
९ × २ = १८
९ × ३ = २७
९ × ४ = ३६
९ × ५ = ४५
९ × ६ = ५४
९ × ७ = ६३
९ × ८ = ७२
९ × ९ = ८१
९ × १० = ९०

(५) **स्मर्तुं विनिश्चयः**—प्रतिदिनमस्माभिरनेकानि वस्तूनि बहवश्च क्रिया दृश्यन्ते, स्मर्यन्ते, विस्मर्यन्ते च। स्मृतेषु च वस्तुषु कानिचित् स्मृतानि तिष्ठन्ति चिराय। परं चिराय तदेव स्मृतं भवति यस्मिन् सावधानो दृष्टिक्षेपो भवति, मनो वा येन संयुज्यते। स्मरणाय रुचेरावश्यकता प्रथमा। नह्युत्सुकताम्, रुचिम्, जिज्ञासां वा विना कण्ठस्थीकरणेन शिक्षणेन वा कोऽपि लाभः। जिज्ञासयैव निश्चयदृढतोत्पद्यते। विनिश्चयेनैव कार्ये पूर्णायाः शक्तेरुपयोगः क्रियते। एतन्मनसि निधायैव प्राचीनाः शिष्यचेतसि जिज्ञासाया औत्कट्यं शिक्षणात् पूर्वमावश्यकं मन्यन्ते स्म। उपनिषदि नाचिकेतसमुपाख्यानमस्यैव तथ्यस्य सूचकम्।

धारणा

धारणा[1] स्मृतेर्द्वितीयमङ्गम्। सा च स्मृतस्य वस्तुनः संरक्षणरूपा। केचिन्मन्यन्ते यत्सर्वं स्मृतेः कण्ठस्थीकृतं वाऽचेतने[2] मनसि संगृहीतं भवति। मनसश्च रूपद्वयम्—चेतनम्, अचेतनञ्च।

१. Retention.
२. Unconscious mind.

In Public domain. Digitization Muthulakshmi Research Academy

अत्र पृच्छा भवति—मनसि संगृहीतं तत्र सक्रियं तिष्ठति ? निष्क्रियं वा ? इति। सक्रियश्चेत् ? कण्ठस्थीकृतस्याचेतनरूपेण मनसि प्रपाठः स्वीकर्तव्यः। मनसि च प्रपाठः कस्यचिद्विषयस्यैव शक्यः, न सर्वेषां विषयाणाम्। येन वृक्षारोहणमभ्यस्तम्, धनुर्विद्या वा शिक्षिता, स आरोहणस्य धनुर्विद्याया वा मनस्यावृत्तिं कर्तुं कथं पारयेत् ? सर्वं ज्ञातजातं प्रतिक्षणं कोऽपि मनसि कथं वा स्मरेत् ? नहि कश्चिदपि प्रतिभाशाली शिक्षितस्य सर्वस्य मनसि प्रपाठमचेतनरूपेणापि कर्तुं प्रभवति। अथाचेतने निष्क्रियं तिष्ठतीति मतं चेत् ? अचेतने इति विशेषणं व्यर्थं भ्रामकं च। शरीरस्यैषा प्रवृत्तिरेव यदनुभवा मस्तिष्के सुरक्षितास्तिष्ठन्तीत्यपरे मन्यन्ते। तन्मतेन सर्वो नवोऽनुभवो मस्तिष्कसंरचनायां किञ्चित् परिवर्तनं जनयति। नह्यधश्चेतनसंस्काराणां मानसिकीनां



वा प्रवृत्तीनां क्वचिदस्तित्वम्। अनुभवेन केवलोऽचेतनो मास्तिष्को व्यापारो जायते, न त्वचेतने मनसि परिवर्तनम्। धारणा स्नायविकी[1] प्रकृतिः। स्नायुसंहत्यां[2] यानि परिवर्तनानि जायन्ते, तेषां स्थायित्वे स्वभावो निर्मीयते, स्मृतिश्च। ड्रेवरमहोदयानां मतानुसारं स्मृतस्य संरक्षणं मानसिकप्रक्रियाया वैशिष्ट्यम्। सर्वाऽपि मानसिकी प्रक्रिया स्वानन्तरं कञ्चित् स्थायिनं परिणामं जनयति। स परिणामश्च मनसोऽन्तःसंरचनायां[3] परिवर्तनरूपः। मानसी प्रक्रिया यत्संस्कारजालमनुत्यजति तन्मानसिके सङ्घटने स्वयं सुरक्षितमवतिष्ठते, तत्र परिवर्तनं विदधाति च। अन्येषां मते शिक्षणेन शरीररचनायां कानिचित् परिवर्तनानि जायन्ते। तानि परिवर्तनानि[4] च सर्वदाऽनश्यन्ति तिष्ठन्ति। परिवर्तनानि चाभ्यासेन[5] तत्पुष्टीकरणेन[6] च मस्तिष्करचनाया-

---

१. Neural habit.
२. Neural system.
३. Structure.
४. Modifications.
५. Exercise.
६. Reinforcement.

In Public domain. Digitization Muthulakshmi Research Academy

मुत्पद्यन्ते । इमानि परिवर्तनान्यत्यन्तं सूक्ष्माण्यपि तथा सामर्थ्यवन्ति, यथैतदुपेतो जन एकदा कृतं कार्यं पुनरपि तथैव कर्तुं प्रभवति । तानि च तावदेव निष्क्रियाणि यावत्कयाचित् प्रभावपूर्णयोत्तेजनया जागरितानि न क्रियन्ते । यानि परिवर्तनानि च मस्तिष्के विशिष्टां स्मृतिं सुरक्षन्ति, तानि 'स्मृतिचिह्नानि[1]' कथ्यन्ते । एषां चिह्नानां स्वरूपं स्पष्टीकर्तुं कठिनम् , तथापि सुनिश्चितमेतद्यत् सर्वाः शिक्षणक्रिया मस्तिष्के काँश्चिदङ्कान् रचयन्ति, ते चाङ्का मस्तिष्के कञ्चित्कालमवश्यं तिष्ठन्ति, पूर्वमभ्यस्तस्य पुनः शिक्षणे साहाय्यं प्रयच्छन्ति च । कालान्तरे तानि चिह्नानि विलुप्तान्यपि भवितुं शक्नुवन्ति । केषाञ्चिन्मतेन 'एकदा स्मृतं कदापि न विस्मृतं भवति । यद्विस्मृतमिव प्रतीयते, तदपि कदाचिदनुकूलं परिवेशमवाप्य पुनः स्मृतिपथमवतरति । ज्वरग्रस्ता जना बहुधा बाल्ये घटितानि स्मरन्ति' इति; परमिदं मतमतिशयोक्तिपूर्णम् । यद्येकदा स्मृतं कदापि न नश्येत्तदा सर्वमप्यनुकूले परिवेश उपस्थिते स्मृतं स्यात् । नैवमस्माकमनुभवः ।

स्मृतिचिह्नानि प्रत्यक्षीकर्तुं न शक्यन्ते । एकदा कण्ठस्थीकृतस्य पाठस्य सारांशो यत् कस्मिंश्चित् कालेऽतीतेऽपि स्मर्यते, तदेव तेषां सत्तायां प्रमाणम् । कण्ठस्थीकृतस्य धारणा प्रकारत्रयेण परिचीयते—(१) प्रत्याह्वानेन[2], (२) प्रत्यभिज्ञया[3], तदितरपृथक्करणेन च, (३) पुनः शिक्षणेन च । स्मृतस्य प्रत्याह्वानं प्रबन्धरचनाकाले स्पष्टं दृश्यते । स्मृतात् पाठादुद्धृता अंशा अन्यत्र प्रत्यभिज्ञाबलात् परिचीयन्ते । अयं परिचय एव प्रत्यभिज्ञा । प्रत्याह्वान-प्रत्यभिज्ञाऽभावेऽपि स्मृते पाठेऽन्यतः प्रक्षिप्ता अंशाः पृथक्कर्तुं शक्यन्ते । एष एव विधिः [4]शुद्धाऽशुद्धपरीक्षायामनुस्रियते । तृतीयश्च प्रकारः पुनः शिक्षणम्[5] । शिक्षितस्य, ततो विस्मृतस्य पाठस्य



मुद्रलेखशिक्षणसूचिका रेखाः

1. Memory trace.
2. Recall.
3. Recognition.
4. True-false-examination.
5. Relearnig method.

In Public domain. Digitization Muthulakshmi Research Academy

पुनः शिक्षणे न तावान् समयोऽपेक्ष्यते, यावान् पूर्वमपेक्षितो भवति। पूर्वं यदि दशमिनटैः पाठः कण्ठस्थो जायते, तदा द्वितीयवारे सार्धसप्तभिरेव।

कालेन धारणाया ह्रासो भवत्येव। तथापि नैष ह्रासः सर्वदा सर्वत्र चैकगतिकः। अपि तु-

(१) कश्चिज्जनोऽन्यापेक्षया शीघ्रतरं विस्मरति।

(२) यः पाठोऽधिकं शिक्ष्यते, यावानभ्यासः स्मरणायावश्यकस्तदपेक्षयाधिकोऽभ्यासो वा यस्य पाठस्य क्रियते तद्विषयिण्या धारणाया ह्रासो मन्दतरगत्या भवति।

(३) सार्थकं वस्तु निरर्थकवस्त्वपेक्षया मन्दतरगत्या विस्मर्यते; निरर्थका अङ्काः, नामानि च शीघ्रमेव विस्मृतानि भवन्ति। सार्थकः पद्यांश एकदा कण्ठस्थीकृतः कदाचिद् यावज्जीवं स्मृतस्तिष्ठति।

धारणाया मापोऽपि शक्यः। मापस्यानेके प्रकाराः प्रचलिताः सन्ति। यथा—

(१) यावन्तं पाठमेकदा पठित्वा, यावद् वैकदा श्रुत्वा कश्चिद् विना साहाय्येन प्रपठितुं शक्नोति तावत्येव तस्य धारणा भवति। अयं प्रपाठः, आवृत्तिर्वा पुनरुत्पादः[1] कथ्यते।

(२) पुनरभ्यासे यावता कालेन पाठः कण्ठस्थो भवति, पूर्वाभ्यासे च यावता कालेन, तयोरन्तरानुसारेण धारणाया मापः शक्यः; एतस्मिन् विषये एबिङ्हास(Ebbinghaus)-महाशयेन अनेके प्रयोगाः[2] कृताः। तेन त्रयस्त्रिंशद् वारान् प्रयासं कृत्वा किञ्चिद्वस्तु स्मृतम्।



प्रयोजनस्य शिक्षणोपरि प्रभावः

---

१. Reproduction.

२. Experiments

In Public domain. Digitization Muthulakshmi Research Academy

षड्दिनानन्तरं यदा तद्विस्मृतं तदा पुनः स्मर्तुमारब्धम्। तदा तेन तदेकादशवारेणैव कण्ठस्थीकृतम्। तस्य धारणा $\frac{२२}{३३}$ = द्वितृतीयांशवतीति स्पष्टमेव। परिचितापरिचितवस्तूनि परस्परं सम्मेल्य परिचितेभ्यः परिचितानां पृथक्करणमपि धारणामापप्रकारः। न्यायाधिकरणेष्वपराधिप्रत्यभिज्ञायै इयमेव पद्धतिरवलम्ब्यते।

(३) पुनर्निर्माणेनापि धारणाया मापः सम्भवति। नवीनपद्धत्या शिशूनां शिक्षणे यानि क्रीडनकानि प्रयुज्यन्ते, तान्येनं विधिमवलम्ब्यापि निर्मीयन्ते।

विस्मृतिः

जनानामयं विश्वास आसीद् यद् गच्छता कालेन सर्वमपि वस्तु विस्मर्यते। अत एव 'कालः श्रेष्ठश्चिकित्सकः' इति भणितिः प्रचलिता। साम्प्रतिकैः परीक्षणैः सिद्धं यन्न कालो विस्मृतिकारणम्; परं यत्किञ्चित् काले घटते, तदेव। गच्छता कालेन न केन्द्रस्थनाडीमण्डले निर्मितानि चिह्नानि क्षिप्यन्ते, अपि तु तदन्तरे घटमानेन सर्वेण। इदमेव कारणं यन्नक्तं स्मृतं प्रातःकाले तथैव स्मृतं तिष्ठति, न तु प्रातः स्मृतं सायङ्काले तथा; यतो दिवा घटमानं मनसि प्रभावं जनयति। तेन स्मृतसंरक्षणे बाधा जायते। यदि कण्ठस्थीकरणवेलायाः प्रत्याह्वानवेलायाश्च मध्ये वर्तमानः कालः सर्वथा क्रियारिक्तो भवेत्, यस्मिन् शरीरे प्रभावकारि किञ्चिदपि बाह्यमान्तरिकं वा न सञ्जायेत; तदा स्मृतौ लेशमात्रोऽपि विकारो न स्यात्। मध्यान्तरे प्रक्रियाद्वययुक्तं सक्रियं भवति। एतत्प्रक्रियाद्वयं व्यवहारः[१], चयापचयौ[२] चेत्यभिधीयते। तदनुसारेण विस्मृतिविषयकौ द्वौ सिद्धान्तौ प्रथितौ —बाधासिद्धान्तः[३], क्षयसिद्धान्तश्च[४]।

दैनन्दिने जीवनेंऽशेन समानाः, अंशेन चासमानाः क्रियाः परस्परं बाधन्ते। ममैकस्य मित्रस्य नाम 'ढपोरशङ्ख' इति प्रसिद्धमासीत्। तस्य सहपाठिनस्तमनेनैव नाम्ना आह्वयन्ति स्म। एवं ढपोरशङ्खशब्दो मे कस्यचिन्मित्रस्य बोधको जातः। कालान्तरेऽनेकैः ढपोरशङ्खैः सह मे परिचयो जातः। तदा तस्य प्रारम्भिकोऽर्थो मे विस्मृतः। साम्प्रतमहं न जानामि तस्य शब्दस्य बाल्यकाले कोऽर्थो मया गृहीत आसीदिति। अत्र मूलार्थविस्मृतेः कारणं "तुष्टीकरणस्याभावः। तस्य नाम्नो नवैरर्थैः प्राचीनोऽर्थो विस्मारितः। बाधाया इदं साधूदाहरणम्।

सुष्ठु कण्ठस्थीकृतोऽपि पाठो विस्मृतो भवति यदि कालान्तरे तस्योपयोगो न जायते। शरीरेऽपि यस्याङ्गस्योपयोगो दीर्घकालं न भवति तन्निर्बलं जायते। बहुकालं निष्क्रियं स्थिता मांसतन्तव[६] इव स्मृतिचिह्नान्यपि क्षीणानि जायन्ते।

जागरणवेलायां विपरीतं विलयनमपि स्मृतेर्बाधकं भवति। एकं पद्यं कण्ठस्थीकृत्य यदि स्वल्पकालान्तरे कश्चिद् द्वितीयं पद्यं कण्ठस्थं कुर्यात्, तदा द्वितीयपद्यकण्ठस्थीकरणेन प्रथमस्य धारणा क्षता भवत्येव; परं यदि पद्यं कण्ठस्थं कृत्वा काचिल्लघुकथा चित्रकला वा शिक्ष्यते, तदा न प्रथमधारणायां काचित् क्षतिः सञ्जायते। सार्थकस्य वस्तुनो धारणा न तथा

---

१. Behaviour.
२. Metabolism.
३. Interference theory.
४. Atrophy theory.
५. Non-reinforcement.
६. Muscle fibres.

In Public domain. Digitization Muthulakshmi Research Academy

क्षीयते यथा निरर्थकस्य। एवमेव परिश्रमपूर्वकं शिक्षितस्य, दीर्घकालं वा शिक्षितस्य धारणा न शीघ्रं क्षीयते। निरन्तराभ्यासोऽपि विपरीतविलयनस्य बाधको भवति।

सुप्तावस्थायां विस्मृतेर्गतिः क्षीणतरा भवतीत्युक्तमेव। तस्मिन् काले बाह्यो व्यवहारो रुद्धप्रायो भवति। एतच्च सुविदितं यन्नवं शिक्षितं पूर्वं शिक्षितपाठस्य स्मृतेर्बाधकं भवति, पूर्वं शिक्षितं च नवस्य पाठस्य स्मृतेः। नहि स्वापकाले किञ्चिन्नवं शिक्ष्यते, येन पूर्वं शिक्षितस्य स्मृतौ बाधा सञ्जायेत। परं सातिशयं शिक्षितस्य वस्तुनो विषये नायं नियमः। सातिशयमभ्यस्तः पाठः स्मरणात् साधारणक्रियापूर्णाष्टघण्टानन्तरं जागरणावस्थायामपि पूर्ववदेव सुस्मृतस्तिष्ठति। स्मृतेः सुपुष्टानि चिह्नानि क्षयबाधाविरुद्धमपि स्थातुं शक्नुवन्ति। कण्ठस्थीकृत्य स्वापो धारणायाः सहायको भवति। कैश्चित् पुरुषैरत्र विषये प्रयोगः कृतः। निरर्थकानां शब्दानां सूचीं कण्ठस्थीकृत्य केचित् सुप्ताः, केचिच्च पूर्ववत् कार्येषु सँल्लग्नाः। कस्यचिन्मध्यान्तरस्य पश्चात् स्वापात् प्रबोधिताः परीक्षार्थमाहूतास्तेऽन्ये च। परीक्षयेदं सिद्धं यन्निद्रावस्थापेक्षया जागरणकाले विस्मृतेर्गतिस्तीव्रतराऽभूत्। कण्ठस्थीकरणानन्तरं निष्क्रियता धारणायाः सहायिका भवतीति विषये मनोवैज्ञानिकैः पशुष्वपि प्रयोगाः कृताः। तैः केचित् कनखजूरेत्याख्याः कीटा एकस्मिन् पञ्जरे बद्धाः, तत्र कस्याश्चिद् विशिष्टाया दिशः पृथक् स्थातुं प्रशिक्षिताश्च। यदा ते वर्जितायां दिशि चरन्ति स्म, तदा विद्युदाघातं प्राप्नुवन्ति स्म। पञ्चदशाष्टादश वा आघातान् प्राप्य ते वर्जितस्थानात् पृथक् स्थातुं शिक्षितवन्तः। शिक्षणानन्तरं तेषु स्वापिताः केचित्, केचिच्चान्यस्मिन् पिञ्जरे यथेच्छं क्रियां कर्तुं निरुद्धाः। कस्यचिन्मध्यान्तरस्य पश्चात् ते पुनः परीक्षिताः पूर्वपिञ्जर एव बद्धीकृत्य। परीक्षणेन सिद्धं यच्छिक्षणानन्तरं ये सुप्ताः, निष्क्रियं वा स्थिताः, तेषां विस्मृतिः क्रियापरायणेभ्यो न्यूनतरा आसीत्।

मनोवैज्ञानिका विस्मृतेर्गतिं वक्रेण रेखाचित्रेण[१] प्रदर्शयन्ति। रेखाभिः स्पष्टीक्रियते यत्कण्ठस्थीकरणानन्तरं प्रथमं तु किञ्चित् कालपर्यन्तं धारणाया ह्रासोऽधिकेन वेगेन भवति, ततो मन्दतरगत्या। प्रयोगार्थं केनचिद् निरर्थकशब्दसूची कण्ठस्थीकृता, ततो विरामो लब्धः। चित्रे लिखितानां दिनानामन्तरेण सा सूची पुनः कण्ठस्थीकृता। उपरित आरभ्य पूर्वया वक्ररेखया पूर्वमभ्यस्तस्य विषयस्य पुनः[२] शिक्षणपरिणामस्याङ्कनं कृतम्। द्वितीयया च विंशतेश्छात्राणां सामान्याया धारणाशक्तेरङ्कनम्।

अन्यान्यप्यनेकानि कारणानि विस्मृतेः। तत्र संवेगानां[३] नवस्थितिः प्रथमा। गृहे कण्ठस्थीकृतं पाठं छात्राः शिक्षकसम्मुखे विस्मरन्ति। अनेका ओषधीर्जानन्तो जनाः स्वेष्टजनेषु रुग्णेषु ता विस्मरन्ति। क्षुब्धमनःस्थितिरेवात्र विस्मृतौ कारणम्। क्षुब्धे मनसि स्वयं निहितानि वस्तून्यपीतस्ततोऽन्विष्यन्ते। यात्राकाले तु प्रायेणैतद्भवति। परिवेशे[४] परिवर्तनमपि विस्मृतेर्जनकम्। गृहे कण्ठस्थीकृतं वक्तव्यं रङ्गमञ्चे, सभापीठे वा विस्मर्यते। शोकजनिका, अपमानस्मारिकाः, स्वहीनत्वसूचिकाश्च वार्ता जनाः प्रायेण विस्मरन्ति। फ्रायडमतेन चेतनम्[५], अचेतनं[६]

---

१. Curve line.
२. Relearning.
३. Emotional disturbance.
४. Environment.
५. Conscious.
६. Unconscious.

In Public domain. Digitization Muthulakshmi Research Academy

चेति मनसो द्वे रूपे। अप्रियाणि वृत्तानि त्वचेतने मनस्येव धार्यन्ते, न तु चेतने। अचेतने मनसि तानि दान्तानि[1] तिष्ठन्ति, न तु विलीनानि भवन्ति। तेषां स्मरणेन मनसि व्यग्रता विक्षोभश्च जायेते। एषा च जनानां प्रकृतिर्यत्ते सुखप्रदाननुभवान् पुनः पुनः स्मर्तुमिच्छन्ति, दुःखदाह्यं विस्मर्तुम्। अतो याननुभवान् प्रति संवेगात्मिका प्रतिक्रिया सुखकरी, तेषां धारणाऽप्यधिका। एतदेव कारणं यद्विजयस्य, साफल्यस्य, स्नेहोल्लासस्य वार्ताः, मनोहराणि च दृश्यानि बहुकालं स्मृतानि तिष्ठन्ति।

भयेनापि स्मरणविकारा उत्पद्यन्ते। तद्दूरीकरणाय भयकारणैर्मैत्री, सहृदयसङ्गतिः, दृढो निश्चयः, मानसिके विन्यासे परिवर्तनं चावश्यकम्।

कुत्रचिद्विस्मरणमप्यावश्यकं भवति। बाला अनेकानि व्यसनानि कुसङ्गेन शिक्षन्ते। तानि विस्मारयितुं ज्येष्ठाः प्रयत्नं कुर्वते। अत्र विस्मरणं सहायकमेव।

प्रत्याह्वानम्[2]

पूर्वं दृष्टस्य, श्रुतस्य, अनुभूतस्य, कण्ठस्थीकृतस्य वाऽप्रस्तुतस्य वस्तुनः स्मरणं प्रत्याह्वानं कथ्यते। तच्च प्रत्यभिज्ञाया भिन्नम्। प्रत्यभिज्ञा ज्ञानेन्द्रियाणां सम्मुखमुपस्थितस्य पूर्वानुभवविषयस्य वस्तुनो भवति, प्रत्याह्वानं च प्रस्तुतस्य। कश्चित् पूर्वपरिचितः पुरुषो भवतः सम्मुखमायाति। भवानाकृत्या तं प्रत्यभिजानाति। आकृत्या च तस्य नामापि स्मृतं भवति। इदं स्मरणं प्रत्यभिज्ञा। कदाचित् केनचिन्मित्रेण भवतोऽन्यस्य मित्रस्य नाम गृह्यते। भवान् तन्नाम जानाति। नाम्ना च मित्रस्याकृतिमपि स्मरति। इदं स्मरणं प्रत्याह्वानम्, स्मृतिः, पुनरुत्पादिका[3] स्मृतिर्वा कथ्यते।

प्रत्याह्वानं विचाराणां सम्बन्धेन, संस्काराणां वोत्तेजनया भवति। साहचर्यं स्मरणजनकम्। यौ सुहृदौ प्रायः सहैव मार्गेऽवलोक्येते, तयोरेकस्य मार्गे दर्शनमपरस्य स्मारकं भवति। येषु वस्तुषु जनेषु वा सहचारितासम्बन्धः स्थापितो भवति, तेष्वेकस्मिन् विलुप्ते नष्टे वा तत्सम्बन्धीनि सर्वाणि वस्तूनि तत्सम्बन्धिनोऽन्ये जना वा स्मृतिमायान्ति। द्वे समधर्मवती वस्तुनी अन्योऽन्यं स्मारयतः; यथा—विकसितं पुष्पं प्रेयसीम्, म्लानं पीतं पत्रं वार्धक्यम्, निवापितो दीपो मृत्युं च स्मारयति। विरोधोऽपि स्मारक एव। पिकः काकस्य, रामश्च रावणस्य स्मारकः। वस्तुतो विरोधिस्मरणेऽपि सादृश्यमेव कारणम्। काको गजस्मरणं जनयितुमक्षमः।

स्मृतिप्रतिमा[4]

यदा कोऽपीन्द्रियानुभवः प्रत्याह्वानकाले स्वेन स्वेन सांवेदनिकेन[5] यथार्थेन च रूपेण सहोपस्थितो भवति, तदा स 'स्मृतिप्रतिमा' इति कथ्यते। अस्यायमाशयः—भवता क्वचिदुद्याने सुरभीणि मनोहराणि पुष्पाण्यवलोकितानि। दृष्ट्वा चानुकूला सुखसंवेदना प्राप्ता। अथ दृष्ट्वाऽ-

१. Repressed.
२. Recall.
३. Reproductive memory.
४. Memory images.
५. Sensory character.

In Public domain. Digitization Muthulakshmi Research Academy

न्यत्र गतोऽपि भवान् यदि तानि पुष्पाणि स्मृत्वा तामेवाह्लादकारिणीमनुभूतिं विन्दते, तदा सा द्वितीयानुभूतिः 'स्मृतिप्रतिमा' इति वक्तुमर्हा।

स्मृतिप्रतिमाः प्रतिजनं भिद्यन्ते। नहि समेषां स्मृतिप्रतिमाः समानरूपेण यथार्थाः। अवलोकनवेलायां यादृङ्निरीक्षणं वस्तुनः क्रियते, तादृगेव याथार्थ्यं स्मृतिप्रतिमासु फलति। प्रायो मन ईक्षणकाले वस्तुनः समग्रमेव चित्रं प्रभावं वा गृह्णाति, न तु तस्याङ्गोपङ्गानां प्रभावम्। प्रतिदिनं विद्यालयं गच्छन्तोऽपि छात्रा मार्गस्थवस्तूनां सूक्ष्मं वर्णनं न कर्तुं शक्नुवन्ति। एतेन प्रतीयते यत् साधारणजना वस्तूनां साङ्गोपाङ्गं निरीक्षणं न कुर्वन्ति। अत एव न तेषां स्मृतिप्रतिमाः सुस्पष्टा भवन्ति। स्मृतिप्रतिमानां द्वौ प्रकारौ—प्राथमिकी स्मृतिप्रतिमा[१], पश्चात्प्रतिमा च। पश्चात्प्रतिमा प्राथमिकस्मृतिप्रतिमाया ईषद् भिन्ना। पश्चात्प्रतिमा सैव, यस्याः प्रत्याह्वानमनुभवात् किञ्चित्कालान्तरे क्रियते। यदा कश्चित् पुरुषो भाषणं करोति तदा तद्भाषणे समाप्तेऽपि तस्य प्रभावः कञ्चित् कालं प्रतिध्वनिरिवावतिष्ठते। वयं किञ्चिन्नैसर्गिकं सौन्दर्यमवलोकयामः, तदा दृष्टौ सौन्दर्यादपसारितायामपि दृश्यं चक्षुषोः सम्मुखमुपस्थितमिव प्रतिभाति। रुचिरपि प्राथमिकस्मृतिप्रतिमानां स्वरूपे परिवर्तनं विदधाति। प्रतिमाचित्रं सत्यचित्रात् कदाचिद्विशालतरं कदाचिच्च क्षुद्रतरं भवति। आयामजन्यं वर्णजन्यं वा परिवर्तनमैच्छिकम्[२], अनैच्छिकं[३] च भवति; परं तदात्मनिष्ठमेव[४]। एवंविधे परिवर्तनेऽपि प्राथमिकी स्मृतिप्रतिमा स्वजनकादनुभवान्मूलतो न भिद्यते। इमाः प्रतिमा बाल्यस्यान्तिमे चरणे प्रायेणानुभूयन्ते, कैशोर्यस्यारम्भे च विलुप्ता भवन्ति। विभ्रमोऽपि स्मृतिप्रतिमाजन्य एव भवति। यदा स्मृतिप्रतिमेन्द्रियजन्यज्ञानरूपेण गृह्यते, तदा विभ्रमस्य सृष्टिर्भवति। स्वप्ने दृश्यमानं तादृशं प्रभावकरं भवति, यथा तद् वस्तु सदृशं गृह्यते। विकृतायां मनोऽवस्थायामपि प्रतिमाः प्रत्यक्षानुभवा इव प्रतीयन्ते।

प्रत्याह्वानं प्रायेण मूलवस्तुनो भिद्यते। यदि कालिदासीयमभिज्ञानशाकुन्तलमधीतवन्तं छात्रं कोऽपि पृच्छेत्—'जानासि भोस्त्वं शकुन्तलाम् ?' इति। तदा स प्रतिवदिष्यति—'ओम्' इति। 'तदा वर्णयताम्' इति प्रेरितेन तेन कृतं वर्णनमपूर्णमेव भविष्यति। कदाचिद् महत्त्वपूर्णान्यपि वर्णनानि स विस्मरेत्। अस्य कारणमिदमेव यन्न केनापि भाषणं प्रतिवाक्यं श्रूयते, क्वापि कथा घटनानुक्रमेणाधीयते, क्रिमपि चित्रं प्रतिरेखं प्रत्यङ्गं वा निरीक्ष्यते। अतो न प्रत्याह्वानायावश्यकानि स्मृतिचिह्नानि पूर्णतया निर्मीयन्ते।

प्रत्यभिज्ञा[५]

प्रस्तुतानां वस्तूनां प्रत्यभिज्ञानं 'प्रत्यभिज्ञा'नाम। मित्रं दृष्ट्वा, तस्य शब्दं श्रुत्वा वा वयं तत् प्रत्यभिजानीमः। पशवोऽपि स्वं स्वामिनं प्रत्यभिजानन्ति। प्रत्यभिज्ञा प्रत्यक्षीकरणस्यैव प्रकारविशेषः। वस्तुविशेषमभिज्ञातुं न तस्याकारस्य दर्शनमेव पर्याप्तं भवति, तदर्थं केचिद्

---

१. Eidetic images.
२. Voluntary.
३. Involuntary.
४. Subjective.
५. Recognition.

In Public domain. Digitization Muthulakshmi Research Academy

विशिष्टाः सङ्केता अप्यपेक्ष्यन्ते। आगच्छन्तीं काञ्चिद् गां दृष्ट्वा प्रथममियं गौरित्येव प्रतीतिर्भवति, ततः कपिलेयं गौरिति, ततो मम सुहृदो रमेशस्येयं गौरिति, ततश्च मम सुहृदा रमेशेन स्वश्वसुराल्लब्धेयं कपिला गौरिति बोधो भवति। अस्य परिचयकारणं केचित् सङ्केतविशेषा एव, येषामुपयोगोऽजानद्भिरपि क्रियत एव।

प्रत्याह्वानमपि प्रत्यभिज्ञायां सहायकं भवति। पूर्वमांशिकी प्रत्यभिज्ञा जायते, ततः प्रत्याह्वानम्। एतत्प्रत्याह्वानं प्रत्यभिज्ञायाः पूरकम्। मार्गे गच्छन्तो वयं कश्चित् पुरुषं पश्यामः। स पुरुषः समीपमागत्य नमस्करोति, भाषितुं चारभते। तदाऽस्मन्मनसि भवति 'दृष्टोऽयं पुरुषः पूर्वम्' इति; परं न स्मर्यते कदा कुत्र वा दृष्टः, कस्मिन् प्रसङ्गे तेन सह परिचयो जातः। तदा वयं स्मृतावगाह्यैकाग्रेण मनसा परिचयस्थानकालादिकमनुचिन्तयामः प्रत्याह्वानसाहाय्येन। यदि प्रत्याह्वानं सफलं भवति, तदा प्रत्यभिज्ञाऽपि पूर्णा भवति।

कदाचित् स्मरणं प्रत्याह्वानेनारभ्यते, प्रत्यभिज्ञया च समाप्यते। यदा किञ्चित् काव्यं स्मर्तुं प्रयत्यते, कस्यचित् प्रश्नस्योत्तरं वा, तदा बहवः काव्यांशा बहून्युत्तराणि वा मनस्यवतरन्ति। तेषु काव्यांशेषु कश्चिदेकः, उत्तरेषु च किञ्चिदेकं गृह्यते। एवंविधायां प्रत्यभिज्ञायां पूर्वं प्रत्याह्वानं भवति, ततः प्रत्यभिज्ञा जायते।

प्रत्यभिज्ञायाः प्रक्रिया प्रत्याह्वानापेक्षया सरला विश्वसनीया च। यस्य नाम्नः, वस्तुनः, काव्यस्य, चित्रस्य वा प्रत्याह्वानं शक्यं तस्य प्रत्यभिज्ञा सम्भवति। कदाचित् प्रत्यभिज्ञाऽपि भ्रान्ता भवति। यदा परिचितवस्तुसदृशं किञ्चिद् गोचरं भवति, तदा भ्रान्त्या तदपि परिचितवस्तुरूपेण गृह्यते। अतः सादृश्यं प्रत्यभिज्ञाया बाधकं भवति। कस्यचिद्बालकस्य सम्मुखं कतिचिच्चित्राण्युपस्थाप्यन्ताम्, यदा तस्य तैः सम्यक् परिचयो जायेत तदाऽन्यानि कतिचित् तेषु संयोज्यन्ताम्। सर्वाणि च मिश्रीकृत्य पूर्वाणि ततः पृथक्कर्तुमादिश्यन्ताम्। तेषु स कतिचित् परिचितानि प्रत्यभिज्ञास्यति, कतिचित् प्रत्यभिज्ञातुं समर्थो न भविष्यति। कानिचिदपरिचितानि परिचितानीव चेष्यति।

कस्मिंश्चिद्वस्तुनि पूर्वं दृष्टानां विशेषणानां पुनः प्रत्यक्षीकरणमपि प्रत्यभिज्ञैव। यथा कश्चित् केनचिद् वस्तुना सहैकदा व्यवहरति, तथैवाऽन्यदा व्यवहर्तुं प्रस्तुतो भवति। यदि किमपि पुरुषं दृष्ट्वा भवानक्रुध्यत्, तदा तस्य पुनर्दर्शने क्रोधस्यैवोदयो भवति। आपणे विक्रीणन्तं जनमेकदा दृष्ट्वा पुनस्तस्मिन्नवलोकिते विक्रेतुरेव प्रतिमा मनस्यवतरति।

स्मृतेः प्रशिक्षणम्[1]

अनेकेषां जनानामेष विचारो यदन्यशक्तय इव स्मृतिरपि विविधैरुपायैर्वर्धयितुं शक्यते। परमिदं मतं भ्रान्तमित्याधुनिकैः प्रयोगैः सिद्धम्। स्मृतिशक्तिर्जन्मना सहैव जायते। न तस्यां परिवर्तनस्य सम्भवः। प्रवर्धनासम्भवेऽपि तस्या विनियोगस्तथा शक्यो येन साऽधिकतरा उपयोगिनी भवेत्। व्यवस्थया[2], विविधैर्विधिभिः[3] तथा कर्तुं शक्यते। कार्यस्य पूर्वयोजना, सम्यग्विनिश्चयश्च

---

१. Training.

२. Management.

३. Methods.

In Public domain. Digitization Muthulakshmi Research Academy

व्यवस्था। विधीनां चर्चा स्मरणनिरूपणप्रसङ्गे कृतैव। स्मरणशक्तेः प्रवर्धनाशक्यत्वेऽपि प्रशिक्षणेन कण्ठस्थीकरणे समुन्नतिः सम्भाव्यते।

प्रशिक्षणस्य स्थानान्तरणम्[1]

एकस्य विषयस्याभ्यासेन व्यक्तौ या कुशलता सम्पद्यते तस्याः स्थानान्तरणमन्यस्मिन्नभ्यासे कर्तुं शक्यते न वेत्ययमपि विचारणीयो विषयः। अस्यायमाशयः—किमेकस्य वस्तुनः कण्ठस्थीकरणेन धारणायाम्, प्रत्याह्वाने वा यद्वैशिष्ट्यमुत्पद्यते; तस्य विनियोगोऽन्यस्य वस्तुनः शिक्षणे कर्तुं शक्यते? प्राचीनानां मते नैतत् सम्भवति। अत एव प्राचीनाः शिक्षकाः 'अष्टाध्यायीसूत्राणाम्, अमरकोशश्लोकानाञ्च कण्ठस्थीकरणेन छात्राणां स्मृतिर्वर्धिष्यते, कठिनकार्येषु क्षमता च' इति विश्वसन्ति स्म। 'एकस्याः शक्तेर्विकासोऽन्यस्याः शक्तेर्विकासे सहायको भवति' इति ते मन्यन्ते स्म। एतन्मत्वैव ग्रीसादिदेशेषु व्याकरणस्य, गणितस्य, ज्यामितेश्च शिक्षणं बाल्यकाले दीयते स्म। साम्प्रतिकानां मनोवैज्ञानिकानां मतमेतद्विरुद्धम्। नहि स्मृतेः स्थानान्तरणं भवतीति प्रयोगैः सिद्धम्।

स्मृतेः सर्वथा स्थानान्तरणाभावेऽपि तस्या उपयोगोऽन्यत्रापि भवत्येव। कक्षायां शिक्षिताः गणितनियमा व्यापारे उपयुज्यन्ते। एकस्मिन् द्विचक्रयाने आरोहणाभ्यासं कृत्वाऽन्यदपि द्विचक्रं चालयितुं शक्नुवन्ति चालकाः। एकस्य कार्यस्य शिक्षणे तत्सदृशस्यान्यस्य शिक्षणे सारल्यं भवति। एकेनाङ्गेन (हस्तेन, पादेन वा) शिक्षणग्रहणानन्तरं द्वितीयेनाभ्यासे सरलता भवति। एकस्य कार्यस्याभ्यासेन नातत्सदृशस्याभ्यासे कोऽपि लाभः। नहि जले तरणमभ्यस्य कोऽपि सरलतया मोटरचालनमभ्यस्यति। थार्नडाइकमहोदयेनास्मिन् विषयेऽनेके प्रयोगाः कृताः। तेन च प्रतिपादितमेतत्प्रकारकाणां प्रयोगाणामपेक्षया नवारम्भो वरीयानिति॥

---

१. Transfer of training.

In Public domain. Digitization Muthulakshmi Research Academy

द्वादशोऽध्यायः

कल्पना-क्रिया

प्रत्यक्षज्ञानम्

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। इन्द्रियाणि च वस्तु प्राप्य प्रकाशकारीणि। इन्द्रियवस्तुसन्निकर्षेण मस्तिष्कस्नायवस्तथा प्रभाव्यन्ते, यथा ते वस्तुनोऽनुपस्थितावपि कञ्चित् कालं तद्वस्तुनश्चित्रमुपस्थापयितुं क्षमन्ते। एतानि चित्राणि प्रत्यक्षज्ञानमूलकान्येव भवन्ति। विलियमजेम्समहोदयेनैतदेव स्वकीये 'प्रिंसिपुल्स आफ सायकोलॉजी' इति नामके पुस्तके प्रतिपादितम्। यया मनःशक्त्यै कदा प्रत्यक्षीकृतस्य पदार्थस्य तत्पदार्थेऽन्तर्हितेऽपि प्रत्यक्षमिव ज्ञानं कार्यते, सा मनःशक्तिः 'कल्पना' इत्यभिधीयते। 'पदार्थस्यानुपस्थितौ तद्विषयकस्य कस्यापि विचारस्य मनसि सञ्चारः कल्पना' इति सामान्या परिभाषा। मनःशास्त्रे कल्पनायाः कश्चिद्विशिष्टोऽर्थो गृह्यते। मनःशास्त्रे सा रचनात्मिका क्रिया कल्पना कथ्यते, यया जनाः प्राक्तनानां स्वानुभवानामाश्रयेण नूतनां विचारसृष्टिं कुर्वन्ति।

कल्पनाया महत्त्वम्

कल्पना मानवमनःशक्तिषु सर्वाधिकमहत्त्वपूर्णा, अद्भुता च। जनानां वैशिष्ट्यं तेषां कल्पनासु यथा स्पष्टं भवति, तथा नान्यत्र कुत्रचित्। नात्रेन्द्रियकरणकं प्रत्यक्षमात्रम्, एषा तु पूर्वानुभवाश्रिता सर्वथा नवा विलक्षणाकृतिर्मनसः। अस्यां तादृशो वेगः, येन जनस्य सम्पूर्णमाचरितं प्रभावितं भवति। सोपस्थितं चिन्ताजालं विस्तारयति, मनोरमं लोकमक्ष्णोः समक्षमानयति, पीडितान् प्रति करुणां जागरयति, सौन्दर्यं प्रति रुचिमुत्पादयति, दूरस्थैः प्रणयिभिः सह सम्पर्कं च स्थापयति। साहित्यसङ्गीतकलाविज्ञानानां जननी कल्पनैव। नैतां विना कुत्राप्युन्नतेः सम्भवः।

कल्पना मानसी प्रक्रिया। बाह्यपदार्थैरुत्तेजितानि ज्ञानेन्द्रियाणि यदा संवेदनामनुभवन्ति, तदा प्रत्यक्षं भवति। पदार्थानामभावेऽपि यदा ज्ञानेन्द्रियाणि संवेदनशीलानि भवन्ति, तदा जनः प्राक्तनस्वानुभवानां पुनर्निर्माणं कर्तुं प्रभवति। यदैवं निर्मिता अनुभवाः प्राक्तनानुभवानां प्रतिकृतयो भवन्ति, पूर्वमवलोकितं चित्रं च यदा तेनैव रूपेण कल्पनया मनसा प्रत्यक्षविषयीक्रियते, तदा सा कल्पना 'स्मृतिः' निगद्यते। अतीताया घटनायास्तेनैव क्रमेण मनस्यावृत्तिः स्मरणम्। नवेन क्रमेण स्वरूपेण वा आवृत्तिः कल्पना।

प्रत्यक्षकल्पनयोर्भेदः

कल्पनायै प्रत्यक्षज्ञानमावश्यकम्। नहि विना प्रत्यक्षं कापि कल्पना सम्भवति। तेन दृष्टिनाशात् पूर्वं विविधवर्णानां दृश्यानां प्रत्यक्षं कृतम्। न च सप्तान्धाः हस्तस्पर्शेनापि गजस्वरूपं वर्णयितुं शक्ताः—इति कथा तु प्रसिद्धैव। न तैः कदापि पूर्वं गजप्रत्यक्षं कृतम्। कल्पना प्रत्यक्षाधारैव।

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षस्य कल्पनामूलकत्वेऽपि प्रत्यक्षकल्पनयोर्महान् भेदः। स यथा—

(१) प्रत्यक्षविषयः पदार्थ इन्द्रियाणां सम्मुखमुपस्थाय तानि संवेदनशीलानि विदधाति। विशालं भवनं दृष्ट्वैव तस्य प्रत्यक्षीकरणं भवति, नैतद्बन्धनं कल्पना सहते। भवनानुपस्थितावपि सा तत्प्रतिमां स्रष्टुं क्षमते। एवं सृष्टा प्रतिमा यदि प्रत्यक्षवद्भवति, तदा सा स्मृतिः कथ्यते। कल्पनासृष्टिः वस्तुप्रतिमातो भिद्यत एव।

(२) मूर्तपदार्थानां प्रत्यक्षं कालस्थानसीमपरिमितमेव भवति। पुरुषः पृथिव्यां तिष्ठन्, चलन्, धावन् वा प्रत्यक्षं करोति, नहि कदाचिदाकाश उड्डीयमानः। नहि पशवः पक्षिणो वा पुरुषवद्भाषमाणा दृश्यन्ते। कल्पना कालस्थानौचित्यबन्धनमपि न सहते। कल्पनापुरुषो व्योम्न्युड्डीयते, कल्पनापशवः पुरुषवद् भाषन्ते। हितोपदेश-पञ्चतन्त्रकथासु कल्पनाविहारः स्पष्ट एव।

(३) प्रत्यक्षं वर्तमानकालसम्बद्धं भवति, कल्पना च कालत्रयगामिनी। विशेषतस्तु भविष्यत्कालसङ्केतिनी। यस्य भवनस्य कल्पना मनः करोति, तस्य निर्माणं भविष्यत्काले स चिकीर्षुरेव भवति।

(४) कल्पनाऽतीतकाले प्रत्यक्षीकृतानां वस्तूनामवयवान् पुनर्नवेन सम्बन्धेन समुपस्थापयति। यथा केनचिन्नीलो वर्णो दृष्टः, पाटलपुष्पं चावलोकितम्। न च कदापि पाटलनीलवर्णयोः सम्बन्धः प्रत्यक्षीकृतः। कल्पनया स नीलपाटलवर्णयोः प्रतिमे संयोज्य नीलपाटलप्रतिमां रचयितुं शक्नोति। कल्पनयाऽतीतानुभूतानां वस्तूनामवयवाः पृथक्कृत्याऽपि दृश्यन्ते। प्रत्यक्षेण सशिरस्का एव पुरुषा गृह्यन्ते। कल्पनायां शिरोविहीना अपि चलितुं शक्नुवन्ति। कल्पनया कुत्रचित् स्थानापत्तिरपि सम्भवति। यथा गणेशप्रतिमायां पुरुषशिरःस्थाने गजशिरः, अश्वमुखकिन्नराणामश्वतुल्यं मुखम्। आकारवृद्धिरपि कल्प्यते; यथा - विनायकस्य तुन्दः, लक्ष्म्या अष्टभुजो विग्रहः, रावणस्य दशाननानि। आकारलघिमाऽपि कल्पनया प्रसूयते; यथा—वामनशरीरम्, आङ्गलकथायां लघुकायकानां लिलिपुताख्यानां पुरुषाणां शरीरं वा।

(५) प्रत्यक्षेऽनुभवस्य विस्तारोऽधिको भवति, कल्पनाजनितप्रतिमायाञ्च न्यूनः। नहि प्रतिमा तथा स्पष्टा भवति, यथा प्रत्यक्षज्ञानम्। न च प्रतिमायां तथा तीव्रता भवति यथा प्रत्यक्षज्ञाने। नहि कदाचिदोषःकालिकानां दृश्यानां प्रतिमास्तथा विशदा भवन्ति यथा तेषां प्रत्यक्षज्ञानम्।

कदाचित् प्रत्यक्षकल्पनयोर्भेदज्ञानं दुष्करं जायते। भ्रमे कल्पितं वस्तु सत्यमिव प्रत्यक्षीक्रियते। स्थाणुं पुरुषं मन्यमानः स्थाणोः प्रत्यक्षं पुरुषरूपेणैव करोति। परमेषा कल्पनैव। स्वप्नेऽप्येवं भवति। स्वप्ने कल्पनाक्रियाऽतिप्रखरा भवति। न सा जाग्रदवस्थया सङ्गच्छते। स्वप्नेऽनुभवः प्रत्यक्षवदेव। तदा पुरुषो जाग्रदिव हर्षविषादावनुभवति। क्षीबोऽपि स्वाचरणं प्रत्यक्षजगदिव सत्यं मन्यते। स जगतो हर्षविषादौ विस्मृत्य तत्स्थाने काल्पनिकं जगद्विरचय्य तत्र तथैवाचरणं करोति; यथा कश्चिदन्यो जगति। यथा कल्पनायां प्रत्यक्षभ्रमो भवति, तथा कदाचित् प्रत्यक्षेऽपि कल्पनाभ्रमः। स च प्रायेणाऽसम्भाव्यवस्तु-घटनानिरीक्षणकाले जायते।

नहि प्रत्यक्षं विना कल्पना सम्भवति। नहि जन्मान्धबधिरौ वर्णध्वन्योः कल्पनां कर्तुं

In Public domain. Digitization Muthulakshmi Research Academy

क्षमेते। नहि कश्चित् कपिलवर्णमनवलोक्य कपिलाया गोः कल्पनां कर्तुं शक्नोति। यस्य च प्रत्यक्षज्ञानं यावद्विस्तीर्णं भवति, स तावदेवाधिकं कल्पनाभिर्विहर्तुं शक्नोति। प्राचीनकवयः सप्ताष्टौ वा वर्णान् नीलपीतहरितरक्तपाण्डुपाटलादीन् प्रत्यक्षीकर्तुमशक्नुवन्, परमाधुनिकाः शततोऽप्यधिकान्। वैज्ञानिकैस्तु पञ्चसहस्रतोऽप्यधिका रागभेदा विनिश्चिताः, नामान्यपि विनिश्चितानि तेषाम्। साम्प्रतिकाः कवयो वर्णविषयिकाः प्रभूताः कल्पनाः कर्तुं शक्नुवन्ति।

स्मृतिकल्पनयोर्भेदः

कल्पनायां प्रत्यक्षस्योपयोगस्तदैव सम्भवति, यदा वयं प्रत्यक्षज्ञानेन प्राप्ताननुभवान् स्मृतिरूपेण धारयितुं शक्नुमः। नान्यथा कल्पनाक्रियासु तेषामुपयोगः। तथाऽपि स्मृतिकल्पनयोर्भेदः स्पष्टः। स्मृत्या गतानुभवानां वर्तमानकाले पुनरावृत्तिः क्रियते। आवृत्तिकाले च ते गतानुभवरूपेणैव ज्ञायन्ते। कल्पनायां तु बहूनामनुभवानां मिश्रणं भवति। तेषु कस्यचिदनुभवस्य कानिचिदङ्गानि विस्मर्यन्ते। कदाचित् कल्पनामूलकः कोऽप्यनुभवः प्रत्यभिज्ञायते, कदाचित् प्रत्यभिज्ञानं दुष्करं भवति। स्मृतिर्भूतकालसम्बद्धा भवति, कल्पना च कालत्रन्धनरहिता। स्मृतावपि कल्पना सहायिका भवति। स्मृतिः[१] कल्पनाप्रकार एव। नहि स्मरणं कस्यचिदपि वस्तुनस्तस्मिन् परिवेशे[२] सम्भवति यस्मिंस्तद्वस्तु पूर्वं दृष्टम्, श्रुतम्, अनुभूतं वा। कल्पनयैव वस्तूनि तेन तारतम्येन तास्वेव च परिस्थितिषु स्मृतानि भवन्ति। अत एव स्मृतिः 'पुनरुत्पादिका[३] कल्पना' कथ्यते।

कल्पना सर्वेष्वपीन्द्रियविषयेषु सम्भवति। कल्पनायामाम्रं द्रष्टुम्, घ्रातुम्, स्वादयितुम्, स्प्रष्टुम्, पततस्तस्य शब्दं श्रोतुं शक्यते। बालाः, स्त्रियश्च प्रायः कल्पनाप्रवणा भवन्ति। बालाः कल्पनायथार्थयोर्भेदं सम्यङ् नावबुध्यन्ति। प्रौढेषु च भाषा, प्रत्ययाः, तर्कश्च कल्पनाचित्रस्थानं गृह्णन्ति।

प्रतिमाः

यदा मनुष्यः किञ्चित्पश्यति, शृणोति, जिघ्रति, स्वादयति, स्पृशति वा; तदा तस्य दर्शनश्रवणघ्राणास्वादनस्पर्शाणां चित्राणि दर्शनाद्यनन्तरं मनसि तिष्ठन्ति येन, वस्तुप्रत्यक्षं विनाऽपि पुनर्मनसा तद्दर्शनादिकल्पना सम्भवति। एतानि चित्राणि 'प्रतिमाः' इति कथ्यन्ते। प्रतिमासु ज्ञानेन्द्रियजन्याः षड्विधाः। तत्र दृष्टिप्रतिमा[४] दृष्टिमूलप्रत्यक्षज्ञानजन्या। एतया गतानुभवा मनश्चक्षुषा प्रत्यक्षीक्रियन्ते। प्रायशो जना गतानुभवान् दृष्टिप्रतिमयैव स्मरन्ति। श्रवणप्रतिमा[५] श्रोत्रकरणकप्रत्यक्षजन्या। अस्यां श्रुतवाक्यानां सङ्गीतस्य च प्रतिमा गण्यन्ते। अनेकदा जनानां मस्तिष्के कस्यचिद्गीतस्य सम्पूर्णा ध्वनिप्रतिमोपस्थिता भवति, यद्यपि न ते गन्तुं जानन्ति। प्रणयिपदशब्दस्य प्रतिमा तथा मस्तिष्के तिष्ठति, यथा आगच्छतस्तस्य पदध्वनिर्दूरत एव परिचीयते। एव-

---

१. Memory.
२. Environment.
३. Reproductive imagination.
४. Visual imagery.
५. Auditory imagery.

In Public domain. Digitization Muthulakshmi Research Academy

मेव स्वादप्रतिमा[१], घ्राणप्रतिमा[२], स्पर्शप्रतिमा[३] च क्रमेण रसन-नासा-त्वक्सम्बद्धाः। शैत्योष्मणोरवतारितेऽपि भारे तस्य कल्पना स्पर्शप्रतिमया क्रियते। षष्ठी च प्रतिमा गत्यात्मिका भवति। सा 'क्रियाप्रतिमा' कथ्यते। तया जन आत्मानं कार्यं कुर्वन्तमनुभवति। जनेषु नहि सर्वाः प्रतिमाः समानाः। केषुचिद् दृष्टिप्रतिमानां प्राचुर्यम्, अन्येषु श्रवणप्रतिमानाम्। अन्धेषु श्रवणस्पर्शप्रतिमानां बाहुल्यं भवति। एवमेव केषाञ्चित् प्रतिमा विशदाः, स्पष्टाः, सविवृत्तयस्तीव्रतराश्च; अन्येषामपूर्णाः, अस्पष्टाः, स्थूलाश्च। यस्य यादृश्यः प्रतिमाः, तस्य तादृशी कल्पना। प्रतिमा मूर्तस्वरूपा[४] शब्दमयी चेत्येवमपि व्याख्यातुं शक्यते। कस्यचित् कल्पनायां मूर्तपदार्थाश्चित्ररूपेणावतरन्ति, कस्यचित्तत्प्रतीकाः शब्दाः। 'गजोऽश्वः' इति कथनं कस्यचिद् मस्तिष्के गजस्याश्वस्य चाकृतिं समुपस्थापयति, कस्यचिच्च शब्दप्रतिमाम्। एते प्रतिमानां वैयक्तिका भेदाः।

प्रतिमानां चत्वारः सामान्यभेदाः। तेषूत्तरप्रतिमा[५] प्रथमा। मूर्तपदार्थैरुत्तेजितान्यस्माकमिन्द्रियाणि समाप्तायामपि संवेदनाप्रातिक्रियायां कानिचित् क्षणानि तामेव संवेदनामनुभवन्ति। सोत्तरकालिका संवेदनोत्तरप्रतिमा कथ्यते। पदार्थानुपस्थितावेषा स्वल्पकालमेवावतिष्ठते।

द्वितीया आदर्शप्रतिमा[६] प्रत्यक्षज्ञानसमा तीव्रसविवृत्तिका स्थिरा च भवति। बालकेष्वस्याः प्राचुर्यं परिलक्ष्यते। [७]आलपोर्टमहोदयश्चित्रमेकं कांश्चिद् बालकान् पञ्चत्रिंशत्सेकण्डान् यावदर्शयत्। बालका अपसारिते चित्रे तस्य सूक्ष्मानपि विशेषान् वर्णयितुमशक्नुवन्। केचित्तु तदुपरि लिखितं जर्मनभाषावाक्यमपि शुद्धमनूदितवन्तः।

तृतीया स्मृतिप्रतिमा[८]। तस्यां स्पष्टतायाः सूक्ष्मपर्यालोचनस्य चाभावो भवति। स्मृतिप्रतिमासु देशकालस्मरणमपि तिष्ठत्येव। एताश्च प्रत्यक्षज्ञानाद्भिद्यन्ते।

चतुर्थी च काल्पनिकी प्रतिमा। स्मृतिप्रतिमा प्रत्यक्षज्ञानान्न तथा भिद्यते, यथा काल्पनिकी प्रतिमा। अस्यां प्रत्यक्षज्ञानस्यावयवानां योगो भवति। यथा केनचित् पुरुषो दृष्टः गजश्च। ततः पुरुषे गजशिरः स्थापयित्वा गणपतेः स्वरूपं कल्पितम्। जीवने स्मृतिकाल्पनिकप्रतिमयोरेव प्राचुर्येणोपयोगो भवति।

कल्पनाया भेदाः

मैकडूगलमहोदयमते कल्पनायास्तिस्रः कोट्यो भवन्ति। तत्र निकृष्टा कल्पना पुनरुत्पादिका स्मृतिर्वा, मध्यमा निर्माणात्मिका[९], उत्तमा च नवसृजनात्मिका[१०]। प्रथमायां गतानु-

---

१. Gastitutory imagery.
२. Olfactory imagery.
३. Tactile imagery.
४. Concrete.
५. After images.
६. Eidetic images.
७. Allport.
८. Memory images.
९. Constructive.
१०. Creative.

In Public domain. Digitization Muthulakshmi Research Academy

भवानामेव शुद्धं चित्रं भवति। यथा तूष्णीं स्थित्वाऽतीताया यात्रायाः स्मरणेन तात्कालिका घटनाः प्रदेशाश्चानुक्रमेण मस्तिष्केऽवतरन्ति। द्वितीयायां पूर्वदृष्टिरपेक्षिता भवति। मस्तिष्के कानिचिदननुभूतानि चित्राणि तिष्ठन्ति, तदाश्रयेण कस्याश्चित् क्रियायाः परीक्षा मनसि क्रियते। कुम्भकारस्य मनसि करिष्यमाणस्य घटस्य रूपं पूर्वमेव भवति। पूर्वमालेख्यं मनसि रच्यते, ततश्च पटे। तृतीया नवसृजनात्मिका कल्पना नवकथाप्रबन्धे समस्यासमाधाने च स्फुटिता भवति। एतच्च कल्पनायाः श्रेष्ठं स्वरूपम्।

ड्रेवरमहोदयानां मतेन कल्पनाभेदा इत्थं निरूपयितुं शक्यन्ते—



तत्र ग्रहणात्मिकायाः कल्पनाया उदाहरणं प्रबन्धकाव्यपाठकः, सृजनात्मिकायाश्च तल्लेखकः। उभावपि कल्पनां कुरुतः। प्रथमो लेखकानुसारेण सङ्केतान् गृह्णाति, द्वितीयश्च तान् विरचयति। लेखकोऽनेकेषां दृश्यानां पात्राणां वा सृष्टिं करोति, पाठकश्च लेखकमनुसर्ता तदाधारेण तेषामनुकल्पनां मनसि करोति। सृजनात्मिकाया अपि द्वौ भेदौ। तत्र प्रथमोपयोगिनी, द्वितीया सौन्दर्यात्मिका। एतौ भेदौ कल्पनाकालिकमनःस्वातन्त्र्यापेक्षया। गणितसिद्धान्तानां परिकल्पना, भवनसेतुजलप्रणाल्यादियोजना चोपयोगिनीं सृजनात्मिकां कल्पनां श्रयते। सौन्दर्यात्मिका सृजनकल्पना महत्सु काव्येषु, उपन्यासेषु, प्रबन्धेषु, चित्रेष्वालेख्येषु च परिस्फुटति। उपयोगिकल्पनाकाले मनोऽनेकैर्नियमैरुपनियमैश्च संयतो भवति। प्रकृति-

१. Receptive.
२. Creative.
३. Pragmatic.
४. Aesthetic.
५. Theoretical.
६. Practical.
७. Artistic.
८. Fantastic.

In Public domain. Digitization Muthulakshmi Research Academy

नियमान् विज्ञानविधींश्चोपेक्ष्य न काऽप्युपयोगिनी कल्पना कार्यक्षमा भवितुं शक्नोति। सर्वे तान्त्रिका यान्त्रिकाश्च निश्चितविधिना नियमानुकूलमेव योजनां पुरस्कुर्वन्ति। योजनायां कल्पनायां वा तादृश एव सेतुर्निर्मीयते यादृशो वस्तुजगति सम्भवति। स्तम्भा धातु-विशेषेणैव निर्मातव्याः, लौहपट्टिकानामायामो निश्चित एव भवेदिति सर्वं विचारणीयं भवति। नहि कोऽपि सेतुबन्धः स्वर्गादागतैः स्तम्भैस्तूलिकया वा सम्भवति। कलात्मिका कल्पनैतस्या भिद्यते। तत्र मनः सर्वथा स्वतन्त्रं भवति। कलासृष्टौ केवलं पदार्थानां सम्बद्धताऽविरोधिता चापेक्षिते भवतः। कलाकृतौ पशवः पक्षिणश्च मनुष्यतुल्यं भाषन्ते, जना अप्सरोभिः सह रमन्ते, तत्राकाशकुसुमानि विकसन्ति, ते च लोका आलिख्यन्ते येऽद्यापि भौगोलिकानामविदिताः। अन्यदप्यन्तरमेतयोः। वस्तुजगतः कार्याणि साफल्यमाप्तवन्त्येव कर्तारं सुखयन्ति। गणितस्य सिद्धान्ताः सर्वस्वीकृताः, समस्याश्च समाहिताः, भवननिर्माणादियोजनाश्च सम्पन्ना एव कर्तॄन् सन्तोषयन्ति; परं कलाकृतौ कल्पितलोकस्य कार्याणि कल्पनाकाल एव रचयितार-माह्लादयन्ति। कालिदासस्य दूतो मेघो यक्षप्रियां पश्यतु मा वा, तस्यै सन्देशं कथयतु न वा, कवेः सन्तोषे न तेन काऽपि बाधा। कलासृष्टावेव तस्य चेतः परमानन्दं भजते। सौन्दर्यात्मिकायां कल्पनायां कल्पनाक्रियाकाल एव सुखं जायते, उपयोगिन्यां कल्पनायां च फलप्राप्तेरनन्तरम्।

उपयोगिनी कल्पना सैद्धान्तिकी भवति, क्रियात्मिका च। वैज्ञानिकः कस्यचिद् सिद्धान्तस्याविष्काराय विचारमग्नो भवति, यान्त्रिकश्च किञ्चिन्निर्मातुम्। उभावपि कल्पना-क्रियां कुरुतः। परमेतयोः कल्पनायामन्तरं भवति। प्रथमः केषाञ्चित्तथ्यानां परीक्षणं ततश्च तेषां साधारणीकरणमभिवाञ्छति। न च तस्य कल्पना तात्कालिकं फलमुत्पादयति। आविष्कृत सिद्धान्तस्योपयोगोऽन्यदैव भवति। वैज्ञानिकस्य कल्पना दूरस्थफलवती सैद्धान्तिक्येव। यान्त्रिकस्य कल्पनागृहनिर्माणं सत्यगृहनिर्मितौ फलति। तस्य कल्पना सद्यःफलदायिनी। सा च कार्यात्मिका। द्वयोरपि कल्पनयोरुद्देश्ये कालकृतभेदेन भिद्येते। क्रियात्मिका कल्पना लोकजीवन संयोजनाभ्यो व्यापारोद्योगेभ्यश्चावश्यकी भवति। सा च न शक्यते विना सैद्धान्तिकीं कल्पनामवस्थातुम्।

सौन्दर्यात्मिका कल्पना कलात्मिका भवितुं शक्नोति, विक्षेपात्मिका वा। कलात्मिकायाः स्वरूपमुपरि स्पष्टमेव। तस्या लक्ष्यं स्पष्टं भवति। तत्र मनः स्वतन्त्रं भवति, क्रियाणां कर्ता च। तस्य कृतयश्चित्र-नाट्य-नृत्य-सङ्गीत-काव्य-मूर्ति-प्रबन्धादिरूपैर्गोचरीभवन्ति।

विक्षेपात्मिका कल्पना ततो भिन्ना। तस्यां मनः स्वतन्त्रं भवति, क्रियाविषयश्च; न तु क्रियाकारकम्। नहि विक्षेपात्मिकायाः कल्पनायाः किञ्चित् प्रकटमुद्देश्यं भवति। सानुत्पादिकाऽपि। कलासृष्टिर्लोकोपकारिणी भवति, लोकरुचिपरिष्कारिणी च; न विक्षेपात्मिका कल्पना तथा। विक्षेपात्मिका कल्पना कालपात्रभेदेनानेकानि रूपाणि गृह्णाति। कल्पनायाः कानिचिद्विशिष्टानि रूपाण्यधो लिख्यन्ते।

कल्पनाप्ररूपाणि[1]

कल्पनाया अनेकानि रूपाणि जगति दृश्यन्ते। स्वप्नास्त्वस्माकं सर्वेषामनुभवविषयाः। दिवा रात्रौ वा शयाना जना यदा कदा स्वप्नेऽनेकानि दृश्यानि, विविधा घटनाश्च घटमानाः

१. Types.

In Public domain. Digitization Muthulakshmi Research Academy

पश्यन्ति। कदाचित् स्वप्नेषु गतानुभवा अविकृता एव पुनरावृत्ता दृश्यन्ते, कदाचिच्च परिवर्तिताः। प्रयोजनाः सद्योघटिता घटनाः, वृत्तानि, तीव्रप्रभावकारि दृश्यं वा पश्यन्ति। बाह्योत्तेजनापि स्वप्नसृष्टिकारिणी भवति। निद्रितस्य कपोले करन्यासस्तस्य कपोलताडनस्वप्नं जनयति, पादतले जलस्पर्शो वृष्टेश्च। जागर्तौ यत् चिन्त्यते तदपि स्वप्नेऽवतरति।

मनःशास्त्रविशारदानां फ्रायडमहोदयानां मते स्वप्ना बाल्येऽतृप्तानामिच्छानां नग्नप्रकाशनाय भवन्ति। ते प्रायः प्रौढावस्थायां दान्तानामन्तर्निगूढानां कामवासनानां कामविरोधजन्यद्वेषवासनानां[1] परोक्षप्रकटीकरणरूपाः। कामवासनाया निर्मुक्ताभिव्यञ्जना सामाजिकप्रतिबन्धेनाशक्या। नहि जागर्तौ तस्या यथेच्छं तृप्तिः सम्भवति। अतो दान्ता निरुद्धा च मनोऽन्तर्निगूढा भवति। न च गूढायास्तस्याः बलं वेगश्च क्षीयते। जाग्रदवस्थायां विवेकेन प्रतिरोधकेन[2] चेतनाक्षेत्रे तस्याः प्रवेशो निरुद्धो भवति। निद्रावस्थायां शिथिले प्रतिरोधकेऽवसरमवाप्य सा शनैश्चेतनाङ्गणमवतरति, छद्मवेषेनाभिव्यक्तिं च लभते। स्वप्ना वस्तुतो 'लिबिडो' इत्याख्ययाः कामवासनाया अभिव्यक्तिरूपा एव। एडलरमहोदयानां मतेन फ्रायडमहोदयानां कथन आंशिकं सत्यम्। लोके कामादतिरिक्तायाः [3]स्वस्थापनप्रवृत्तेरपि दमनं प्रायो गृह्यते। अतः केचित् स्वप्ना विफलीभूतायाः स्वस्थापनप्रवृत्तेरपि पूरकाः। ते द्रष्ट्रा सम्पादयिष्यमाणस्य कस्यचित् कार्यस्य पूर्वसूचकाः। न तेऽतीतं सूचयन्ति। जुंग(Gung)मते केचित् स्वप्ना वंशगतानां[4] जातिगतानां वा परम्पराप्राप्तानामन्तर्निगूढानां दान्तवासनानां प्रकाशका भवन्ति। केचिज्जीवनसङ्घर्षान् प्रति जनानामनभिव्यक्ताभिवृत्ति[5]सम्बद्धाः। केचिच्च कल्पनाविलासमात्राणि। न ते सुस्पष्टं प्रच्छन्नतया वा कासाञ्चिदतृप्तवासनानां पूर्तये भवन्ति। बुडवर्थमहोदयानुसारं नेच्छास्तथाऽन्तर्गूढा भवन्ति, यथा फ्रायडमहोदया मन्यन्ते। ता अस्वीकृताः[6], असन्नाताः[7], अश्लिष्टाश्च[8] सत्योऽपि व्यक्ता भवन्ति। मैकडूगलमहाशयाः 'विकृतस्नायुवतां रोगिणां केषाञ्चित् स्वप्नानाञ्च व्याख्या फ्रायडमतेन सम्भवति, न तु सर्वेषाम्' इति मन्वते।

स्वप्ना इव दिवास्वप्ना अपि कल्पनाप्रभवा एव। बहिर्वृत्तीनामपेक्षयाऽन्तर्वृत्तयः पुरुषा दिवास्वप्नेष्वधिकं निमग्ना भवन्ति। आधुनिकमनोवैज्ञानिकमतेन दिवास्वप्ना अपि प्रेरिता भवन्ति, न तु स्वतः स्फूर्ताः। ते कासाञ्चिदिच्छानां तृप्तिकरीच्छानां प्रकाशकाश्च। तेऽपि दान्तवासनानाम्, स्वस्थापनवृत्तेः, सङ्कल्पानाञ्च पूरकाः। एडलरमते तेषामुद्देश्यं भविष्यत्कालार्थं योजनानिर्माणम्।

---

१. Spite wishes.
२. Censor.
३. Self-assertion.
४. Racial or collective unconscious.
५. Unconscious attitude.
६. Unavowed.
७. Unmanned.
८. Uncomplexed.

In Public domain. Digitization Muthulakshmi Research Academy

केचित् स्वयंपर्याप्तेषु विचारेषु[१] लीनास्तिष्ठन्ति। स्वयंपर्याप्ता विचारा जनान् स्वकल्पनासु, काल्पनिकेषु च सुखेषु निमज्जयन्ति। अयथार्था असामाजिकाश्च विचाराः स्वयंपर्याप्ताः कथ्यन्ते।

चिन्ताऽपि[२] विक्षेपात्मिका कल्पना। यदा किञ्चित् फलदायकं कर्म न सम्भवति, तदा चिन्ता तत्स्थानापन्ना भवति। यथा केनचित् परीक्षार्थिना परीक्षोपयोगि सर्वमधीतम्, परीक्षा जाता, तत्र प्रश्नानामुत्तराणि साधु लिखितानि। अतो न किञ्चिच्चिन्ताकारणमवशिष्टम्, तथापि न मुञ्चति चिन्ता पिण्डम्।

विभ्रमो[३]ऽप्रस्तुतस्य दर्शनम्, संवेदनया सह दूरस्थवस्तुविषयको विचारो वा। इदं द्रष्टृसापेक्षं[४] प्रत्यक्षीकरणम्, यत्र वस्तु नोपस्थितं भवति। विभ्रमे घातकोऽभिहतस्यात्मानं पश्यति, तस्य शब्दं शृणोति, तस्माद् बिभेति च। नात्र बाह्योत्तेजना। घातकमनसि सांवेदनिकतीव्रतामयी स्मृतिप्रतिमा तिष्ठति, यस्या जन्म मस्तिष्कस्यासाधारणावस्थया भवति। भ्रमो[५] बाह्योत्तेजना जनयति। विभ्रमो दार्ष्टिकः, श्रावणिकः, स्पार्शिकश्च भवति। स काल्पनिको द्रष्टृसृष्टिः प्रत्यक्षीकरणपदार्थ इव प्रतीयते। स्वस्था नीरोगा जनाः प्रायेण विभ्रान्ता न भवन्ति। विक्षिप्ता मनोरोगाभिभूताश्च कल्पितैः प्रेतैर्वातालापं कुर्वन्त अवलोक्यन्ते।

भ्रान्तिः[६] दुर्निवारो मिथ्याविश्वासः। काऽपि युक्तिर्नैनां निरसितुं प्रभवति। कस्यचिद् भ्रान्तिर्भवति स कृष्णावतार इति। कश्चिदात्मानं महात्मानं मन्यते। इतोऽतिरिक्तेषु सर्वेषु विषयेषु स तर्कसङ्गतं व्यवहरति। भ्रान्तेः कारणं मिथ्यानिरीक्षणम्, मिथ्याऽवगतिः, दुष्टस्तर्कश्चेति। विभ्रमः सांवेदनिकसजीवतामयी प्रतिमा। रुग्णः स्वकक्षेऽनुपस्थितं प्रेतं समीक्ष्य बिभेति। प्रेतश्च काल्पनिकः। तस्य भयं विभ्रमजन्यम्। कश्चिदात्मानं सम्राजं मन्यते। एषा भ्रान्तिः। भ्रान्तिः स्थायिनी भवति। रोगान्मुक्तिरेव तस्या मुक्त्युपायः। भ्रान्तेर्भेदत्रयम्—प्रथमा श्रेष्ठत्वभ्रान्तिः[७], द्वितीया च पीडनभ्रान्तिः[८]। प्रथमायां पुरुष आत्मानं श्रेष्ठम्, विद्वांसम्, धनिनम्, महान्तं वा मन्यते। द्वितीयस्याञ्च शत्रुभिराक्रम्यमाणमभिभूयमानं वा। तृतीया च सङ्केतभ्रान्तिः[९], यस्यां पुरुषो विश्वसिति यत् तस्य समन्ताद् घटमानाः सर्वा घटनास्तस्य क्षतये हानये वा भविष्यन्ति। द्वौ पुरुषौ मिथो मन्त्रयन्तौ समीक्ष्य तौ स्वप्रतिकूलं प्रपञ्चं रचयन्तौ मन्यते।

---

१. Autistic thinking.

२. Worry.

३. Hallucination.

४. Subjective perception.

५. Illusion.

६. Dellusion.

७. Dellusion of grandeur.

८. Dellusion of persecution.

९. Dellusion of reference.

In Public domain. Digitization Muthulakshmi Research Academy

मनोराज्येन[1] तृप्तो जनो वस्तुजगति स्वाभिलाषान् पूरयितुं न यतते। स रुचिकरेषु कल्पनाचित्रेष्वेव मग्नस्तुष्यति। व्यावहारिकाज्जगतः पलायनस्यायं विधिविशेषेऽतृप्तानां वासनानां तृप्तेश्च सरलो मार्गः। धार्मिकाणां स्वर्गकल्पना, मानवतावादिनामसमानताविरहितसमाजकल्पना, कवीनामादर्शलोककल्पना चाव्यावहारिकी। परमस्याः प्रभावो मनस्युदात्त एव जायते।

एकात्मीकरणमपि[2] कल्पनाजन्यं भवति। अस्यां स्थितौ जनोऽन्यस्य सुखं दुःखं शोकमिच्छां स्वीयत्वेन कल्पयति। अन्यश्च स्वाङ्गमिव प्रतीयते। प्रणयसम्बन्धिषूपन्यासेषु, नाटकेषु, चलच्चित्रेषु च पात्राणां चरित्रैः सह पाठकदर्शकाणामेकात्मकत्वं स्थापितं भवति। तेन स्वल्पकालाय स्वापत्तिभ्यः, अरोचकेभ्योऽनुभवेभ्यश्च विश्रान्तिर्लभ्यते।

यौक्तिकीकरणे[3] मिथ्यायुक्तीनामाविष्कारः कल्पनया क्रियते। स्वदोषानपराधाँश्च न कोऽपि सोढुमिच्छति; यतः स्वदोषस्वीकरणेनात्मप्रताडनभावो मनस्युत्पद्यते। अतो जना युक्तिभिरात्मदोषानाच्छादयन्ति, परेषां सम्मुखं स्वीकार्यांश्च विदधति।

प्रक्षेपणम्[4] अस्यैवापरं स्वरूपं कथ्यते। प्रक्षेपणेन जनः स्वासफलताकारणमन्यं पुरुषं वस्तु वा मन्यते। नृत्येऽदक्षो नर्तको नृत्यशालामननुकूलां कथयति, मद्यपश्च स्वव्यसनं पैतृकं निरूपयति। अयमपि स्वदौर्बल्यजन्यात्मप्रताडनायाः पलायनस्य मार्गविशेषः।

कल्पनाया आधारः

कल्पनाया आधारः स्मृतिः, स्मृतेश्चाधारः प्रत्यक्षीकरणम्। जन्मन आत्रिवर्षं बालकेषु पुनरुत्पादिकैव कल्पना भवति, तत ऊर्ध्वं ग्रहणात्मिका। तेऽन्यैः प्रतिबोधिताः प्रतिमा अवगन्तुं क्षमन्ते, न तु ताः स्रष्टुम्। पञ्चवर्षीयेषु रचनात्मककल्पनाबाहुल्यं भवति। तेऽप्सरःकथासु रमन्ते। अष्टौ वर्षाणि यावत्तेषां कल्पना व्यावहारिकी न भवति। यथा यथा ते वर्धन्त आयुषा सह, तथा तथा तेषां लौकिकं ज्ञानमपि प्रवर्धते, कल्पना चोपयोगिनी सम्पद्यते। तथापि सा वस्तुनिष्ठा[5] भवति, न त्वात्मनिष्ठा[6]। किशोराणां कल्पनायां संवेगतत्त्वानां प्राधान्यं भवति। एतद्दिवास्वप्नानां वयः। ततः पुनरपि कल्पना वस्तुजगत्सम्बद्धोपयोगिनी च भवति। अन्ते च कलात्मिकायाः कल्पनाया आविर्भावो भवति, या आदर्शमयी कल्पना कथ्यते। एषा स्थूलजगदावश्यकतामुपेक्ष्य गभीरतराभिलाषान् पूरयितुमवसरं प्रयच्छति।

कल्पनाशक्तेरुन्नतिः

बालानां कल्पनाया निर्दोषसमुन्नतये क्रीडानामावश्यकता भवति। क्रीडाश्च न केवलं मनोरञ्जनसाधनम्। तास्तु तेषां कायमनसोर्विकासे सहायिकाः। यैर्बालकैः क्रीडावसरो न

---

१. Fantasy.
२. Identification.
३. Rationalization.
४. Projection.
५. Objective.
६. Subjective.

In Public domain. Digitization Muthulakshmi Research Academy

लभ्यते, तेषां व्यवहारोऽस्वाभाविको जायते। शिशुः प्रथमं क्रीडनकं गृह्णाति, मुखाभिमुखं नयति, सर्वतो भ्रामयति, क्षिपति च। आयुषा सह तस्य क्रीडाप्रकारे परिवर्तनं भवति। ततः स क्रीडनकाङ्गानि त्रोटयति, संयोजयति च। स यष्टिकामश्वं कल्पयति। क्रीडनकं छित्वा क्रोधं प्रकटयति। ततः कल्पनाप्रचुराणां क्रीडानामारम्भो भवति। शनैः शनैः कल्पनाक्रिया प्रखरा भवति। कथा, आख्यायिका, नाट्यम्, काव्यञ्चावकाशं लभते। क्रीडाप्रवृत्तिस्तु जन्मजातैव। नहि क्रीडायाः क्रीडाभिन्नं किञ्चिल्लक्ष्यं भवति। 'प्रकृतिः क्रीडानिमित्तेन बालेभ्यस्तेषां नैसर्गिकीणां शक्तीनामुपयोगस्यावसरं प्रयच्छति' इति कार्लग्रूसमहाशयानां मतम्। अत एव बालशालासु क्रीडाद्वारैव शिक्षणं प्रदीयते। विश्वविद्यालयेष्वपि क्रीडाप्रबन्धो विधीयते।

व्यवहारोपयोगिन्याः कल्पनायाः प्रवृद्धिविषये सर्वेऽपि विद्वांस एकमनसः। परं सौन्दर्यात्मिकाया विषये मतभेदस्तेषु। केषाञ्चिन्मतेन सौन्दर्यात्मिकायाः कल्पनाया उन्नतिं विना न मनोऽनुकूलमभिव्यक्तिं लब्धुं शक्नोति, नापि तां विना श्रेयसोऽस्तित्वं सम्भवति। बालस्य कल्पनाशक्तिनिग्रहेण 'स कालिदास-भवभूति-भासादीनां काव्यरसानभिज्ञ एव भवेत्। केषाञ्चिन्मते सौन्दर्यात्मिकायाः कल्पनाया उन्नतिर्जनं मनोराज्ये विचरणशीलं विदधाति। तस्य वस्तुजगता सह सम्बन्धो विच्छिद्यते। एते बालैः पशुपक्ष्यप्सरसां कथापठनमपि हानिकरं मन्यन्ते।

कल्पनाशक्तिपरीक्षा

कल्पनाशक्तिपरीक्षायै विनेमहोदयेन हेनरीमहोदयेन च मसीशोषणपत्र-पद्धतिराविष्कृता। तस्यां ह्विपिलमहोदयेन किञ्चित् परिवर्धनमपि कृतम्। सा चैवंरूपा—प्रयोक्ता परीक्ष्यं जनं शोषणपत्रे विंशतिं मसीबिन्दुचिह्नानि दर्शयति। स एकं बिन्दुमेकदा पश्यति, कञ्चित्कालं च तत्र ध्यानमेकाग्रं करोति, चिन्तयति च बिन्दुचिह्नं कामाकृतिं सङ्केतयतीति। कल्पनाप्रकाराणामन्तरं ज्ञातुमेसिलानमहोदयानां विधिरप्युपयोगी। स परीक्ष्यसम्मुखं कानिचिच्छन्दांस्युपस्थापयति, तदाश्रयेण च वाक्यरचनां प्रेरयति। वाक्यसंख्यया कल्पनापरिमाणस्य परीक्षया तत्प्ररूपस्य च ज्ञानं भवति। विनेमहोदयस्य वाक्यपूर्तिपद्धतिरपि रुचिकरी। तेन द्वाभ्यां स्वपुत्रीभ्यामपूर्णवाक्यं प्रदत्तम्, तस्य च पूर्तये प्रेरिते ते। अपूर्णवाक्यमासीत्—'अहं शीघ्रतां करोमि...' इति। एकया पूरितम् 'अहं शीघ्रतां करोमि पत्रलेखने यतो नाहमधिकं जीविष्यामि' इति। द्वितीयया लिखितम्—'अहं शीघ्रतां करोमि स्वकार्यं समापयितुं येनाहमवशिष्टे समये क्रीडेयम्' इति। अनेन ज्ञातं यत्प्रथमा पुत्री मनोराज्यमयी, द्वितीया च व्यवहारप्रवणा आसीत्।

आधुनिका मनोवेत्तारः कल्पनागौरवमङ्गीकुर्वन्तोऽपि तासु नियन्त्रणमभीप्सन्ते। यतस्तन्मतेन कल्पनायथार्थयोः समन्वय एव लोककल्याणकारी॥

In Public domain. Digitization Muthulakshmi Research Academy

त्रयोदशोऽध्यायः

विचारः[1]

विचारणा

मनुष्यः कर्ता विचारकश्चेति निगद्यते। स न केवलं प्रस्तुतेन परिवेशेन[2] व्यवहरति, तत्परिवर्तितुमपि वाञ्छति। साहसिकेषु कार्येष्वानन्दमनुभवन् स स्वकार्यैरन्यान् प्रभावयति, प्रभावकारिणः परिणामाँश्च जनयति। स योजनानुकूलमाचरति। योजना च विचारणायाः फलं भवति। मनुष्यो वार्तालापमपि करोति। वार्तालापस्य विचारेण घनिष्ठः सम्बन्धोऽस्ति। भाषा विचाराणां स्थिरतायां परिपक्वतायां च सहायिका भवति। तस्याः सहायतया स सुहृदः प्रति विचारान् प्रकटीकरोति।

प्रत्ययनम्

उच्चकोटिकेषु पशुषु मनुष्येषु च विशिष्टा प्रत्ययनक्रिया[3] भवति। प्रत्ययनस्य प्रस्तुतेन वातावरणेन[4] तथा सम्बन्धः। प्रत्ययनं मानसी क्रिया। नेयं स्पष्टरूपेण ज्ञानेन्द्रियसम्बद्धा[5], गतिसम्बद्धा[6] वा क्रिया। सा प्रस्तुतानां वस्तूनां सांवेदनिकोत्तेजनाया[7] उपयोगं न करोति। न च प्रस्तुतस्य वातावरणस्य परिवर्तनाय मांसपेशीश्चालयति। केषुचित् पृष्ठेषु मुद्रितां रुचिकरीं कथां पठन् तस्या उत्तेजनां गृह्णन् जनः स्पष्टं जानाति यत् सा काल्पनिकघटनाजन्याऽस्ति। भविष्यत्कालाय योजनां कुर्वन् जनः मांसपेशीनामुपयोगं करोति, कक्षे इतस्ततो भ्रमति चिन्तयन्, कदाचित् प्रतिद्वन्द्विनमाह्वयन् वायौ मुष्टिकामप्युत्तोलयति; परं नैताभिश्चेष्टाभिः स्पष्टं भवति यत्स प्रस्तुतं वातावरणं परिवर्तयितुं चेष्टते।

दिवास्वप्नः

शैथिल्यक्षणेषु मनुष्यस्य विचारा इतस्ततो भ्रमन्ति। तदा एकं वस्तु किञ्चिदन्यद्वस्तु स्मारयति। एका स्मृतिरन्यस्याः स्मृतेः प्रत्याह्वानं करोति। तदा जनो मूलविचारं परित्यज्यातिदूरं भ्रमति मनसा। परं यदि सावहितं विचारानुक्रमस्य पुनर्निरीक्षणं[8] क्रियते, तदा तानि साहचर्यसूत्राणि सरलतया अनुमृग्यन्ते, यानि मनसा एकस्माद् विचारादन्यत्र नीतवन्ति।

---

१. Thinking.
२. Planning.
३. Ideational activity.
४. Atmosphere.
५. Sensory.
६. Motor.
७. Sensory stimuli.
८. Review.

In Public domain. Digitization Muthulakshmi Research Academy

कदाचिद् विस्मृतमपि वस्तु [1]स्वतन्त्रसाहचर्यस्यानया प्रक्रियया पुनर्जीवति। इदं साहचर्यं स्वतन्त्रं कथ्यते, यतो नेदं केनाप्युद्देश्येन नियन्त्रितं भवति, नापि किमपि लक्ष्यमस्योद्दिष्टं भवति। एषाऽसम्बद्धाविच्छिन्नविचारपरम्परा दिवास्वप्नोऽभिधीयते। दिवास्वप्ने जनोऽन्तरिक्षे भवनानां निर्माणं करोति, कस्याश्चित् कथाया नायकमात्मानं कल्पयति। स तस्मिन् रूपे वस्तूनां कल्पनां करोति यस्मिन् रूपे तानि द्रष्टुं वाञ्छति, न तु यस्मिन् रूपे तानि वस्तूनि लोकेऽवलोक्यन्ते। दिवास्वप्ने जन आत्मानं सफलं विजेतारं वा नायकं मन्यते। कदाचित् पराभूतमप्यात्मानं कल्पयति। आत्मनः पराभवावस्थायां स जगदुपहसन् स्वपीडां वा विपुलतरां प्रदर्शयन्नास्ते। एवमात्मसम्मानस्य भावना तुष्टिं गच्छति। नैत्यिके जीवने यत् पुरुषं प्रेरयति तदेव दिवास्वप्नेऽपि। यया सामग्र्या दिवास्वप्नानां सृष्टिर्भवति, सा नैत्यिकाज्जीवनादेव गृह्यते। दिवास्वप्नस्यापि महत्त्वमन्यक्रीडासमम्, परं चरमां कोटिं प्राप्तेषु दिवास्वप्नेषु जनस्य भूतजगता सह सम्बन्धो नश्यति। केचिद्दिवास्वप्नदर्शकाः सामाजिकं सम्बन्धतन्तुमच्छिन्दन्तः किञ्चित् काल्पनिकं जगद्रचयन्ति, यस्मिन् ते विजेतॄन् पराभूतान् वाऽत्मन उपकल्प्य मिथ्याविश्वासेनात्मनः कासाँश्चिदिच्छानां पूर्तिं कुर्वन्तः सुखेनासते।

निद्रायां मस्तिष्कक्रियाऽधोमुखी भवति। वातावरणे च सम्बन्धो विच्छिद्यते। कदाचित् कासाञ्चिद् घटनानामपरिपक्वं ज्ञानं भवत्यपि। यथा घटिकाशब्दो मधुरसङ्गीतरूपेण गृह्यते। पादौ स्पृशन् शीतलः पवन आर्द्रमार्गरूपेण च गृह्यते। स्वप्ना इच्छापूर्तिकरा अपि भवन्ति। बालकाः स्वप्ने द्रव्यपूर्णां मञ्जूषां प्राप्नुवन्ति, प्रथमश्रेणीं वा परीक्षायां लभन्ते। कामुका अतृप्तवासनानां पूर्तिं स्वप्ने कुर्वन्ति। केचित् स्वप्नाः पूर्णतया कल्पनाश्रिता निरर्थकाश्च भवन्ति। न तैः काऽपीच्छा पूर्यते। फ्रायडमहोदयानां मतेन तेऽपि कासाञ्चित् प्रच्छन्नानामिच्छानां पूरका एव। ये च स्वप्ना निरुद्दिष्टाः प्रेरकविरहिता वा भवन्ति, तेषामपि सामग्री जीवनानुभवेभ्य एव प्राप्ता भवति।

सप्रयोजनविचारणा[2]

दिवास्वप्नः कठिनानां श्रमपूर्णानां कार्याणामनन्तरं जाताच्छैथिल्यात्, गुरुतरोत्तरदायित्वाच्च मुक्तिं[3] प्रददाति। परं प्रत्ययनस्योपयोगो[4] दैनन्दिने जीवने व्यवहारे चाऽपि भवति। अनुसन्धानेन[5], आविष्कारेण[6] च सम्बद्धेषु मानवीयकार्येषु प्रत्ययनेन साहाय्यं प्राप्यते। वैज्ञानिकानां गवेषकाणां च लक्ष्यं भवति नवानुसन्धानम्। वास्तुविशारदानां कलाकाराणाम्, अन्येषां रचयितॄणां च लक्ष्यं भवत्याविष्कारः। द्वयोरप्यनयोः सिद्धये प्रत्ययनमपेक्ष्यते। अनुसन्धाने प्रत्ययनस्योपयोगो यथा—भवान् लवित्रं वाञ्छति, अन्विष्यँश्च लवित्रम्, तत्र गच्छति

१. Free association.
२. Purposive thinking.
३. Relaxation.
४. Ideation.
५. Discovery.
६. Invention.

In Public domain. Digitization Muthulakshmi Research Academy

यत्र तत्प्रतिदिनं निधीयते। परं तत्तत्र न दृश्यते। तदा यदि भवान् कस्यचिदपि मार्गदर्शकस्य विचारस्य साहाय्यं विना झटिति सर्वाणि वस्तूनीतस्ततः क्षिपन् लवित्रं यत्र कुत्रचिदन्वेष्टुमारभते, तदेतदनुसन्धानं विशुद्धं गत्यात्मकं[1] भवति। परं यदि भवान् स्वल्पं कालं विरम्य मौनं कथयति— "प्रथममहं चिन्तयेयं कुत्र लवित्रं भवितुमर्हति। यत्र सायमहं तस्योपयोगं कुर्वन्नासं तत्रापि तस्य सम्भवः" इति, तदा भवान् तत् स्थानं स्मरति यत्र पूर्वस्मिन् दिने तस्योपयोगः कृतः। तत्र गच्छन्नेव लवित्रं प्राप्नोति। एवम्प्रकारकेऽनुसन्धाने मानसिकः प्रयासो मुख्यः। तेन कालस्य शक्तेश्चापव्ययो न जातः। एवंविधेऽनुसन्धाने प्रत्ययनस्य तत्त्वद्वयं सम्मिलितम्—

(१) मार्गदर्शको विचारः—'तत्राहं पश्येयं यत्र पूर्वस्मिन् दिने निहितम्' इति।

(२) स्मृत्योद्बोधितस्तथ्यविशेषश्च।

आविष्कारे प्रत्ययनस्योपयोगो यथा—भवान् स्वाध्ययनकक्षे स्थापितानां वस्तूनां व्यवस्थया न सन्तुष्टः, तत्र परिवर्तनं वाञ्छति। परिश्रमेण वस्तूनीतस्ततः परिवर्तयन्नप्यसन्तुष्टः क्षणं स्थित्वा चिन्तयति—"को दोषोऽत्र व्यवस्थायाम्? पुनर्व्यवस्थया कीदृशं कक्षमहं द्रष्टुमिच्छामि?" अयं प्रश्नः। अस्योत्तरं च भवन्तं कस्याञ्चिद् विशिष्टायां दिशि प्रेरयिष्यति। तान् कक्षाँश्च स्मारयिष्यति, येषां व्यवस्थां दृष्ट्वा भवान् पूर्वं प्रसन्नोऽप्रसन्नो वा जातः। तदा भवान् पुनर्व्यवस्थायाश्चित्रं मनसि निधायानेकानि वस्तनि तत्स्थानादविचाल्यैव यथेष्टां व्यवस्थां कर्तुं शक्ष्यति। अत्र प्रत्ययनस्योपयोगः प्रकारत्रयेण भवति—

(१) प्रस्तुतया समस्यया सम्बद्धानां पूर्वनिरीक्षितानां तथ्यानां प्रत्याह्वानेन।

(२) मार्गदर्शकाणां विचाराणां प्रत्याह्वानेन। समस्यासमाधानाय क्रियमाणे प्रयत्ने स्थापितः कश्चित् सिद्धान्तो नियमोऽन्यासामपि समस्यानां समाधाने सहायको भवति।

(३) प्राप्ते स्वसमस्यासमाधाने तत्समाधानोपायस्य भविष्यत्कालोपयोगित्वतदभावविनिश्चयनेन च। यथा—भवता स्वमित्रमुपहसितु किञ्चिद्वाक्यं चिन्तितम्, कोऽपि विधिर्वा चिन्ततः। तदा 'अस्य प्रतिक्रिया मम सुहृदि कीदृशी भविष्यति' इति विचारो मनस्यायातः। भवान् स्वोपहासप्रकारं तस्य मित्रगतां प्रतिक्रियां च कल्पनयैव पश्यति। जानाति च नास्य प्रतिक्रियाऽनुकूला भविष्यतीति। तत उपहासकल्पनां त्यजति। नेदं सर्वं नेत्राभ्यां द्रष्टुं शक्यते। प्रत्ययविधिनैवास्य सम्भवः। मानसिक्याऽन्तर्दृष्ट्या[2] ज्ञानमवगमो वाऽत्र दर्शनस्य प्रत्ययनस्य वाऽभिप्रायः। नात्र विवेचनं सम्मिलितम्। यद्यपि विवेचनेनैव प्रायो वयं जानीमो यदमुकं कथनं सत्यं मिथ्या वा, अमुकी योजना सफला भविष्यत्यफला वा। नान्यथा कोऽपि समाधानविधेः परीक्षां तस्याः परिमाणाँश्चादृष्ट्वा आश्वस्तो भवति। तथापि प्रत्ययनद्वारा विवेचनेन प्रयोगान्मार्गः सरलो भवति। विवेचनेन विना प्रयोगा नार्थसाधका भवन्ति। सोद्देश्या विचारणा अन्वेषणोपलब्ध्यो रेकमङ्गम्। मार्गदर्शका विचारा अन्वेषणप्रक्रियायाः सञ्चालकाः कथ्यन्ते, विवेचनं तथ्योपगमश्च भण्यते।

---

१. Motor exploration.

२. To percieve by mental insight.

In Public domain. Digitization Muthulakshmi Research Academy

विचारस्य साधनानि[१]

(१) प्रतीकाः—विचारक्रिया न सदा श्रमसाध्या। दिवास्वप्ने कः श्रमः? परमुपस्थितेषु कठिनेषु प्रश्नेषु विचारणा न तथा सरला। विचारा उच्छृङ्खलं भ्रमितुं प्रारभन्ते। प्रस्तुतपरिवेशजन्या उत्तेजनाश्च विचारक्रियायां विघ्नं जनयन्ति। प्रतीकानामुपयोग एतत्काठिन्यं न्यूनीकरोति। प्रस्तुतपदार्था अप्रस्तुतानां स्थानापन्नाश्च पदार्थाः प्रतीकरूपेण गृह्यन्ते। यदि भवान् कथयितुमिच्छति—'कस्मिंश्चिच्चतुष्पथे द्वयोर्यानयोः सङ्घर्षो जातः' इति। तदा रेखाचित्रैर्भवानिदं वृत्तमेवमवबोधयिष्यति—"अयमेकः पन्थाः, अयं च द्वितीयः, इदं च मे पुस्तकं प्रथमयानस्थाने, इदं भवतो द्वितीययानस्थाने" इति। अत्र भवान् मार्गस्थाने यानस्थाने च तत्प्रतीकान् प्रयुङ्क्ते।

प्रतीकानां द्वौ प्रकारौ—चित्रम्[२], शब्दाश्च[३]। पुस्तके अत्र यानयोः प्रतीकरूपेण व्यवह्रियेते। एतच्चित्ररूपं प्रतीकम्। अवबोधाय प्रयुज्यमानाः 'इदमेकं यानम्, इदं च द्वितीयम्' इति शब्दाः शब्दप्रतीकाः। शब्दप्रतीकाश्चित्रप्रतीकाश्च विचारसाधनानि भवन्ति।

(२) स्मृतिः—स्मृतिरपि विचारसाधनं भवति। वस्तुतः स्मृतिर्विचारसाधन[४]-पेटिका। स्मृतिसाधनेन पूर्वार्जितं ज्ञानं प्राप्यते, यत्समस्यासमाधाने उपादेयं भवति। अस्माकं ज्ञानभाण्डागारेऽनेके तथाविधाः प्रत्ययाः[५] सिद्धान्ताश्च[६] सन्ति, येषामुपयोगो विचाराणां साधनरूपेण कर्तुं शक्यते।

(३) भाषा—भाषाऽपि विचारसहायिका। यदा कश्चिद् बालकं पृच्छति—'त्वं केन शिक्षसे?' इति, तदा स स्वमुखं व्याददाति। व्यवहारवादिनो[७] मनोवैज्ञानिकाः स्वरयन्त्रं[८] तत्स्थाने मन्यन्ते, प्राक्तना यूनानीयास्चोरःप्राचीरम्[९]। एते सर्वे विचारस्य सम्बन्धं वाण्या निरूपयन्ति। तेषामिदं मतं केचिदन्तर्दर्शनेन[१०] समर्थयन्ति, यतो वयं विचारणानीरवां वाणीमनुभवाम एव। विचारक्रियायां भाषा अतिसहायिका भवति। प्रथमं विचाराः सामाजिकीषु परिस्थितिषु विकसन्ति। यदा कश्चिद् बालं पृच्छति—'तेन किं दृष्टं पाठशालायामद्य?' इति, तदा स दृष्टं वर्णयितुमिच्छति। तस्य विवक्षा विचारणामुत्तेजयति। प्रौढानां विचारक्रिया विवादेन, तर्कवितर्काभ्यां चोत्तेजिता भवति। यदा कश्चिज्जन एकाकी भवति, स्वगतं च विचारं

---

१. Tools of thought.
२. Diagrams.
३. Verbal Symbols.
४. Tool chest.
५. Concepts.
६. Principles.
७. Behaviouristic Psychologists.
८. Larynx.
९. Diaphragms.
१०. Introspection.

In Public domain. Digitization Muthulakshmi Research Academy

करोति, तदाऽपि स बहुधा बुद्बुदायते, तथा सङ्केताँश्च करोति यथा स श्रोतॄणां सम्मुखं स्वविचारान् प्रकटयन्निव प्रतिभाति।

भाषा विचारसामग्रीसंग्रहेऽपि सहायिका भवति। तया प्रत्याह्वानं सुकरं जायते। कस्याश्चित् समस्यायाः समाधानाय यदि कश्चित् सिद्धान्तः स्थिरीक्रियते, तदा तत्तुल्यायाः समस्यायाः पुनरुपस्थितौ तस्य सिद्धान्तस्य प्रत्याह्वानं सारल्येन भवति। अस्य द्वे कारणे—प्रथमं मधुरशब्दरचनामयानां वाक्यानां कण्ठस्थीकरणं स्मृतावववधारणं च सरलम्। द्वितीयं सिद्धान्तस्य सुस्पष्टाभिव्यक्तये तस्य स्पष्टो बोधोऽप्यावश्यकः। स च भाषयैव सम्भवति।

भाषा प्रवञ्चयत्यपि। कदाचिच्छ्रवणमधुरैर्वाक्यैरेवं प्रतीयते यद्वस्तुबोधो जातः, परं सा धारणा कृतायां परीक्षायां मिथ्या सिद्ध्यति। अनेके द्व्यर्थका[1] अनेकार्था वा शब्दाः सन्देहमुत्पादयन्तोऽन्यस्मिन्नर्थे प्रयुज्यन्ते, अन्यं चार्थं बोधयन्ति। केचिच्छब्दाः संवेगं[2] पूर्वग्रहञ्चोत्तेजयन्ति,[3] विचारवीथीमुपरुन्धन्ति च।

केवलो वार्तालापः, केवला शब्दानुकृतिर्वा[4] न विचारसंज्ञां लभते। विनाऽर्थावगमेन कण्ठस्थीकृतं शब्दशश्चानुकृतं व्याख्यानं न विचारशब्दभाक्। या मूकवाणी सार्थका, सा विचारसहवर्तिनी। विचारोऽर्थेन सम्बद्धो भवति, न शब्देन। शब्दा अपि सावधानतया विचाराय महत्त्वपूर्णा भवन्ति। शिशवः शब्दोच्चारणसमकालमेव विचारयन्ति। यदा च तेषामुच्चरणं निषिद्धं भवति, तदा ते फुसफुसायन्ते, ओष्ठान्तरे च बुद्बुदायन्ते। अन्ते च प्रत्यक्षामुच्चारणक्रियामकुर्वन्त एव विचारयितुं शक्नुवन्ति। वयस्कानां विचारक्रियायामप्यप्रत्यक्षोच्चारणस्य योगो भवति। गहनविचारसमये जना विविधा वदनचेष्टा हावभावाँश्च[5] प्रकटयन्तीति सर्वेषां स्पष्टम्।

चित्राणि[6]

यदा योजना जटिला भवति, परिस्थितिश्च कठिना; तदा शाब्दिकं चित्रणं नोपादेयं भवति। शब्दैर्न व्याख्यातुं शक्यं भवति, नापि ग्रहीतुम्। यदि कश्चिद् यान्त्रिको वस्तुकलाविद्वान् स्वसहायकान् तक्षणः, सूत्रधारानन्यान् वा विनैव रेखाकृतीनां सहायतया कार्यं निर्दिशेत्, ज्ञापयेच्च यादृशं भवनं स तैर्निर्मितमिच्छति; तदा सर्वमव्यवस्थितं भवेत्। एवमेव यदि कश्चित् सङ्गीतनिर्देशको विना स्वरलिपिं सङ्गीतसङ्केतान् वा केवलैः शब्दैर्वादकवृन्दं शिक्षयेत्, निर्दिशेच्च यथा नवं गीतं वाद्येषु वादितव्यम्; तदा कीदृशी विषमा स्थितिः स्यात्! रेखाकृतिः[7],

---

१. Ambiguous.

२. Emotion.

३. Prejudice.

४. Verbatism.

५. Gesturing.

६. Diagrams.

७. Blue prints.

In Public domain. Digitization Muthulakshmi Research Academy

स्वरलिपिः, मानचित्रम्, सङ्घटनतालिकाश्च[१] विशदाः प्रतीकाः[२] एव, ये शाब्दिकचित्रापेक्षयाऽधिकमुपयोगिनो भवन्ति। चित्रप्रतीकैः परिस्थितीनां स्वरूपं स्पष्टतरं भवति। तेषु यथार्थवस्तूनां किञ्चिद्वैशिष्ट्यमपि सन्निहितं भवति। चित्राणामनुशीलनेन योजनायास्त्रुटयोऽपि परिलक्ष्यन्ते, तस्यां संशोधनमपि कर्तुं शक्यते। यानि को मार्गाणां चित्रं दृष्ट्वा यात्रायाः सरलतरं मार्गं निश्चिनोति।

प्रत्ययाः[३]

स एव शब्दो विचारसाधनं भवितुं शक्नोति योऽर्थसहितो भवेत्। शब्दस्यार्थः 'प्रत्ययः' इति कथ्यते। शब्दकोशेषूल्लिखिता अर्थाः प्रत्ययाभिव्यक्तेः प्रयत्नरूपा एव। उदाहरणानि चार्थस्पष्टतायां सहायकान्येव भवन्ति। अनेकदाऽवगतेष्वपि शब्दार्थेष्वन्येभ्यस्तद् व्याख्यातुमुपयुक्ताः शब्दा न लभ्यन्ते। अस्यायमभिप्रायो यदस्मत्समीपे प्रत्यया विद्यन्ते, परं तेभ्यः स्वरूपं प्रदातुं वयमशक्ताः। तथाविधाः प्रत्यया अस्मत्समीपे भवन्ति यदर्थं सुकराणि नामानि न प्राप्यन्ते। केचिज्जना वस्तूनां सार्वत्रिक्या महार्घताया विषये विचारविनिमयं कुर्वन्ति; एकः कथयति 'यदि वस्तूनां मूल्ये वृद्धिर्भवति तदा वेतनेऽपि वृद्धिर्भवत्येव' इति। अन्यः कथयति 'यदि वेतनं वर्धते तदा वर्धितमुत्पादनव्ययं पूरयितुं वस्तूनां मूल्यवर्धनमावश्यकं भवति'। तृतीयः कथयति 'यद्येवं भवति तदास्मत्समक्षेऽस्मात् कुचक्रान्निष्क्रमणस्यैक एवोपायः, स चोत्पादनस्य वर्धनम्' इति। अस्मिन् सम्भाषणे केचित्तथाविधाः शब्दाः प्रयुक्ताः सन्ति, येषां प्रयोगोऽर्थावगमं विनाऽपि शुकवत् कर्तुं शक्यते? ये च प्रत्ययविशेषाणां स्थाने स्पष्टविचारणासाधनरूपेणापि व्यवहर्तुं शक्यन्ते।

सर्वस्य जनस्य वस्तुविषयकाः प्रत्ययास्तत्परिभाषया पूर्णरूपेण सङ्गताः स्युरिति नायं नियमः। जनस्य वस्तुविषयके प्रत्यये तत्सर्वं सम्मिलितं भवति यत् स तद्विषये जानाति। ज्ञानं च सर्वेषां भिन्नम्। ततो दृष्टिरपि भेदकारिणी। गोविषयकः प्रत्यय आर्यधर्मावलम्बिनाम्, अन्येषां च भिन्न एव भविष्यति। उच्चारिते गोशब्दे तत्सम्बन्धि सर्वं क्षणेनैव कस्यचित् प्रत्यक्षवद्भवति, कस्यचिन्न तथा। एवमेव पूजास्थानचर्चाविषये भगवच्चर्चाविषये च विभिन्नमतावलम्बिनो भिन्नानां स्वप्रत्ययानां प्रयोगं कुर्वन्ति। एवमेव सर्वेषां शब्दानां विषये कथयितुं शक्यते। अत एव नहि कश्चिदपरस्य वक्तुस्तात्पर्यं पूर्णतयावबुध्यति। प्रत्यया न केवलं वस्तूनां व्यक्तीनामेव वा, गुणक्रिययोस्तयोर्मिथःसम्बन्धानामपि च भवन्ति। अद्रीणां तुङ्गतायाः, निर्झराणां कलकलस्य, पत्राणां पतनस्य, द्वयोः स्थानयोर्मध्यगतस्य दूरत्वस्यापि च प्रत्यया भवन्ति। बालोऽपि भाषणात् पूर्वं कतिपयानां प्रत्ययानां संग्रहं करोति। स निरीक्षते, वस्तूनां व्यापारान् स्मरति च। मातुः पितुश्च व्यापारेषु परस्परं भेदं समीक्ष्य तयोर्विषये भिन्नौ प्रत्ययौ, स्वदोलात् पतन्ति वस्तूनि दृष्ट्वा पतनविषयकान् पतनयोग्यवस्तुविषयकाँश्च प्रत्ययान् संगृह्णाति। यदा च स भाषितुं प्रारभते, तदा स शब्दानामर्थज्ञानस्यावश्यकतामनुभवति। यथा यथा च स उचितार्थव्यञ्जकान् शब्दान् प्रयुनक्ति, तथा तथा वयं जानीमो यत्तेन तत्सम्बन्धिनः[४] प्रत्ययाः शिक्षिता इति। नीलपीतादिवर्णानां नामानि सङ्ख्यासङ्केताँश्च स सरलतया शिक्षते।

---

१. Organization chart.
२. Elaborate symbols.
३. Concepts.
४. Corresponding concepts.

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्ययनिर्माणे तन्नियन्त्रणे[१] च सामान्यीकरणस्य[२] भिन्नीकरणस्य[३] च स्थानं महत्त्वपूर्णम्। बालप्रत्ययेषु साधारणीकरणप्रवृत्तिरधिका भवति। सा शनैश्शनैर्विभेदपरिज्ञानपूर्वकमपसारणीया। शिशुः सर्वं पेयं जलम्, सर्वं खाद्यं च 'रोटी' इति वदति। पश्चात् स पेयखाद्यविशेषान् विजानाति। अस्पष्टेभ्यः सामान्यप्रत्ययेभ्यः समतुलितप्रत्ययावाप्तिर्निरीक्षणेन[४] पुष्टीकरणेन[५] च भवति। यानि वस्तूनि प्रथमदृष्टौ भिन्नानि प्रतीयन्ते, तेषु [६]सामान्यप्रवृत्तीनामन्वेषणं प्रत्ययपद्धतेरन्यः प्रकारः। मूषकेषु, मार्जारेषु, नकुलेषु सामान्यगुणानन्वेषयन् बालो दन्तैरुत्कृत्योत्कृत्य भक्षयतां[७] पशूनां पृथग्जातिं विज्ञातुं समर्थो भवति। तांश्च पशुजातिं मार्जारकुलात् पृथक्कृत्याधीते। एतदुन्नतकोटिकं साधारणीकरणम्।

साधारणीकरणस्य सूक्ष्मप्रक्रियायां [८]पृथक्करणपद्धतिरुपयोगिनी भवति। सा चानेकेषु वस्तुषु विद्यमानानां सामान्यगुणानां मध्ये कस्यचित् प्रमुखस्य निर्वाचनम्, स्वल्पकालायान्येषामुपेक्षणं च। वयं कथयामः कञ्चित् पुरुषं दृष्ट्वा 'स्थूलोऽयं पुरुषः' इति। तदा 'स्थूल' इति विशेषणं तस्यैकस्य गुणस्य परिचायकं भवति। स गुणोऽन्येष्वपि जनेषु दृश्यते। तस्मिंश्चान्ये गुणा दृश्यन्ते; परमस्मिन् काले तस्यान्यान् गुणानुपेक्ष्य स्थौल्यमेवोल्लिख्यते, यत्तस्मिन्नन्येषु च समानमेव प्राप्यते। एवमेवाकृतिषु काचित् समानता अन्यसामान्यापेक्षयाऽधिकसरलतया परिचीयते।

प्रत्ययसमष्टिः[९]

यथैकाकिनः प्रत्यया विचारक्रियाया मार्गदर्शनं कुर्वन्ति, तथा समवेता अपि। अङ्कगणित-क्रीडा-राजनीति-प्रकृतिसम्बन्धिनः साध्य[१०]नियम[११]विधि[१२]सिद्धान्ता[१३] द्वयोरधिकानां वा प्रत्ययानां संयोगेन सिद्ध्यन्ति। ज्यामितौ साध्यस्य सिद्ध्यनन्तरं सिद्धान्तो निश्चीयते— 'कस्यापि त्रिभुजस्य त्रयः कोणाः सम्मिलिताः समकोणद्वयेन तुल्या भवन्ति' इति। अस्मिन् सिद्धान्ते कतिपये प्रत्ययाः परस्परं सम्बद्धाः। एष च सिद्धान्तो ज्यामितिसम्बन्धिषु बहुषु प्रश्नेषूपयोगी भवति। एकस्मिन् प्रत्ययतन्त्रे[१४] अनेके प्रत्ययाः सम्मिलिता भवन्ति। अङ्कगणितस्तु

१. Conditioning.
२. Generalization.
३. Differenciation.
४. Observation.
५. Reinforcement.
६. Common characteristics.
७. Rodents.
८. Abstraction.
९. Combination of concepts.
१०. Preposition.
११. Rule.
१२. Law.
१३. Principles.
१४. Conceptual system.

In Public domain. Digitization Muthulakshmi Research Academy

तथाविधमेव तन्त्रम्, यस्मिन् संख्यानाम्, चतसृणां मूलभूतानां क्रियाणाम्, भिन्नानाम्, दशमलवस्य, प्रतिशतस्य, अनुपातस्य च प्रत्ययाः सम्मिलिताः सन्ति। अङ्कगणितसम्बन्धिनीं समस्यां दृष्ट्वा वयमुपयुक्तरीत्या विचारयितुमारभामहे। यदि समस्या सौन्दर्यानुभूतिविषयिणी भवति, तदा आनुपातिकेन सामञ्जस्येन[१], समतोलनेन, विषमतया च प्रत्ययतन्त्रमाश्रित्य तदुपरि दृष्टिं निक्षिपामः।

प्रत्यया न सदैव विचाराणां मार्गदर्शनं कुर्वन्ति, ते भ्रामयन्त्यपि तान्। कदाचिद् भ्रामकाणां प्रत्ययानामपि प्रयोगो भवति, कदाचित् प्रत्ययास्तथा सङ्कीर्णा रूढिग्रस्ता वा भवन्ति, यथा ते वस्तुविचारे बाधका एव भवन्ति; न तु साधकाः। विचारकस्य स्वीया अनुभूतयः, प्रत्ययसमूहस्य पूर्वग्रहा विचारान् पथो भ्रंशयन्ति। वस्तुनिरीक्षणेन स्पष्टविचारणाभ्यासेन चात्र सुधारणा शक्या।

समस्यानां समाधानम्

यदेष्टं स्थानं गन्तुं मार्गः सरलो निर्बाधो वा न भवति, इष्टं परिणामं जनयितुं वा साधनं पूर्णतया स्पष्टं न भवति; तदा समस्या प्रस्तुता भवति। यदा मार्गः साधनं वा प्राप्यते, तदा समस्या समाहिता भवति। समाधानमन्वेषणोपलब्धिप्रक्रियाभ्यां प्राप्यते। समस्यात्मिकायां परिस्थितौ कश्चिदारम्भबिन्दुर्भवति, किञ्चिल्लक्ष्यं च। काचित् सामग्री प्रस्तुता भवति, कानिचिद् वस्तूनि ईप्सितव्यानि च भवन्ति। उपस्थितेषु तथ्येषु वस्तुषु च कानिचिन्निरर्थकानि जायन्ते, येषां कारणेन विचारो भ्रान्तो भवितुं शक्नोति, विचारसामग्री अपर्याप्ता भवति वा। ततोऽधिकायाः सामग्र्याः संग्रहणस्यावश्यता भवति। अथवा समस्यायाः समग्रसमाधानायोपस्थिता सामग्री तत्काले नोपयुक्ता भवति। अपराधरहस्यान्युद्घाटयितुं प्रयतमानानामारक्षिणामपि पुरतस्तथाविधं काठिन्यमुपस्थितं भवत्येव। गणितसम्बन्धिनीषु समस्यासूपस्थिता सामग्री प्रायेण पर्याप्ता भवति। सामग्री त्रुटिपूर्णापि भवति।

केचित् समस्याः समाधातुं वेधावेधसंयोग–घाताघात-प्रहस्तन[२]व्यापारस्योपयोगं कुर्वन्ति; परमयमुपायो नातिसफलः। समस्यायाः सम्पूर्णं स्वरूपमविज्ञाय, मार्गदर्शकविचारान् विना कार्यमारभ्य पश्चात् समाधानोपायानां मार्गणं त्यक्तव्यमेव। प्रयत्नपूर्वकं मार्गदर्शकोपायानामन्वेषणमेव वरीयः। लक्ष्यस्य चिन्तां परित्यज्योपस्थितायाः परिस्थितेः परीक्षणेन मार्गदर्शका विचाराः प्राप्यन्ते।

परिकल्पना[३]

विचारस्य निरीक्षणं प्रति प्रेरकः प्रश्नः 'परिकल्पना' इति कथ्यते। नहि सर्वे प्रश्नाः परिकल्पनास्वरूपं लभन्ते। यदा परिस्थितिः पूर्णतः परिचिता भवति, तदा तथ्यानां क्रियाश्चौचित्यसम्बन्धे प्रश्ना एव नोद्भवन्ति। सर्वथा नवायां समस्यात्मिकायां च परिस्थितौ ये प्रश्ना उद्भवन्ति, तेऽतिसामान्यकोटिका अनिश्चिताश्च भवन्ति। कल्प्यताम्—किञ्चिद्वाहनं चलदेव

१. Symmetry.

२. Hit-or-miss motor manipulation.

३. Hypothesis.

In Public domain. Digitization Muthulakshmi Research Academy

सहसा मार्गे जडीभूतम्। तदा प्रश्नो भवति—किं जातमस्मिन् वाहने ? कथं सहसैव स्थिरीभूतम् ? इमौ प्रश्नौ सामान्यकोटिकावनिश्चितौ च। तदा प्रश्नः क्रियते—'चालक ! तैलं तु न समाप्तम् ?' इति। परं तैलमापकं तु न शून्यबिन्दुं लक्षयते। तेन तु तैलपेटिकाऽर्धपूर्णेति ज्ञायते। 'स्पार्कयन्त्रस्य का स्थितिः ?' —इमे प्रश्नाः सुनिश्चितविषयका विचारं निरीक्षणं च प्रेरयन्ति। उत्तरमपि सङ्केतयन्ति। तदा निरीक्षणेनोत्तरं लभ्यते। विज्ञानविषयकमन्वेषणमप्यनयैव रीत्या क्रियते। विज्ञानविषयिणीनां समस्यानां समाधानाय पूर्णतो नवाः परिकल्पनाः, विचारणाया निरीक्षणस्य च विस्तारोऽपेक्ष्यत इत्यन्यदेतत्।

विचारणायाः प्रक्रिया प्रच्छन्ना परिवर्तमाना च भवति। अतः सफलपरिकल्पनाधिगमकस्य चिन्तनस्य प्राप्तेरुपायप्रदर्शनाय नियमानां स्थिरीकरणं कठिनमेव। प्रथमावश्यकता तु समस्याया यथाशक्ति स्पष्टमवगमः। सञ्चितं ज्ञानमत्र सहायकं भवति। समाधानसङ्केतप्राप्तये ततो यत्नः क्रियते। यदि कानिचित् क्षणानि यतित्वापि सङ्केतो न प्राप्यते, ग्रहणात्मिकायामभिवृत्तौ[1] कञ्चित् कालं निष्क्रियं तिष्ठति, तदा समस्याविचारः स्थगितो भवति। अस्मिन् काले प्रश्नात्मिकया दृष्ट्या स्वमतानां निरीक्षणं[2] कार्यम्। नवया दृष्ट्या च समस्यायाः परीक्षणं कार्यम्। कुशलोऽनुसन्धाता सावधानं[3] प्रतीक्षते, सक्रियमन्वेषयति,[4] सर्वाङ्गीणं विचारं करोति, निष्पक्षो[5] भूत्वा ज्ञातायां स्वच्युतौ मतपरिवर्तनाय[6] तत्परस्तिष्ठति।

काचित् परिकल्पना स्वयमेव निश्चितविचाररूपा भवति। परं प्रायः सा एतादृशं ज्ञानमाश्रयते, यत्स्वतोऽप्यधिकं सामान्यं मार्गदर्शकं विचारमुपस्थापयति। साध्वी परिकल्पना नान्धकारे लोष्टक्षेपवदनिश्चिता भवति।

समस्यानां परिपालनम्[7]

यदानेकैः प्रयत्नैरपि समस्यायाः समाधानं न प्राप्यते, बुद्धिश्च भ्रमे क्षिप्तेव परिलक्ष्यते, तदा कञ्चित्कालं यावत् समाधानप्रयत्ना निलम्ब्यन्ते। कला-साहित्य-विज्ञानाविष्कारादिषु सर्वेषु विषयेष्विदं निलम्बनमुपयोगि सिध्यति। एवं स्थितौ विचारणायाः समग्रा प्रक्रिया [8]रचनात्मकविचारमयेषु चतुर्षु चरणेषु विभजनीया—(१) उपक्रमः[9] ग्रहणं वा, (२) निल-

---

१. Receptive attitude.

२. Assumptions.

३. Watch & wait.

४. Active seeking.

५. Open-minded.

६. Flexibility.

७. Incubation of difficult problems.

८. Creative thinking.

९. Preparation.

In Public domain. Digitization Muthulakshmi Research Academy

म्बनम्[१], (३) प्रकाशनम्[२], (४) परीक्षणम्[३]। उपक्रमावस्था विचारणानां प्रारम्भिकी अवस्था। तत्र काचित् समस्या विचारार्थं गृह्यते। द्वितीयावस्थायां विचारः कञ्चित्कालं स्थगितो भवति। प्रकाशकाले मुख्यो विचारो मार्गं दर्शयति, तथा चानन्ददायिनीमवस्थां प्राप्नोति। अस्यामवस्थायां परिकल्पना सुस्पष्टा जायते। परीक्षणावस्थायां विचारा विस्तारं लभन्ते। प्रथम-चरणे समस्याया विश्लेषणं क्रियते, साधारणः प्रयत्नः प्रारभ्यते; परमसफले प्रयत्ने काञ्चिद् वेलां यावत् ततो विरम्यते। निलम्बनकाले गभीरो विचारो न क्रियते। यदि प्रश्नः स्वत एव वारं वारं मनस्यवतरति, तदा तस्य वारणमपि न क्रियते। प्रायेण स्थगितः प्रश्नः स्वापानन्तरम्, प्रभाते, दिवास्वप्ने, वार्तालापकाले, भ्रमणवेलायाम्, स्नानसमये वा पुनर्मनस्यायाति। तदा विचारः प्रकाश इवायाति, सम्पूर्णञ्च मन आच्छादयति। अस्मिन् काले ध्यानमेकाग्रं क्रियते। यदि विचारः साधुर्भवति तदा कार्ये तस्योपयोगो विधीयते। कलायाः, काव्यस्य, आविष्कारस्य वा रूपं तेन गृह्यते। निलम्बनस्य तत्त्वमिदमेव यत् स्थगितेऽपि विचारे प्रच्छन्नरूपेण तत् कार्यं करोत्येव। यथा पक्षिणामण्डेषु परिसेवनकालेऽपि प्रच्छन्नरूपेण पोषणप्रक्रिया भवत्येव। यदा च विद्यमानायामपि सम्पूर्णायां सामग्र्यां समाधानं नोपलभ्यते, तदा सुनिश्चितमेतद् यद्विचारकोऽप्रासङ्गिकैर्विचारैरित-स्ततो भ्राम्यते, असाधून् वा सिद्धान्ताननुसरति, अप्रशान्तं वा मार्गमवलम्बते, निष्प्रयोजनवतीषु विस्तृतासु वार्तासु मग्नो विचारणीयस्य पूर्णं स्वरूपं विवेक्तुमक्षमो भवति वा। ईदृशा विघ्ना-स्तदैव जायन्ते, यदा जनो निरवकाशं सातत्येनैकस्मिन्नेव प्रश्ने विचारं करोति। परं कण्ठस्थी-करणवदत्रापि विश्रमकाले [४]नवताप्रभावो विलीयते। विचारणायै च मध्यावकाश आवश्यको भवति। अत एव विश्रमोऽपेक्ष्यते।

विचारविधिरपि प्रयत्नच्युतिरूप एव। पिञ्जरबद्धमूषकस्येव विचारकस्यापि सम्मुखे प्रारम्भिकी सामग्री प्रस्तुता भवति, लक्ष्यञ्च स्पष्टम्। केवलो लक्ष्यप्राप्तिमार्गोऽविदितो भवति। अन्तरमेतद्यद् विचारको न केवलं प्रहस्तेनेन, गत्यात्मकानुसन्धानेन च प्रयासं करोति; अपि तु स प्रत्ययनस्यापि प्रयोगं कर्तुं क्षमते। प्रश्ने योजनानुसारेणापि च विचारं कर्तुं शक्नोति। स प्रश्नस्य समग्रं रूपमवबुध्य तेन सङ्गतान् तदनुकूलानेव विचारान् गृह्णाति।

तर्कानुकूला[५] विचाराः

यदा कोऽपि विचारकः प्रस्तुतस्य पूर्णमनुसन्धानं कृत्वा, तथाविधं परिणाममधिगच्छति यो निश्चितः शक्यो वा भवति, तदा स तर्कयन् कथ्यते। यदा च स प्रस्तुतेन स्वानुमितं निष्कर्षं प्राप्नोति, तदा तेन तार्किको विचारः कृत इति मन्यते। यदा च निष्कर्षः प्रस्तुतसामग्र्याऽनु-मितो न भवति, तदा विचारोऽसम्बद्धः, निष्कर्षश्चातार्किकः कथ्यते।

निष्कर्षस्तदैव सामग्र्यानुमितो भवति, यदा स प्रस्तुतया सामग्र्या सङ्गच्छते। यदि

---

१. Incubation.
२. Illumination.
३. Verification.
४. Recency effect.
५. Logical.

In Public domain. Digitization Muthulakshmi Research Academy

रामः श्यामस्य पुत्रो देवदत्तस्य च जनकस्तदेदमनुमन्यते यच्छ्यामो देवदत्तस्य पितामह इति। अस्मिन् दृष्टान्ते रामश्यामदेवदत्तानां मध्ये तैर्विशेषेण सम्बद्धं हेतुपदमस्ति। तेनैव तेषां सम्बन्धोऽवगम्यते। तर्कश्च प्रायेण हेतुपदप्रयोगाधीनो भवति। कश्चिद् द्वयोर्वृक्षयोः स्कन्धमध्यस्थौल्यस्य परस्परं तुलनामिच्छति। स द्वाभ्यामपि पाणिभ्यामेकस्य मध्यं गृह्णाति, गृहीतुं च शक्तो भवति; परमन्यस्य कश्चिदेव भागोऽङ्कगतो भवति, न तु सर्वः। एतद्धस्तग्राह्यत्वं हेतुप्रदस्थाने प्रयुज्य स निर्णयति—'कतरो वृक्षः स्थूलतरः' इति। येषां वस्तूनां प्रत्यक्षज्ञानं न सम्भवति, तेषां मिथस्तुलनार्थं यो मापदण्डः प्रयुज्यते स हेतुपदकार्यकारी भवति।

सङ्ख्याऽपि हेतुपदं भवति। यथा आगमिष्यत्सु केषुचिज्जनेषु कश्चित्पृच्छति—'किं सर्वेभ्यः पर्याप्तानि आसनानि?' इति। अन्यश्चोत्तरं ददाति—'पूर्वं जना अत्रागच्छेयुः, पश्चादहं निर्णेतुं शक्ष्याम्यासनानि पर्याप्तानि न वा' इति। तृतीयो वक्ति—'परं निर्णयः पूर्वमपि सम्भवति। कति पुरुषा आगच्छन्तीति निश्चीयताम्' इति। तदा स गणयति—'एकः, द्वौ, त्रयः... पञ्चदश' इति। तदा पश्यत्यासनानि चतुर्दशैवेति। एकस्मै पुरुषायाऽन्यदासनमानेतव्यमिति च निश्चिनोति। अत्र चतुर्दश पञ्चदशेति द्वे संख्ये हेतुपदस्थाने प्रयुक्ते।

तर्कस्य याथार्थ्यपरीक्षायै तदाधारभूतायाः सामग्र्याः स्पष्टीकरणमावश्यकं भवति। वार्तालापे, निबन्धे च निष्कर्षकारणानि केवलमंशत एव व्यक्तीभवन्ति। यथा—कश्चित् कमपि प्राणिविशेषमुड्डीयमानं दृष्ट्वा कथयति—'अयं प्राणी पक्षी भवितुन्नार्हति; यतोऽयं षट्पदः' इति। यद्येषा युक्तिः पूर्णतया स्पष्टा क्रियते तदाऽस्याः स्वरूपमेवं भविष्यति—(१) अयं प्राणी षट्पादवान्, (२) न कोऽपि पक्षी षट्पादवान् भवति, (३) अतोऽयं प्राणी न पक्षी। अनेकेषु विषयेषु कथनस्य विधिपूर्वकता बोधसुकरतां सम्पादयति। यत्र निष्कर्षस्तर्कसामग्र्यनुकूलो न वेति विचारणीयम्, तत्र विधिवत्कथनेनैवागम्यते—किं हेतुपदम्? कश्च वस्तुद्वयस्य मिथः सम्बन्धः? इति। [1]आधारवाक्ययोस्तर्कार्थं महत्यावश्यकता भवति। ते हेतुपदस्यान्याभ्यां पदाभ्यां सम्बन्धं सूचयतः। ताभ्यां [2]निष्कर्षोऽनुमीयते। आधारवाक्ये निष्कर्षश्च सम्मिलितरूपेण न्यायवाक्यस्य रचनां कुर्वन्ति। यथा—अयं प्राणी षट्पदेषु पक्षिषु न गण्यः, नहि कश्चित् प्राणी षट्पादवान् पक्षीति स्वीक्रियते; अतोऽयं प्राणी न पक्षिजातिविशेषः।

तर्कानुकूलो निष्कर्षोऽनिर्वार्यतया न सत्य एव। यद्याधारवाक्येऽवितथे भवतः, तदा तर्कसम्मतो निष्कर्षोऽप्यवितथो भवति। तर्कस्योपयोगिता द्विधा व्याख्यातुं शक्यते, यथा—

यदीदमवगतं भवति यदाधारवाक्ये नाऽसत्ये, तदा सत्येन तर्केण नूतनस्य ज्ञानस्योपलब्धिर्जायते। सत्याभ्यामेवाधारवाक्याभ्यां निष्कर्षशुद्धताऽवगम्यते। यदि वयं जानीमो यद् भल्लूकः [3]स्तनधारिप्राणिजातीयः, स्वबालान् स्वस्तन्यं पाययति; सर्वे स्तनधारिणः पशव उष्णरक्तवन्तश्च। तदा वयं 'भल्लूका अप्युष्णरक्तवन्तः' इति निष्कर्षमधिगमिष्यामः। तत्त्वतो मिथ्यानिष्कर्षेणाधारवाक्ययोः परिकल्पनाया वाऽपि मिथ्यात्वमनुमीयते।

---

१. Premises.

२. Syllogism.

३. Mammals.

In Public domain. Digitization Muthulakshmi Research Academy

निष्कर्षानुमानम्, परिकल्पनापरीक्षणम्, ततो निष्कर्षस्य मिथ्यात्वामिथ्यात्वपर्यवेक्षणं तर्कस्य द्वितीय उपयोगः। निष्कर्षशुद्धता परिकल्पनाशुद्धताया अनुमापिका भवति। कदाचिन्मिथ्याधारवाक्यानि सत्यस्य तर्कसम्मतस्य वा निष्कर्षस्यानुमापकानि भवन्ति। यथा—सर्वे ह्वेलजातीया मत्स्याः स्तनधारिणः; मनुष्योऽपि ह्वेलजातीयः, अतः सोऽपि स्तनधारी।

क्वचिद्भाषाऽपि तर्के दुरूहतां दुष्टतां वोत्पादयति। दुरूहता कथनप्रणालीजन्या भवति, यया विचारसामग्रीसम्बन्धो जटिलः सम्पद्यते। यथा—पुष्पा कमलापेक्षया गौरी, किन्तु सरलापेक्षया श्यामा। अत्र प्रश्नः क्रियते—'काऽल्पा गौरी? कमला, सरला वा?' इति। अस्योत्तरमल्पवयस्का बालकाः सरलतया दातुं न शक्नुवन्ति। अयमेव प्रश्नो यद्येवं पृच्छयेत—'सरला पुष्पापेक्षया गौरी, पुष्पा च कमलापेक्षया। अथ का गौरतरी कमलासरलयोः?' इति, तर्हि बालाः सरलतया प्रत्युत्तर्तुं शक्ता भवेयुः। प्रथमरूपे तु द्वयोर्मिथोविरोधिनोरधिका गौरी, न्यूना गौरीत्यनयोः शब्दयोर्मिश्रणेन भ्रान्तिरुत्पन्ना॥

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्दशोऽध्यायः

अनुभूतिः[1]

अनुभूतेः स्वरूपम्

सर्वस्या अपि मूर्ताया मानसिकप्रक्रियायास्त्रयः पक्षा भवन्ति—ज्ञानम् , अनुभूतिः, चेष्टा च। यदा मानसिकप्रक्रियायां ज्ञानस्य प्रामुख्यं भवति, तदा ज्ञानात्मिकाऽवस्था[2]। यदाऽनुभूतेः प्राधान्यं भवति तदा वेदनात्मिकाऽवस्था[3], अनुभूतिर्वा। यदा च चेष्टा मुख्यतां लभते, तदा चेष्टात्मिकाऽवस्था[4] कथ्यते। प्रथमं ज्ञानं भवति, येन प्रभावितो द्रष्टा सुखं दुःखं वाऽनुभवति। ततोऽनुभूतिर्द्रष्टुः क्रियामुत्पादयति। अनुभूतिकाले द्रष्टा निष्क्रियो भवति। अनुभूतिः सुखकारी दुःखप्रदा वा भवति, प्रिया, अप्रिया वेति। भवानाम्रे पक्वं सुन्दरं फलं पश्यति। प्रथमं ज्ञानं भवति—'इदमाम्रम्' इति। तस्य मनसि सुखदः प्रभावो जायते। ततस्तद्ग्रहणाय चेष्टां करोति। एवमनुभूतिर्ज्ञानजन्या क्रियाजनिका च। अनुभूतिरात्मगतोऽनुभवः[5]। नेयं क्रिया, क्रियाजनकत्वं त्वस्या अस्त्येव।

अनुभूतयः संवेदनापेक्षयाऽस्थिराः परिवर्तनशीलाश्च। संवेदनाऽवधानं वस्तुस्वरूपं प्रकाशयति। वृक्षेऽवधानेन तस्य शाखाः, पत्राणि, पुष्पाणि च स्पष्टानि भवन्ति; न चानुभूतिस्तथा। सा त्ववधानेन नश्यति। अनुभूतावधानेन तत्प्रेरकाद् ध्यानमपसरति। अनुभूतिश्च विनश्यति। यथा संवेदनाः शरीरस्य विशिष्टेषु भागेषु तिष्ठन्ति, नानुभूतिस्तथा। नहि तस्याः स्थितिरङ्गविशेषे निरूपयितुं शक्या। सुखस्य दुःखस्य चानुभूतयः परस्परव्यावर्तिकाः[6]। नहि सुखानुभूतिकाले दुःखानुभूतिः सम्भवति। न चानुभूतिरेकाकिनी भवति, प्रत्यक्षीकरण-स्मृति-कल्पना-संवेग-सङ्कल्पादिषु काऽपि मानसिकी प्रक्रिया तत्सहचारिणी भवत्येव।

चेष्टितक्रिया-अनुभूत्योरन्तरम्

मांसपेशीसम्बद्धा सर्वा क्रिया बाह्यं परिणामं जनयति। तस्या उद्देश्यमेव बाह्यपरिणामोत्पादः। नानुभूतिः स्वयं कमपि परिणाममुत्पादयति। तथापि साऽनेकदा चेष्टितप्रवृत्त्या[7] सँल्लग्ना भवति। दुःखदानुभूत्या सह तद्विमुक्तेश्चेष्टापि प्रारभ्यते, सुखदया च वस्तूनि यथावस्थमभिरक्षितुम्। दुर्गन्धानुभूत्या जनस्तत्स्थानात् प्रचलति, सुगन्धानुभूतिस्तं तत्रैव स्थातुं चेष्टयते।

१. Felling.
२. Cognative.
३. Affective.
४. Conative.
५. Subjective expereince.
६. Exclusive.
७. Motor-tendency.

In Public domain. Digitization Muthulakshmi Research Academy

परं नानुभूतिचेष्टयोर्नैरन्तर्यसम्बन्धः । तीव्रानुभूतिः शक्तिपूर्णां चेष्टामुत्पादयति, शिथिला च शिथिलाम् । कदाचिच्चेष्टाऽनुभूतिविरुद्धाऽपि भवति । अन्तरे उत्तेजनामनुभवन्नपि बाह्यरूपेण शान्तस्तिष्ठति मनुष्यः, चिकीर्षाभावेऽपि क्रियां करोति ।)

[1]ज्ञान-संवेदना[2]-अनुभूतीनामन्तरम्

अनुभूतिर्ज्ञानाद्भिन्ना भवति । नानुभूतेरुपयोगो परिस्थितिज्ञाने आत्मविषयकज्ञाने वा भवति । संवेदनया मनः पदार्थस्य प्रकृतिं जानाति । संवेदना मनोबाह्यानां पदार्थानां तेषां सम्बन्धानाञ्च सूचनां प्रदत्ते, अनुभूतिश्चात्मन एव मनस आन्तरिकीं दशां सूचयति । हाफडिंग-महोदयो मन्यते यज्जनोऽनुभूतिश्चोभे अपि [3]सापेक्षतानियममनुसरतः । दीर्घः पुरुषः खर्वसमीपे दीर्घतरः, खर्वश्च दीर्घसमीपे खर्वतरः प्रतीयते । एवमेव सुखानन्तरं दुःखमधिकतरकष्टप्रदम्, दुःखानन्तरं सुखं चाधिकतरं रोचकं प्रतीयते । बुडवर्थमहोदयानुसारमनुभूतिः संवेदनाया भिन्ना । अनुभूतौ न बहिर्जगतस्तथ्यानाम्, न चात्मशरीरतथ्यानां बोधो भवति । अनुभूतिर्मनसो निष्क्रियावस्था ।

संवेदना सरलज्ञानरूपा । सा च बाह्योत्तेजनया मनस्युत्पद्यते । संवेदना बाह्योत्तेजनाधीना, अतो वस्तुसापेक्षा[4] । अनुभूतिश्चात्मसापेक्षा[5], यतः सा मनोऽधीना । अनुभूतिः संवेदनाभ्यो जायते, समष्टिरूपेण च गृह्यते । कदाचिदेकैवोत्तेजना संवेदनामनुभूतिञ्च जनयति । सा संवेदनां जनयति । संवेदना च द्रष्टारं सुखरूपेण दुःखरूपेण वा प्रभावयति । एवमुत्तेजना संवेदनां जनयति, संवेदना चानुभूतिम् ।

अनुभूतेर्विमाः[6]

रोयस(Royce)महोदयानां मते अनुभूतेर्द्वे विमे भवतः—सुखम्-दुःखम् , उद्दीप्तिः-शान्तिश्च[7] । अयमनुभूतेर्द्विवैमः सिद्धान्तः कथ्यते । बुण्ड्टमहोदयोऽनुभूतेस्तिस्रो विमाः स्वीकरोति—(१) सुखम्-दुःखम् , (२) उद्दीप्तिः-शान्तिः, (३) क्षोभः[8]-शैथिल्यम्—अयं त्रिवैमः[9] सिद्धान्तः कथ्यते । बुण्ड्टमते सुखेन सह तानो भवतुं शक्नोति, उद्दीप्तिर्वा ।

नैतौ सिद्धान्तौ साधू । उद्दीप्तिशान्त्योरन्तरं भवतीति सत्यम् , परमिदमन्तरमाङ्गिक-पैशिकसंवेदनाजन्यम् । उद्दीप्तावस्थायां पेशीषु तानो जायते, श्वासोच्छ्वासयोश्च द्रुतत्वम् । शान्तौ च पेशीनां सक्रियता समाप्यते, अङ्गव्यापारेषु च सामञ्जस्यं जायते ।

---

१. Sensation.
२. Cognition.
३. Law of relativity.
४. Objective.
५. Subjective.
६. Dimension.
७. Excitement-calm.
८. Tension-Relaxation.
९. Tri-dimensional theory.

In Public domain. Digitization Muthulakshmi Research Academy

सुखस्यानुभूतिः

प्लेटो–शापेनहावर(Schopenhaur)प्रभृतयो दार्शनिका दुःखं भावात्मिकाम्[1], सुखं चाभावात्मिकामनुभूतिं[2] मन्यन्ते । तन्मते दुःखस्य सत्ता भावात्मिका । सुखं च दुःखाद्विमोक्षः । अतः सुखं दुःखाभाव एव । शापेनहावरमते जीवनं कस्यचिल्लक्ष्यस्य प्राप्तेः प्रयत्नः, अभावस्य दुःखदामनुभूतिमपसारयितुं प्रयत्नो वा । यदा चाऽभावो दूरीभवति, तदा सुखं प्राप्यते । अतः सुखं दुःखमुक्तेरभावात्मिकाऽनुभूतिः ; परमिदं मतं न साधु । दुःखप्रहाणानन्तरं सुखं वैषम्येण वर्धतेतराम् । न च तत्पूर्ववर्तिनो दुःखाद् भावात्मकतायां न्यूनत्वम् । सुखस्यानुभूतिरपि भावात्मिकैव ।

अनुभूतिः प्रिया भवति, अप्रिया वा । न चानुभूतिरुदासीना सम्भवति । पिल्सबरीमते उत्तेजनोदासीना भवितुं शक्नोति, नानुभूतिः । नोदासीनोत्तेजनाप्यनुभूतिमुत्पादयति ।

अनुभूतिर्ज्ञानचेष्टयोर्मध्यवर्तिनी शृङ्खला । ज्ञानं तस्याः कारणम्, सा च चेष्टायाः कारणम् । चेष्टाप्यनुभूतिकारणं भवितुं शक्नोति । स्टाउटमते सफला चेष्टा सुखमुत्पादयति, विफला च दुःखम् । एवमेवावधानमप्यनुभूतिकारणं भवति । केनापि वस्तुना विचारेण वा सह ध्यानस्य प्रभावयुक्तव्यवस्थापनं सुखं जनयति, प्रभावहीनं व्यवस्थापनं च दुःखमुत्पादयति । अवधानमपि चेष्टैवेति पृथङ्निरूपितम् ।

इच्छाप्यनुभूतिं जनयति । अनुभूतिश्च द्विप्रकारिकैवेत्युक्तमेव । सुखस्य दुःखस्य वाऽनुभूतिर्भवति । मेलोनमहोदयेनोक्तम्—'इच्छापूर्तये क्रियमाणं कार्यं यावत्तत्प्रतिकूलवस्तुनाऽबाधितं सद्भवति तावदेवेच्छा सुखकरी भवित्री; यदा चाभीष्टप्राप्तये क्रियमाणं कार्यं बाधितं भवति तदेच्छा दुःखकरी जायते' इति । इच्छापूर्तेः सुखम्, इच्छाविघाताद् दुःखमिति निष्कर्षः । एवमिच्छानुभूतेर्जननी । अनुभूतिरपीच्छाकारणं भवति । दुःखानुभूतिरभावान्मुक्तेरिच्छामुत्पादयति ।

अनुभूतेर्नियमाः

अनुभूतिविषये केचिन्नियमा मनोविद्भिः पुरस्कृता अधस्ताद् वर्ण्यन्ते —

(१) **उत्तेजननियमः**[3]—सर्वेषामपि ज्ञानेन्द्रियाणामुत्तेजनं यदा निम्नतमात्[4] संवेद्यबिन्दोरुपरि याति, तदा प्रथमं सुखदं भवति । कञ्चित्कालं यावदुत्तेजनया सह सुखं प्रवर्धते, उच्चतमबिन्दुं स्पृशति च । ततस्तस्य ह्रासः प्रारभते । नीचैर्गच्छँस्तदुदासीनताबिन्दुं स्पृशति । तत्र संवेदना सुखदुःखोभयविरहिता भवति । तत उत्तेजनया सह संवेदनोत्तरोत्तरं दुःखदा जायते । एवं क्रमेण तस्यां दुःखदता चरमं बिन्दुं स्पृशति । ततस्तस्यां वृद्धिर्न भवतीति बुण्ड्टमहोदयानां मतम् ।

(२) **परिवर्तननियमः**[5]—क्रियायाः परिमाणे प्रकारे वा परिवर्तनमनुभूतेः कारणम् ।

---

१. Positive.
२. Negative.
३. Law of stimulation.
४. Threshold point.
५. The law of change.

In Public domain. Digitization Muthulakshmi Research Academy

मन्दप्रकाशात्तीव्रप्रकाशे आगमनं सुखानुभूतिकारणं भवति। एवमेव तीव्रपीडायाः स्वल्पपीडायां परिवर्तनं सुखं जनयति। अत्र परिमाणमनुभूतिकारणम्। गम्भीरस्य बौद्धिकश्रमस्यानन्तरं क्रीडनं सुखमुत्पादयति। विपरीतं परिवर्तनमपि जनकमनुभूतेः। तमसो ज्योतिर्गमनम्, असतः सद्गमनम्, मृत्योरमृतगमनं सुखावहम्।

(३) समन्वयविरोधनियमः[१]—समन्वयो विरोधश्चानुभूतिकारणे भवतः। सङ्गीते ध्वनीनां सङ्गतिः प्रिया भवति। समकालिकानामनुक्रमिकाणां वोत्तेजनानामसङ्गतिरप्रिया भवति, यथा—कोलाहलोऽप्रियः। विचारा अपि सङ्गतिपूर्णा एव सुखदाः, विरोधिनश्च दुःखदायिनः। एकमेव लक्ष्यमनुसरन्तो विचाराः सुखजनकाः, विरोधमाश्रयन्तश्च दुःखजनकाः। एवमेव सामञ्जस्यवत्यः शरीरावस्थाः सुखानुभूतिजनिकाः, परस्परं बाधिकाः, सङ्घर्षशीला वा पीडानुभूतिकारणम्।

सहानुभूतिः[२]

यदान्ये कस्याश्चिदनुभूतेः प्रकाशनं कुर्वन्ति, तदा वयमपि तथानुभवितुं प्रयतामहे। प्रसन्नानाह्लादितान् जनान् दृष्ट्वाऽन्येऽपि प्रसन्ना आह्लादिताश्च जायन्ते; विषण्णाँश्च दृष्ट्वा विषण्णाः। क्षोभमये वातावरणे तेऽपि क्षुब्धतां भजन्ते, येषां क्षोभाय नान्यत् किञ्चित् कारणं भवति। यदा कुतूहलवशात् केचिज्जना कस्याञ्चिद्दिशि धावन्ति, तदा कारणमविज्ञायैवान्येऽपि तथा धावितुमारभन्ते। अन्येन जनेन सहानुभवनमेव सहानुभूतिः। नैसर्गिकीयमनुकरणात्मिका प्रतिक्रिया, शिक्षितो वेत्ति न निश्चयपूर्वं कथयितुं शक्यते। नात्र केवलमनुकरणमेव, प्रेरणाऽप्यत्र समाविष्टा भवति। यथा सुहृदनुभवति तथाऽनुभवस्य, यत्र तस्य रुचिस्तत्र रुचेः, यत्र वाऽरुचिस्तत्रारुचेरिच्छा जनस्य मनसि भवति। यूनोर्दम्पत्योरियमिच्छा बलवती भवति। एवं तौ मिथोऽधिकं निकटमात्मानौ कल्पयतः।

सहानुभूतिः कल्पनामपेक्षते। आत्मानं परस्थितौ कल्पयित्वैव तद्दृष्ट्या वस्तूनामवलोकनं सम्भाव्यते।

समानुभूतिः[३]

कस्यापि जनस्य वस्तुनोऽवान्तः प्रविश्यानुभूतिः समानुभूतिः कथ्यते। समानुभूतौ वस्तुना सहैकात्मभाव आवश्यकः। लोकव्यवहारे प्रायः समानुभूतिरेव दृश्यते। क्रीडायै सन्नद्धस्य, विवादादिस्पर्धायै प्रस्तुतस्य वा जनस्य सहायतां कुर्वन्त इव दर्शका अवलोक्यन्ते। नायमनुकरणात्मको व्यवहारः। यतो दर्शकव्यवहारः क्रीडकात् स्पर्धमानाद्वा पूर्वं भवति। नास्य सम्बन्धः क्रीडकेन क्रियमाणया क्रियया। दर्शकव्यवहारस्तु क्रीडकेन करिष्यमाणायाः क्रियायाः कल्पनया सम्बद्धो भवति। नाट्यदर्शनकाले, आख्यायिकाध्ययनवेलायां वा दर्शकाः पाठका वा नायकेनैकात्मकतामनुभवन्ति। तस्य सङ्कटे दुःखिता हर्षे च हृष्टा भवन्ति। इयं समानुभूतिरेव॥

१. The law of harmony and discord.
२. Sympathy.
३. Empathy.

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चदशोऽध्यायः

संवेगाः[1]

संवेगानां स्वरूपम्

विचारवत्तया मानवः प्राणिषु श्रेष्ठः। स तर्कपूर्वकं विचारपूर्वकं वा स्वकार्याणि करोति। तथाप्यनेकदा तस्य चेष्टितानि तर्कविरहितानि भवन्ति। समूहे प्रायशो जनानामाचरणं विचारशून्यमिव भवति। एकाकिनोऽप्यनेकानि कर्माणि न विचारमनुसरन्ति। धार्मिकाः, साहित्यिकाः, कलाकाराः, पक्षविशेषसमर्थका राजनीतिविदश्चानेकदा संवेगेन, न तु तर्केण, शासिता भवन्ति। राज्यपुनारचनायोगस्य प्रतिवृत्तप्रकाशनानन्तरं वयोवृद्धै राजनीतिज्ञैरपि भारते यथा आचरितम्, तेन स्पष्टमेव यद्विवेकशीलोऽपि जनो बहुष्ववसरेषु संवेगवशीभूतस्तर्कविरुद्धमाचरति, तर्कं चात्मपक्षसमर्थनाय प्रयुङ्क्ते। ये चेदमवगच्छन्ति ते जनेषूत्तेजनामुत्पाद्य स्वेष्टं साधयन्ति। शेक्सपियरमहोदयस्य जुलियससीजरेत्याख्ये रूपके सीजरमन्त्रिणः 'एण्टोनी' इति नाम्नो महाशयस्य भाषणमीदृशमेव। तद्भाषणेन दर्शनशास्त्रमर्मज्ञस्य ब्रूटसमहोदयस्य सर्वे तर्काः संवेगमुत्प्रेर्य निरस्ताः। जनाश्च ब्रूटसवधायोत्तेजिताः। कदाचित्तु स्वकीयमेव संवेगावस्थाचरितं पर्यालोच्य जना लज्जयाऽधोमुखा जायन्ते।

संवेगात्मकानुभवकाले जनः पूर्णरूपेणाव्यवस्थितो जायते। तस्यात्मन उपरि नियन्त्रणं नश्यति। स्वापत्यं सङ्कटे दृष्ट्वा पशवोऽपि प्राणान् सङ्कटे पातयन्ति, बालाँश्च रक्षन्ति। संवेगानामुदयो बाह्यपरिस्थितिभिरान्तरिकोत्तेजनाभिश्च भवति। शरीरे पीडया, परकष्टेन च जनाः रुदन्ति। केचित् प्रियजनान्, स्वकीयं नष्टं वैभवं वा स्मारं स्मारं रुदन्ति। नैकेन बाह्यकारणेन सर्वेषु समानस्यैव संवेगस्योदयो भवति। गोमान्तकप्रदेशे भारतीयानां सत्याग्रहीणां प्रवेशेन भारतीयाः प्रफुल्लिता जायन्ते स्म। भारतस्य सुहृदो देशा अपि प्रसन्ना अभवन्, परं न तथा पुर्तगालीयाः; ते तु क्रोधज्वलिता भवन्ति स्म, भारतस्य विरोधिनश्च चिन्तिताः। अत्रैकया क्रियया भिन्नेषु जनेषु भिन्नानां संवेगानामुदयो जातः। ये निरपेक्षा उदासीनाः, तेषु न सत्याग्रहस्य कोऽपि प्रभावः। संवेगोदयेन जनानां व्यवहारा अस्वाभाविका भवन्ति। संवेगैर्जनानां क्रियाशक्तावपि परिवर्तनं भवति। केषुचित् संवेगेषु कार्यशक्तिर्वर्धते, केषुचिच्च नश्यति। संवेगानां तीव्रतया व्यक्तेर्विन्यासश्छिन्नो भिन्नश्च जायते। संवेगातिरेकदशायां जना विक्षिप्ता अपि भवन्ति। संवेगा उपकारका अपि दृश्यन्ते। अनेकेषां वात्सल्यादीनां सद्भावानाम्, कलाकाव्यादीनां च प्रभावे संवेगा एव कारणम्। संवेगानां सङ्ख्या विपुला, तेषु केचिदधो वर्ण्यन्ते—

भयम्—भयं तस्य वस्तुनोऽवलोकनादुत्पद्यते, यदतीते पीडाकारकं हानिकरं वाऽनुभूतं भवति। आक्रामिका विघ्नकारिण्यो वा परिस्थितयो भयं जनयन्ति। प्रखरः कोलाहलः, विपुलस्तीव्रः प्रकाशः, आकस्मिकी गर्जना, प्रबलस्य शत्रोः सहसा आक्रमणं भयं जनयति।

---

1. Emotion.

In Public domain. Digitization Muthulakshmi Research Academy

तत्काले भविष्यत्काले वा पीडादायिन्याः परिस्थितेर्ज्ञानाद्भयोत्पत्तिः। भयस्याभिव्यक्तिर्हृदयस्य तीव्रगत्याऽङ्गानां कम्पेन म्लानतया दूरं पलायनेन च भवति। मेकडूगलमते भयसंवेशः पलायनाख्यस्य मूलप्रवृत्तेर्वेदनात्मकः पक्षः। भयातिरेकेऽङ्गानि स्तब्धानि भवन्ति।

अयं संवेगः सर्वेष्वपि प्राणिषु विद्यते। प्रकृत्याऽयं प्राणिनां मनस्यात्मरक्षायै प्रतिष्ठापितः। वस्तुतो मानवे भयसत्ता न निन्दनीया। यो भयं नानुभवति, स आत्मरक्षणोपायानपि न करोति। भयमागमिष्यतो दुःखस्य पूर्वसूचकम्। तस्य च प्रकारद्वयं भवति—जन्मजातम्[1], अर्जितं[2] च। जन्मतो बालकः कतिपयेभ्य एव वस्तुभ्यो बिभेति। स तीव्रध्वनेर्भीतो भवति; परं यदा स ध्वनिरन्धकारे भवति, तदाऽन्धकारादपि बिभेतुमारभते। कष्टप्रदोऽनुभवोऽर्जितभयस्य कारणं भवति।

भयाक्रान्तस्य मुखं पीतं जायते। ओष्ठौ वदनं च शुष्यन्ति। मुखाद् वचनं न निःसरति। हृदयं वेगेन स्पन्दते। यत्किञ्चिदपि स कर्तुमुद्यतो भवति, तदा 'एड्रिनल' इति नामकग्रन्थयः 'एड्रिनलीन' नामानं पदार्थं सृजन्ति, येन प्राणिनि परिस्थितिप्रतीकारशक्तिः प्रादुर्भवति। मनःप्रसादिका ग्रन्थयश्च स्वकार्यं स्थगयन्ति। अतो भयावस्थायां मनसे नानन्दो रोचते।

क्रोधः—भयमिव क्रोधोऽपि सर्वेषु प्राणिषु विद्यते। मनोवैज्ञानिकैर्भयक्रोधादयः संवेगाः परुषा[3] भणिताः। क्रोधो मानसिकप्रवृत्तेः प्रतिरोधादुत्पद्यते। मूलप्रवृत्तीनामतृप्तेर्वा। कृपणस्य मनसि तद्धनापहरणचेष्टा क्रोधं जनयति। कामातुरः कामवासनामार्गे आगतमवरोधकं प्रति क्रुध्यति। गौरपि स्ववत्सं पीडयितारं प्रति क्रोधं प्रकटयति। मूलप्रवृत्तीनामवरोधात् क्रोधोदयो दृश्यन्ते। क्रुद्धस्य शरीरे मनसि च बहूनि परिवर्तनानि सँल्लक्ष्यन्ते। क्रोधाविष्टस्याधरौ कम्पेते, मुखं शुष्यति, आनने रक्तिमा पदमाधत्ते, हृदयगतिस्तीव्रा भवति। उदरे वेदनानुभूयते। भयावस्थायामिव क्रोधेऽपि ग्रन्थिभ्यो विशेषप्रकारकः स्रावो भवति।

स्वविषयेऽन्यस्य हस्तक्षेपः, स्वीया विफलता वा क्रोधमुत्पादयति। स्वाभीष्टप्राप्तौ विफलो जनो यदा विफलतादोषमन्यस्य शिरसि क्षेप्तुं शक्नोति, तदा स क्रुद्धो भवति। क्रुद्ध आत्मदोषानपश्यन् परिस्थितेः सहयोगिनां च त्रुटीर्विशेषतः पश्यति। कदाचिज्जनः स्वस्मिन्नपि क्रोधं प्रकटयति। भयापेक्षया क्रोधोऽधिकः शक्तिशाली स्वल्पदुःखदश्च संवेगः।

विनोदः—स्मितस्य हासस्य च काले या संवेगात्मिका स्थितिर्भवति साऽपि महत्त्वपूर्णा। नह्युन्मुक्तहाससमा काऽपि प्रतिक्रिया स्पष्टा। विनोदो भयक्रोधविरुद्धस्वरूपः। बालः क्रीडनकं दूरे क्षिप्त्वा हसति, किशोरः कञ्चन पिच्छिले मार्गे पतन्तं दृष्ट्वा, वयस्कः श्लिष्टोक्त्या, प्रौढोऽन्येषां मौर्ख्यमवलोक्य हसति।

हर्षः—अयं विनोदेन सममेव सुखदः; तथापि विनोदाद् भिन्नः। विजयेन हर्षो भवति, न तु विनोदः। बहु सङ्घर्षानन्तरं प्राप्तं साफल्यम्, बहुप्रयासानन्तरलक्ष्यप्राप्तिर्वा हर्षं जनयति। हर्षेण वदनमुत्फुल्लं भवति।

---

१. Inborn

२. Acquired.

३. Coarse emotions.

In Public domain. Digitization Muthulakshmi Research Academy

शोकः—शोको हर्षविरोधी। शोकाक्रान्तस्य प्रतिक्रिया हर्षितविरुद्धा भवति। शोको भाविन्या तात्कालिक्या वाऽसफलतयोत्पन्नः संवेगः। रोदनं क्रन्दनं वाऽस्य लक्षणम्। यदा कस्यचित् पुरुषस्य प्रियं वस्तु तस्मादपह्रियते, तदा स शोकमनुभवति।

अनुरागः—प्रेमशब्दस्य प्रयोगस्त्रिष्वर्थेषु भवति। तत्र प्रथमो मन्मथसंवेगः। अस्योत्पत्तिः कामप्रवृत्तितो भवति। द्वितीयश्च मातृकप्रवृत्तिजन्यो[१] वात्सल्यसंवेगः[२]। तृतीयश्च महत्सु भक्तिरूपेण प्रकटितो भवति। स्वार्थमूलकोऽनुरागः प्रियाहितमपश्यन्नात्महितकाम्ययैव व्यवहरति। अनुरागे तत्त्वद्वयं सम्मिलितं भवति—आसक्तिः, सहानुभूतिश्च। आसक्तेर्व्यञ्जकाश्चुम्बनालिङ्गनादयः। अन्यजनसंवेगानुभवः सहानुभूतिः। सलीमहाशयमते आसक्तिः स्वार्थमूलकोऽनुरागः, सहानुभूतिश्च परार्थमूलकः। वेनमहोदयमते आसक्तिर्वात्सल्यसंवेगः, यः स्पर्शनचुम्बनालिङ्गनादौ शारीरिकसम्पर्केऽभिव्यक्तो भवति।

घृणा—विरुद्धार्थोऽयं शब्दः। अयं भावनार्थे प्रयुज्यते, संवेगार्थेऽपि। मैकडूगलमते घृणायां क्रोधभयविरागाणां सम्मिश्रणेनायं मिश्रितः संवेगः। घृणापात्रं क्रोधजनकं भवति। यं बलवन्तं प्रति क्रोधाभिव्यक्तिरशक्या, स भीतियुक्तां विरक्तिं जनयति। घृणानुरागयोर्वैपरीत्यम्। घृणा व्यक्तित्वसङ्कोचिका, अनुरागश्च तद्विस्तारकः। घृणा घृणितादात्मरक्षायै प्रेरयति। अयं संवेगो रक्षात्मकः। अन्येऽनेके संवेगा विस्तरभिया नात्रोल्लिख्यन्ते।

संवेगानामुत्पत्तिः

सामान्यजनानां विश्वासो यत्संवेगानामुत्पत्तिः कस्याश्चित्परिस्थितेः प्रत्यक्षीकरणेन, स्मृत्या कल्पनया वा भवति। प्रथमं प्रत्यक्षीकरणम्, ततः संवेगः, तत आङ्गिकानि परिवर्तनानीति क्रमः। संवेगानन्तरमाङ्गिकानि परिवर्तनान्यभिव्यक्तानि भवन्ति। सर्पस्य प्रत्यक्षीकरणेन भयं जायते, भयाच्च कम्पः, पलायनप्रवृत्तिश्च।

जेम्सलैङ्गसिद्धान्तः

केचिद्विद्वांस इमं सरलं सिद्धान्तं न स्वीकुर्वन्ति। तेषु डेनमार्कनिवासिनो लैङ्गमहोदयस्य, अमेरिकावासिनो विलियमजेम्समहोदयस्य च मतमेतद्विपरीतम्। जेम्समहोदयः कथयति—"प्रत्यक्षीकरणानन्तरमेवाव्यवहितानि शारीरिकपरिवर्तनानि जायन्ते। यथा चैतानि परिवर्तनानि भवन्ति, तथैव तेषामनुभूतिः संवेगः। सम्पत्तिर्नश्यति, ततः शोको भवति, ततो रोदनम्। भल्लूकं दृष्ट्वा भीतिर्भवति, ततः पलायनम्। विरोधिसकाशादपमानः, ततः क्रोधः, तत आक्रमणम्। एषा सामान्या लोकबुद्धिः। परं तर्कसङ्गतं कथनमित्थम्—शोको भवति यतो रोदनम्, भीतिर्भवति यतः कम्पः, क्रोधो भवति यत आक्रमणमिति। नेदं कथनं युक्तियुक्तम्—वयं रुदिमः, आक्रमणं कुर्मः, पलायामहे वा; यतोऽस्मासु शोकः, क्रोधो भयं वा भवति। प्रत्यक्षीकरणानन्तरं जायमानाभ्यः शारीरिकदशाभ्य ऋते प्रत्यक्षीकरणस्वरूपं विशुद्धज्ञानात्मकं संवेगांशशून्यं भविष्यति" इति। एवं जेम्समहोदयानुसारेण संवेग आङ्गिकीनां संवेदनानां समूहः, उद्दीपकस्य वस्तुनः प्रत्यक्षीकरणानन्तरमान्तरिकेष्वङ्गेषु जायमानानां परिवर्तनानां परिणामश्च। जेम्समहोदयेन स्वपक्ष-

१. Maternal instinct.

२. Tenderness.

In Public domain. Digitization Muthulakshmi Research Academy

समर्थनायानेका युक्तयः पुरस्कृताः। वने काञ्चिद्द्रतिमतीं कृष्णाकृतिं वीक्ष्य भयोत्पत्तेः पूर्वमेव हृदयस्पन्दो निरुध्यते, उच्छ्वासश्च प्रवर्धते। नात्र प्रत्यक्षीकरणस्याङ्गिकप्रतिक्रियाणां चान्तवर्ती कोऽपि संवेगः। नह्याङ्गिकाभिव्यक्तिं विना संवेगकल्पनाऽपि सम्भवति। आङ्गिकाभिव्यक्ते-र्निरोधेन तत्सम्बद्धः संवेगोऽपि निरुद्धो भवति। आङ्गिकाभिव्यक्तेः कृत्रिमोत्पादेन तत्सम्बद्धाः संवेगा अप्युत्पद्यन्ते। नटा भयशोकादीनां कृत्रिमाभिव्यक्त्या तत्संवेगानप्यनुभवन्ति। मद्यादीनां सेवनेनामोदसाहसादयः संवेगा उत्पद्यन्ते। तत्राङ्गिक्यो दशाः संवेगकारणं भवन्ति। काश्चिदा-ङ्गिक्योऽव्यवस्थाः संवेगाञ्जनयन्ति; यथा—यकृद्दोषजन्योऽवसादः क्षोभम्, स्नायविका रोगाश्च निराशां भयञ्च। एताभिर्युक्तिभिर्जेम्समहोदयेन प्रतिपादितं यद्वस्तुनः प्रत्यक्षीकरणं प्रतिक्षेप[१]-क्रियारूपेणान्तरिकाङ्गेषु परिवर्तनानि विधत्ते। बोधस्नायवोऽस्य सूचनां मस्तिकं प्रेषयन्ति, तत आङ्गिक्यः संवेदना अनुभूयन्ते। वस्तुप्रत्यक्षीकरणेन सहैता आङ्गिक्यः संवेदनाः 'संवेगः' इति नाम भजन्ते।

डेनमार्कनिवासिना लैङ्गमहोदयेनापि स्वतन्त्ररीत्या विचारं कुर्वताऽयमेव सिद्धान्त आविष्कृतः। स कथयति—"अस्माकं हर्षविषादयोः, आनन्दपीडयोर्मानसिकजीवनान्तर्गतस्य सम-ग्रस्य संवेगात्मकपक्षस्याधारो वाहिनीपेशीतन्त्रम्[२]" इति। तन्मते संवेगस्य द्वे तत्त्वे—कारणम्, कार्यं च। तत्र कारणमिन्द्रियसंस्कारः, सहचारी विचारो वा। कार्यं प्रतिक्षेपत उत्पन्नानि वाहिनीषु पेशीषु परिवर्तनानि, तदाश्रितानि मानसिकानि शारीरिकाणि च परिवर्तनानि। नानयोर्मध्यस्था[३] काऽपि वेदनाऽस्तीति।

कालान्तरे जेम्समहोदयेन स्वमते स्वल्पं परिवर्तनं कृतम्। तेन स्वीकृतं यत्प्रत्यक्षी-करणमनुभूतिशून्यं न भवति। तत्र [४]वेदनांशोऽपि तिष्ठत्येव। वेदनायुक्तं प्रत्यक्षमाङ्गिकं परिवर्तनं जनयति। पश्चात् प्राप्तायां तत्सूचनायां मस्तिष्के संवेग उत्पद्यते। एष सिद्धान्तो 'जेम्सलैङ्ग-सिद्धान्त'नाम्ना व्यवह्रियते।

शेरिङ्गटन-कैननमतम्

अस्य सिद्धान्तस्य विरोध इङ्गलैण्डप्रदेशे शेरिङ्गटनमहोदयेन, अमेरिकादेशे च कैनन-महोदयेन कृतः। शेरिङ्गटनमहोदयेन शल्यक्रियया पशूनां मस्तिष्कम्, थैलमसाख्यस्याङ्गस्य च भागविशेषः, तेषां शरीरात् पृथक्कृतः; चर्मणो मांसपेशीभ्यश्च संवेदनात्मकोंऽशः पृथक्कृतः। तथापि पशुषु संवेगो न निरुद्धः। तेन सिद्धं यत्संवेगाय शारीरिकपरिवर्तनानि नावश्यकानि, कैननमहोदयेन शल्यक्रियया स्वतन्त्रनाडीमण्डलाद् हृदययकृद्देड्रीनलेत्यादयः सर्वेंऽशाः पृथक्कृताः, तथापि संवेगोदयोऽभूदेव।

कैनन-वार्डसिद्धान्तः

कैनन-वार्डमहोदयाभ्यां संवेगोदयविषये थैलमिकसिद्धान्तः प्रचारितः। अस्य सिद्धान्तस्य

१. Reflex action.
२. Vaso-motor-system.
३. Affective Intermediary.
४. Feeling tone.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपादकानां मतेन 'हाइपोथेलेमस[1]' इत्यान्तरिकमङ्गं संवेगोदयकेन्द्रः। संवेदनात्मकोऽनुभवः, संवेगात्मको व्यवहारश्च मिथः स्वतन्त्रौ। जेम्सलैङ्गसिद्धान्तानुसारेण शारीरिकपरिवर्तनानां ज्ञानेन संवेगात्मका अनुभवा जायन्ते। कैनन-वार्डमतेनोभौ सहैव भवतः।

मैकडूगलमतम्

मैकडूगलमतेन मूलप्रवृत्तयः[2] संवेगकारणम्। सर्वा अपि मूलप्रवृत्तय एकैकं संवेगं जनयन्ति। मैकडूगलमतानुसारं मूलप्रवृत्तयस्तत्सम्बद्धाः संवेगाश्चेमे सन्ति—

मूलप्रवृत्तिः	संवेगः
१ पलायनम्[3]	भयम्[4]
२ युयुत्सा[5]	क्रोधः[6]
३ विकर्षणम्[7]	अरुचिः[8]
४ जिज्ञासा[9]	आश्चर्यम्[10]
५ कामः[11]	कामुकता[12]
६ सन्तानरक्षा[13]	वात्सल्यम्[14]
७ आत्मलाघवम्[15]	विनीतता[16]
८ आत्मगौरवम्[17]	अभिमानः[18]

१. Hypothalamus.
२. Instinct.
३. Flight.
४. Fear.
५. Combat.
६. Anger.
७. Repulsion.
८. Disgust.
९. Curiosity.
१०. Wonder.
११. Sex.
१२. Lust.
१३. Parental instinct.
१४. Tenderness.
१५. Submision.
१६. Subjection.
१७. Assertion.
१८. Elation.

In Public domain. Digitization Muthulakshmi Research Academy

९ सामाजिकता[१]	एकाकित्वम्[२]
१० संग्रहवृत्तिः[३]	स्वामित्वम्[४]
११ रचना[५]	स्रष्टृत्वम्[६]
१२ हास्यम्[७]	विनोदः[८]
१३ भोजनान्वेषणम्[९]	बुभुक्षा[१०]
१४ शरणागतिः[११]	करुणा[१२]

जेम्सलैङ्गसिद्धान्तस्य समीक्षा

एषु जेम्सलैङ्गसिद्धान्तो नहि युक्तिसम्मतः। जेम्सलैङ्गसिद्धान्तेनेदमवगम्यते यत्संवेगः, तस्याभिव्यक्तिश्चाभिन्ना। परं स्टाउटमहोदयो वक्ति—"नहि सर्वा अप्याङ्गिकसंवेदनाः संवेगाः। नहि बुभुक्षोदरपीडा च संवेगात्मकोऽनुभवः।" यदि च संवेगेष्वाङ्गिकाभिव्यक्तिषु चाभिन्नता भवेत्, तदेकस्य संवेगस्यैकैवाभिव्यक्तिः स्यात्; परं भिन्नानामपि संवेगानामेकैवाभिव्यक्तिर्दृश्यते। अश्रूणि हर्षे, शोके, क्रोधे च समानान्येव निःसरन्ति। एवमाक्रमणं भये क्रोधे च समानं भवति। टिचनरमहोदयस्य कथनमप्यत्र महत्त्वपूर्णम्—"हृदयस्य तीव्रं स्पन्दनं नानिर्वार्यतया भयस्य संवेग एव। मुखे रक्तिमभावो न लज्जैव। केवलेन निरीक्षणेनाऽप्येतत् स्पष्टं भवति यन्न तीव्रतादृष्ट्या, न गुणेन, नाभिव्यक्तिकालेन वाङ्गिकप्रतिक्रियासंवेगमध्ये कोऽप्यरिहार्यः परिसंवादः[१३]"। जेम्समहोदयस्य धारणा यद्वस्तुदर्शनमात्रेण [१४]पूर्वसङ्घटितरचनाभिराङ्गिकाः प्रतिक्षेपा उत्पद्यन्ते। ते च संवेगान् जनयन्ति। परं प्रतिक्षेपक्रियाः समरूपा भवन्ति। व्यवहारे च दृश्यते यत्प्रतिक्रियाः प्रत्यक्षीकरणस्य परिस्थित्यनुसारं भवन्ति। वार्डमहोदयः कथयति—"जेम्समहोदयः कञ्चिद्भल्लूकं पिञ्जरान्तः पश्यति, ततश्च तमेवोन्मुक्तम्। प्रथमं स खाद्यं ददाति, द्वितीयाच्च पलायते" इति। संवेगाः प्रकृत्या परोपजीविन इत्यस्यापि जेम्समहोदयेनोपेक्षा कृता।

---

१. Social instinct,
२. Feeling of loneliness.
३. Hoarding.
४. Possession.
५. Construction.
६. Creativeness.
७. Laughter.
८. Amusement.
९. Food-seeking.
१०. Appetite.
११. Appeal.
१२. Distras.
१३. Correspondence.
१४. Pre-organised Mechanism.

In Public domain. Digitization Muthulakshmi Research Academy

नहि मार्जारी स्वाङ्काच्छिशूनामपसारेण क्रुद्धा भवति। मातृत्वप्रवृत्तौ बाधैव क्रोधजनिका। शेरिङ्गटनमहोदयेन कुक्कुरेषु कृताः प्रयोगा अप्येतस्य समर्थका एव। यत्संवेगजन्यो व्यवहारः, तस्याभिव्यञ्जिका गतयश्च नान्तरिकसंवेदनाधीनाः।

जेम्समहोदयस्य परिशोधितः सिद्धान्तः प्रत्यक्षीकरणस्याङ्गिकानां परिवर्तनानां च मध्येऽनुभूतितत्त्वं स्वीकरोति। इदमनुभूतितत्त्वं 'प्रारम्भिकः संवेगः' कथयितुं शक्यते। नेदं मतं सामान्यसिद्धान्ताद् भिद्यते। सामान्यमतेनापि—

(१) परिस्थितेः प्रत्यक्षीकरणम्, कल्पना वा।

(२) प्रारम्भिकं संवेगं जनयति।

(३) तस्याभिव्यक्तिराङ्गिकेषु परिवर्तनेषु भवति।

(४) पश्चात् प्रारम्भिकः संवेगः पुष्टो भवति।

मैकडूगलमहोदयस्य मतं स्वीकार्यकल्पमस्ति। सांवेगिकपरिस्थित्या मूलप्रवृत्तिर्जागरिता भवतीति सत्यम्; तथापि तस्य मूलप्रवृत्तिसूची न सर्वथा निर्दोषा। मूलप्रवृत्तयः संवेगाश्च परस्परं सम्बद्धाः; तथापि सर्वासां मूलप्रवृत्तीनां कश्चिद्विशिष्टः संवेगः, सर्वेषां च संवेगानां काचित् मूलप्रवृत्तिरिति न स्वीकर्तुं शक्यते। अनेका मूलप्रवृत्तयः संवेगसाहचर्यविरहिताः, एकस्मिन्नेव च संवेगेऽनेका मूलप्रवृत्तयो दृश्यन्ते। भयसंवेगे पलायनं गोपनं चोभे अपि दृश्येते।

संवेगः, स्वतन्त्रं स्नायुतन्त्रं[1] च

नवीनैरनुसन्धानैरिदं सिद्धप्रायं यत्संवेगानां स्वतन्त्रस्नायुतन्त्रस्य च मध्ये घनिष्ठः सम्बन्धः। स्वतन्त्रस्नायुतन्त्रं सामान्यस्नायुतन्त्रस्य भागविशेषः। इदं श्वसनरक्तसञ्चार-पाचनक्रियासँल्लग्नैर्ग्रन्थीन् चिक्कणमांसपेशीर्यावच्च गच्छद्भिः स्नायुभिर्निर्मितमस्ति। अस्य स्नायवो हृदयम्, रक्तवाहिनीः, फुफ्फुसम्, आमाशयम्, अन्त्रम्, अन्याँश्चान्तरिकानवयवान् यान्ति। इमे स्नायवोऽतिसूक्ष्मस्नायुसूत्रैर्निर्मिता भवन्ति।

स्वतन्त्रस्नायुतन्त्रस्य त्रयो भागाः सन्ति। अस्योर्ध्वभागः शिरस्यवस्थितः। अयं भागः मस्तिष्कस्य स्कन्धभागम्[2], उपतारापेश्या लालाग्रन्थिभिश्च योजयति। अनेनैवोपतारा सङ्कुचिता भवति, ग्रन्थयश्च लालां स्रावयन्ति। अस्य भागस्य स्नायव आमाशयस्य पेशीभिः ग्रन्थिभिश्च संयुक्ताः सन्ति। येनामामाशयग्रन्थयो जठररसमुन्मोक्तुं प्रेरिता भवन्ति। अन्ये स्नायवो हृदयेन संयुक्ताः, तेन च हृदयगतिर्मन्दायते। द्वितीयश्च सहभावी[3] भागः सुषुम्णाया मध्यभागेन संयुक्तः। सहभाविस्नायवो वक्षःस्थलस्तरे सुषुम्नाया उद्गच्छन्ति। ते हृदयगतिं वर्धयन्ति, आमाशयक्रिया-मुपरुन्धन्ति च। तृतीयश्च त्रैकविभागो[4] निम्नभागे सुषुम्णां जननाङ्गैर्मूत्रमलाशययोः पेशीभिश्च संयोजयति। तेषां क्रियाश्चोत्तेजयति। सहभावी विभागोऽन्त्रगतत्रैकविभागमाच्छादयति। स्वतन्त्र-

---

१. Automatic nervous system.

२. Stem.

३. Symathetic division.

४. Sacral division.

In Public domain. Digitization Muthulakshmi Research Academy

स्नायुतन्त्रस्य स्नायवः स्वेदग्रन्थीन्[1] कचानां लघुपेशीरक्षणोरुपतारिके[2] यावद्गच्छन्ति। उपतारिके कनीनिके विस्तारयतः, अश्रुग्रन्थिभ्योऽश्रूणि प्रवाहयन्ति, लालायाः पाचनस्य च ग्रन्थीनाम्, आमाशयस्य, आन्त्रजालस्य च पेशीनां पाचनक्रियाया निरोधं कुर्वन्ति। मूत्रमलाशययोः पेशीभिर्मूत्रमलोत्सर्गं कारयन्ति। रोमाञ्चमुत्पादयन्ति, स्वेदग्रन्थिभ्यस्त्वगुपरि स्वेदं प्रस्रावयन्ति।

संवेगः, [3]प्रणालीविहीनग्रन्थयश्च

लालाश्रुप्रस्वेदानां ग्रन्थयः प्रणालीयुक्ता भवन्ति। ते लघुनालीभिः स्वोत्पादितं[4] शरीरतले मुञ्चन्ति। परं प्रणालीविहीना ग्रन्थयः, ये [5]अन्तरासर्गिणोऽपि कथ्यन्ते, स्वोत्पादितं रक्तवाहिनीनां भित्तिभ्यः स्वयमेव रक्तप्रवाहे मुञ्चन्ति। तेषां रसा न्यासर्गाः[6] कथ्यन्ते। प्रणालीविहीनेषु ग्रन्थिषु उपवृक्क्य[7]-गल[8]-पोष[9]-प्रजन[10]-ग्रन्थयः संवेगेन विशेषरूपेण सम्बद्धाः सन्ति।

उपवृक्क्यग्रन्थी द्वौ स्तः। अनयोः केन्द्रभागो मज्जकः[11], आवरणं च त्वक्षः[12] कथ्यते। मज्जकादुत्पन्नो न्यासर्ग औपवृक्किः[13], त्वक्षाच्चोत्पन्नस्त्वाक्षि[14]रित्यभिधीयते। औपवृक्केः प्रभावो हृदयगतौ, रक्तप्रवाहे, आमाशये च भवति। श्रान्तपेशीनां कार्यक्षमतावर्धनं नेत्रतारिका[15]-विस्तारः, रोमाञ्चम्, स्वेदस्रावोऽस्य कार्याणि। अयं सहभाविनाडीनां परिणामं स्थायिनं विधत्ते। त्वाक्षिर्बलम्, कार्योत्साहम्, कामप्रेरणां च संरक्षति।

गलग्रन्थिः—ग्रीवामूले श्वासप्रणाल्याः सम्मुखे भवति। अस्य रसो गलग्रन्थिन्यासर्गः[16] कथ्यते। अस्मिन् 'आयोडीन'नामको मुख्यपदार्थो भवति। गलग्रन्थौ दोषपूर्णे शरीर-

---

१. Sweat glands.
२. Iris.
३. Ductless glands.
४ Products.
५. Endocrine glands.
६. Hormones.
७. Adrenal glands.
८. Thyroid.
९. Pituitary.
१०. Gonads.
११. Mudulla.
१२. Cortex.
१३. Adrenin.
१४. Cortin.
१५. Pupil.
१६. Thyroxin.

In Public domain. Digitization Muthulakshmi Research Academy

वृद्धौ बाधा भवति, बुद्धेश्च क्षतिर्जायते। रोगेण नष्टेऽस्मिन्नुत्साहः स्फूर्तिश्च नश्यति; मन्दता-मूर्खता-विस्मृतिशीलतादयश्चाक्रामन्ति। यदा च सोऽतिक्रियाशीलो भवति, तदा जनश्चञ्चलश्चिन्ताशीलोऽस्थिरश्च जायते।

उपगलग्रन्थयः—गलग्रन्थिसमीपे चत्वार उपगलग्रन्थयो भवन्ति। तेषु नष्टेषु पुरुषोऽतिशीघ्रमुत्तेजितः[१] क्षुब्धश्च भवति। उपगलग्रन्थिन्यासर्गः शामकः, गलग्रन्थिन्यासर्गश्चोद्दीपको भवति।

पोषग्रन्थिः—पोषग्रन्थिर्मस्तिष्कस्याधोभागसन्नद्धः, कपालमूले शिरसो मध्यस्थले गुहास्थितश्च। अग्रपोषः[२] पेशीर्बलवतीस्तथा जनमाक्रमणशीलमात्मसंयमिनं परिणामदर्शिनं च करोति। अस्याः पुष्टिश्च उत्साहहीनत्वमवसादञ्च जनयति।

प्रजनग्रन्थिः—प्रजनग्रन्थयः कामसंवेगैरतितरां सम्बद्धाः। "पुरुषन्यासर्गः[३] पुरुषत्वम्, स्त्रीन्यासर्गश्च[४] स्त्रीत्वं विकासयति। प्रजनग्रन्थिन्यासर्गाभावे व्यक्तिः स्वलिङ्गलक्षणरहिता षण्ढरूपा वर्धते" इति बुडवर्थमहोदयाः।

मूलप्रवृत्तेः सम्बन्धः शरीरव्यापारैर्भवति, संवेगस्य च मानसिकप्रक्रियया। संवेगोऽनुभूतेः, मूलप्रवृत्तिश्च कार्यस्य सङ्केतिका। संवेगे आन्तरिक्यः प्रक्रिया भवन्ति। मूलप्रवृत्तिश्च बहिः सञ्चालिता भवति।

संवेगानां लक्षणानि[५]

संवेगो मनसः शरीरस्य च क्षुब्धावस्था। मनसः सम्मुखं तादृशं किञ्चिद् भवति, यस्मिन् नियन्त्रणमशक्यं भवति। तदा मनस्यान्दोलनं जायते। तस्य प्रकाशनं च शरीरस्यान्यवस्थया भवति। स्टाउटमहोदयो निरूपयति यत्संवेगानां विस्तारो व्यापकः। एक एव संवेगोऽनेकैः कारणैरुदितो भवितुं शक्नोति। शिशूनां ताडनेन मार्जारी, क्रीडनकापहरणेन बालकः, शत्रुविहितां हानिं स्मृत्वा, शत्रुणा करिष्यमाणां क्षतिं कल्पयित्वा, तर्कावगमाक्षमे प्रतिपक्षिणि च साधारणा जना क्रुध्यन्ति। अत्र प्रत्यक्षीकरणादारभ्य प्रत्ययनं यावत् संवेगकारणानि क्रोधमेव जनयन्ति। एवमेव विविधाः परिस्थितय एकमेव संवेगं जनयन्ति। श्वा लाङ्गूलाकर्षणेन क्रुद्धो भवति। तस्य शिशूनां ताडनेनापि, तस्याहारापहरणेनाऽपि। एवमेव पुरुषो हिंस्रपशोर्बिभेति, रोगादपि, जीविकासाधननाशादपि।

संवेगात्मिकाया दशाया द्वे कारणे—स्ववेतनवृद्धिं ज्ञात्वा मनो हृष्टं भवति, सुरापानेनापि। प्रथमे हर्षे परिस्थितिप्रत्यक्षीकरणं कारणम्। द्वितीये चाङ्गिक्यवस्था[६]। द्वितीया 'मनोदशा[७]' पदेन अभिधेया, न तु संवेगनाम्ना।

---

१. Over–excitability.
२. Anterior Pituitary,
३. Male Hormanes.
४. Female Hormones.
५. Characteristics.
६. Organic state.
७. Mood.

In Public domain. Digitization Muthulakshmi Research Academy

संवेगाः स्वानन्तरं स्वतुल्यां मनोदशां त्यक्त्वा विरमन्ति । एवं तेषां प्रभावो बहुकालमवतिष्ठते । यदि केनापि कारणेन कोऽपि पुरुषः क्रुद्धो भवति, तदा तस्य क्रोधं न केवलं क्रोधकारणमेव प्रभावयति ; अपयातेऽपि क्रोधकारणेऽन्यां स्वाभिव्यक्तिं विषयीकरोति ।

स्वभावश्चतुर्विधः—वातुलः[१], तामसिकः[२], विषण्णः[३], [४]पित्तप्रधानश्च । वातुलः—चपलः, दुर्बलः, आशामयः, प्रसन्नश्च भवति । तामसिकः—क्षिप्रकारी, जागरूकः, बलवान्, क्रोधनश्च भवति । विषण्णः—मन्दः, अवसन्नः, शोकालुश्च । पित्तप्रधानः—अलसः, मन्दश्च । तस्मिन् धैर्यं सँल्लग्नता[५] च प्राप्येते ।

भावना– भावना स्थायिनी संवेगात्मिका प्रवृत्तिः । वस्तुविशेषे केन्द्रीभूतानां संवेगात्मकानां प्रवृत्तीनां सुव्यवस्थिता समष्टिर्वा भावनेति शैण्डमहोदयाः ।

मैकडूगलमतेन वस्तुविशेषस्यानुभवादुत्पन्ना तद्वस्तु प्रति स्थायिनी चेष्टात्मिका अभिवृत्तिर्भावना । भावनाऽर्जिता प्रवृत्तिः, यस्याः सृष्टिः कालक्रमेणानेकेभ्यः संवेगात्मकेभ्योऽनुभवेभ्यः क्रियाभ्यश्च भवति ।

ड्रेवरमहोदयस्य कथनानुसारेण भावना प्रवृत्तिर्नाम । अस्यां संवेगात्मकप्रवृत्तीनां विचारेण विचारसमष्ट्या वा साहचर्यं भवति । संवेगोऽल्पकालस्थायी उद्रेकः, भावना तु स्थायिनी संवेगात्मिका प्रवृत्तिः । संवेगश्चेतनाकेन्द्रेऽनुभूयते । भावना चेतनाद्वारस्याधः[६] स्थायितरावस्थायां विद्यमाना भवति । माताऽपत्येषु स्निह्यति, परं न सा सर्वदा स्नेहसंवेगमनुभवति, तथापि बालकेषु स्नेहस्य स्थायिनी संवेगात्मिका प्रवृत्तिस्तस्यां विद्यत एव । यदा पुत्रो रोगग्रस्तो भवति, तदा सा स्नेहमनुभवति, तस्य परिचर्याञ्च करोति । सरला भावना संवेगविशेषस्य पौनःपुनिकानुभवस्य परिणामः । जटिला च भावना बहुविधान् संवेगानुत्पादयितुं क्षमते ।

स्टाउटमहोदयानां मते भावना संवेगात्मकमनोदशाया भिद्यते । मनोदशा चेतनायाः सक्रिया वेदना । भावना तु तदाऽपि वर्तमाना भवति यदा मनोदशासंवेगौ नानुभूयेते । रुच्यरूची, घृणानुरागौ च संवेगात्मिकाः प्रवृत्तयः, न तु संवेगाः । यदा कोऽपि क्षुभ्यति, तदा स चेतनायां क्षोभमनुभवति । न तु घृणाया अनुरागस्य चैवमनुभवः शक्यः । भावनाश्चेतनाया अधःस्तरे वर्तन्ते ।

संवेगानां वर्गीकरणम्[७]

गुणक्रियानुसारेण मनोविद्भिः संवेगानां वर्गा विनिश्चिताः । मैकडूगलमहोदयेन ते

---

१. Sanguine.
२. Choleric.
३. Melancholic.
४. Phlegmatic.
५. persistence.
६. Threshold of consciousness.
७. Classification.

In Public domain. Digitization Muthulakshmi Research Academy

तिसृषु श्रेणीषु विभाजिताः। ताश्च श्रेण्यः—मौलिक[1]-मिश्र[2]-व्युत्पन्ना[3] इति। मौलिकानां संवेगानां मूलं मूलप्रवृत्तयो भवन्ति। न तेऽन्यान् कानपि पूर्वसंवेगात्मकाननुभवानाश्रयन्ते। अत एव ते मौलिकाः प्रारम्भिका वा कथ्यन्ते। भयक्रोधशोकहर्षविषादस्नेहादयोऽविकसिता मौलिकाः प्रतीयन्ते। मिश्राश्च द्वाभ्यामधिकाभ्यां वा मूलप्रवृत्तिभ्यामुत्पन्ना भवन्ति। मिश्राः संवेगा द्वयोरधिकानां वा सरलसंवेगानां योगस्य परिणामः। ते स्वघटनायै मौलिकसंवेगाना-श्रयन्ते, यथा घृणा। घृणा क्रोधभयारुचीनां संयोगस्य परिणामः। एवमेवोपक्षा क्रोधारुच्योः। व्युत्पन्नाः संवेगा न मूलप्रवृत्त्यात्मकक्रियासम्बद्धाः। तेषां सम्बन्धश्चेष्टात्मकप्रवृत्तिव्याघातेन भवति। इच्छाया उत्पत्तिः कस्या अपि चेष्टात्मकप्रवृत्तेर्जागरिततया भवति। व्युत्पन्नसंवेगा इच्छाभिः सम्बद्धाः। पित्रा ताडितो बालो भृत्यान् भर्त्सयति, सहपाठिभिश्च कलहायते।

संवेगः परोपजीवी[4] भवति। संवेगात्पूर्वं मूलप्रवृत्तेरावश्यकता भवति। सारमेयो रोटिका-पहरणेन गुरगुरायते, मार्जारी च तस्या बालानां ताडनेन। उभयत्रापि संवेगाभ्यां पूर्वं भोजना-न्वेषण-मातृकमूलप्रवृत्ती तिष्ठतः।

तीव्राः संवेगाः शरीरस्यान्तरिकेष्वङ्गेषु परिवर्तनानि जनयन्ति। तानि परिवर्तनानि चाङ्गिक्यः संवेदना उत्पादयन्ति। संवेगैः पेशीषु शैथिल्यम्, तानो वा जायते, येन पेशीसम्बन्धिन्यः संवेदना जायन्ते।

संवेगाः स्वभावेनास्थिराश्चञ्चलाश्च भवन्ति। तेषां रूपमपि परिवर्तते। अनुरागो घृणायाम्, घृणा चानुरागे परिणमते। एवमेव क्रोधो भये, भयञ्च क्रोधे परिवर्तते। मधुमक्षिकादंशनेन क्रोधो जायते, तेषां वधाय चेच्छा भवति; परं द्वितीय एव क्षणे तेषां वृन्दं दृष्ट्वा क्रोधो भये विपरिवर्तते, जनश्च पलायते।

संवेगजन्याः संस्काराः

यदि कस्यचिदनुभवा वारं वारमेकमेव संवेगं जनयन्ति, तदा तस्य तत्संवेगजन्यः स्वभावो भवति। संवेगजन्याः स्वभावा अभिवृत्तिः[5], मनोदशा[6], चित्तवृत्तिर्वा स्वभावो[7] भावना[8]-इत्याद्याख्या लभन्ते।

अभिवृत्तिः—अभिवृत्तिर्दृष्टिविशेषः। यदाऽनेकाः परिस्थितयो वारं वारमेकमेव संवेगं जन-यन्ति, तदा तेन पुरुषदृष्टिप्रकारः प्रभावितो भवति। स परिस्थितिविशेषे व्यवहारविशेषस्या-भ्यस्तो जायते। शुभकार्येषु वारं वारमायान्ति विघ्नानि समीक्ष्य तस्योन्नतिकार्याणि प्रति निराशा-

---

१. Primary.
२. Compound.
३. Derived.
४. Parasite.
५. Attitude.
६. Mood.
७. Temperament.
८. Sentiment.

In Public domain. Digitization Muthulakshmi Research Academy

पूर्णा दृष्टिर्जायते। एवमेव सत्कार्याणामशुभं परिणामं दरीदृश्यमानो जनो हृदयस्य श्रेष्ठवृत्तिषु विश्वासं परित्यज्य सर्वानपि सशङ्कदृष्टया द्रष्टुमारभते।

मनोदशा—मनोदशा संवेगस्य पश्चात्प्रभावः। इयं संवेगापेक्षया मन्दतरप्रभावा। परं तस्याः स्थितिकालः संवेगादधिकः। संवेगस्य विषयो निश्चितो भवति। श्वा पुच्छाकर्षेण क्रुद्धो भवति। मनोदशाया विषयो न किमपि निश्चितं वस्तु भवति। सा स्वयमेव स्वविषयं जनयति। क्रुद्धो जनो यत्किमपि पात्रं क्रोधाभिव्यक्तये निश्चिनोति। पित्रा ताडितो बालः स्वलेखनीं स्पृशतोऽपि कनीयसो भ्रातुः कपोले चपेटां ददाति। आङ्गिक्यव्यवस्थापि मनोदशां जनयति। कोष्ठबद्धतया पीडितो जनः स्वल्पेनैव कारणेनोत्तेजितो भवति।

स्वभावः—मनोवेगः संवेगस्य पश्चात्प्रभावः। स चाल्पकालं तिष्ठति। स्वभावस्थायित्वं गाम्भीर्यञ्चाधिकं भवति। स्वभावो जीवनस्य सर्वामभिवृत्तिं प्रभावयति। स्वभावः प्रकारविशेषेण विचारस्य, अनुभूतेः, सङ्कल्पस्य च स्थायिनी प्रवृत्तिः। अयं मानसिको गुणः। मेकडूगलमते मानवस्वभावस्य सामान्यपरिभाषेयम्—"स्वभावो मानवशरीरस्य समग्रासूतिषु[1] निरन्तरं जायमानानां चयापचयात्मकानां[2] रासायनिकानां वा परिवर्तनानां प्रभावस्य योगः" इति। शैण्ड-महोदयानां मते प्रकृतौ[3] स्वभावे च भेदः। प्रकृतिः सा यया जनः संवेगविशेषमनुभवति। स्वभावश्च तस्य......भवन्ति। आशाचिन्तादय इच्छाया भविष्यत्कालम्[4], पश्चात्तापसन्तापाद्याश्चेच्छाया भूतं[5] कालं सङ्केतयन्ति। अन्ये च मनोवैज्ञानिकाः संवेगाँश्चतुर्ष्वधोलिखितेषु भागेषु विभाजितवन्तः—स्वार्थी,[6] स्वार्थपरार्थी[7], परार्थी[8], निर्वैयक्तिकश्चेति[9]। तत्रात्मरक्षणात्मकः संवेगः स्वार्थी। तस्योत्पत्तिः स्वस्मै लाभप्रदस्य हानिकरस्य वस्तुनः प्रत्यक्षीकरणेन विचारेण कल्पनया वा जायते। भयक्रोधहर्षविषादादयः स्वार्थिनः संवेगाः। स्वार्थपरार्थी संवेगः परमतेन प्रबुद्ध आत्मतृप्तिजनकः, यथा—प्रशंसानुरागः, शक्तिस्पृहा वा। अन्यकल्याणाकल्याणविधायकस्य वस्तुनः प्रत्यक्षीकरणजन्यः परार्थी संवेगः; यथा—सहानुभूतिः। निर्वैयक्तिकः संवेगोऽमूर्तादर्शस्य विचारेण जन्यते; यथा बौद्धिक[10]नैतिक[11]धार्मिक[12]सौन्दर्यात्मकाः[13] संवेगाः।,

---

१. Tissues.
२. Metabolic.
३. Temper.
४. Prospactive.
५. Introspective.
६. Egoistic.
७. Ego-altruistic.
८. Altruistic.
९. Impersonal.
१०. Intellectual emotion.
११. Moral.
१२. Religiaus.
१३. Aesthetic.

In Public domain. Digitization Muthulakshmi Research Academy

अमूर्ताः संवेगाश्चतुर्विधा बौद्धिकनैतिकसौन्दर्यात्मकधार्मिकभेदेन । ते च क्रमेण सत्यशुभसौन्दर्यशुचितारूपाणामादर्शानां चिन्तनादुत्पद्यन्ते । केचिन्मनोविद इमान् संवेगान् भावनाशब्देन व्यवहरन्ति। एषु कौतूहलाश्चर्यसत्यानुरागादयो बौद्धिकाः संवेगाः। तेषु च हर्षविषादयोर्मिश्रणम्। विचारेषु विसंवादस्य[1] तार्किकः संवेगः पीडाकरो भवति, संवादस्य[2] सामञ्जस्यस्य च सुखदः। विचाराणां द्वन्द्वेनायासो जन्यते, विरोधिनां विचाराणामायासपूर्णेन समायोजनेन च सुखम्।

सौन्दर्यस्य संवेगः

यदा सौन्दर्यात्मिका भावनाः सुन्दरोदात्तोपहास्यानां वस्तूनां प्रत्यक्षीकरणेन विचारेण कल्पनया वा प्रबुद्धाः संवेगरूपेणात्मनः प्रकाशयन्ति, तदा ते सौन्दर्यात्मकसंवेगसञ्ज्ञां लभन्ते। सौन्दर्यात्मकः संवेगः चिरानन्दस्य स्रोतः। तत्प्रसूत आनन्दोऽस्वार्थप्रेरितः। तत्र सौन्दर्यमेवोद्देश्यम्, न तु साधनम्। सौन्दर्यात्मकेषु संवेगेषु सहोपभोग्यता[3], चिन्तनात्मिकाऽभिवृत्तिश्च[4] सन्निहिता भवति। चन्द्रमसः सौन्दर्यस्योपभोगमनेके जनाः सहैव कर्तुं प्रभवन्ति। तुरङ्गोद्वेलितस्य समुद्रस्य सौन्दर्यानन्दो मौनमेवोपभुज्यते। स चिन्तनमपि प्रेरयति। सुन्दरस्य वस्तुनस्त्रयो घटकाः[5] सन्ति—(१) पार्थिवं तत्त्वम्[6], (२) आकारात्मकं तत्त्वम्[7], (३) निर्देशात्मकं तत्त्वं[8] च। सुन्दरे वस्तुनि इन्द्रियगम्यत्वं भवति—यथेन्द्रधनुषि वर्णाः, सङ्गीते ध्वनिर्वा। तत्र कश्चिदाकारोऽपि भवति। वस्तुष्रूपलभ्यमानं सामञ्जस्यम्[9], अनुपातो[10] [11]विन्यासश्चाकृतिगत एव। इयमेवानेकतायामेकतायाः संमितेः (Symmetry) जनिका। निर्देशात्मकं तत्त्वं सुन्दरेण वस्तुना निर्दिष्टेषु विचारेषु संवेगेषु च प्राप्यते। काव्यसौन्दर्यसौन्दर्यं यथा तस्य शब्देषु, तालेषु च; तथैव तत्प्रेरितेषु विचारेष्वपि।

उदात्तस्य संवेगः

महतां वस्तूनाम्, यथोत्तुङ्गाद्रेर्विशालस्य दण्डकारण्यस्य वा दर्शनेन उदात्तस्य संवेग उत्पद्यते। तस्य द्वौ भेदौ —गणितशास्त्रीयः (Mathematical), प्रावेगिकश्च (Dynamical)। देशकाल्योर्विशालता गणितशास्त्रीयं संवेगम्, शक्तेर्गरिमा च प्रावेगिकमुदात्तसंवेगं जनयति।

---

१. Contradiction.
२. Consistency.
३. Shareability.
४. Contemplativs attitude.
५. Constituents.
६. Material element.
७. Formal element.
८. Suggestive element.
९. Hormony.
१०. Proportion.
११. Order.

In Public domain. Digitization Muthulakshmi Research Academy

उदात्तसंवेगः सुखदो दुःखदश्च । महत्ताऽस्माकं लघिमानं क्षुद्रत्वं च स्मारयति, भययुक्तमाश्चर्यञ्च जनयति । सुन्दरसंवेगस्तु सुखद एव ।

उपहास्यस्य(Comic) संवेगः

हास्यस्य जन्मासङ्गताद्वस्तुनो भवति । अयं संवेगोऽनुचितादसङ्गताद् विचित्राद्दोषाद् गतेर्वा भवति । वेनमहोदयोऽपि स्वीकरोति यद् गौरवोचितस्य जनस्य रुचेर्वा पतनाद्धास उत्पद्यते । हाब्स (Hobbes) मतेनापि हास्यस्य संवेगो गुरोरुत्कृष्टस्य च जनस्य वस्तुनो वा सहसाऽकल्पितात् पतनाद् भवति । न चोपहास्ये हास्यजनके (Laughable) वा तादात्म्यमस्ति । यत्किञ्चिदप्युपहास्यं तद् हास्यजनकमपि । न च सर्वं हास्यजनकमुपहास्यम् । अयं हर्षस्य संवेगः, यस्योत्पत्तिरसङ्गतेर्भवति [1] ।

नैतिकः संवेगः

शुभाशुभपरिचयान्नैतिकसंवेगोत्पत्तिः । कस्यापि नैतिकदृष्ट्या शिवस्य कर्मणः प्रत्यक्षीकरणमानन्दं वर्धयते । अयं संवेगो मानवीयकर्मसम्बन्धी । स शिवस्य करणायाशिवान्निर्वृत्तये प्रेरयति । नैतिकाः संवेगाः सामाजिका नियामकाश्च [2] भवन्ति । यतो नैतिकानि कर्माणि सामाजिकानि भवन्ति । तानि च कर्तुं जनो बाधितो भवति ।

धार्मिकः संवेगः

ईश्वरस्य चिन्तनादस्योत्पत्तिः [3] । धार्मिकाः संवेगा अनेके । ईश्वराद्भयं तस्य लोकातीतां शक्तिं समीक्ष्य, आश्चर्यं तस्याज्ञेयतया, श्रद्धा तस्य पूर्णतायाम्, विनयः समर्पणञ्च तत्रेत्यादयः संवेगाः सँल्लक्ष्यन्ते ।

बौद्धिकनैतिकसौन्दर्यात्मकधार्मिकादयः संवेगाः सामान्यतया 'भावना' इति व्याह्रियन्ते । ता भावना मूर्ताश्चामूर्ताश्च । अमूर्ता उपरि व्याख्याताः, मूर्ता घृणानुरागमैत्रीदेशभक्त्यादयो वस्तुजन्याः ।

संवेगानामभिव्यक्तिः

डार्विनमहोदयेन संवेगानामभिव्यक्तिविषये त्रयो नियमाः पुरस्कृताः । तत्रोपयोगिनां सहचारिस्वभावानां नियमः प्रथमः । काश्चित्संवेगाभिव्यक्तयो यथा क्रोधे मुष्टिबन्धः, भ्रुकुटिवक्रता, दन्तोपमर्दः, तेषां कार्याणामवशेषा यान्यस्माकं पूर्वजेभ्य उपयोगीन्यासन् । अस्माकं पूर्वजा मुष्टेर्दन्तानाञ्च प्रयोगं शस्त्रस्थाने शत्रौ कुर्वन्ति स्म । मुष्टिबन्धो दन्तप्रदर्शनं तस्यावशेष एव । द्वितीयश्च समानानुभूतिप्रेरकान् प्रति समानप्रतिक्रियानियमः । मधुरं वस्त्वास्वाद्य जनः शिरश्चालयति । पश्चाच्च स्वीकृत्यर्थे शिरश्चालनं भवति । उभे अप्यनुभूती समाने, समानरूपेणैवाभिव्यक्ते भवतः । तृतीयश्च विरोधनियमः । विपरीताः संवेगा विपरीतैर्विधिभिः प्रकाशिता भवन्ति । विपरीतानां संवेगानामभिव्यक्तयः परस्परं विपरीता भवन्ति । यथा क्रोधे मुष्टिबन्धः,

---

१. Incongruity.

२. Regulative.

३. Contemplation.

In Public domain. Digitization Muthulakshmi Research Academy

आघातोपक्रमः, पेशीनाञ्च तानत्वम्। भये च तद्विपरीतं भवति—मुष्टिमोक्षः, शरीरे निष्क्रियत्वम्, पेशीषु च शैथिल्यम्।

संवेगजाः शारीरिकप्रतिक्रियाः[1]

संवेगावस्थायामान्तरिकेष्वङ्गेषु परिवर्तनानि भवन्तीति पूर्वमुक्तमेव। तत्र प्रथमं श्वासगतौ वृद्धिर्जायते। आधुनिकैर्विपश्चिद्भिः संवेगकाले श्वासगतिपरीक्षणाय किञ्चिद् यन्त्रं निर्मितं यत् 'न्यूमोग्राफ[2]' इति कथ्यते। इदं यन्त्रं जनस्य वक्षःस्थले सन्निधीयते। एकञ्च [3]स्फिग्मोमैनोमीटराख्यं यन्त्रं हस्ते बध्यते। इमे द्वे अपि यन्त्रे एकेनान्येन यन्त्रेण सम्बध्येते, यस्मिन् परिवर्तनमङ्कितं भवति। परीक्षणेनेदं सिद्धं यत्संवेगकाले श्वासगती रक्तगतिश्च तीव्रा जायते। हृदयगतिरपि परिवर्तनं याति। नहि सर्वेषु संवेगेषु समानं परिवर्तनं जायते। [4]साइकोगैलवानमीटरनाम्ना यन्त्रेण त्वचो विद्युन्निरोधशक्तिरपि[5] परीक्ष्यते। संवेगकाले विद्युद्विरोधिक्षमताया ह्रासो जायते। अन्त्राणामवस्था बहुषु संवेगेषु तुल्यैव भवति। भये तीव्रसुखे चान्त्रेभ्यः प्रवहणशीलस्य रसस्य लालायाश्च स्रावो निरुद्धो भवति। कैनन-पातलोवादिकैर्महोदयैरेतद्विषये बहु परीक्षणं कृतम्।

संवेगजा विकाराः

संवेगादुत्पद्यमाना[6] विकारा अस्थायिनः स्थायिनश्च भवन्ति। अस्थायिनो विकाराश्चित्तवृत्तयो मनोदशा[7] वा कथ्यन्ते; स्थायिनश्च स्थायिभावाः, भावना[8] वा। एकदा मनसि प्रबुद्धः संवेगः स्वप्रभावं मनसि त्यक्त्वा विलीयते। अयं प्रभावः कञ्चित्कालमवतिष्ठते; ततः स्वयमेव नश्यति। यथा पत्नी पतये क्रुध्यति। पत्युः केनापि व्यवहारेण तस्या मनसि क्रोधसंवेग उत्पन्नः। तेन तस्या मनादेशा क्रोधमयी जाता। क्रोधे शान्तेऽपि क्रुद्धा मनोदशा तिष्ठति। तस्यां मनोदशायां सा समीपमागतं पुत्रं स्वल्पेऽपि दोषे ताडयति। यदि तस्या मनोदशा तदा क्रोधमयी नाभविष्यत्तदा सा तस्मा अपराधाय बालं नाताडयिष्यत्। ताडनानन्तरं क्रोधमयी मनोदशा स्वयमेव शाम्यति।

स्थायिभावाः

यदा च कश्चिद्भावो मनसि वारं वारं प्रादुर्भवति, काचिदेकैव वा मनोदशा दीर्घकालं मनसि तिष्ठति, तदा कश्चिद्विशिष्टः स्थायिभावो जायते। यं कश्चिद् वारं वारं क्रोधसंवेग उत्पद्यते

---

१. Physiological reactions.

२. Pneumograph.

३. Sphygmomano-meter.

४. Psychogalvano-meter.

५. Electrical resistance.

६. products of emotions.

७. mood.

८. Sentiment.

In Public domain, Digitization Muthulakshmi Research Academy

तं प्रति वैररूपः स्थायिभावो मनसि पदं लभते। यश्च कश्चिद्वारं वारं त्रासयति, तं प्रति घृणाभावः। स्थायिभावानामाश्रयः पशवः, मनुष्याः, जडाः, अमूर्ता आदर्शा वा भवितुं शक्नुवन्ति। भगिनीम्, देवमूर्तिम्, गाम्, विद्याञ्च प्रति श्रद्धारूपः स्थायिभावोऽनेकेषु दृश्यते। शैण्डमतानुसारं स्थायिभावाः स्वभावविशेषाः, ते च संवेगजन्याः। मनुष्यस्य चरित्रञ्च स्थायिभावानां समष्टिमात्रम्। यस्य यादृशाः स्थायिभावास्तादृशमेव तस्य चरित्रम्।

स्थायिभावाः शुद्धा विकृताश्च भवन्ति। अस्माकं नीतिसदाचारविषयकधारणाविरुद्धाः स्थायिभावा विकृता इति कथ्यन्ते। यथा कस्यचिन्मनसि स्वगुरुं प्रति घृणाभावः, परं स घृणाभावः सर्वमान्यगुरुविषयकश्रद्धाविरुद्धः, अतो न स्पष्टं प्रकाशयितुं शक्यते। एवम्भूतोऽवाञ्छनीयो भावो मनस्यन्तर्निगूढ एव तिष्ठति। क्रमेण च तस्य सत्ताऽपि विस्मर्यते। मनःशास्त्रे स स्थायिभावः, यस्योपस्थितिमपि जनो न स्वीकरोति स्पष्टं जानाति च, विकृतः स्थायिभावः कथ्यते। स ग्रन्थिरूपं[1] लभते। सर्वेषामपि मनस्येवम्प्रकारा ग्रन्थयो भवन्ति ये मनस्यन्तः सङ्घर्षं जनयन्ति, विवेकप्रतिकूलानि कार्याणि च कारयन्ति। विकृतानां स्थायिभावानामन्येष्वारोपणमपि दृश्यते। पितरं प्रति घृणाभावः पितृतुल्येष्वन्येष्वप्यारोपितं भवति। कश्चित् संन्यासिनं प्रति द्वेषबुद्धिः संन्यासिमण्डलीं प्रति द्वेषबुद्धिं जनयति।

संवेगपरिणामः

मनुष्याणां मानसिकं शारीरिकञ्च स्वास्थ्यं संवेगाधीनम्। तेषां नियन्त्रणेनैव जनः समाजे सम्मानमप्रतिष्ठां वा लभते। यो वारं वारं क्रुद्धो भवति तमनेके रोगा आक्रामन्ति। ट्राइन-महोदयेन 'इन ट्यून विथ दि इनफिनिट' नामके ग्रन्थे लिखितं यत्क्रोधावेशे एकस्या मातुर्दुग्धं तथा विषमयं जातं यत् तस्य पानेन शिशोर्मृत्युर्जातः। एवमेव केचित् संवेगाः पाचनशक्तिमुद्दीपयन्ति, शरीरपोषणे च सहायका भवन्ति। अनुरागावस्थायां शरीरमानन्दपूर्णं भवति। तदा शरीर एवंविधानां रसानामुत्पत्तिर्भवति ये पाचनक्रियायां सहायका भवन्ति।

संवेगानां प्रशिक्षणम्

बाल्यावस्थायां बालानां ये संवेगा दान्ता भवन्ति तेऽलक्षिता एवान्तः सङ्घर्षं कुर्वन्ति, अवसरं प्राप्य च विस्फुटन्ति। बहूनां मानसिकरोगाणामुत्पत्तिः संवेगानामनियन्त्रणेनैव जायते। मनोविदः संवेगानां सदुपयोगस्यानेकानुपायान् वर्णयन्ति। ते च निरोध[2]-मार्गान्तरीकरण[3]-शोध[4]-अध्यवसाय[5]-रचनादयः[6]। तत्र हानिकराणां संवेगानामुत्पत्तिर्यथा न स्यात्तथा विधानेन

---

१. Complex.

२. Inhibition.

३. Redirection.

४. Sublimation.

५. Mental occupation.

६. Catharsis.

In Public domain. Digitization Muthulakshmi Research Academy

संवेगानां निरोधो भवति। संवेगानां पुनः पुनर्जननेन मनो निर्बलं जायते। अतस्तेषां निरोधः प्रथम उपायः। मार्गान्तरीकरणं संवेगविषयाणां परिवर्तनम्। क्रोधसंवेगो दुष्टान् प्रति क्रोधे परिवर्तयितुं शक्यः। कदाचित् संवेगस्य स्वरूपं तथा परिवर्तितं भवति, यथा तस्य मूलसंवेगो नाभिज्ञायते। एतादृशं परिवर्तनं शोध इति कथ्यते; यथा—प्रेयस्यनुरागस्य भक्तौ परिवर्तनम्, यथा वा कामुकतायाः सङ्गीतकाव्यकलास्वरूपग्रहणम्। चतुर्थश्चोपायोऽध्यवसायः। यः सदा कार्यरतस्तिष्ठति, तमुद्वेगकराः संवेगा न व्यथयन्ति। येषाञ्च संवेगानां शक्तेर्व्ययोऽन्येन केनापि प्रकारेण न भवति तेषां रेचनमावश्यकम्। हासोपहासौ हर्षपूर्णानि पर्वाणि च रेचनस्यैव साधनानि। केचिच्च गालिप्रदानेनाश्लीलपरिहासैर्वा रेचनक्रियां विदधति ॥

In Public domain. Digitization Muthulakshmi Research Academy

षोडशोऽध्यायः

सहजाः क्रियाः

प्रतिक्रियाः

अर्वाचीनानां मनोविदांमयं सिद्धान्तो यत्सर्वा अप्युत्तेजनक्रिया[१] मनसि प्रतिक्रियां जनयन्ति। उत्तेजना त्वर्थसन्निकर्ष एव। केनापि ज्ञानेन्द्रियेणार्थस्य सन्निकर्ष उत्तेजना निगद्यते। उत्तेजना मनसा गृह्यते। उत्तेजनया मनसि क्रियात्मिका[२] वृत्तिरुत्पद्यते। तेन बहिर्जगति किञ्चित्परिवर्तनं जायते। बाह्योत्तेजनायाः फलं संवेदना[३] भवति। तस्याः प्रतिक्रिया[४] च किञ्चिच्छारीरिकं कार्यम्, बाह्यं परिवर्तनं वा भवति। एवं सर्वापि प्रतिक्रिया कस्याश्चिदुत्तेजनाया बाह्यप्रेरणाया वा परिणामो भवति। यथा कश्चित् कीटोऽस्माकं हस्ते रिङ्गति। यथैव कीटस्य सम्पर्कोऽस्मद्धस्तेन भवति, तथैवाविलम्बं हस्त उत्क्षिप्यते। हस्तोत्क्षेपे बाह्योत्तेजनक्रियायास्तत्प्रतिक्रियायाश्च स्वरूपं स्पष्टमवगम्यते।

प्रतिक्रियाया भेदाः

प्राणिक्रियाणां कारणान्यनेकानि। काचित् क्रिया पूर्वानुभवमूला भवति। कस्याश्चिन्मूलं प्राणिनः स्वभावगतं वैशिष्ट्यम्। कस्याश्चित् कारणं बाह्योत्तेजना भवितुं शक्नोति। कस्याश्चिच्चान्तरिकी आवश्यकता। काश्चित् क्रियाः प्राणी स्वेच्छया करोति, काश्चिच्च स्वतो जायन्ते। कस्याञ्चित् तस्य सम्पूर्णं शरीरं स्पन्दमानं भवति। कस्याञ्चिच्च कानिचिदेवाङ्गानि। अन्यया दृष्ट्या मानसिक्यः क्रिया द्वयोर्वेगयोर्विभाजिता भवन्ति—

(१) स्वतश्चालिताः[५], ऐच्छिक्यश्च[६] क्रियाः। (२) जन्मजाताः[७], अर्जिताश्च[८] क्रियाः। अयं भेदः प्राबल्यसापेक्ष एव। बहुयोऽनुभवप्राप्ता अर्जिता वापि क्रियाः स्वतो जायन्ते। स्वतो जायमाना अपि क्रिया अर्जिताः, जन्मजाता वा भवन्ति।

छात्रः प्रातःकाले उत्थाय, वस्त्राणि परिधाय विद्यालयं गच्छति। गृहाद्बहिर्निर्गत्य राजमार्गमागतः स इतस्ततोऽवलोकयति, कस्मिंश्चिद्विचारे वा मग्नो भवति। यदा च मार्गे वाहनानि पृष्ठतोऽग्रतो वा यान्ति, तदा विनैव विचारेण स वामतो दक्षिणतो वापसरति। एतदपसरणं

---

१. Stimulus.
२. Conative.
३. Sensation.
४. Reaction.
५. Automatic.
६. Voluntary.
७. Innate.
८. Learnt.

In Public domain. Digitization Muthulakshmi Research Academy

यन्त्रवदेव भवति। जायमानायामप्यपसरणक्रियायां तस्या विचारगतिरबाधितैव भवति। सहसैव कस्यचिज्जन्तोरुपरि पादः पतति, तदा विनैवायासेन विचारेण वा झटिति पाद उत्क्षिप्तो भवति। नेत्रयोर्मीलनमुन्मीलनं चात्राधगतिना निरन्तरं जायते। नैतदर्थं विचारस्यावश्यकता भवति। नाट्यगृहेऽभिनयं पश्यन् द्रष्टा तथा भावमग्नो भवति यथात्मानं विस्मृत्य सोऽप्यभिनेतृवदाचरितुं प्रारभते। कदाचिच्च प्रसन्नो भूत्वाऽविचारेणैव करतालिकावादनं करोति।

आसु क्रियासु वस्त्रधारणं चलनं चैच्छिकम्। एताः क्रियाश्चेतनापूर्विकाः। मार्गे चलनम्, वाहनागमने इतस्ततोऽपसरणम्, पादोत्क्षेपः, निमीलनोन्मीलने, करतालिकावादनं च स्वतो जायमानाः क्रियाः। आसु काश्चित् स्वल्पं मस्तिष्कसाहाय्यमपेक्षन्ते; काश्चित्सुषुम्णयैवं सम्पाद्यन्ते। एतत्तु पूर्वं प्रतिपादितमेव यदुत्तेजनया संवेदनशीला[1] नाड्यः प्रेरिता भवन्ति। आसां नाडीनामेकः प्रान्तस्त्वचा सम्बद्धो भवति, अपरश्च सुषुम्णया नाड्या। अत्रास्याः सम्बन्धः क्रियावाहिन्या[2] नाड्या भवति। संवेदनशीला ज्ञानवाहिनी वा नाडी क्रियावाहिनीं प्रेरयति। येनाङ्गेषु गतिर्जायते। याश्च क्रियाः स्वतः स्फूर्ताः सन्ति, तास्तु सुषुम्णास्तरे एव जायन्ते, न तासु मस्तिष्कं क्रियाशीलं भवति।

स्वतश्चालिताः क्रियाः[3]

श्वसनम्, रक्तसञ्चारः, पाचनं च सहजक्रिया। नासां विषये चेतनाऽपि सामान्यतया भवति। नवजातः शिशुरपि कर्माण्येतानि करोत्येव। तस्य शरीराभ्यन्तरे एते व्यापाराः स्वयमेव जायन्ते। एतदर्थं शरीरान्तर्गता स्नायविक्युत्तेजना तिष्ठति। एतेषां व्यापाराणां विषये जातेषु विघ्नेष्वेव चेतना प्रबुद्धा भवति। यथा जातायामुदरपीडायां पाचनविषयणी चेतना जायते। यद्वा निरुद्धे श्वासे केनापि कारणेन ध्यानं तत्राकृष्टं भवति। रक्तसञ्चारगतौ मन्दायां तीव्रतरायां वा रक्तसञ्चारस्य भानं भवति। सामान्यतया सहजा एताः क्रिया न प्राणिनो ध्यानमाकर्षन्ति।

सहजक्रियासु मस्तिष्कस्योपयोगो न भवतीति पूर्वं प्रतिपादितम्। प्राणिविज्ञानिभिर्मण्डूकस्य मस्तिष्कं शरीरादपसार्य पादो यदा सूच्या भेदितस्तदापि तेन पाद इतस्ततः क्षिप्तः। तेन स्पष्टं यन्मस्तिष्काभावेऽपि सहजाः क्रिया भवन्ति। नेत्रस्योपताराऽपि प्रकाशं प्राप्याकारे वर्धते, अन्धकारे च सङ्कोचं याति। तेन सम्मुखस्थस्य वस्तुनस्तारायां प्रतिमायै यावान् प्रकाशोऽपेक्ष्यते तावानेवान्तः प्रविशति।

हिक्काऽपि सहजक्रिया। तया नासान्तःप्रविष्टं वस्तु बहिर्निष्क्रान्तं भवति, न च तन्मस्तिष्के प्रविश्य रोगमुत्पादयति। लालास्रावः, नेत्रोन्मीलननिमीलने, अश्रुप्रवाहः, जृम्भा, वमनम्, कण्डूयनमित्यादीनि कर्माणि सहजानि। तानि च शरीररक्षायै बहुमूल्यानि। विचारानुपस्थितावपि तानि यन्त्रचालितानीव स्वयं सम्पद्यन्ते। सहजा क्रिया 'व्यापारिकः प्रतिक्षेपः[4]' इत्यप्यभिधीयते कैश्चित्।

---

१. Sensory.

२. Motor.

३. Automatic actions.

४. Phyisiological reflex.

In Public domain. Digitization Muthulakshmi Research Academy

अनियमिताः क्रियाः[१]

एताः क्रियाः शरीराभ्यन्तरे संगृहीतायाः शक्तेरनायासेन प्रकाशनाज्जायन्ते। नैतासां कारणं बाह्योत्तेजना भवन्ति। अण्डेषु शावकानां गतयः, गर्भे च बालानां गतयस्तथाविधा एव। नहि लक्ष्यस्य पूर्वदर्शनान्मानसिकाद्वा कारणादासामुत्पत्तिः, न चान्येन केनाऽपि कष्टेन। केचिद् बाह्योत्तेजनाजन्यानि निरुद्देश्यानि विशृङ्खलानि कर्माण्यपि अनियमितासु क्रियासु परिगणयन्ति। यथा बहुवर्णं क्रीडनकं दृष्ट्वा बालकस्य निरुद्देश्या गतयः। गर्भावस्थायां बालकस्य हस्तपादप्रसरणं न मानसिकप्रेरणापरिणामः। तत्तु तस्य कर्मकेन्द्रेषु सञ्चितायाः शक्तेः प्रकाशनमात्रम्। जातस्य बालकस्य हस्तपादप्रचालनानि मानसिकप्रेरणाजन्यानि। अनियमिताः क्रिया बालानां स्वास्थ्यवृद्धौ सहायिका भवन्ति। ताभिः पेश्यो बलवत्यो जायन्ते। भविष्यत्कालिकानां सोद्देश्यगतीनामप्याधार इमा एवानियमिता गतयः। परं नैतासां प्रयोगो बुद्धिपूर्वकः सप्रयोजनो वा। ऐच्छिककर्माधारभूतान्येतानि कर्माणि त्वनैच्छिकान्येव।

प्रतिक्षेपक्रियाः[२]

कस्याश्चिद् बाह्योत्तेजनायास्तात्कालिकी पैशिकी[३] ग्रान्थिकी[४] वा प्रतिक्रिया 'प्रतिक्षेपक्रिया' कथ्यते। सा चोत्तेजनाऽव्यवहितैव भवति। यथा तृणे कर्णान्तःप्रविष्टे कण्डूः, दीप्तिमद्वस्तुना वा नेत्रनिमीलनम्। उत्तेजना च बाह्यवस्तुजन्या आङ्गिकी वा प्रतिक्षेपक्रियां जनयति। बाह्यवस्तुजन्या यथा—प्रकाशातिशयेन पक्ष्मणोरधः पतनम्। आङ्गिकी चोत्तेजना यथा—शीतेन कण्ठशोथे कासः। एषा पैशिकी प्रतिक्रिया। ग्रान्थिकी प्रतिक्रिया यथा—नेत्रे रजःपातेऽश्रुप्रवाहः, अम्लवस्त्वास्वादनेन लालास्रावो वा।

प्रतिक्षेपक्रियाः संवेदनापूर्विकाः संवेदनाविरहिताश्च भवन्ति। येषां प्रतिक्षेपाणां बोधो भवति, येषु चेतना वा प्रबुद्धा भवति, ते संवेदनाप्रतिक्षेपाः। कासः, हिक्का, जृम्भेत्यादयः संवेदनाप्रतिक्षेपाः। एतेषां ज्ञानं तु भवत्येव। चेतनापूर्वकमेवैताः क्रिया भवन्ति। चेतनैषां जननी। काश्चित्क्रिया न चेतनाजन्याः, चेतना तासामवगन्त्रीति सत्यम्। पक्ष्मपातस्तथाविधैव क्रिया। पक्ष्मपातो नहि चेतनापूर्वकः। ज्ञानं तु तस्य भवत्येव। शरीरव्यापारिकः प्रतिक्षेपः संवेदनारहितो भवति। यथा कनीनिकाप्रतिक्षेपः। प्रकाशे कनीनिकाकार आयततरो भवति, तमसि च सङ्कुचितः। न तस्य संवेदना जायते। अत एव व्यापारिकः प्रतिक्षेपः सहजक्रियेति निगद्यते।

प्रतिक्षेपचापः[५]

सामान्यायां प्रतिक्षेपक्रियायामेकं ग्राहकमिन्द्रियम्, एकोत्तेजना, एको ज्ञानवाही तन्तुः, एकश्च क्रियावाही नाडीतन्तुः सम्मिलितो भवति। एवंविधा क्रिया 'साधारणः प्रतिक्षेपचापः' इति कथ्यते। मानवेषु साधारणः प्रतिक्षेपचापः प्रायो न दृश्यते। यदि काचिच्छूकशिखा पादे

१. Random actions.
२. Reflex actians.
३. Muscular.
४. Glandular.
५. Simple reflex are.

In Public domain. Digitization Muthulakshmi Research Academy

निविशते तदैकः पाद उत्क्षिप्यते, अन्येन च शरीरभारो धार्यते। अत्र एक एव ग्राहक उत्तेजितः, तथापि तज्जनितसंवेदनाप्रभावेणानेके क्रियावाहिनाडीतन्तवः क्रियारता अभूवन्।

प्रतिक्षेपक्रियासाधनानि

साधारणप्रतिक्षेपक्रियार्थमुत्तेजनाग्राहकज्ञानक्रियावाहितन्तूनामावश्यकता भवति। जटिलानां प्रतिक्षेपक्रियाणां सम्पादनाय पञ्चाङ्गानि क्रियारतानि भवन्ति। तत्र प्रथमं ज्ञानेन्द्रियं यद्बाह्याघातं गृह्णाति। यस्य च परिवेशेन तात्कालिकः सम्बन्धो भवति। द्वितीयं चाङ्गं बोधस्नायुतन्तवः। ज्ञानस्नायुतन्तुभिरेव बाह्याघात आभ्यन्तरिकस्नायुकेन्द्रं यावन्नीयते। एते तन्तवोऽन्तर्गामिणः[1], ज्ञानतन्तवो वा कथ्यन्ते। तृतीयमङ्गं च स्नायुकेन्द्रम्। चतुर्थं च कर्मस्नायुकोषः। अयमेव स्नायुकोष आघातं स्नायुकेन्द्रान्मांसपेशीर्यावन्नयति। इमे च [2]बहिर्गामिणस्तन्तवोऽभिधीयन्ते। पञ्चममङ्गं मांसपेश्यः, याः कर्मस्नायुतन्तुभ्यः प्राप्तानामावेगानामनुसारं कार्यं कुर्वन्ति। यदि कुत्रापि शरीरे शूलं निवेष्टुमुपक्रमते, तदा स्नायुप्रान्तराणि समुत्तेजितानि भवन्ति। सा चोत्तेजना स्नायविकशक्तौ परिणमति। एषा शक्तिश्च ज्ञानतन्तुमार्गेण सुषुम्णां प्राप्नोति, यत्र तस्याः सम्पर्कः कर्मस्नायुतन्तुभिर्जायते। तेन पथा च सा मांसपेशीं प्राप्नोति। ततो मांसपेश्यां सङ्कोचो जायते। ततस्तस्मात् स्थानात्त्वगपसार्यते, यत्र शूलमन्तर्निविशते।

प्रतिक्षेपगुणाः

(१) प्रतिक्षेपाणामुत्पत्तिर्नह्येकस्मिन्नेव काले भवति। शरीरवृद्ध्यनुसारेण तेऽपि क्रमश उत्पद्यन्ते। छीत्कारः, कासश्च जन्मनः कतिपयदिवसाभ्यन्तर एवोदितः। नेत्रनिमीलनोन्मीलने च द्वितीये मासि। एवमन्येऽपि प्रतिक्षेपाः।

(२) ते च न केवलं बाह्योत्तेजनाश्रिताः। शरीरावस्थाधीना अपि ते। स्वल्पोऽपि पत्रपतनशब्दो भीतं भीषयति।

(३) प्रतिक्षेपाः शरीरायोपयोगिनो भवन्ति। कासः कण्ठात्, छीत्कारं च नासायाः, अश्रूणि च नेत्राभ्यां मलं बहिर्निष्कासयन्ति।

(४) प्रतिक्षेपाश्चेतनानियन्त्रणं न स्वीकुर्वन्ति। शरीरव्यापारकाः प्रतिक्षेपाश्चेतनारहिताः। संवेदनाप्रतिक्षेपाश्चेतनापूर्वकाः सन्ति, परन्तु न ते चेतनप्रतिक्रियारूपाः।

(५) ते चाव्यवहिताः प्रतिक्रियासमरूपाश्च। एकस्याः प्रतिक्रियाया एक एव निश्चितः प्रतिक्षेपो भवति। तीव्रः प्रकाशः कनीनिकां संकोचयत्येव।

(६) प्रतिक्षेपा न सहेतुकाः[3], ऐच्छिका नापि शिक्षिता भवन्ति। नहि तेषु लक्ष्यस्य पूर्वज्ञानं सन्निविष्टं भवति। प्रतिक्षेपः सरला स्थानविशेषगा च प्रतिक्रिया। न तस्मिन् क्रियाणां जटिला परम्परा विद्यते।

---

१. Afferent.

२. Efferent.

३. Purposive.

In Public domain. Digitization Muthulakshmi Research Academy

नियन्त्रिता प्रतिक्रिया[१]

सर्वोऽपि बाह्याघातः प्रतिक्रियां जनयतीति कथितम्। कयाचिदुत्तेजनया काचित् प्रतिक्रिया स्वभावतो जायते। मुखे मांसग्रासन्यासेन शुनो मुखे तथैव लालास्रावो भवति, यथा कस्यचित् पुरुषस्य मुखे भोजनस्थापनेन। यदा पुरुषो बुभुक्षितो भवति, भोजनदर्शनेन भोजनप्रदातुर्वा दर्शनेन तस्य लाला स्रवति। शुनोऽपि तथैव भवति। एषा स्वाभाविकी, अनियन्त्रिता वा प्रतिक्रिया। परं यदा सा प्रतिक्रिया स्वाभाविकोत्तेजनायाः स्थाने प्रतिष्ठितया[२] कयाचिदन्ययोत्तेजनयोत्पद्यते तदा सा प्रतिक्रिया 'नियन्त्रिता प्रतिक्रिया' इति निगद्यते। रूसदेशीयेन पैवलोवमहोदयेनास्मिन् विषये परीक्षणं कृतम्। तेन दृष्टम्—यदा शुने भोजनं दीयते तदा तन्मुखाल्लाला स्रवतीति। तेन न केवलं भोजनदानकाल एव, भोजनदर्शनेनापि स्रवन्ती लाला दृष्टा। तदा तेन प्रतिवारं भोजनप्रदानकाले कश्चिद्घण्टिकाशब्दः कृतः। अनेकवारान् भोजनकाले घण्टिकाशब्दं कृत्वाऽन्ते तेन विनैव भोजनदानेन केवलो घण्टिकाशब्दो विहितः। तदाऽपि सारमेयमुखाल्लाला स्रवितुमारब्धा। एवमुत्तेजनाया भोजनदानरूपायाः स्थानेऽधिष्ठितो घण्टिकाशब्दोऽपि लालास्रावकारणं जातः। एवमेव विद्युत्प्रकाशः, त्वचि शीतस्पर्शो वा स्वाभाविकोत्तेजनायाः स्थान्नापन्नो जातः। एवं बहून्युदाहरणानि नियन्त्रितप्रतिक्रियाया अवलोक्यन्ते।

यदा परीक्षकः कतिपयदिनानन्तरं घण्टिकां वादयति, न तु भोजनं ददाति; तदा शनैः शनैर्वादितायामपि घण्टिकायां लालास्रावो न जायते। एवं प्रभावरहितोत्तेजना प्रभावशालिनी सम्पद्यते, प्रभावशालिनी च प्रभावरहिता। नहि सुस्थापिताऽपि नियन्त्रितप्रतिक्रिया तथा स्थिरा भवति स्वाभाविकी। यथा सा शनैः शनैः स्थापिता भवति, तथा नश्यत्यपि। भोजनदर्शनेन, तद्गन्धेन, दातुर्वा पदध्वनिना, दातुर्दर्शनेन वाऽपि लाला स्रवति; परं यदा वारं वारं भोजनं प्रदर्श्यते, न तु दीयते, तदा भोजनदर्शनमपि प्रतिक्रियां नोत्पादयति।

यथा काचित् प्रतिक्रिया स्थानापन्नयोत्तेजनयोत्पन्ना भवति, तथैव काचिदुत्तेजनाऽपि भिन्नां प्रतिक्रियां जनयितुं शक्नोति। यदा कश्चिच्चिकित्सको गृहमायाति, शिशुस्तं स्वपितुर्मित्रं मत्वा तदङ्के सहर्षं क्रीडति। वारं वारं तं गृहागतं दृष्ट्वा हृष्यति। परं यदा रुग्णायाः स्वमातुः करे तं सूच्या निक्षेपं कुर्वन्तं पश्यति तदा तस्माद् बिभेतुमारभते। अत्र हर्षप्रतिक्रियाजनकश्चिकित्सको भीतिरूपां प्रतिक्रियां जनयितुमारब्धवान्। अत्रोत्तेजना स्थानापन्नया प्रतिक्रियया सँल्लग्ना बभूव।

प्रतिक्रियाया नियन्त्रणस्य बहून्युदाहरणानि लोके दृश्यन्ते। जन्मतो बालकः पतनादुच्चैः शब्दात् पीडायाश्च बिभेति। परं यदैतानि भयकारणान्यन्याभिरुत्तेजनाभिः सम्बद्धानि जायन्ते, तदा स ताभ्योऽपि भेतुमारभते। बालकस्तीव्रध्वनेर्बिभेति, न तु तमसः। परं यदा स तमसि जायमानं तीव्रं शब्दं शृणोति तदा तमसो भेतुं प्रारभते। एवमेव प्रेतपिशाचेभ्यो बिभ्यन् नरोऽन्धकारादपि भीतो भवति। यतः सोऽन्धकारे विलसतां तेषां वर्णनं लोकाच्छृणोति। वाट्सनमहोदयेनाऽपि भयप्रतिक्रियाया वर्णनं कृतम्। तच्चेत्थम्—कस्यचित्त्रिवर्षीयस्य बालकस्य पुरत एकः शशक आनीतः। तं दृष्ट्वा बालको हृष्टो जातस्तस्य पृष्ठं हस्तेनास्पृशत्। यदा यदा

१. Conditioned responses.
२. Substitute.

In Public domain. Digitization Muthulakshmi Research Academy

शशकस्तत्समीपमानीयते स्म, तदा तदा स प्रसन्नमुखस्तथैव हस्तं प्रासारयत्। एकदा यदा शशकस्तत्समक्षमानीतः, स च पूर्ववद्धस्तं प्रसारयितुमचेष्टत तदैव पृष्ठतः कश्चित्कर्कशो ध्वनिः कृतः। न च ध्वनेः कारणं स्थानं वा बालकेनाभिज्ञातम्। बालकस्त्रस्तः सन् हस्तं झटित्यपसारितवान्। यदा वारं वारमस्यावृत्तिः कृता, तदा बालकः शशकाद् भेतुमारेभे। अत्रापि भयप्रतिक्रियायाः कारणीभूतं वस्तु (उत्तेजना) न भयस्य सत्यं कारणम्।

विचारप्रेरितं कर्म[१]

विचारप्रेरितं कर्म पूर्वोक्ताभ्यः क्रियाभ्यो भिद्यते। पूर्वोक्तासु क्रियासु बाह्योत्तेजनायाः प्राधान्यं भवति, विचारप्रेरिते कर्मणि च विचारस्य; तथापि यथैच्छिकेषु कर्मसु चेतनाया प्रामुख्यं नैतेषु केष्वपि कर्मसु तथा। नहि विचारप्रेरितं कर्म साभिप्रायं सहेतुकं वा भवति। इदं संवेदनाप्रतिक्षेपादपि भिद्यते। संवेदनाप्रतिक्षेपस्तत्र यत्र काचित् प्रतिक्रिया संवेदनायास्तात्कालिकः परिणामो भवति। यथा नासायां वर्तिकाप्रवेशस्य परिणामश्छीत्कारः। विचारप्रेरितं कर्म तु कर्मणो विचारानन्तरमव्यवहितमेव जायते, न तु संवेदनाया अनन्तरम्। एतत्तु कर्म विचारेणैव सम्पद्यते। पूर्वं विचारो भवति, तदा स विचारो द्रुतमेव क्रियायां परिवर्तते। अयं कर्मविचारोऽत्यावेगात्मको[२] भवति। नात्र क्रिया कदाचिदिच्छाशासनवर्तिनी। क्रियाविचारस्तथा प्रबलो जायते, यथा विचारकस्तदनुसारेण कर्तुं विवशो भवति। तुङ्गशृङ्गे स्थितो जनो नीचैर्विलोक्य विचारयति 'अहमस्माच्छृङ्गान्नीचैः पतिष्यामि' इति। एवं विचारयन् स झटित्येव ततोऽपसरति। जेम्समहोदयेनोक्तम्—"यदा क्रियाविचारः स्वानन्तरं विना तर्केण चिन्तनेन वा सद्य एव क्रियां जनयति, तदा तज्जा क्रिया विचारप्रेरितेति निगद्यते। नात्र विचारक्रिययोर्मध्येऽन्यस्य कस्यचिद् वस्तुनो ज्ञानं शिष्यते। विचारिते एव कर्मणि कर्म सम्पद्यते" इति। मित्रैर्वार्तालापं कुर्वन् जनः कपोले स्थितां मक्षिकां पश्यति, हस्तेन च तामपसारयति, भूम्यां पतितं पणं पश्यति, गृह्णाति च। नात्रेच्छा स्पष्टरूपेण व्यज्यते। एवं प्रतीयते यद् वस्तुदर्शनमात्रेण तत्सम्बन्धिक्रियाविचारमात्रेण च कर्म सम्पन्नमभूत्।

कानिचिद् विचारप्रेरितानि कर्माणि निर्विचारानुकरणरूपाण्यपि भवन्ति। अनुकरणं तु तत्रानायासं सहजमिव प्रतीयते। मार्गे कञ्चन पुरुषं दृष्ट्वा भवान् स्मेरमुखो भवति। सोऽपि भवन्तं स्मयमानमवलोक्य स्मयते। बालकोऽन्यं रुदन्तं निशम्य रोदितुमारभते। जनसम्मर्देऽपि जना अन्यानुत्तेजितान् दृष्ट्वा क्रुद्धा भवन्ति, करतालिका वादयतश्च दृष्ट्वा तालिकां वादयन्ति। न च ते जानन्ति किं तेषां चेष्टायाः कारणमिति।

मूलप्रवृत्त्यात्मकं कर्म[३]

मनुष्यस्य क्रियाप्रवृत्तिर्द्विविधा भवति—जन्मजाता, अर्जिता च। मनुष्यस्य सर्वाण्यपि कार्याणि जन्मजातप्रवृत्तिसम्बन्धीनि, अर्जितप्रवृत्तिसम्बन्धीनि वा भवन्ति। जन्मजाताः क्रिया अपि द्विविधा भवन्ति—सहजक्रियाः, मूलप्रवृत्तयश्च। निम्नकोटिकेषु प्राणिषु सहजक्रियाणां

---

१. Ideo-motor action.

२. Impulsive.

३. Instinctive action.

In Public domain. Digitization Muthulakshmi Research Academy

वाहुल्यं भवति, समुन्नतेषु च मूलप्रवृत्त्यात्मिकानां क्रियाणाम्। मनुष्यजीवन आभिः सर्वाभिः सहार्जितानामभ्यासजन्या[१], ऐच्छिका[२] इति भेदद्वयवतीनामपि क्रियाणां वाहुल्यमवलोक्यते।

मैकड्गलमहोदयेन स्वकीये 'आउट लाइन आफ सायकॉलाजी' इति नाम्नि पुस्तके प्रतिपादितं यन्मूलप्रवृत्तिरूपा काचिद्विशिष्टा प्रकृतिप्रदत्ता शक्तिः प्राणिनोऽवधानं कञ्चित्पदार्थविशेषं प्रत्याकर्षति, तस्योपस्थितौ च प्राणिनि कस्यचित् संवेगविशेषस्यानुभूतिमुत्पादयति, कस्मिंश्चित् कार्यविशेषे च तं योजयतीति। एषा च जन्मजाता प्रवृत्तिः। मूलप्रवृत्तिजं कर्मात्मरक्षणाय जातिरक्षणाय च भवति। तच्च मानसिकम्, न तु विशुद्धं जैविकं कर्म। नास्मिन् लक्ष्यस्य सुस्पष्टो विचारो भवति। मूलप्रवृत्तिर्मानसिकी प्रक्रिया वर्तते। तस्यां ज्ञानस्य वेदनायाश्चेष्टायाश्च समावेशो भवति। सा च प्राणिना वंशानुक्रमेणावाप्यते। मूलप्रवृत्तिसंस्कारा मुख्यरूपेण क्रियात्मकाः सन्तोऽपि ज्ञानवेदनामया भवन्ति। मनुष्यस्य क्रियात्मिकाः प्रवृत्तय एव तमवधानाय प्रेरयन्ति। यदा चावधानमेकाग्रं जायते, तदाऽनुकूला प्रतिकूला वा वेदना जायते। ततः स क्रियापरो भवति। मार्गे गच्छतः पदं यदा रज्जोरुपरि पतति, तदा स तां सर्पोऽयमिति मत्वा भीतः सन् ततः पलायते। प्राणरक्षाया जन्मजाता मूलप्रवृत्तिरेवात्र पलायने हेतुः। अनयैव प्राणरक्षारूपया मूलप्रवृत्त्या घातकान् पशूनवलोक्याप्यस्माकं मनसि भयसंवेग उत्पद्यते। तेन प्रेरिताश्च वयं तस्मात् स्थानाद् दूरं पलायितुमुपक्रमामहे।

मूलप्रवृत्ति-सहजक्रिययोरन्तरम्

मैकड्गलमते मूलप्रवृत्तयोऽस्माकं ज्ञानक्रियाविकासस्य मूलाधारः। सहजक्रिया-मूलप्रवृत्त्योरन्तरमपि तेन सुष्ठु प्रतिपादितम्।

(१) सहजक्रिया बाह्योत्तेजनामपेक्षते, न तु मूलप्रवृत्तिजा। सा तु स्वयञ्चालिता भवति। कासाय, कण्डूयनाय च बाह्योत्तेजना आवश्यकी। आत्मगौरवं तु विनाऽपि बाह्योत्तेजनां प्रभवति। यदा च मूलप्रवृत्तिर्बाह्योत्तेजनाजन्या भवति, तदा चिरं तिष्ठति, न तु सहजक्रिया तथा।

(२) सहजक्रिया यन्त्रवद् भवति। सर्वाऽप्युत्तेजना सुनिश्चितामेव सहजक्रियां जनयति, न तु मूलप्रवृत्तिजा क्रिया सदैकरूपा यन्त्रवच्च भवति।

(३) मूलप्रवृत्तिजानि कार्याणि लक्ष्याभिमुखानि भवन्ति। नहि सहजक्रिया लक्ष्यगामिन्यो भवन्ति।

(४) अभ्यासेन मूलप्रवृत्तिजा क्रिया औन्नत्यं सौष्ठवञ्च यान्ति। न तु सहजक्रियासून्नतेः सम्भवः। अभ्यासवैपुल्यमपि न तेष्वन्तरं जनयितुं शक्तम्।

(५) मूलप्रवृत्तयो बुद्धिनियन्त्रणं स्वीकुर्वन्ति, न तु सहजक्रियाः।

(६) मूलप्रवृत्तिर्जटिला भवति। तस्यां समग्रस्य शरीरस्य समायोजनं जायते, न तु कस्यचिदङ्गस्यैवेति मनमहोदयस्य मतम्।

---

१. Habitual.

२. Voluntary.

In Public domain. Digitization Muthulakshmi Research Academy

बुडवर्थमहोदयेनापि निरूपितं यत् सहजक्रिया तात्कालिकी प्रतिक्रिया। सा चोत्तेजनानन्तरमेव प्रसूयते। तदनन्तरञ्च न तस्याः कोऽपि कार्यशेषोऽवतिष्ठते। मूलप्रवृत्तिजं कर्म स्थिरप्रवृत्तिमत्, तत्कालेऽसम्पद्यमानां फलप्राप्तिं प्रति च प्रेरितं भवति। खगेषु नीडनिर्माणप्रवृत्तिर्भवति या नीडनिष्पत्तिं यावदवतिष्ठते। खगेष्वण्डानामुपरि स्थित्वा तेषां प्रवर्धनस्य मूलप्रवृत्तिर्भवति; सा च तावत्तिष्ठति सक्रिया, यावदण्डानि शावकेषु न परिणमन्ति। एवं मूलप्रवृत्तिश्चिरकालं सक्रिया तिष्ठति। सहजक्रियासु मानसिकतत्त्वानि न सन्निहितानि भवन्ति।

"मूलप्रवृत्त्यात्मके कर्मणि बुद्धिज्ञानयोर्योगो भवति[1]। तत्र रुचिरवधानं परिणामस्यानुकूलप्रतिकूलवेदनीयते च परिवर्तनं विदधते। तत्रानुभवेन शिक्षणशक्तियोग्यताऽपि सन्निविष्टाऽस्ति" इति मनमहोदयाः।

मूलप्रवृत्तीनां प्रकाशनम्

मूलप्रवृत्तय आनम्या भवन्ति। अनुभवेन तासु परिवर्तनं जायते। कस्या अपि मूलप्रवृत्तेः प्रकाशनं यदि पीडाकरं भवति तदा सा स्वल्पकालाय चिराय वा निरुद्धा जायते। एवमेव यस्याः प्रकाशनं सुखदं सन्तोषकरं च भवति, सा पुनः पुनरपि क्रियमाणा तिष्ठन्ती स्वभावरूपेण दृढा जायते। एतद्विचार्यैव केनचिदुक्तम्—'दुग्धेन दग्धा मार्जारी तक्रमपि परीक्ष्य परीक्ष्य पिबति' इति। यासां मूलप्रवृत्तीनां प्रकाशनं सुखदं भवति ताः पुनः पुनरपि प्रकाश्यन्ते, स्वभावरूपमापद्यन्ते। अत एव शशक एकस्मिन्नेव स्थाने पुरीषोत्सर्गं करोति, विहगश्चाप्येकस्मिन्नेव वृक्षे वारं वारं नीडं रचयति।

मूलप्रवृत्तीनां प्रकाराः

मूलप्रवृत्तीनां चतुर्दश भेदा मैकडूगलमहोदयेनोल्लिखिताः। अत्र संवेगनिरूपणाध्यायेऽपि तेषां वर्णनं सविस्तरं कृतमास्ते। मूलप्रवृत्तिषु काश्चित्पोषणसम्बन्धिन्यः, यथा—मृगया, संग्रहशीलता, भोजनान्वेषणम्, भोजनमित्यादयः। जीवनधारणे सहायिकाः सर्वा अप्यनर्जिताः प्रवृत्तयोऽत्र गण्यन्ते। काश्चिन्मूलप्रवृत्तयो वंशाविच्छेदोपयोगिन्यः, यथा—प्रणयः, मैथुनम्, सन्ततिपालनमित्यादयः। एता जातिसंरक्षणात्मिका जन्मजाता एव। कासाञ्चित्सम्बन्ध आत्मरक्षया भवति। पलायन-गोपन-लज्जा-विनीतता-गृहनिर्माण-रचनादयस्तत्र मुख्याः। युयुत्सा-स्वत्वस्थापनादयो या आक्रमणात्मिकाः प्रवृत्तयः, ता अपि स्वरक्षायै एव। काश्चित् प्रवृत्तयः समाजसम्बन्धिन्यो भवन्ति। सामाजिकता, हासः, सहानुभूतिः, ईर्ष्या, द्वेषः, लज्जा, स्पर्धेत्यादयस्तासु प्रमुखाः। सामाजिकप्रवृत्तयोऽन्येषामुपस्थितावेव क्रियारता भवन्ति। आसु त्रयोदश सर्वेष्वपि प्राणिषु वर्तन्ते। हासस्तु केवलं मानव एव। एताः सर्वा अपि केनापि संवेगविशेषेण सम्बद्धा भवन्ति; यथा—भोजनान्वेषणं बुभुक्षया, पलायनं भयेन, युयुत्सा क्रोधेन, उत्सुकता आश्चर्येण, रचना सृजनसुखेन, संग्रहः स्वामित्वेन, विकर्षणं घृणाभावेन, शरणागतिः करुणया च। एवमन्यत्रापि ज्ञेयम्। अपरे तु मूलप्रवृत्तिसंवेगसम्बन्धस्याविच्छेद्यतां न स्वीकुर्वन्ति।

मूलप्रवृत्तीनामुद्भवः

मूलप्रवृत्तीनामुद्भवविषये मनोवैज्ञानिकेषु नाद्याऽपि मतैक्यम्।

वुण्ट्महाशयो मन्यते यन्मूलप्रवृत्तयोऽस्माकं जातीयः स्वभावः। पूर्वं परिवेशेन

In Public domain. Digitization Muthulakshmi Research Academy

समायोजनाय तासामावश्यकता बभूव। ततो मुहुरावृत्तिभिस्ताः स्वतश्चालितकर्मरूपतामापद्यन्त। बुद्धेश्च प्रयोगस्तत्रानावश्यको जातः। अस्माभिस्ताः पैतृकसम्पत्तिरूपेणैव वंशपरम्परया प्राप्ताः।

हर्बर्ट-स्पेन्सरमते मूलप्रवृत्तिजं कर्म प्रतिक्षेपकर्मसमुच्चयमात्रम्, वंशपरम्परागता प्रतिक्षेप-कर्मशृङ्खला वा। कतिपयानि प्रतिक्षेपकर्माण्यकस्मात् परस्परं संयुक्तानि जटिलकर्मतामभजन्त। तेषूपयोगीनि कर्माणि सुस्थिराण्यभवन्, वंशपरम्परया च पैतृकसम्पत्तिरूपेण प्राप्तानि लोकैः।

बाल्डविनमहोदयानां मतं यज्जीवो ज्ञानपूर्वकमज्ञानेनैव वा कानिचित् समायोजनकारीणि कर्माण्यवलिम्ब्य जीवितं धारयितुं सन्तत्युत्पादने च सफलो भवितुं शक्नोति। कालक्रमेणैतानि कर्माणि स्थायित्वं भजन्ते।

एते त्रयोऽपि सिद्धान्ताः क्रमेण नष्टबुद्धि[१]-मिश्रप्रतिक्षेप[२]-जैविकचयन[३] सिद्धान्ताः कथ्यन्ते।

क्रीडा

बालकानां प्रारम्भिकाः क्रीडाव्यापारा अपि मूलप्रवृत्त्यात्मका एव भवन्ति। क्रीडा पेशीनां स्वतन्त्रा, सुखदा अनायासजाता च क्रिया। तस्यां कल्पनानुकरणयोः समावेशो भवति। बालिकानां पुत्तलिकाक्रीडा मातृत्वानुकरणमेव। क्रीडया आत्मप्रकाशन-विनीतता-युद्ध-पलायनानु-अनुसन्धान-प्रहस्तन-हास्य-सामाजिकतादयो मूलप्रवृत्तयस्तुष्टा भवन्ति। एतद्विषयेऽन्यत्र विस्तरेण प्रतिपादितम्। पुनरुक्तिदोषभिया नात्र विशदं लिख्यते।

आधुनिकानां मनोविदां विश्वासो यन्मूलप्रवृत्तयो न तथा परस्परं भिद्यन्ते, यथा मैकडूगल-महाशयो भणति। एकैव शक्तिः सर्वासां मूलप्रवृत्तीनामुद्गमस्थानम्। सर्वास्ता एकस्थानादेव प्रभवन्ति। यदा काचिन्मूलप्रवृत्तिरतिबलवती भवति, तदा तद्विरोधिन्या मूलप्रवृत्तेः शक्तिसंवर्धनेन तयोर्मध्ये सामञ्जस्यं स्थाप्यते॥

---

१. The theory of lapsed intelligence.
२. The compound reflex theory.
३. The theory of organic selection.

In Public domain. Digitization Muthulakshmi Research Academy

सप्तदशोऽध्यायः

ऐच्छिकानि कर्माणि

इच्छा[1]

ऐच्छिकानि[2] कर्माणि तानि यानि कर्त्रा प्रयोजनमुद्दिश्य क्रियन्ते । एवंविधानां कर्मणां लक्ष्यं पूर्वज्ञातं भवति । तस्य प्राप्तय एव कर्म क्रियते । इच्छाऽत्र क्रियायाः कारणं भवति । इच्छा च कस्याऽपि वस्तुनोऽभावस्य दूरीकरणाय तत्प्राप्तुं कर्तुरभिलाषः । म्यूरहेडमहोदयस्य मतेनेच्छा आत्मनो विद्यमानदशायाः, अप्राप्ताया भाविदशायाश्च विचारयोर्विरोधेनोत्पद्यते । इच्छा च ज्ञानवेदनाचेष्टामयी जटिला मनोऽवस्था । लक्ष्यस्य प्रेरकम्, तस्याभावनिरसनशक्तिः, साधनानि, अभावस्य विद्यमाना दशा, भविष्यत्कालिकी तृप्तिदशा, तयोस्तुलना, लक्ष्यप्राप्तेः सुखदता दुःखदता वेति सर्वस्य विचार इच्छाया ज्ञानात्मकं तत्त्वं भवति । अभावस्य पीडाकर्यनुभूतिः, तृप्तेः पूर्वकल्पनया जायमाना सुखकर्यनुभूतिश्चेच्छाया वेदनात्मकं तत्त्वम् । लक्ष्यप्राप्तेः कामना, अभावानुभूतिनिरासकरः प्रेरकः, लक्ष्यप्राप्तये प्रवृत्तिश्चेति चेष्टात्मकं तत्त्वमिच्छाया भवति । इच्छायास्तीव्रता वर्तमानाभाव-भविष्यत्प्राप्त्योर्मध्ये वैषम्यमात्राऽधीना ।

क्षुधेच्छयोरन्तरम्

क्षुधाया[3] इच्छायाश्च मध्ये यदन्तरं तदपि द्रष्टव्यम् । क्षुधा तु काले काले जायमाना कायिक्यावश्यकता, या बुभुक्षा-पिपासा-निद्रा-कामादिरूपेणाभिव्यज्यते । पशवोऽपि क्षुधामनुभवन्ति, न त्विच्छां कुर्वन्ति; यतस्तेषु चेतना भवति, न त्वात्मचेतना । आत्मचेतना चेच्छायाः कारणम् । क्षुधापूर्त्यै जायमानाः पशुप्रवृत्तयस्त्वन्धा एव । न च तेषु वस्तुचेतना भवति । उच्चश्रेणीकेषु पशुषु लक्ष्यस्य काचिच्चेतना भवतीति सत्यम् । सिंहस्य वाञ्छितवस्तुविषयकं स्वल्पं ज्ञानं भवति, न तु निम्नकोटिकेषु पशुषु तथा । तेषां लक्ष्यस्वरूपज्ञानमस्पष्टमेव विद्यते । तेषु सुखस्य दुःखस्य वानुभूतिः प्रबला भवति । बालकेष्वपि प्रथममिच्छामात्रं स्पष्टं न भवति । क्रमेण तेषां क्षुधा इच्छासु परिणमन्ते । क्षुधा नियतकालिकाः शारीरिकतृष्णाः । इच्छासु लक्ष्यस्य स्पष्टविचारेण जायमानाश्चेतनस्य तृष्णाः ।

इच्छावेगयो[4]रन्तरम्

एवमावेगोऽपि गतेश्चेतनप्रवृत्तिः । आवेगस्य ज्ञानमस्माकं भवति । परमावेगे लक्ष्यस्य विचारो न सन्निविष्टो भवति । इच्छायाञ्च लक्ष्यस्य विवेचनसन्निहितमस्त्येव । आवेगाः क्षुधाजन्या भवन्ति । क्षुधया सह व्यग्रता,अशान्तिर्वा जायते; तृप्त्या सह च निरस्ता भवति ।

---

१. Desire.

२. Voluntary Action.

३. Appetite.

४. Impulse.

In Public domain. Digitization Muthulakshmi Research Academy

क्षुधेवावेगोऽपि विवेकहीनः । तस्य कारणं क्षुन्मूलप्रवृत्तयोऽनुभूतयः संवेगा वा भवन्ति । स्टाउटमते आवेगात्मकं कर्म केवलं चेष्टात्मिकां प्रवृत्तिमनुसरति । इच्छाहेतुके[1] कर्मणि सङ्कल्पे वात्माऽनेकेषां सम्मिलितानामावेगानां विचारं करोति, तेषामेकं कञ्चिदनुसरति, अन्याँश्च निरुणद्धि ।

इच्छासङ्घर्षः

ऐच्छिकानां कर्मणां तिस्रो भूमयो भवन्ति—मानसिकी[2], शारीरिकी[3], फलसम्बन्धिनी[4] च । मनोभूमौ वर्तमानाभावस्य दुःखदा, भविष्यति काले प्राप्तेश्च काल्पनिकी सुखदाऽनुभूतिरवतिष्ठते । एषैवानुभूतिः कर्मणो मूलस्रोतो भवति । सा चेच्छायां विपरिवर्तते । कदाचित् परस्परस्पर्धिन्योऽनेका इच्छाः प्रादुर्भवन्ति । ताश्चेच्छाः पृथक् पृथगनेकानि लक्ष्याणि प्रति मन आकर्षन्ति । परं नहि सर्वासामपि पूर्तिरेककाले सम्भवति । कदाचिच्चेच्छाः परस्परविरोधिन्योऽपि भवन्ति । कस्यचिन्मनसि संयमस्य भोगस्य च प्रेरकौ सहैवोदितौ नह्येककाल एव तुष्टिं प्राप्तुं शक्नुतः । तयोरेकस्य निरोधोऽपरस्य च वरणं क्रियते ।

अत्र कदाचिद् द्विविधात्मिकाऽपीच्छा[5] भवति । कश्चित् प्रातर्भ्रमणमिच्छति, स्वापमपि च । एषाऽनिश्चयावस्था[6] द्विविधेच्छायामेव भवति । तत आत्मा तयोरकं वृणुते । अनिश्चयस्यैकाऽवस्था दोलाऽपि[7] कथ्यते, यस्यामात्मा ग्राह्यं त्याज्यं वा निश्चेतुमसमर्थो भवति । जटिलायामेव परिस्थितौ मनसो दोलावस्था सम्भवति । अस्यां मनसि व्यग्रता जायते । निश्चये च सञ्जाते व्यग्रताशमनं भवति ।

अनिश्चयावस्थायामात्मा कर्म स्थगयति । विविधैः प्रेरकैः[8] प्रदर्शितायाः कार्यपद्धतेर्गुणानवगुणाँश्च विचारयति । तेषां पक्षे विपक्षे चाऽवधानं करोति । इयं विचारणायाः स्थितिर्भवति । स्टाउटमहाशयेनोक्तम्—"विचारणा रज्जोरेकदैकस्यां ततोऽन्यस्यां दिशायामाकर्षणं विकर्षणं नास्ति । तया च जातो विनिश्चयो नैकस्यावेगस्यान्यस्मिन् विजयरूपः । ऐच्छिकं कर्म नहि बह्वीनां प्रवृत्तीनां मध्ये कस्याश्चिदेकस्या अनुसरणमात्रम् । तत्तु तासां मध्ये कतमा प्रथममनुसर्तव्येति निश्चयस्य फलम् । कर्तुरात्मनः प्रत्यय एवेदमन्तरं जनयति । इदं श्रेष्ठमपरं वेति नायं विकल्पः, इदं कर्तव्यमपरं वेति विकल्पो भवति" इति । विचारणायामेकस्य विकल्पस्य[9]

---

१. Volition.
२. Mental stage.
३. Bodily Stage.
४. Stage of consequences.
५. Hesitancy.
६. Indecison.
७. Vacillation.
८. Motives.
९. Alternative.

In Public domain. Digitization Muthulakshmi Research Academy

तुलनाऽन्येन क्रियते। यदा चात्मा किमपि निश्चेतुमशक्तो भवति, तदा विचारावरोधो[१] जायते। तीव्रे गत्यवरोधेऽनेकदा निश्चयो यादृच्छिको भवति। यदा च कस्मैचित् कालाय विचारं स्थगयित्वाऽप्यात्मा निश्चयं नाधिगच्छति[२], विकल्पस्य तुल्यबलत्वात्; तदा श्रान्ततया निश्चयो यदृच्छया विधीयते।

विनिश्चयः[३]

विचारानन्तरमात्मा प्रेरकविशेषं[४] निश्चिनुते, तेन च तादात्म्यं स्थापयति। अन्यान् त्यक्त्वा कस्यचिदेकस्य प्रेरकस्येच्छाया वा वरणं विनिश्चयः कथ्यते। अनिश्चयदशायां यद्विचार-प्रेरकं भवति, तदेव जाते निश्चये कर्मप्रेरकं जायते। अनिश्चयदशायां विचारप्रेरकं कर्मणः सम्भावितं प्रेरकं भवति, तदेव जाते निश्चये कर्मणो वास्तविकं प्रेरकं जायते। आत्मा नहि सदा प्रबलतममेव प्रेरकं स्वीकरोति। बहवो निर्बला अपि प्रेरकाः संहत्य बलवत्तमं प्रेरकं पराजयन्ते। दुर्बलं बालकमाततायिनस्त्रायमाणो जनो मृत्युमप्यालिङ्गति। अत्र करुणा-त्याग-परोपकार-दुष्ट-विरोधादयो दुर्बला वृत्तयो बलिष्ठामात्मरक्षणवृत्तिं पराजयन्ते। पराभूताः प्रेरका अपि न सर्वथा प्रभावहीना जायन्ते। ते तत्काले निष्क्रिया जाता अपि कालान्तरेऽनुकूलां परिस्थितिं प्राप्य क्रिया-शीला भवन्ति।

सङ्कल्पः[५]

कृते निश्चये दृढतापूर्विका स्थिरता सङ्कल्पगुणः। यस्य मनो दोलायमानं भवति स विचारणानन्तरं कृतं विनिश्चयमपि परित्यजति। अतो निश्चयानुकूलाचरणाय सङ्कल्पस्याव-श्यकता भवति। यदा च निश्चयस्य क्रियायाश्च मध्ये पर्याप्तोऽवकाशो न विद्यते, तदा सङ्कल्प-स्यावश्यकता न जायते। यदा च निश्चयानन्तरं क्रिया कस्मैचित् कालाय स्थगिता भवति, तदा सङ्कल्पस्यावश्यकता।

शारीरिकी क्रिया

सञ्जाते निश्चये सङ्कल्पेन दृढत्वमापन्ने च तस्मिन् शारीरिकी क्रिया प्रवर्तते। यदा सङ्कल्पो दृढो भवति, लक्ष्यञ्चातिसुखप्रदम्, तदा शारीरिकी क्रियाऽपि तीव्रा भवति। कदाचिन्मार्ग-गता बाधाः क्रियातीव्रतामेव जनयन्ति। यदा च विघ्ना अजेयाः, तदा नैराश्येन क्रियायां शैथिल्यमुत्पद्यते। क्रियायास्तीव्रता सङ्कल्पाश्रिता भवति। शारीरिकी क्रिया बाह्यजगति फलपरिवर्तनं जनयति। एतत्परिवर्तनं 'परिणामः' इति कथ्यते। लक्ष्यस्य प्राप्तिः, अप्राप्तिर्वा परिणामो भवितुं शक्नोति।

---

१. Deadlock.

२. Arbitrary.

३. Decision or choice.

४. Motive.

५. Resolution.

In Public domain. Digitization Muthulakshmi Research Academy

ऐच्छिककर्मगुणाः[१]

ऐच्छिकं सप्रयोजनं वा कर्म पूर्वतो ज्ञातस्य लक्ष्यस्य साधकं भवति। लक्ष्यं चाभावपूर्तिकरम्। सप्रयोजनं कर्म यान्त्रिकमिव नैकप्रकारकम्। तत्र नवीनताऽपि पर्याप्तमवकाशं लभते। अनभ्यस्तत्वेन तन्नूतनाकर्षकं च भवति। यदा सप्रयोजनं कर्माबाधितं सम्पद्यमानं भवति, तदा समायोजनतीव्रता नावश्यकी भवति; परमुपस्थितायां भ्रान्तौ बाधायां वा समग्राः शक्तयः प्रबुद्धा विधीयन्ते। सहेतुकं कर्म जटिलं भवति। समग्ररूपेण तत्सप्रयोजनमिति नात्र संशयः; परं तस्यानेकेऽवयवा अहेतुका एव भवन्ति। यदा कोऽपि पत्रं लिखति, तदा समग्रं पत्रं सप्रयोजनं चेतनेरितं च भवति। परं प्रत्यक्षरं न चेतनानियन्त्रितम्, तत्र तु यान्त्रिक्येव प्रक्रिया दृश्यते।

ध्यानम्[२]

ध्यानमेव सङ्कल्पं शारीरिकक्रियायां परिवर्तयति। समुपस्थिते इच्छासङ्घर्षे ध्यानमेव निश्चयसहायकं भवति। ध्यानमेव प्रेरकविशेषेणात्मनस्तादात्म्यं स्थापयति। यो विचारोऽस्माकं ध्यानं नाकर्षति, तत्र स्थिरो वा न भवति, सोऽस्माकं क्रियासु नियन्त्रणं कर्तुं न प्रभवति। सङ्कल्पश्च ध्यानस्यैव स्वरूपविशेषः। ऐञ्जलमहोदयानां मतं यद् ध्यानं मनसि कृतां सम्भावनां वस्तुरूपे परिणमयति।

समुपस्थितासु बह्वीष्विच्छासु या प्रबलतमा भवति सा 'उत्कण्ठा[३]' इति कथ्यते। प्रभावहीनाश्च 'इच्छा[४]'। यदा चात्मेच्छां तस्याः सम्पूर्णैरङ्गैर्लक्ष्यसाधनपरिणामादिभिः सह स्वीकरोति, तदा सेच्छा सङ्कल्परूपं गृह्णाति।

प्रेरकम्[५]

यत्किञ्चिदपि कस्मैचित् कर्मणे प्रेरयति, प्रोत्साहयति वा तत्प्रेरकम्। अनुभूतिस्तु कर्मप्रेरिका भवति। बेन्थम-मिलप्रभृतयोऽनुभूतिं कर्मप्रेरिकां मन्यन्ते; परमपरे न तत्सहन्ते। तन्मतेऽनुभूतिः क्रियाया निमित्तकारणम्, लक्ष्यस्य विचारस्तु मुख्यो हेतुः। यस्योद्देश्यस्य सिद्धिरभिप्रेता भवति तद्विचारो हि प्रेरकः। मैकेञ्जीमहोदयस्यापि कथनं यत्कर्मणे प्रोत्साहयति, स तु लक्ष्यस्य विचार एव। अभिप्रायस्तु[६] प्रेरकापेक्षया व्यापकः; प्रेरकस्तु व्याप्यः। अभिप्राये प्रेरकविवर्तकानुभवावष्यन्तर्भवतः। प्रयोजनं[७] चाभिप्रायाद् भिद्यते। बुडवर्थमते प्रयोजनं स्वयमेव क्रिया भवति, या प्रारब्धाऽभूत् समाप्तिं तु नागमत्। एषा च पूर्वदृष्टं लक्ष्यं प्रति प्रगतिमयी क्रियेति।

---

१. Characteristics of voluntary action.
२. Attention.
३. Wish.
४. Volition.
५. Motive.
६. Intention.
७. purposes.

In Public domain. Digitization Muthulakshmi Research Academy

आत्मसंयमः[१]

आत्म-संयमोऽप्यैच्छिकं कर्म। स त्वात्मनः प्रसूतः समग्रस्यात्मनो नियामकश्चेति स्टाउट-महोदयः। अयमात्मनो निकृष्टवृत्तिषूत्कृष्टवृत्तीनाम्, वासनासु च बुद्धेः शासकः। स च विचार-संवेगावेगेच्छादीनां निरोधान्निषेधकः, प्रोत्साहनाच्च विधायकोऽपि भवति। संशयश्च विचारसंवेग सङ्कल्पानां मनसस्त्रयाणामप्यङ्गानां भवितुं शक्नोति।

ऐच्छिककर्मणामुत्पत्तिं केचिदनैच्छिकेभ्यः कर्मभ्यो मन्यन्ते, अपरे च मन एव तेषां मूलमिति स्वीकुर्वन्ति ॥

१. Self control.

In Public domain. Digitization Muthulakshmi Research Academy

अष्टादशोऽध्यायः

अर्जितः स्वभावः[1]

स्वभावस्वरूपम्[2]

वानराः, श्वानः, हयाः, हस्तिनः, कपोतादयः पक्षिणश्चानेकान्याश्चर्यकराणि कृत्यानि सम्पादयन्तो बहुभिर्दृष्टाः। अनेके तत्पालकास्तेषामद्भुताः क्रीडाः प्रदर्श्य जीविकामर्जयन्ति। एतच्च सुविदितं यत्प्रथमे दिने न तेऽद्भुतासु क्रियासु दक्षा आसन्। पौनःपुनिकेनाभ्यासेन ते नैपुण्यमाप्तवन्तः। मनुष्योऽप्येवमेवाभ्यासेन शिक्षते। शिक्षणेन यथा पशुषु परिवर्तनं लक्ष्यते, तथा मनुष्येष्वपि। मनुष्ये परिवर्तनस्य सम्भावना पशूनामपेक्षयाऽधिका। क्षुद्रोऽप्यनुभवः, नगण्योऽपि वा प्रयोगस्तस्मिन् किञ्चित् परिवर्तनं विदधाति। मनुष्यो यावज्जीवं प्रयोगान् करोति, शिक्षते च। मुहुर्मुहुरभ्यासेन तेषु योगास्तस्याङ्गतां भजन्ते, स्वभावं चापद्यन्ते।

बालकः प्रथमं कम्पमानो बिभ्यत् पतँश्च भूमौ पद्भ्यां चलति। क्रमेण स चलने प्रवीणो जायते। ततः सोऽनायासेन चलितुं पारयति। एवमेव स वक्तुं पठितुञ्च शिक्षते। मनुष्यस्य सम्पूर्णं जीवनमेव स्वभावपरिपूर्णम्। अस्य स्वभावस्याधारस्तस्य परिवर्तनशीलता धारणशीलता च। परिवर्तनशीलतया स नवं नवं गृह्णाति, धारणशीलतया च गृहीतं तत् स्थिरीकरोति। स्वभावाय द्वे अप्यपेक्ष्येते। काचोऽपि यथेच्छं परिवर्त्यते, यत्किञ्चिदपि स्वरूपं वा गृह्णाति, परं तस्मिन् धारणशीलता नास्ति। तस्यैकामाकृतिमग्निना द्रावयित्वान्या आकृतिः क्रियते; एवमेव मणिषु धारणशीलता भवति, परिवर्तनीयता तु न। अतो मणिः काचो वा स्वभावं निर्मातुमशक्तः। बाल एकदा तरणमभ्यस्य यावज्जीवं तरणाभ्यासं धारयितुं क्षमते। तस्य स्नायुमण्डलं परिवर्तनाय धारणायै चोपयुक्तम्।

स्वभावो वारं वारं क्रियमाणानामिच्छापूर्वकाणां कार्याणां परिणामः। ऐच्छिकेषु कार्येषु सङ्कल्पप्रयत्नो भवति; परं यदा तानि कार्याणि स्वभावरूपं प्राप्नुवन्ति, तदाऽवधानस्य सङ्कल्पस्य चावश्यकता नावशिष्यते। तानि स्वयञ्चालितानि जायन्ते। एवं स्वभावोऽर्जितो गुणः। पठनम्, धावनम्, तरणम्--सर्वाण्यप्येतानि पौनःपुनिकाभ्यासजानि कर्माणि। तानि शिक्षितानि, न तु जन्मजातानि।

स्वभाववैशिष्ट्यम्[3]

स्वभावेन क्रियायां कश्चिद्विशेषो जन्यते। तत्र समरूपता भवति। स्वभावजनितानि कार्याणि समरूपाणि भवन्ति। यदा लेखनाभ्यासो न भवति, तदा प्रतिवारं लिखितान्यक्षराणि भिन्नाकृतीनि भवन्ति। अभ्यासानन्तरं तेषु समरूपतोत्पद्यते। एवमेव क्रीडायाम्, वार्तालापे,

---

१. Habit.

२. Nature.

३. Characteristics.

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गीते च भवति । अभ्यासजनितानि कार्याणि शीघ्रतयाऽपि सम्पाद्यन्ते । स्वभावो यावान् प्रबलो भवति, तावत्येव क्षिप्रता क्रियासु जायते । अभ्यासेन क्रियासु याथार्थ्यमपि समुत्पद्यते । विनाऽभ्यासं सम्पद्यमानानि कर्माणि बहुधा त्रुटिपूर्णानि भवन्ति । स्वशक्त्यनुसारमेव गत्यात्मिका प्रतिक्रिया भवतीति स्वभावजनितक्रियासु शुद्धताऽनायासेनैव प्राप्यते । जाते स्वभावे क्रिया न तथाऽवधानमपेक्षन्ते । अभ्यासेन कार्याणि स्वयञ्चालितानीव भवन्ति । तेन तेभ्यो ध्यानस्य चेतनाया वा मार्गदर्शनमावश्यकम् । ध्यानं तेषां बाधकमेव भवति । यस्य लेखनाभ्यासः, स यदि कस्यचिच्छब्दविशेषस्य वर्णविन्यासे ध्यानं करोति, तदा स द्विविधाग्रस्त एव भवति । अभ्यासः सरलतां सुविधाञ्चापि जनयति । अभ्यासेन कार्येषु सरलता भवति । कार्यगतिश्च तीव्रा । स्वभावे जाते नटा आकाशे बद्धाया रज्जोरुपर्यपि वेगेन धावन्ति, न च काठिन्यमनुभवन्ति । दक्षाः पादकन्दुकक्रीडकाः क्रीडास्थले निश्चिन्तास्तिष्ठन्ति, समायाते च कन्दुकेऽनायासेन, सरलतया सुनिश्चितां दिशं प्रताडयन्ति । अकुशलाश्च बहु प्रयत्यापि मनोऽनुकूलं न ताडयितुं क्षमन्ते । स्वभावो यावान् प्रबलो भवति, तावानेव प्रयत्नस्तत्र परिवर्तनं विधातुमावश्यको भवति । अत एव मद्यपा धूम्रपाश्च न प्रयत्नेनापि व्यसनान्मुक्तिं लभन्ते । उक्तञ्च 'स्वभावो दुरतिक्रमः' इति ।

स्वभावो [1]मूलप्रवृत्तेर्भिद्यते । यद्यपि समरूपता सरलता चोभयोर्दृश्यते, उभाभ्यामपि निष्पन्नानि कार्याणि यन्त्रवदनुष्ठानि भवन्ति, सङ्कल्पप्रयत्नभावोऽनैच्छिकता चोभयोः समानं लभ्येते; तथापि स्वभावोऽर्जितः, मूलप्रवृत्तयश्च जन्मजाता इति तयोरन्तरम् । एवमेव प्रतिक्षेपस्वभावयोरप्यन्तरम् । सतोरपि सङ्कल्पावधानायासानपेक्षयोस्तयोः प्रतिक्षेपो जन्मजातः, स्वभावश्चार्जितः । अत एव प्रतिक्षेपक्रिया सरला, स्वभावक्रिया च जटिला । जृम्भाकर्म सरलम्, अश्वारोहणं च जटिलम् । स्वभाव ऐच्छिककर्मणां समवायः सन्नप्यैच्छिकात् कर्मणो भिन्नः । ऐच्छिकं कर्म नवीनपरिवेशं प्रति प्रतिक्रिया । सा चानुसन्धानात्मिका, प्रयोगात्मिका च; स्वभावः स्थिरो निश्चितश्च । ऐच्छिककर्मणोर्गतिर्मन्दा, परिमाणोऽनिश्चितः, प्रयत्नश्च सावधानो भवति । स्वभावक्रियाया गतिः क्षिप्रा, परिणामो निश्चितः सन्तोषदः, प्रयत्नश्चानवधानो भवति ।

स्वभावविधयः

विलियमजेम्समहोदयेन स्वभावक्रियायाश्चत्वारो नियमा वर्णिताः । तेऽधोलिखिताः सन्ति—

(१) नवोऽभ्यासो यथासम्भवं दृढतया प्रारब्धव्यः । एतदेव कारणं यन्महत्त्वपूर्णानां कार्याणामारम्भात् पूर्वं शपथग्रहणप्रथा वर्तते । दृढतापूर्वकं प्रारम्भः साफल्यं नयति । दृढतां विना कदापि कार्यारम्भ एव न भवति ।

(२) यावदभ्यासो दृढो न भवेत्तावत् कार्यं विघ्नाद्रक्षेत् । यदा कार्ये वारं वारं व्याघातो जायते, तदा मनसि शैथिल्यं पदमाधत्ते । एकदा प्रातर्भ्रमणमारभ्याव्यतिक्रमेण तत्प्रतिदिनं विधेयम्, अन्यथाऽभ्यासो द्रढीयान्न भवति, त्यज्यते च कालान्तरे ।

(३) निश्चयानुसारं कार्यारम्भाय मुहूर्तं न प्रतीक्षेत । यदैवावसरं प्राप्नुयात्तदैव त्वरितं प्रारभेत । समयं प्रतीक्षमाणस्योत्साहः शिथिलो भवति, नवानि चावश्यकानि कार्याणि पन्थानं रुन्धन्ति । उक्तञ्च 'श्रेयांसि बहुविघ्नानि' इति ।

---

१. Instinct

In Public domain. Digitization Muthulakshmi Research Academy

(४) प्रतिदिनं किञ्चिन्नवं कार्यं सम्पाद्यात्मनो यौवनं परिरक्षेत्। केचिद् वार्धक्यात् पूर्वमेव वृद्धा भवन्ति; यतस्ते विचाराणां कर्मणाञ्च परम्परागतं मार्गमवलम्बन्ते। एवं ते शिथिलोत्साहा जायन्ते। अतोऽभ्यासदार्ढ्याय प्रतिदिनं किञ्चिन्नवं कठिनं च कार्यं सम्पादयेत्।

स्वभावपरिवर्तनम्

स्वभावो वरोऽपि भवितुं शक्नोति, हानिकरोऽपि च। हानिकरः स्वभावो व्यसनं कथ्यते। तस्मान्मुक्तेरुपायाश्चिन्त्याः। उचितावसरस्य प्रतीक्षां विना झटित्येव नवाभ्यासस्य प्रारम्भः, व्यसनस्य च सर्वथा त्यागस्तत्र प्रथम उपायः। यदि सहसैव त्यागेन स्वास्थ्यनाशसम्भवना भवेत्, तदा क्रमेण व्यसनं त्याज्यम्। दुःस्वभावविपरीतस्वभावस्याभ्यासः कार्यः। तस्य स्थाने कश्चित् सदभ्यासो विधेयः; यथा—मद्यस्थाने दुग्धपानम्, परनिन्दास्थाने कथाश्रावो वा। यानि वस्तूनि मित्राणि वा दुःस्वभावं प्रेरयन्ति, तेषां सम्पर्कस्त्याज्यः।

केषाञ्चित् स्वभावानां निर्माणं शैशवे भवति, केषाञ्चित् कैशोर्ये, केषाञ्चिच्च तारुण्ये। शरीरस्वच्छताया अभ्यासः शैशवे; वस्त्रधारणस्य, परैः सह व्यवहारस्य, नीतिधर्माचरणस्य च कैशोर्ये; व्यावसायिकोऽभ्यासश्च तारुण्ये जायते। सर्वेऽप्येतेऽभ्यासा मनोविकासे सहायका भवन्ति। नहि स्वभावक्रियां विना लोके कस्या अप्युन्नतेः सम्भवः। स्वभावो काल-श्रम-श्रान्ति-शक्ति-व्ययातिरेकाज्जनं रक्षति। विना स्वभावनिर्माणं पुरुषः पदे पदे कष्टमनुभवेत्।

परं यथा स्वभावाः प्रगतेः साधकास्तथा बाधका अपि भवन्ति। ते मनसः स्वतन्त्रां गतिं बाधन्ते, नवोन्मेषान्निरुन्धन्ति च। स्वभावेन जना रूढिग्रस्ततामुपयान्ति। प्रायो दृश्यते दृढस्वभावा जना नवानाविष्कारान् विचारांश्च विरुन्धन्ति। वृद्धाः प्रबलस्वभावा भवन्ति, न तेभ्यः केऽपि सुधाराः परिवर्तनानि वा रोचन्ते। अतो मनसो नवान् विचारान् ग्रहीतुं जीवनस्य नवानादर्शान् स्वीकर्तुं सज्जीभाव आवश्यकः। जनेन न कदापि स्वभावदासेन भाव्यम्। स्वभावनिर्माणं जीवन-सौकर्याय, न तु जाड्याय क्रियते।

चरित्रम्

स्वभावाश्चरित्रस्य[1] आधाराः। श्रेष्ठाः स्वभावाः श्रेष्ठम्, निकृष्टाश्च निकृष्टं चरित्रं विदधति। चरित्रं विचार-संवेग-कर्म-स्वभावानां समष्टिः। मेकडूगलमते चरित्रनिर्माणे आत्म-सम्मानभावनाऽत्यधिकं महत्त्वपूर्णा। चरित्रस्य ज्ञानमाचरणेन भवति। आचरणं[2] चरित्रस्य बाह्यं प्रकाशनम्। ऐच्छिकान्यभ्यासजानि च कर्माणि 'आचरणम्' कथ्यन्ते। तच्च परिवर्तनीयं भवति। सदभ्यासेम स्वभावेऽपि परिवर्तनं शक्यम्। स्वभावपरिवर्तनं चरित्रे प्रतिफलति। चरित्र-परिवर्तनं चाचरणेन विज्ञायते॥

---

१. Charactor.
२. Conduct.

In Public domain. Digitization Muthulakshmi Research Academy

एकोनविंशोऽध्यायः

बुद्धिपरीक्षा[1]

बुद्धिपरीक्षोपयोगः

मनुष्याः परस्परं भिन्ना भवन्ति, तेषां भेदो बुद्धिचरित्रयोः स्पष्टः परिलक्ष्यते। तत्र बुद्धिकृतो भेदो जन्मना सहजातः, चरित्रकृतश्चार्जितो भवति। बुद्धिर्यादृशी जन्मकाले भवति, तादृश्येव यावज्जीवं तिष्ठति। बुद्धौ विकासः सम्भवतीति सत्यम्; परं विकासेनाऽपि तस्या वैशिष्ट्यमपरिवर्तितमेव तिष्ठति। केचिज्जन्मनैव मन्दबुद्धयो भवन्ति, केचिच्च प्रखरबुद्धयः। कस्य कीदृशी बुद्धिरित्यस्य परीक्षणमाधुनिकैर्मनोविद्भिः क्रियते। बुद्धिपरीक्षणेनैतज्ज्ञायते यत्कः पुरुषः कस्मिन् कार्ये सफलो भविष्यति। बुद्धिपरीक्षाया उपयोगो बालकानां शिक्षणेऽपि विधीयते। ये बालका येषां विषयाणां शिक्षार्थमुपयुक्ता भवन्ति, तांस्त एव विषयाः पाठ्यन्ते।

बुद्धिपरीक्षया मनुष्यस्य योग्यता[2] अवगम्यते। सा योग्यता द्विविधा भवति—वर्तमाना[3], सम्भाव्या[4] च। वर्तमाना योग्यता 'उपलब्धिः', संभाव्या योग्यता च 'सामर्थ्यम्' इत्यभिधीयते। सामर्थ्यमुपलब्धेरधिकमेव भवति। यत्किञ्चिदपि मनुष्येण शिक्षितं भवति, तदपेक्षया बह्वधिकं स शिक्षितुं शक्नोति। केनचिच्छात्रेण व्याकरणाचार्यपरीक्षोत्तीर्णा। तदनन्तरं विघ्नवशान्नासावधिकं शिक्षितुं शशाक। यदि सोऽवसरं प्राप्स्यत्तदाऽधिकमध्येष्यत। कञ्चिद्धाराप्रवाहेण संस्कृतभाषणं कुर्वन्तं दृष्ट्वा आश्चर्यचकिता भवामो वयम्। परं तथाविधभाषणस्य योग्यताऽस्मास्वपि वर्तते। न सा योग्यतोपलब्धा, उपलब्धिसामर्थ्यं त्वस्ति। एवं यत्किञ्चिदपि केनचिच्छिक्षितं भवति, ततोऽधिकं शिक्षितुं क्षमते। परं सर्वेषामपि शिक्षणक्षमतायाः सीमा भवति। नहि कोऽपि स्वकीयायाः क्षमता-सीम्नोऽधिकं शिक्षितुं क्षमते। नहि प्रयत्नशतैरपि कश्चिच्चन्द्रं ग्रहीतुं शक्नोति; नापि क्षणेन सागरं तर्तुम्। सर्वेषामपि सामर्थ्यं पृथग्भवति। उपलब्धेः प्रमाणं प्रत्यक्षमेव कार्यं सम्पाद्य दातुं शक्यते, सामर्थ्यं त्वनुमितमेव भवति। 'कोऽपि बालकः समुचितं वातावरणं प्राप्य संस्कृतभाषणे दक्षो जायते, अतो रामोऽपि संस्कृतभाषणे समर्थो भवितुं शक्तः' इत्यनुमानम्।

उपलब्धिपरीक्षा

उपलब्धिपरीक्षा[5] कृत्यैव सम्भवति। तत्र परीक्ष्येण सर्वथा मनोयोगपूर्वकं कार्यं सम्पादनीयम्। कृतेः परीक्षणस्य निर्दुष्टसिद्धान्ताः स्वीकार्याः। उपलब्धिपरीक्षा अनेकविधा

१. measurement of intelligence.
२. capacity.
३. Actual.
४. potential.
५. Achievement tests

In Public domain. Digitization Muthulakshmi Research Academy

भवन्ति—शिक्षाविषयिण्यः, गतिविषयिण्यः, काठिन्यविषयिण्यश्च। शिक्षाविषयकपरीक्षाभिर्ज्ञायते यच्छात्रेण गणितविज्ञानादिविषयेषु कियदर्जितमिति। परीक्षा च क्वचित्प्रश्नैः, क्वचित्क्रियया भवति। ज्ञानेन्द्रियजन्य—सविकल्पकप्रत्यक्षज्ञानस्य याथार्थ्यं विज्ञानप्रयोगशालासु यन्त्रद्वारा परीक्ष्यते। गतिपरीक्षार्थं कानिचित् सरलानि कार्याणि कर्तुं प्रदीयन्ते, परीक्ष्यते च यज्जनः कियच्छीघ्रं तानि सम्पादयति। याथार्थ्यपरीक्षार्थं जनः कस्मिंश्चिल्लक्ष्ये बाणम्, लौहगोलकम्, अन्यद्वा किञ्चिद्वस्तु क्षेप्तुमाज्ञाप्यते। काठिन्यपरीक्षासु पूर्वं सरलाः,तत उत्तरोत्तरं कठिनाः प्रश्नाः पृच्छ्यन्ते। कियत् कठिनं कार्यं परीक्षार्थी कर्तुं शक्नोतीति च परीक्ष्यते।

बुद्धिः, तस्या वितरणञ्च

बुद्धौ तस्याः पर्यायवाचकेषु मनीषा-धिषणा-धीरित्यादिषु शब्देषु च क्रियार्थोऽन्तर्निहितः। बुद्धिः कस्यचिद्वस्तुनो ज्ञानम्, तस्योपयोगम्, तेन सह वा व्यवहारं सङ्केतयति। यदा कश्चिज्जनः कस्याञ्चित् परिस्थितौ तथा व्यवहरति, यथा सम्पादनीयं सम्यक्तया सम्पादितं भवति; तदा कथ्यते 'तेन बुद्धिपूर्वकं कार्यं कृतम्' इति। यदि च समस्यायामुपस्थितायां स तथा व्यवहरति, येनानिष्टः परिणामो जायते; तदा कथ्यते 'तेन मूर्खतया आचरितम्' इति। बुद्धिर्न ज्ञानमात्रम्, ज्ञानपूर्विका चेष्टा तस्यां सन्निविष्टा वर्तते। येन नीतिशास्त्रं कण्ठस्थीकृतम्, तस्यार्थोऽप्यवगतः, स ज्ञानवान् भवति। बुद्धिमाँस्तु सः, यः शास्त्रावगमपूर्वकं तस्योपयोगे क्षमः। अनेके वैयाकरणाः शब्द-व्युत्पत्तिनिपुणा व्याकरणग्रन्थानां मुखाग्रपारायणदक्षा नहि नैषधीयं महाकाव्यमपि पाठयितुं क्षमन्ते। न चावसरे प्राप्ते यथार्थाञ्छब्दान् प्रयोक्तुं शक्नुवन्ति। ज्ञानवन्तोऽपि ते न बुद्धिमन्तः। केचिच्च तथा बुद्धिहीना भवन्ति यत्ते स्वजीवनव्यवस्थामपि कर्तुं न पारयन्ते। येषु बुद्धेर्न्यूनता सर्वाधिका भवति ते जडाः[१], येषु ततोऽल्पा ते मूढाः[२], येषु ततोऽप्यल्पा ते मूर्खाः[३] कथ्यन्ते। एवमेव तेषु केचिद् बुद्धिमन्तः, अपरे उत्कृष्टबुद्धयः, अन्येऽत्युत्कृष्टबुद्धयः[४], इतरे च [५]प्रतिभा-शालिनोऽभिधीयन्ते। मूढ-मूर्ख-प्रतिभाशालिनां सङ्ख्याल्पैव भवति। जगति मध्यमबुद्धिमता-माधिक्यं वर्तते।

जडाः सामान्यादपि सङ्कटादात्मरक्षां कर्तुं न पारयन्ति। तेऽग्नौ हस्तं क्षिपन्ति, गाम्भीर्य-मनपेक्ष्यैव जलेऽवतरन्ति, राजपथमध्ये सम्मुखमागच्छद्यानमविचार्यैव तिष्ठन्ति। न ते स्ववस्त्र-भोजनविषयेऽपि चतुराः, भूतभविष्यचिन्तायास्तु कथैव दूरं तिष्ठतु! मूढाः सामान्येभ्यः सङ्कटेभ्य आत्मरक्षणे क्षमन्ते। वार्तालापमपि कुर्वन्ति; परमध्ययनेऽसफलास्तिष्ठन्ति। नहि तेऽन्यसाहाय्यं विना किञ्चिदप्युपादेयं कर्तुं प्रभवन्ति। मूर्खाः सरलानि कार्याणि स्वयमेव कुर्वन्ति। ते स्वद्रव्यस्य, अवकाशकालस्य वा समुचितमुपयोगं स्वयं कर्तुं न पारयन्ति। न ते कस्याञ्चिन्नूतनायां परिस्थितौ, जटिलायां वा समस्यायामुपस्थितायां चातुर्येण व्यवहर्तुं क्षमन्ते। केषुचिद्देशेषु क्षीणबुद्धीनां शिक्षणार्थं पृथक् पाठशालाः स्थापिताः सन्ति। तासु त एव छात्राः प्रवेष्टुमर्हन्ति ये बुद्धि-

१. Idiot.
२. Imbecile.
३. Moron.
४. Genius.
५. exceptional

In Public domain. Digitization Muthulakshmi Research Academy

न्यूनतया आत्मनो भरणं पोषणं वापि कर्तुमसमर्था भवन्ति। न च समाजे विपत्तिभ्य आत्मानं रक्षितुं प्रभवन्ति।

जडा यदि बुद्धिरेखाया एकस्मिन् प्रान्ते तिष्ठन्ति, तदालौकिकबुद्धिमन्तोऽन्यस्मिन्, प्रतिभाशालिनस्तत्समीपगाः। एतादृशा जनाः साहित्यविज्ञानराजनीतिप्रमुखेषु विषयेषु लब्धप्रतिष्ठा भवन्ति। एते कुशाग्रबुद्धयो बाल्य एवाद्भुतानि कार्याणि कुर्वन्ति। काशीस्थः स्वर्गीयो भारतेन्दुहरिश्चन्द्रो वयसः पञ्चमे वर्ष एव दोहानामकं छन्दो व्यरचयत्! सततप्रयत्नशीलता, आत्मशक्तिः, विश्वासः, चरित्रबलम्, अदम्या महत्त्वाकाङ्क्षेत्यादयो गुणाः प्रतिभाशालिषु दृश्यन्ते। साध्यसिद्धये यतमानास्त आत्मानमपि विस्मरन्ति।

बुद्धिपरीक्षा

बुद्धिपरीक्षणारम्भो जर्मनीदेशीयैर्वुण्ड्टादिभिर्मनःशास्त्रिभिः कृतः। ते प्रयोगशालासु विविधैर्यन्त्रैर्बुद्धिमापं व्यदधुः। यन्त्राणि मनुष्यस्य संवेदनाशक्तिमसूचयन्त। संवेदनशक्त्यैव बुद्धेरप्यनुमानमक्रियत। एतेन विधिना यो द्वयोर्बहूनां वा वर्णानाम्, ध्वनीनाम्, स्पर्शानां वा मध्ये स्वल्पतममन्तरं विज्ञातुमपारयत्, स बुद्धिमत्तमोऽकथ्यत। अस्य सिद्धान्तस्य दोषवत्ता सुस्पष्टैव। अनेकेषां प्रतिभाशालिनामपि संवेदनशक्तिर्दुर्बला भवति, मूर्खाणाञ्च प्रबला।

विनेपरीक्षापद्धतिः

बुद्धिमापस्य व्यावहारिक उपयोगोऽस्या एव शताब्द्याः प्रारम्भात् फ्रांसदेशीयेन मनोविज्ञानपारङ्गतेन अलफ्रेडविनेनामकमहोदयेन कृतः। तत्र पेरिसनगरपालिकया सभया क्षीणबुद्धिबालानां पृथक् शिक्षाप्रबन्धो विहितः। विनेमहोदयश्च क्षीणबुद्धिबालकपरीक्षायां नियुक्तः। तेनैतदर्थं बुद्धिमापपरीक्षाया नूतनो विधिराविष्कृतः। अद्य जगति प्रचलिता नानाविधा बुद्धिपरीक्षापद्धतयो विनेपद्धतेरेव संशोधनपरिवर्धनादिना निर्मिताः। विनेमहोदयेन स्वसहयोगिनः थ्योडोरसाइमनमहोदयस्य साहाय्येन वयोऽनुसारं बालकानां बुद्धिपरीक्षार्थं पृथक् प्रश्नाः निर्मिताः। यो बालको वयोऽनुसारं स्वस्मै विरचितस्य प्रश्नपत्रस्योत्तराणि सम्यग्दातुमशक्नोत्, स साधारणबुद्धिरिति घोषितोऽभवत्; यश्च तत्राऽसमर्थः, स मन्दबुद्धिः; यश्च स्वतो ज्यायसां प्रश्नानामुत्तराणि दातुं समर्थोऽभवत्, स प्रखरबुद्धिरिति। तेन यथानुभवं प्रश्नपत्रेषु परिवर्तनमपि कृतम्। अथोदाहरणाय कानिचित् प्रश्नान्यधस्ताल्लिख्यन्ते—

त्रिवर्षीयेभ्यः—

(१) स्वकीयनासिका-नेत्र-मुखानां प्रदर्शनम्।

(२) द्वाभ्यामङ्काभ्यां निर्मितानां सङ्ख्यानाम् (यथा—५७, ६६, ८४ इत्यादीनाम्) आवृत्तिः।

(३) षड्वर्णैर्निर्मितानां शब्दानामावृत्तिः। (यथा—अरिषड्वर्गः, मदमोहादयः, नगरनिगमसम्पत्तिरित्यादीनाम्)

(४) स्वकीयलिङ्गकथनम्। (त्वं बालको बालिका वा?)

(५) स्वकीयं स्वपरिवारस्य च नामकथनम्।

(६) द्वयोश्चित्रयोर्दृश्यमानानां वस्तूनां नामवर्णनम्।

In Public domain. Digitization Muthulakshmi Research Academy

षड्वर्षीयेभ्यः—

(१) प्रातःसायङ्कालयोरन्तरम् ।
(२) सुपरिचितानां वस्तूनामुपयोगः ।
(३) सुन्दरासुन्दरयोर्मुखयोरन्तरम् । द्वयोः पुरुषयोर्मध्ये सुन्दरतरस्य ग्रहणम् ।
(४) षोडशवर्णविरचितस्य वाक्यस्यावृत्तिः ।
(५) आयुषो ज्ञानम् ।
(६) दक्षिणस्य हस्तस्य वामस्य कर्णस्य च प्रदर्शनेन दक्षिणवामयोर्ज्ञानप्रकटनम् ।
(७) सहैव प्रदत्तस्य देशत्रयस्यानुवर्तनम् ।

सप्तवर्षीयेभ्यः—

(१) अपूर्णेषु चित्रेषु या न्यूनता तस्या ज्ञानम् ।
(२) गणनां विनैवैकस्य द्वयोर्वा करयोरङ्गुलीनां सङ्ख्याया ज्ञानम् ।
(३) लेखन्या मस्या च पुरुषाकृतेरनुकरणम् ।
(४) पञ्चाङ्कैर्निर्मितानां सङ्ख्यानामावृत्तिः ।
(५) त्रयोदशानां पणानां गणना ।
(६) प्राकृतिकदृश्यचित्रवर्णनम् ।
(७) चतुर्णां वर्णानां प्रचलनशीलानां मुद्राणां च नामज्ञानम् ।
(८) सहैव प्रदत्तानां चतुर्णां निर्देशानामनुवर्तनम् ।

यथा यथाऽनुभववृद्धिर्जाता तथा तथा विनेमहोदयेन स्वकीयायां प्रश्नावल्यां संशोधनं कृतम् । ईसवीये १९०८तमे वर्षे विरचितेषु प्रश्नेषु किञ्चित् परिवर्तनं कृतमीसवीये १९११ तमे वर्षे । तेन सहस्रेभ्यो बालकेभ्यः प्रश्ना दत्ताः । परीक्षया ये योग्यास्ते प्रश्नावल्यां गृहीताः; येऽतिकठिना अतिसरला वा ते परित्यक्ताः । प्रश्नाश्च नैकविषयसम्बन्धिन एव, बहुविषयका आसन् । पुनश्च तेन साधारणबुद्धिविषयकाः प्रश्ना एव गृहीताः । तेन स्वतो ज्यायोभ्यो बालकेभ्यो निश्चितानां प्रश्नानामुत्तरप्रदाने प्रखरबुद्धित्वं बालकस्य स्वीकृतम् । बालकस्य आयुः किञ्चिदपि भवेत् , यस्मै आयुषे निश्चितानां प्रश्नानामुत्तरं स ददाति तदेव तस्य मानसिकमायुः कथ्यते ।

बुद्धिलब्धिः

विनेमहाशयस्य परीक्षापद्धतौ सम्प्रति कतिचित् परिवर्तनानि जातानि । तत्र प्रथमं महत्त्वशालि परिवर्तनं जर्मनीदेशवासिना विलियमस्टर्नमहोदयेन कृतम् । नहि साम्प्रतं मानसिकमायुः परीक्ष्यते । बुद्धिं परीक्ष्य परीक्षापरिणामो 'बुद्ध्युपलब्धि[१]' रूपेण प्रकाश्यते । सा च मानसिकायुःकालकृतायुर्भ्यां विभज्य प्राप्यते । तस्या विधिरयम्—बुद्धिलब्धिः = $\frac{\text{मानसिकमायुः}^{2}}{\text{कालकृतमायुः}^{3}}$ ।

---

१. Intelligence quotient.

२. Mental age.

३. Chronological age.

In Public domain. Digitization Muthulakshmi Research Academy

यदि भागफलमेकं भवति तदा साधारणबुद्धिः, यदि च भागफलमेकस्मान्न्यूनं तदा बुद्धिर्मन्दा, एकस्माद‍धिके च भागफले प्रखरा बुद्धिरित्यवगम्यते। आधुनिका मनोविदो भागफलं शतेन गुणितं कृत्वा बुद्धिलब्धिं प्रतिशतद्वारा प्रदर्शयन्ति। तथा च बुद्धिलब्धिः= $\frac{\text{मानसिकमायुः}}{\text{कालकृतमायुः}} \times १००$ ।

बुद्धिलब्ध्यनुसारेण बालकानां नव विभागाः क्रियन्ते—

बालकप्रकाराः	बुद्ध्युपलब्धिः
१. प्रतिभाशाली[1]	१४० अङ्केभ्य ऊर्ध्वम्
२. प्रखरबुद्धिः[2]	१२० तः १४० पर्यन्तम्
३. तीव्रबुद्धिः[3]	११० तः १२० पर्यन्तम्
४. सामान्यबुद्धिः[4]	९० तः ११९ पर्यन्तम्
५. मन्दबुद्धिः[5]	८० तः ९० पर्यन्तम्
६. निर्बलबुद्धिः[6] (सीमान्तगतः)	७० तः ८० पर्यन्तम्
७. मूढः[7]	५० तः ७० पर्यन्तम्
८. मूर्खः[8]	२५ तः ५० पर्यन्तम्
९. जडः[9]	० तः २५ पर्यन्तम्

कल्प्यताम्, केनचिद् दशवर्षीयेण बालकेन परीक्षायां पञ्चाशदङ्काः प्राप्ताः। इमे चाङ्काः अष्टवर्षीयेभ्यः सामान्येभ्यो बालकेभ्यो विनिश्चतास्तदा दशवर्षीयस्य बुद्धिलब्धिः=८÷१०×१००=८० भविष्यति, बालकश्च मन्दबुद्धिः। यदि बालकस्यायुः षड्वर्षाणि स्यात् तदा बुद्धिलब्धिः =८÷६×१००=१३३$\frac{१}{३}$ भविष्यति। प्रथमो बालको मन्दबुद्धिः, द्वितीयश्च प्रखरबुद्धिर्भविष्यति। बुद्धिलब्धिः=बु०ल०[10]. इति संक्षेपरूपेणापि लिख्यते।

टरमेनपरीक्षापद्धतिः

विनेमहाशयस्य परीक्षाविधौ द्वितीयं संशोधनं टरमेनमहाशयेन प्रस्तुतम्। टरमेनमहाशयेन तथाविधाः प्रश्ना निर्मिताः, यैर्बालकानां विशिष्टविषययोग्यताया ज्ञानं सम्भवति। अस्यां

---

१. Genius.
२. Very superior.
३. Bright.
४. Normal.
५. Dull.
६. Border line.
७. Moron.
८. Imbecile.
९. Idiot.
१०. I. q

In Public domain. Digitization Muthulakshmi Research Academy

पद्धतौ येषां प्रश्नानामुत्तराणि बालको ददाति, तेभ्यः पृथक् पृथगङ्काः प्रदीयन्ते। विनेपद्धतौ यदि कश्चिद् बालकः स्वप्रश्नावल्या द्वाभ्यामधिकानां प्रश्नानामुत्तराणि दातुं नाशक्नोत्, तदा स एकमप्यङ्कं नाप्नोत्। सर्वेषामपि प्रश्नानां पृथगङ्कप्रदानेन विशिष्टो लाभो भवति। कश्चिद् बालको भाषासम्बन्धिप्रश्नानामुत्तराणि ददाति, कोऽपि गणितविषयकाणाम्। एतेन ज्ञायते तस्य रुचिः कस्मिन् विषयेऽधिकेति। टरमेनमहोदयस्य कानिचित् परीक्षाप्रश्नपत्राण्यधोलिखितानि। परीक्षक एतेषु विषयेषु प्रश्नान् पृच्छति।

त्रिवर्षीयेभ्यः —

(१) शरीरावयवानां ज्ञानम्। पृष्टः सन्नासिकानेत्रकर्णाद्यङ्गानि प्रदर्शयेत्।
(२) परिचितानां वस्तूनां नामग्रहणम्।
(३) किञ्चिच्चित्रं दृष्ट्वा तत्रालिखितानां त्रयाणां वस्तूनां नामग्रहणम्।
(४) लिङ्गभेदज्ञानम्।
(५) स्वकीयनामज्ञानम्।
(६) षण्णां सप्तानां वाङ्कानामावृत्तिः।

षड्वर्षीयेभ्यः—

(१) दक्षिणवामयोर्भेदज्ञानम् (दक्षिणहस्तवामकरादिप्रदर्शनद्वारा)।
(२) चित्रेषु नष्टानां विस्मृतानां वा वस्तूनामन्वेषणम् (नासिकाविहीनां बाहुविरहितां वा आकृतिं प्रदर्श्य)।
(३) त्रयोदशानां भिन्नमूल्यानां मुद्राणां गणना।
(४) व्यवहारप्रश्नाः (विद्यालयगमनकाले संजातासु वर्षासु किङ्करणीयमित्यादिकाः)।
(५) प्रचलनशीलानां मुद्राणां नामवर्णनम्।
(६) षोडशस्वष्टादशसु वा खण्डेषु वाक्यस्यावृत्तिः।

सप्तवर्षीयेभ्यः—

(१) दक्षिणे, वामे, उभयोर्वा हस्तयोर्गणनां विनैव सङ्ख्यानिर्देशः।
(२) चित्रावलोकनानन्तरं तत्रालिखितानां क्रियाणां वस्तूनां वा वर्णनम्।
(३) पञ्चानामङ्कानामावृत्तिः।
(४) अनुकरणरूपेण ग्रन्थिबन्धनम्।
(५) स्मृत्याऽन्तरवर्णनम्, प्रत्यभिज्ञा च। (मक्षिकामधुकर्योः, काष्ठकाचयोर्यथा)
(६) बहुभुजक्षेत्रानुलेखनम् (चित्रद्वारा)।

क्रियात्मकपरीक्षा

विनेमहोदयस्य प्रश्नोत्तरविधेरपेक्षया क्रियात्मिकायां परीक्षायां मूर्तवस्तूनां प्रयोगोऽधिको भवति। यथा कस्मिंश्चित् काष्ठफलके बहूनि भिन्नाकाराणि छिद्राणि क्रियन्ते। तेषु तुल्याकाराणि काष्ठपट्टानि स्थापयितुं बालक आदिश्यते। तथाकरणे यावतीस्त्रुटीः स करोति ता गण्यन्ते। त्रुटयश्च तदा भवन्ति, यदा सोऽन्याकारं पट्टमन्याकारं छिद्रं प्रवेशयितुं चेष्टते।

In Public domain. Digitization Muthulakshmi Research Academy

मनुष्यचित्रणपरीक्षा

इयं परीक्षा वयसश्चतुर्थवर्षादारम्य दशवर्षाणि यावदुपादेया। अस्यां बालको वर्तिकया मनुष्यस्य सुन्दरतमं चित्रमालिखितुमादिश्यते। तस्यालेख्ये पूर्णतां सम्बद्धतामवलोक्याङ्का दीयन्ते, न तु सौन्दर्यदृष्ट्या। आयुर्दृष्ट्या ज्यायान् बालोऽधिकतरान् विशेषान् दर्शयति। स बाहू कण्ठ-समीपे संयोजयति, न तु शिरसि। एवमन्यत्रापि ज्ञेयम्।

सामूहिकी बुद्धिपरीक्षा

अनेन विधिना बहूनां जनानां परीक्षा सहैव क्रियते। अस्या ईशवीयशताब्द्याः प्रथमे युद्धेऽमेरिकादेशे सैनिकानामाशु परीक्षार्थमयं विधिः प्रयुक्त आसीत्। एकस्यां परीक्षापुस्तिकायां प्रथमे पृष्ठेऽङ्कगणितस्य केचित् प्रश्ना आसन्, ये उत्तरोत्तरं कठिनतरा अजायन्त। एकं पृष्ठं सामान्य-ज्ञानप्रश्नैः पूर्णमासीत्। एकस्मिन् पृष्ठे पर्यायविलोमशब्दानां परीक्षायै प्रश्ना अभवन्। यथा— आरोहणोत्थाने पर्यायसूचके विलोम्नी वा? एवमेव स्फूर्तिपरीक्षायै[1] मानसिकनमनीयता-परीक्षायै[2] चापि विधयो विनिश्चिता आसन्।

एतासु परीक्षासु पूर्वानुभवेन प्राप्तस्य ज्ञानस्योपयोग आवश्यको भवति। कस्यापि शब्दस्य परिभाषाऽर्थो वा, मनुष्याकृतेरालेखनम्, भ्रान्तिजनकगृहे प्रवेशः—इत्यादि सर्वं पूर्वार्जितं ज्ञानमपेक्षते। परीक्षाभिर्विदितं यद् यथा शरीरस्य तथा बुद्धेरपि विकासो जन्मतश्चतुर्दशवर्ष-पर्यन्तं भवति, ततः स्थिरता जायते। बालकेषु बालिकासु च नहि लिङ्गकृतः कश्चिद् बुद्धिभेदो भवतीति च।

जनसङ्ख्यासु बुद्धिवितरणम्

कस्यचिज्जनस्यान्यजनैस्तुलनायां किं स्थानमिति निर्धारणमेव बुद्धिपरीक्षोद्देश्यम्। तदर्थं जनानां सामान्यबुद्धिलब्धिर्ज्ञातव्या। बुद्धिलब्धेर्विस्तारः[3] शून्यादारभ्य २०० पर्यन्तं विस्तृतो भवति। तत्र जनसङ्ख्यानुसारेण बुद्धिलब्धेर्वितरणं प्रतिशतमधोलिखितानुसारमस्तीति मतं मनोविदाम् --

बुद्धिलब्धिः	जनसङ्ख्याप्रतिशतम्	बुद्धिलब्धिः	जनसङ्ख्याप्रतिशतम्
१४० त ऊर्ध्वम्	१ (प्रतिभाशालिनः)	९० तो ९९ पर्यन्तम्	२३ सामान्याः
१३० त १३९ पर्यन्तम्	२ } अत्यन्तोत्कृष्ट-	८० ,, ८९ ,,	१६ मन्दबुद्धयः
१२० त १२९ ,,	८ } बुद्धयः	७० ,, ७९ ,,	८ सीमान्तगताः[4]
११० त ११९ ,,	१६ उत्कृष्टबुद्धयः	६० ,, ६९ ,,	२ } मानसिकाभाव-
१०० तः १०९ ,,	३२ सामान्याः	६० ,, नीचैः	१ } ग्रस्ताः[5]

---

१. Alertness.

२. Flexibility.

३. Range.

४. Border line.

५. Mentally deficient.

In Public domain. Digitization Muthulakshmi Research Academy



बुद्धिलब्धयः

प्रथममहायुद्धानन्तरं सैन्यविभागे शिक्षाविभागे च बुद्धिपरीक्षाणां प्रचारो विशेषरूपेण जातः । पूर्वमेव परीक्षया प्रवेशदानेन शक्तेः, धनस्य, समयस्यापव्ययो न भवति, योग्याश्च जनास्तदनुकूलकार्येषु नियोजिता भवन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

विंशोऽध्यायः

निद्रा, स्वप्नश्च

किं नाम निद्रा ?

भारतीयेषु ग्रन्थेषु मनुष्यस्य चतस्रोऽवस्था वर्णिताः। ताश्च जाग्रत्स्वप्नसुषुप्तितुरीयाः। जाग्रदवस्थायां चेतना स्वकं सामान्यं कार्यं करोति। तस्यां बाह्यसंसारस्य ज्ञानं साधारणतो भवति। निद्रावस्था सुषुप्तेरवस्था। तस्यां चेतनायाः सामान्यानि कार्याणि स्थगितानि भवन्ति। मस्तिष्कस्य स्नायवः कार्याद्विरता भवन्ति। शरीरस्यान्यान्यङ्गानि स्वेषु कार्येषु पूर्ववद्वर्तन्ते। तेषां नियन्त्रणं स्वतन्त्रं नाडीमण्डलं करोति, न तु मस्तिष्कम्। निद्राजाग्रदवस्थे परस्परं विपरीते, जाग्रदवस्थायां वयं ज्ञानेन्द्रियैर्निरन्तरं बाह्याघातान् प्राप्नुमः, ते च स्नायुमण्डलक्रियया प्रत्याघातैः सङ्कुचिता जायन्ते। निद्रायामेषा प्रक्रिया विपरिवर्तते। निद्रावस्थायां निद्रालुर्निद्रागाम्भीर्यानुसारं पूर्णतया, अंशतो वाऽचेतनो जायते। तस्य श्वासोच्छ्वासा मन्दा गभीरतराश्च भवन्ति। अक्षिगोलकेऽग्रत ऊर्ध्वं यातः, कनीनिके च स्थिरे भवतः। जाग्रदवस्थायां जायमानो ललाश्रुस्रावो न्यूनतां भजते। अक्ष्णोर्बाह्यं तलं शुष्कं भवति, येन शक्तेरभावोऽनुसूच्यते। एतन्निद्रायाः सुपरिचितं चिह्नम्।

सामान्यतयैतत् प्रतीयते यन्निद्रा शीघ्रं याति शीघ्रमेव चायाति। परं न निद्रा आकस्मिकी प्रक्रिया। आगच्छन्त्यां निद्रायां पूर्वं हस्तपादप्रचलनशक्तेर्ह्रासोऽनुभूयते, ततः श्रवणशक्तेः। जागरणे समायात एतद्विपरीतं भवति। पूर्वं श्रवणशक्तिः पुनरावर्तते, ततो हस्तपादप्रचालनशक्तिः।

नहि निद्रायाः प्रगाढता सर्वस्यामपि निद्रावधौ समाना भवति। आदौ भवति तस्यां प्रगाढता, घण्टाद्वयानन्तरं तस्यां न्यूनता जायते, क्रमणे च पूर्णो ह्रासः, जागर्तिश्च।

निद्राया उपयोगः

निद्रा शारीरिकक्षतिपूर्तिसाधनम्। जाग्रदवस्थायामनेकैः कार्यैः शक्तेः क्षयो भवति, निद्रायाञ्च तस्याः पूर्तिः। येषां स्नायूनां क्षतिर्जाग्रदवस्थायां जायते तेषां सुधारो निद्रया सम्पाद्यते। क्रियारते मस्तिष्के जाग्रदवस्थायां शरीरेणोत्पादिता शक्तिस्तदर्थमेव व्ययिता भवति। तदा शक्तेः प्रवाहो मस्तिष्कं प्रति भवति। अतो नान्यान्यङ्गानि पर्याप्तां शक्तिं लभन्ते। शक्तेः सर्वाधिको व्ययो विचारेण जायते। निद्रावस्थायां च विचारश्रृङ्खला भग्नैव भवति। तदा शक्तिरन्यान्यङ्गानि प्रति सञ्चरति। पाचनक्रियाया अपि सम्यक् सम्पादनाय विचारविराम आवश्यकः। स निद्रामूर्च्छयोर्निसर्गतः, तुरीयावस्थायाञ्च सप्रयत्नो भवति।

निद्राप्रकाराः

भारतीयविचारकैर्या सुषुप्तिरित्यभिहिता सा तु प्राकृतिकी निद्रा[१]। सा च स्वास्थ्यरक्षायै जीवनक्रमरक्षायै चावश्यकी। प्रतिदिवसमनुभूयमाना सा स्वास्थ्यचिह्नम्। निर्विघ्ननिद्रा

१. Natural sleep.

In Public domain. Digitization Muthulakshmi Research Academy

नीरोगावस्थां सूचयति। बालानां दैनिको निद्राकालः प्रौढेभ्यो दीर्घतरो वृद्धानां चाल्पतरो भवति। बालानां कायपुष्टिवृद्धी निद्राधीने।

अन्यापि काचिदवस्था निद्राकल्पा या चोपचारेण निद्रैवाभिधीयते। सा च मदजन्या, मोहजन्या च। नास्यां दशायां चेतनाऽविकृततया कार्यपरायणा भवति। अस्याः कारणानि मद्य-मोहादयः। चिन्ताक्लेशादिका निद्राबाधका भवन्ति। नहि निद्रां विना कोऽपि जीवितुं क्षमते बहुकालम्। ततः प्राकृतिकनिद्राभावे मदावस्थां प्रापयितृभिर्वस्तुभिः कृत्रिमा[1] निद्रोत्पाद्यते। सा च 'ईथर' इत्याद्याख्यानां वस्तूनामाघ्राणेन जायते। शिरस उपर्याघातेनापि निद्राकल्पा मूर्च्छा[2]-स्थितिर्भवति। रोगाक्रमणेनोन्मादसन्निपातादिनाऽपि निद्रानिभाऽवस्था मूर्छा प्राप्यते। सम्मोहनमपि[3] निद्राजनकम्। सर्वविधास्वेवैतासु निद्रासु मानसिकक्रियाणामवरोधस्तुल्यः। अन्तरं तु जाग्रदवस्थां प्रापयितृषूपायेषु, मानसिकक्रियासु जायमानानां परिवर्तनानां परिमाणे चोपलभ्यते।

शिरसि जायमाने आघाते मानसिक्यः क्रियाः पूर्णतया निरुद्धा भवन्ति। अन्यासु चाल्प-परिमाणे जायमाना वर्तन्ते। सुषुप्त्यवस्थायाः सामान्यतमा प्रक्रिया स्वप्नः। सा च जाग्रत्सुषुप्त्यो-रन्तरावस्था। मूर्छाऽसह्यात् शारीरिकान्मानसिकाद्वा क्लेशाज्जायते। सा चासह्यवेदनामुक्तिजननी वेदनाऽतिशये स्वयमेवोत्पद्यते।

सम्मोहनम्

अन्यस्य कस्यापि प्रयत्नेन जाता मनसश्चेतनाहीनावस्था सम्मोहनं नाम। सा च मोह-निद्राप्यभिधीयते। नास्यां चेतनाऽवरुद्धा भवति। सम्मोहनेऽन्यवशगा सामान्याया भिन्ना विशिष्टा काचिच्चेतना कार्यरता भवति। यथा च सम्मोहको निर्दिशति तथैव सम्मोहितश्चिन्तयति। पूर्वं स विचारशून्यो भवितुमादिश्यते। ततो विचारशून्ये जाते सम्मोहकस्तं यथेच्छं निर्दिशति। स चादिष्टं सर्वं करोति।

जाग्रदवस्थायामपि वयं सर्वे परनिर्देशाननुसरामः। वृद्धानामादेशा आत्महितायेत्यविचार्यैव स्वीक्रियन्ते। यदा च कस्याप्यादेशा निर्देशाश्चान्यत् सर्वमुपेक्ष्य श्रद्धया गृह्यन्ते; तदा चेतनाऽन्येभ्य इन्द्रियजन्माघातेभ्यो विच्छिन्ना सती सम्मोहकसम्बद्धाघातेष्वेव केन्द्रिता भवति, परं नहि सम्मोहावस्थायां कोऽपि स्वनीत्याचारविचारविरुद्धमाचरति। यदा च तथा कर्तुं निर्दिश्यते, तदा स भग्नसम्मोहोऽवबुद्धो भवति। नहि सदाचारविरोधिनिर्देशाय सम्मोहनमावश्यकम्। दुराचारविरोधिशक्तिमत्त्वे सति सदाचरणक्षमत्वं नाम हि चरित्रम्। यदि कश्चित् परनिर्देशेनासदा-चरति, तदा नहि निर्देष्टुर्दोषः; कर्तुरेव तद्दौर्बल्यम्। नहि कश्चिदप्यजानन्निच्छाविरुद्धं वाऽपि सम्मोहितो भवितुं शक्नोति। सम्मोहनमुपगमय्य निर्देशं कर्तुं स एव शक्नोति यस्येच्छाशक्तिः सम्मोहपात्रादधिकतरा स्यात्।

सम्मोहितस्तदेव निर्देष्टुं शक्यते यत् स जाग्रदवस्थायां निर्दिष्टः सन्नाचरति। यदि

---

१. Narcotic sleep.

२. Coma.

३. Hypnotic sleep.

In Public domain. Digitization Muthulakshmi Research Academy

निर्देशः कष्टदायकः, तस्य प्रकृतिविरुद्धो वा भवति, तदा नाऽनुष्ठीयते। एकदा कोऽपि शिक्षकः स्वच्छात्रं सम्मोहितावस्थामानीय निर्दिष्टवान्, यदा त्वं जागर्सि ततः पञ्चदशमिनटानन्तरमाक्रन्दस्व 'हुर्रा' इति। एवं निर्दिश्य सोऽन्यान् छात्रान् पाठयितुमारब्धवान्। बालकोऽवबुद्धोऽतीतेषु पञ्चदशमिनटेषु व्यग्रतयेतस्ततो द्रष्टुमारेभे। एवं प्रतीयते स्म यत्स किञ्चित् कर्तुं चेष्टते, परं साहसाभावेन कर्तुं न प्रभवति। ततस्तेन समीपस्थस्य सहपाठिनः कर्णे मन्दमुक्तम् 'हुर्रा' इति। अत्र सामाजिकी परिस्थितिर्निर्देशविरुद्धा आसीत्। ततस्तेनान्यो मार्गो निर्देशानुसरणस्यान्वेषितः। एवमेव कोऽपि स्त्रियं सम्मोहयित्वा नहि तां सदाचारभ्रष्टां कर्तुं शक्नोति।

निर्देशस्वीकरणे जना भिन्नां प्रवृत्तिं प्रदर्शयन्ति। केचित् काठिन्येन विरोधपूर्वकम्, केचिच्च सरलतया स्वीकुर्वन्ति। केषाञ्चित् प्रकृतिरीदृशी भवति यत्ते सुहृद्भिर्दत्तं परामर्शमपि सन्देहदृष्ट्या पश्यन्ति, परामर्शविरुद्धमेव चाचरन्ति। 'अन्ये तं कुमार्गेण गन्तुं प्रेरयन्ति' इति त एव कथयन्ति येषां मनः सदा सन्देहग्रस्तं भवति।

येषामिच्छाशक्तिर्दुर्बला भवति त एव शीघ्रं सम्मोहनवशीभूता दृश्यन्ते। एवंविधा जनाः प्रायेण विवेकहीना भवन्ति। नहि विचारपरस्तर्कप्रवणो वा सरलतया सम्मोहितो भवति। बालाः स्त्रियश्च प्रौढपुरुषापेक्षया सारल्येन सम्मोहनं नीयन्ते। सम्मोहावस्थायां सम्मोहितस्य मनः सम्मोहकवशानुगं भवति। पूर्वं सम्मोहकनिर्देशेन विचारशून्यतां प्राप्तः सम्मोहनविषयश्चेतनाहीन इव सर्वान् निर्देशान् यन्त्रवदनुतिष्ठति। सम्मोहकश्च तेन यथावाञ्छितं कारयति। निर्देशा यथा सम्मोहनकालेऽनुष्ठीयन्ते, तथा सम्मोहनोत्तरकालेऽपि। यथा पूर्वं निरूपितम्, छात्रो विगतायामपि सम्मोहनदशायां 'हुर्रा' इति शब्दमुदचारयत्। सम्मोहनोत्तरकालेऽनुष्ठीयमाननिर्देशविषये यदि कश्चित् सम्मोहनविषयं पृच्छेत्, तदा स्वक्रियायाः कारणविषयेऽज्ञतामेव सूचयिष्यति, यत् किञ्चिदपि कल्पितं कारणं वा वक्ष्यति। सहपाठिनः कर्णे 'हुर्रा' इति शब्दमुच्चारयन् बाल उच्चारणकारणानभिज्ञ एवासीत्।

कस्मिन्नपि वारं वारं सम्मोहनक्रियाप्रयोगो हानिकरः। जना बालकानेव प्रायः सम्मोहनविषयान् कुर्वन्ति। एवं तेषामिच्छाशक्तिर्दुर्बलतरा जायते। सम्मोहनस्योपयोगं मनोवैज्ञानिकाः शिवायैव प्रकुर्वते। ते जनं सम्मोहयित्वा तस्य विस्मृतमप्रियानुभवं स्मारयन्ति। अनुभवं चेतनास्तरमानीय ते मनोरोगिणो रोगकारणं मार्गयन्ति, चेतनावस्थायाञ्च रोगिणा तत्सर्वं स्वीकारयन्ति। एवं बहवो मनोरोगा मानसिकग्रन्थिशैथिल्याद् दूरीभवन्ति। मनोवैज्ञानिकैः सम्मोहनप्रक्रियानिपुणैर्भाव्यम्।

स्वप्नाः

जाग्रत्सुषुप्त्यवस्थयोरिव स्वप्नावस्थाया अनुभवोऽपि सर्वेषां भवति। रात्रौ दृष्टाः स्वप्ना दिने प्रायेण विस्मृता भवन्ति। अतो नहि सर्वेषां स्वप्नविषयकं ज्ञानं तथा स्पष्टं भवति यथा सुषुप्तेः। मनोराज्य[1] इव स्वप्नेऽपि नवीना सृष्टिर्मनःसम्मुखं भवति। यद्यपि स्वप्नसृष्टेराधारो भौतिकं जगदेव, तथाऽपि सा वस्तुजगतो भिन्ना भवति। यानि कार्याणि जगत्यशक्यानि भवन्ति, तानि स्वप्नलोके घटमानानि दृश्यन्ते। शय्यामधिशयानो जनः विचारेषु चेतनानियन्त्रणं स्थगितं

---

१. Fantasy.

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा यदा मनो यथेच्छं भ्रामयितुमनुजानाति तदा मनोराज्यसृष्टिर्भवति। ततोऽनन्तरं स्वप्नावस्था, ततः सुषुप्तिरिति क्रमः । मनोराज्ये जागर्त्यहङ्कारवान् द्रष्टा सूत्रसञ्चालको भवति। स्वप्नद्रष्टा तु तस्माद्भिन्नः। नहि स्वप्नेषु चेतनाया नियन्त्रणं भवति, न च कोऽपि यथेष्टं स्वप्नान् द्रष्टुं शक्नोति, न ततो विरन्तुम्। भयङ्कराणां स्वप्नानां मुहुर्मुहुर्दर्शनं मनसः शरीरस्य च विकाराणां सूचकम्।

स्वप्नकारणानि

स्वप्नानां कारणं शारीरिकी मानसिकी वोत्तेजना भवति । शारीरिक्युत्तेजना द्विविधा—शारीरिकविकारजन्या, बाह्यपदार्थजन्या च । ज्वरावस्थायां पीडातिशये च भयप्रदाः स्वप्ना दृश्यन्ते। रोगावस्थायामनेका भयङ्करकल्पना मनसि प्रादुर्भवन्ति, ताश्च तथाविधान् स्वप्नान् सृजन्ति। अनेकदा भाविनो रोगा अपि स्वप्नेषु दृश्यन्ते । अचेतनं मनश्चेतनात् पूर्वमेव तान् विकारानवगच्छति, ये रोगकारणानि भवन्ति। वातपित्तकफविकाराः स्वप्नस्रष्टारो भवन्ति। कस्याश्चित् क्रियाया वारं वारमनुष्ठानं भविष्यत्काले घटिष्यमाणं च स्वप्नकारणं भवति। रोगाः, आगामिन्य आपदश्च प्रतीकरूपेण; यथा—जले नावा तरणम्, जले निमज्जनम्, सर्पदंशः, राक्षसबाधा स्वप्ने दृश्यन्त इत्यपि सर्वेषामस्माकमनुभवः।

स्वप्ना बाह्यपदार्थप्रेरिता अपि भवन्ति । दुर्गन्धमयेऽस्वच्छे स्थाने, वस्त्रेण मुखमावृत्य वा शयनं दुःस्वप्नप्रेरकं भवति। दूषितो वायुरन्तः प्रविश्य मनस्त्रासं जनयति। स च त्रासः स्वप्नैरभिव्यज्यते । शयनस्थाने जायमानः प्रियोऽप्रियो वा शब्दोऽपि प्रियाप्रियस्वप्नजनको भवति। कोऽपि बाह्यः शीतल उष्णो मृदुः कर्कशो वा स्पर्शः स्वप्ने स्वसम्बन्धं जनयति।

मनसः क्षुब्धावस्था स्वप्नानां प्रधानं कारणम्। साऽपि द्विविधा—जाग्रदवस्थाऽनुभवजन्या, आभ्यन्तरिकेच्छाजन्या च । अस्माकं स्वप्नेष्वधिकतराणामुत्पत्तिर्जाग्रदवस्थाया अनुभवेभ्य एव भवति। मृच्छकटिकं नाम प्रकरणं पठन्नेव यो निद्रां गच्छति स चाण्डालैर्वध्यमानमात्मानं चारुदत्तरूपे द्रष्टुं शक्नोति स्वप्ने। दिवसे वा निगृह्यमाणमारक्षिभिः कञ्चिच्चौरं दृष्ट्वा कोऽपि स्वप्ने तत्सदृशं दृश्यं द्रष्टुं शक्नोति। कदाचिन्नवाः प्राक्तनाश्चानुभवा अंशतः संयुज्य नवामाकृतिं विरचय्य स्वप्ने उपस्थापयन्ति।

दिवास्वप्नाः

स्वप्नानां कतिपये प्रकाराः पूर्वमुक्ताः। तेषु दिवास्वप्नाः सर्वेषां सुविज्ञाताः। सम्मुखस्थं परिवेशं विस्मृत्यानेके जनाः केषुचिदव्यवस्थितेषु लीना अवलोक्यन्ते । अनुपस्थितविषयका सम्बद्धविचारा एव दिवास्वप्नाः । ते च वस्तुजगतः पलायनसहायकाः। केचिद्दिवास्वप्ना आनन्दकरा भवन्ति। ते च तथाविधानां वस्तूनां कल्पनायां निमज्जयन्ति यान्यप्राप्यानीप्सितानि च। प्रयत्नेनाप्राप्यकल्पनया समीहा दिवास्वप्नेषु परिस्फुटिता भवति । एवंविधा दिवास्वप्ना आनन्ददायिनो भवन्ति। ते चोपयोगिनः, अनुपयोगिनश्च। कलासृष्टौ सहायकास्ते कवीन् चिन्तनपरायणाँश्चोपकुर्वन्ति । प्रयत्नस्थानापन्ना मृषात्मतोषदायकाश्च तेऽकर्मण्यतामूलाः। दिवास्वप्नाश्चिन्तारूपा अपि भवन्ति। केचिज्जनाः कठिने कार्ये उपस्थिते तत्सम्पादनप्रयत्नं न

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा वृथा चिन्तिता एव तिष्ठन्ति। चिन्ताभाराक्रान्तास्ते न कमपि प्रयत्नं कुर्वन्ति। तथाविधानां चिन्ताऽक्षमताजन्यात्मग्लानिपरिहाराय व्याजमात्रम्। एवं दिवास्वप्नेष्विच्छाया भयस्य वा संवेगोऽनुप्रविष्टो भवति। यदि दिवास्वप्नानां परिमाणमल्पं भवति तदा ते परिवेशपरिसीमानं भित्वा दूरगतान्यपि वस्तून्याप्तुं जनान् प्रेरयन्ति। तेषामाधिक्यञ्च जनं कापुरुषं कल्पनाविलासिनञ्च करोति। दिवास्वप्नाः संवेगहीना अपि भवन्ति। चेतनानियन्त्रणरहितं मनोऽनेकदा मुक्तमसम्बद्धं यत्किञ्चिच्चिन्तयत्तिष्ठति। अस्यामवस्थायां मनो यत्र कुत्रचिदपि निरुद्देश्यं भ्रमति। न च तात्कालिकाः स्वप्ना भयेच्छादिसंवेगप्रेरिता भवन्ति। ते तु निरुद्देश्या एव सञ्चिकरान्यकार्याभावेऽस्तित्वमायान्ति।

रात्रिस्वप्नाः

रात्रिस्वप्नेति शब्दे रात्रिशब्दोऽवच्छेदको निद्रायुतदिवाकालेऽप्युपचर्यते। एवं रात्रिशब्दोऽत्र निद्राशब्दसमानार्थी। रात्रिस्वप्ना अपि दिवास्वप्ना इव संवेगहीना भवितुं शक्नुवन्ति। चिन्तया, अन्येन वा क्लेशेन यदा गाढनिद्राबाधो भवति, तदा दिने क्रियमाणानि कार्याणि बहुधाऽक्रमेणावृत्तानि भवन्ति। परीक्षायां सन्निकटायां सर्वं दिवाऽधीतं छात्राः क्रमविरहितं पुनरधीयते स्वप्नेषु। चौरान् निगृहीतवानारक्षी पुनरपि तानेव चौरान् स्वप्ने निगृह्णाति।

दिवास्वप्ना इव रात्रिस्वप्ना अपि प्रायेणेच्छातृप्तिकराः। बुभुक्षितः स्वप्ने यथेच्छं मिष्टान्नं प्राप्नोति, शत्रुणाभिभूतो विपक्षं पराजयते, परीक्षार्थी प्रथमश्रेण्यामुत्तीर्णो भवति, कामुकश्च कयाचित् स्त्रिया सङ्गच्छते। काश्चिदिच्छाः समाजमर्यादाविरुद्धा अत्यन्तं स्वार्थसाधिका वा भवन्ति। तासां प्रकाशनादपि जना अपत्रपन्ते, पूर्तेस्तु का कथा! एतादृश्य इच्छाः स्वप्ने पूर्यन्ते। नहि कुतोऽपि भयं स्वप्ने बाधते। भयस्वप्नास्त्वेतद्विरुद्धाः। स्वप्ने केभ्यश्चिद् वस्तुभ्योऽकारणं भयं जायते। संवेगा येन केनाऽपि वस्तुना आत्मानं संयोजयन्ति। नहि तज्जन्यानि भयानि सत्यानि। वास्तविकं भयं विचारसहं भवति। वारं वारं दृष्टा भयोद्वेगकराः स्वप्ना यथार्था अपि जायन्ते।

स्वप्नानां स्वरूपम्

केचित् स्वप्ना रूपकप्रधाना[१] भवन्ति। अप्रस्तुते प्रस्तुतारोपणं नाम रूपकम्। रूपकस्वप्नेषु किञ्चिद्वस्तु प्रच्छन्नतयाऽन्यवस्तुवेषे प्रस्तुतं भवति। नद्यां तरणं सङ्कटस्य, विकसमानं सरोजं सुखस्य, केनापि प्रदत्तं फलं पुत्रजन्मनः सूचकं भवति। प्रतीकात्मकाः स्वप्ना व्यङ्ग्य[२]-चित्राणीव भवन्ति। तत्र सूचितव्यं वस्तु सङ्केतेनाभिव्यज्यते। स्वार्थपरायणः कश्चित्तत्र भल्लूकराक्षस-गृद्धादिरूपं गृह्णाति। तेन पीडितः शोषितश्चाजाया दुर्बलब्राह्मणस्य मांसपिण्डस्य वा। मार्गनमहोदयेन कस्याश्चित् स्त्रियः स्वप्नानां वर्णनं कृतं स्वकीये 'प्रारम्भिक मनोविज्ञान' इति नाम्नि पुस्तके। सा स्त्री स्वप्नेषु दूरदेशयात्रामकरोत्। कदाचित् सा सुन्दरेषु प्रदेशेषु पर्यटत्। अन्यदा तादृशेषु सेतुषु चलन्तीमात्मानमपश्यद्येषां नीचैः प्रखरोर्मिमयो जलौघः प्रावहत्, तस्य रयस्तां निपातयितुं क्षमश्चाभूत्। जलौघं तरन्ती सा कदाचित् प्रकाशमानं पर्वतश्रृङ्गं सम्मुखमपश्यत्,

१. Allegorical.

२. Cartoons.

In Public domain. Digitization Muthulakshmi Research Academy

कदाचिच्च तदेव शृङ्गं तुषारावृतम्। एते सर्वे स्वप्नास्तस्या वर्तमानजीवनानुभवजां कथां प्रतीकपद्धत्या वर्णयन्त आसन्।

स्वप्नानां व्याख्या

फ्रायडमहोदयेन स्वप्नानां व्याख्याऽन्येन प्रकारेण कृता। तन्मते सर्वेषामपि स्वप्नानां कारणमतृप्ताः कामना एव। मनसि प्रकृत्यैवानेका इच्छाः प्रादुर्भवन्ति। तासु काश्चित् समाजमर्यादानुकूलाः, काश्चिच्च लोकव्यवहारविरुद्धाः। लोकानुकूलानां तु तृप्तिर्लोके सम्भवति। नास्माकं चेतनमनस्ता विरुणद्धि। तृप्तीश्चेच्छाः शान्ता भवन्ति। नहि ता मनसि काञ्चिदुत्तेजनां जनयन्ति। याश्चेच्छा लोकमर्यादाचारप्रतिकूला भवन्ति, तासां तृप्तिर्नहि लोकसमक्षे शक्या। एतादृश्यः कामना नानाविधा उत्तेजना मनसि जनयन्ति। ताश्चोत्तेजना अचेतने मनसि स्थीयन्तेऽर्धचेतनावस्थायाम्। यदा विवेकरूपो नियन्त्रकः शिथिलो भवति, प्रकाशयितुमात्मानं प्रयतन्ते। स्वप्नाश्च दमितेच्छाप्रसवाः। स्वप्नेऽपि मनो नहि पूर्णतयाऽचेतनं भवति। नीलाचारविरुद्धाश्चेच्छाश्चेतनाद् बिभ्यत्यो वेषान्तरं परिधाय, आरक्षिभयाच्चोरवञ्चका इव, प्रकटयन्ति स्वरूपम्। स्वप्नाश्चैवंविधातृप्तेच्छानां प्रच्छन्नरूपेण तृप्त्युपायरूपाः। फ्रायडमते कामेच्छा एव जीवने सर्वाधिका अतृप्ता भवन्ति। ताश्चैव जीवने प्रबलतमाः। ता एव स्वप्नकारणानि भवन्ति। जलावगाहः, वायावुड्डयनम्, पर्वतारोहणम्, कन्दराप्रवेशः, पलायनम्, बालैः सह क्रीडनमित्यादीनि सर्वाणि स्वप्नचेष्टितानि कामतृप्तिसूचकान्येव। वैरेर्ष्यालोभादयः स्थायिभावा उद्विग्नताजनकाः स्वप्नानां हेतवः। प्रबलाः स्थायिभावा अतृप्ताः सन्तो ग्रन्थिरूपेण मनसि तिष्ठन्त इष्टमृत्युतुमुलयुद्धाधःपतनादिभयजनकान् स्वप्नान् सृजन्ति। यश्च पितरं द्वेष्टि स कस्यचिन्महापुरुषस्य निधनमनिष्टं वा स्वप्नेऽवलोकयति। जाग्रदवस्थायां यथा संवेगानां स्थानान्तरणं भवति, तथा स्वप्नेऽपि। कयाचित् स्त्रिया वञ्चितः सर्वा अपि नारीर्घृणया विलोकयति। कश्चिद्वङ्गप्रदेशीयं महाकविं समादृत्य सर्वानपि वङ्गीयान् समादरदृष्ट्याऽवलोकयति जनः। स्वप्नेऽप्येतत् स्थानान्तरणं भवति। एवं मनसि स्थिता अप्रीतिकराः स्थायिभावा अप्रीतिजनकान्, प्रीतिकराश्च प्रियान् स्वप्नानुत्पादयन्ति।

स्थायिभावा यथा वस्तुजगति कार्यरता भवन्ति, न तथा स्वप्नजगति। तेषां कार्यविधिः परिवर्तितो भवति। लोके वयं शत्रुविनाशाय यतामहे, तदनिष्टाय चेष्टामहे, स्वप्ने तत्प्रतिकूलमपि भवति, स्वयमेव शत्रुत्रस्ता भवामः। जाग्रदवस्थायां वयमन्यान् घृणयाऽवलोकयामः, स्वप्नेऽन्येऽपि तथाऽस्मानवलोकयन्ति। लोके वयं धनं सञ्चिनुमः, स्वप्नेऽस्माकं धनमपह्रियते। लोकेऽन्यमृत्युकामना स्वप्ने स्वमरणरूपं धत्ते। एतद्विरुद्धं प्रकाशनम्।

ब्राउनमहोदयानां मते स्वप्ना अतीवोपकारकाः। स्वप्ना निद्राभङ्गकारका इति भ्रान्तिः। ते निद्रारक्षका इति तु सत्यम्। निद्रायै प्रबलोत्तेजनानां शान्तिरावश्यिकी भवति, यथा शमो निर्वाणप्राप्तये। निद्राऽपि प्रतिदिवसं निर्वाणरूपैव। वैरघृणालिप्सादयो भावास्तद्भोगेन, तद्विपरीतभावोदयेन वा शाम्यन्ति। स्वप्ने चेदृशानामुत्तेजकानां भावानां फलभोगो जायते। यदा च मनसि द्वेषादिभावानां प्राबल्यं भवति, तदा तेषां निराकरणाय प्रकृतिरेव तथाविधाः स्थितीर्निर्माय फलभोगद्वारेणात्मयन्त्रणारूपेण शममुत्पादयति।

In Public domain. Digitization Muthulakshmi Research Academy

केषुचित् स्वप्नेषु कोऽप्यादेशोऽन्तर्हितो भवति । एडलरमते कठिनपरिस्थितौ सङ्कटे वा नाऽस्माकं निर्णयो पक्षविपक्षयुक्तिपुरस्सरो भवति । अज्ञाताः प्रवृत्तयः, चेतनमनोयुक्तयश्च निर्णये सहायिका भवन्ति । निर्णयोऽचेतनं मन एव करोति । यदा चाचेतनस्य मनस आदेशो जाग्रदवस्थायां न प्राप्येत, तदा स स्वप्ने उपलब्धो भवति । चेतनाचेतनमनसोर्यदा विरोधो भवति तदैवादेशात्मकाः स्वप्ना जायन्ते ।

युङ्गमहाशयानां मते स्वप्ना मनःस्थितेरावश्यकतानाञ्च सूचकाः । तस्यानेके रोगिणः स्वप्ने उपचारविधिमवगतवन्तः । तं विधिं चाश्रित्य चिकित्सया तेनानेके रोगिणो नीरोगाः कृताः । तन्मते स्वप्नाः स्वप्नोत्तरविचाराश्चाऽप्यतिमहत्त्वपूर्णाः । एवं युङ्गमहाशयोऽप्यादेशात्मकस्वप्नविषयिणीं भारतीयां धारणामेव समर्थयति ।

स्वप्ननिरोधः

यथा मनःशुद्ध्याऽभ्यासेन च विचारेषु नियन्त्रणं शक्यम् , तथैव स्वप्ननिरोधोऽपि । परं नह्येवंविधेन स्वप्ननिरोधेन स्वप्नकारणानि नश्यन्ति । यावच्च कारणानि तावत्स्वप्नेषु तेषामभिव्यक्तिरपि हितायैव । नहि स्वप्ननिरोधो मनःस्वास्थ्याय हितावहो भवति । स्वप्ननिरोधेन निद्राभङ्गः स्मृतिह्रासो वा सम्भवति । यावच्च मनः पूर्णतया विशुद्धं न जातम् , तावत् स्वप्नदर्शनं स्वाभाविकं स्वास्थ्यप्रदं चेति विज्ञेयम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

एकविंशोऽध्यायः

व्यक्तित्वम्[1]

परिभाषा

व्यक्तित्वशब्दः सर्वस्यापि तस्य बोधको भवति यत्किञ्चिद्व्यक्तौ विद्यते—तस्य मनः, शरीरम्, स्वभावः, चरित्रम्, अन्यैश्च व्यवहारशैली। मनुष्यस्य संवेदनाः, मूलप्रवृत्तयः, प्रत्यक्षज्ञानम्, संवेगाः, कल्पना, स्मृतिः, शिक्षितम्, बुद्धिः, विवेकोऽन्यच्च सर्वं तत्सम्बन्धि तस्य व्यक्तित्वे समाविष्टं भवति। एतस्य सर्वस्य समग्रतैव नाम व्यक्तित्वम्। यदि रमेशः सुरेशं पृच्छेत् कीदृशं व्यक्तित्वं देवदत्तस्येति, तदा सुरेशः कथयिष्यति स दयालुरध्यवसायी बुद्धिमाँश्चेति। रमेशश्च वदति मन्मते स प्रसन्नचित्तः, क्षमाशीलः, विवेकी चेति। अत्र द्वाभ्यां मित्राभ्यां देवदत्तस्य व्यक्तित्वं द्वाभ्यां प्रकाराभ्यामुपवर्णितम्। किमस्य कारणम्? व्यक्तित्वविषये जनानां निर्णयस्तैः सह व्यक्तेर्व्यवहारेणैव भवति। अतो न व्यक्तित्वं केवलं व्यक्तेरात्मगतमेव सर्वम्, तस्य समाजे परैः सह प्रकटीकरणमपि व्यक्तित्वान्तर्गतं भवति। एवं व्यक्तित्वस्याधिको भागः सामाजिकः। पुनश्च देवदत्तस्य यानि विशेषणान्युपर्युक्तानि तीनि तस्य क्रियाविशेषणानि। तानि तस्य व्यवहारविषय एव यत्किञ्चित् सूचयन्ति। कस्यचिदाचरणं मनोहरं भवति, कस्यचिच्चामर्षजनकम्। कश्चिदुत्साहपूर्वकं कार्यं करोति, अपरो मन्दं मन्दम्। एतदनुसारं जनः सदाचारी, दुराचारी, उत्साही, मन्दो वा कथ्यते। एवं व्यक्तित्वमुद्घाटयन्तः शब्दा व्यवहारस्य विशिष्टानां गुणानां नामानि, न तु क्रियानामानीति स्पष्टम्। व्यक्तित्वं व्यक्तेर्व्यवहारस्य गुणसमष्टिः। व्यवहारगुणाश्च त एव ये तस्य विचारैः विचाराभिव्यक्तिरीत्या, अभिवृत्त्या, रुच्या, कार्यविधिना, निजेन जीवनदर्शनेन[2] च सूच्यन्ते।

'व्यक्तौ यत्किञ्चिद् वर्तते तस्य समग्रता नाम व्यक्तित्वम्' इति परिभाषायां समग्रताशब्दस्य विशिष्टं महत्त्वम्। आबाल्यात् प्राप्तानामनुभवानामेकस्यां व्यक्तावेकीभवनं नाम समग्रता। बालो यथा यथा वर्धते तथा तस्य जन्मजातः स्वभावोऽर्जितैरनुभवैः परिवर्तितो भवति। कालक्रमेण बहु विस्मर्यते, बहु च नवमुपार्ज्यते। कतिपयवर्षपूर्वं ये वयमास्म, नाद्य ते। केचित्तु तथा परिवर्तिता यथा तेषामभिज्ञानमपि दुष्करं भवति। तथापि न कोऽप्यात्मानमन्यं मन्यते। अस्य कारणं व्यक्तित्वस्य समग्रतैव। समग्रतैवैकताविधायिनी। अत एव म्यूरहेडमहोदयेनोक्तम् "व्यक्तित्वं व्यक्तेः संरचनायाः[3], रुचिभेदानाम्, अभिवृत्तेः, व्यवहारस्य, क्षमता-योग्यता-प्रवणतानां[4] च सर्वातिगं "सामग्र्यमस्ति" इति। समग्रत्वञ्च सर्वगुणानां योगः। कश्चित् पुरुषो दयालुः

---

१. Personality.

२. Philosophy of life.

३. Constitution.

४. Aptitudes.

५. Integration.

In Public domain. Digitization Muthulakshmi Research Academy

स्वावलम्बी चेत्यस्य स दयालुः सन् स्वावलम्बीत्यर्थः। न तु दयालुत्वं स्वावलम्बित्वं च पृथक्काले पृथक् पृथगवतिष्ठेते।

व्यक्तित्वस्य तत्त्वानि[1]

यद्यपि व्यक्तित्वे निहितानि तत्त्वान्यसङ्ख्यानि, तेषां पृथक् पृथक् चर्चाऽशक्या, यतो व्यक्तित्वे सर्वा अपि मनःशरीरसम्बन्धिन्यः शक्तयः, तासामभिव्यक्तिप्रकाराश्चान्तर्भूताः सन्ति; तथापि तस्य प्रधानानान्यङ्गानि निम्नलिखितानि—

शरीररचना[2]—शरीररचनायाः प्रभावोऽन्येषु प्रथमं जायते। आकृतिं दृष्ट्वैव जनाः पूर्वं परिचयं कुर्वन्ति। 'यत्राकृतिस्तत्र गुणा वसन्ति' इति तु प्रसिद्धमेव। आकृत्या गुणाः परिचीयन्ते। कश्चित्पुरुषो ह्रस्वो भवति, कश्चिदुन्नतः, कश्चित् स्थूलो भवति, कश्चित्तनुः, कश्चिद् गौरः, अपरः श्यामः। एवमेव नेत्रनासिकौष्ठादीनामङ्गानां रचनायामन्तरं भवति। एडलरमहोदयानां मते शरीराङ्गानामसमानत्वं विकृतिर्वा आत्महीनतानाममनोग्रन्थिजन्यम्। विकलाङ्गं मनसि विकृतिमुत्पादयति। तेन स्वभावेऽपि विशेषा जायन्ते। खर्वस्य स्वरः प्रखरो भवति, कुरूपः ख्यातये चेष्टते, काणः खञ्जश्चाद्भुतानि कार्याणि कर्तुं प्रयतेते। मनुष्यस्य तुङ्गत्वम्, अवयवसंस्थानम्, भारः, मुखाकृतिः, वर्णः, कण्ठस्वरः, वेषः—सर्वमेतद्वपुष्यन्तर्भूतमस्ति। वेषस्य स्थानं व्यक्तित्वनिर्धारणे न सर्वथोपेक्ष्यम्। वेषः स्वभावरुचिसूचको भवति। तस्य प्रभावोऽप्यन्येषु जायते। अत एवोक्तम्—

> विद्यया वपुषा वाण्या वस्त्रेण विभवेन च।
> वकारैः पञ्चभिर्युक्तो नरः सर्वत्र शस्यते॥ इति।

अनेकदा तु वस्त्रैस्तेषां धारणप्रकारेण चाकथिता अपि बहवो गुणदोषा व्यक्तेः स्वत एव प्रकाशिता भवन्ति।

व्यक्तित्वनिर्देशिका यथा आकृतिः, वेशश्च; तथैव वाणी, वक्तृत्वशैली च। वाण्या जनः प्रियोऽप्रियो वा भवति। व्यवहारः, भाषणशैली च कुरूपतापह्नवसाधने। सामान्याऽपि युवतिर्या रूपप्रसाधनसम्पन्नाया वेश्यायाः सुन्दरतरा दृश्यते तत्र लज्जा-विनय-संयमादियुक्तभाषण-व्यवहारावेव कारणम्। मधुरभाषी शीलान्वितश्च जनः कटुभाषिणोऽधिकः प्रियो भवति।

बुद्धिः[3]—जीवनप्रश्नेभ्योऽभीतिस्तेषां सफलसमाधानसामर्थ्यं च बुद्धेः फलम्। शिक्षणक्षमतया चापि बुद्धेर्निकटः सम्बन्धः। समस्यासमाधाने शिक्षणे च क्षमता बुद्धिर्नाम। नहि समाहिताः समस्याः शिक्षितं वा वस्तु बुद्धिरित्यभिधानमर्हति। एषा क्षमता सर्वेषु पृथग्भवति। अतो व्यक्तित्वं प्रतिजनं भिद्यते।

बुद्धिः शरीरापेक्षयाऽधिकं महत्त्वपूर्णं व्यक्तित्वघटकम्। शरीरमिव बुद्धिरपि जन्मजातैव[4]

---

१. Factors or traits.
२. physical appearance.
३. Intelligence.
४. Inborn.

In Public domain. Digitization Muthulakshmi Research Academy

भवति। तथा प्रयत्नेन, शिक्षया च तस्या विकासः सम्भवति। जन्मना कोऽपि मन्दबुद्धिर्भवति, कोऽपि कुशाग्रबुद्धिश्च। नहि प्रयत्नेन बुद्धौ परिवर्तनं शक्यम्। तयोरुपयोगिता तु विकासेन वर्धत एव। मन्दबुद्धिर्न तथा ज्ञानं सम्पादयितुं शक्नोति, यथा प्रखरबुद्धिः। विषयेषु रुचिश्च ज्ञानेनैव जायते। मनोविकासोऽपि बुद्ध्यैव जायते। मन्दबुद्धेरर्जितः स्वभावस्ताडन-प्रोत्साहनाधीनो भवति, कुशाग्रबुद्धेश्च ज्ञानाधीनः। बुद्धिमान् विचारपूर्वकं व्यवहरति, मन्दबुद्धिश्च स्वभाववशात्। संवेगानां प्रकाशने, सामाजिकव्यवहारेषु चापि बुद्धिप्रभावो नाल्पः। विचारवान् पुरुषो न शीघ्रमुद्विग्नो भवति। विवेकशीलः प्रायः शान्तो गम्भीरश्च भवति। समाजे व्यवहारचातुर्याय बुद्धेरावश्यकता भवति। व्यक्तित्वस्य मानसिकलक्षणानि यथा निरीक्षणम्, स्मृतिः, अवधानम्, निर्णयः, तर्कादयोऽपि बुद्ध्या प्रभावितानि भवन्ति। मानसिकी सतर्कतापि बुद्धिसहचारिणी।

स्वभावः[१] संवेगशीलता वा—संवेगशीलतायाः स्थानं व्यक्तित्वनिर्माणेऽतिमहत्त्वपूर्णम्। तस्या द्वौ पक्षौ—प्रीतिकरः, अप्रीतिकरश्च भावः। अस्मासु केषाञ्चित् प्रवृत्तिः प्रीतिकरम्, केषाञ्चिदप्रीतिकरं भावं प्रति भवति। केषुचिज्जन्मत एव संवेगाः प्रबला भवन्ति। मनोवैज्ञानिकैः संवेगदृष्ट्या व्यक्तित्वस्य चत्वारः प्रकारा निरूपिताः। ते च—(१) प्रफुल्लः[२], (२) खिन्नः[३], (३) क्रोधी[४], (४) चञ्चलश्च[५]। एषु कस्याऽपि प्रकारस्याधिक्यमनिष्टम्।

प्रफुल्लः सदा हर्षं प्रकटयति, विहसति च। आशावान् स न कस्यापि कार्यस्य दुःखदं पक्षं समालोकयति। न चोत्तरदायित्वेन सह किमपि कार्यं सम्पादयितुं क्षमते। जीवने प्रफुल्लता आवश्यकी, परं गम्भीरतापि तथैव महत्त्वपूर्णा।

खिन्नता—इयं प्रफुल्लताविरोधिनी। खिन्नः सर्वास्वेव परिस्थितिषु निराशामेव निशाम्यति। भाविदुःखाशङ्कया स सुखानपि सम्यग् भोक्तुं न शक्नोति। स कल्पनयैव सुखेन सह दुःखं योजयति। एवंविधः पुरुषः प्रायेणाकर्मण्यो भवति, जीवनञ्च दुःखाकीर्णं विदधाति। स [६]औदासीन्यरोगेणाक्रान्तो बहुधा आत्महत्यया जीवनलीलां समापयति।

क्रोधी सदा कलहकारणान्यन्वेषयति, न शान्तां स्थितिमीहते, अन्येषामवमाननां करोति, स्वं च सुखिनं मन्यते। क्रोधप्रकाशाय यदाऽन्यन्न लभते तदा समीपस्थवस्तुष्वेव क्रोधमुद्वमति। क्रोधी जनोऽन्याभावे आत्मशरीरे एव क्रोधं प्रकटयति, शिरो वक्षश्च ताडयति, उपोषितस्तिष्ठति।

चञ्चलस्य मनो नैकस्यां स्थितावतिष्ठते। कदाचित् प्रफुल्लो भवति, कदाचिच्च खिन्नः। एतादृशोऽव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करो भवति। स कस्मिन्नपि कार्ये तन्मयो न भवति, न च संवेगान्नियन्त्रयितुं शक्नोति। आवर्त्तपतिततृणमिव स परिस्थितिभिरितस्ततो भ्राम्यते।

---

१. Temperamant or emotionality.
२. Elated.
३. Depressed.
४. Irritated.
५. Unstable.
६. Melancholic.

In Public domain. Digitization Muthulakshmi Research Academy

सङ्कल्पः[1], चरित्रञ्च[2]—कर्तृत्वशक्तिश्चरित्रं च व्यक्तित्वस्याङ्गम्। सङ्कल्पेनैच्छिकेषु कर्मसु नियन्त्रणं भवति। तन्नियन्त्रणञ्च समाजकल्याणाय, आत्महिताय च भवति। कर्माण्येव नियतं क्रियमाणानि स्वभावरूपं भजन्ते। स्वभावेनाचरणम्, आचरणेन च चरित्रं भवति। तत्र च सामाजिकानां नैजानां चादर्शानां समन्वय आवश्यकः। समाजानुकूलमाचरणं नैतिकमाचरणं कथ्यते, तच्च भियाऽपि सम्पाद्यते। भिया जनः समाजविरुद्धमाचरणं त्यजति। तथा चाचरति येन स समाजे लाञ्छितो न स्यात्। इदमभावात्मकं शीलम्। दुर्जनादयमपि श्रेयान्। परं व्यक्तित्वस्य चारुविकासाय भावात्मका आदर्शा आवश्यकाः, तेषां मूलञ्च सत्सङ्कल्पः।

सामाजिकता[3] – बालस्य प्रवृत्तिर्वैयक्तिकी भवति। सर्वेऽपि बालाः स्वार्थं समीहन्ते। नहि तेषां प्रवृत्तयः समाजोन्मुख्यो भवन्ति। क्रमेण तेषां रुचिरन्येष्वपि वर्धते। आदानप्रदानाभ्यासस्तस्यायुषा सह जायते। अन्येषु रुचिप्रदर्शनमन्येषां जीवनानुसारेण स्वजीवनस्य निर्माणयोग्यता प्रतिजनं भिन्ना भवति। कस्यापि जनस्यान्यान् प्रति का विशिष्टा अभिवृत्तयः, तस्य तदाचरणमभिवृत्तिञ्च प्रति कीदृशी प्रतिक्रिया, स सामाजिकदृष्ट्या आक्रामकः पलायनशीलो वा, सावलेपो विनम्रो वा, सहानुभूतिशीलस्तटस्थो वेत्यादयः प्रश्ना व्यक्तित्वनिर्धारणे महत्त्वपूर्णाः। सामाजिकतायास्तत्त्वं प्रतिव्यक्ति भिन्नं भवति।

शक्तिः[4], दृढता[5] वा—दृढता व्यक्तित्वस्य सर्वप्रधानं तत्त्वम्। तच्च जीवने सफलतायै आवश्यकम्। अनेके मेधाविनः शक्तेर्दृढताया अध्यवसायस्य वाऽभावेन न साफल्यमवाप्नुवन्ति। कार्यसँल्लग्नतया मन्दबुद्धयोऽपि सफला भवन्ति। प्रायशो जना भविष्यत्कालायायोजनं कुर्वन्ति; परं साफल्यमाप्तो वर्तमानकाले क्रियमाणानां कार्याणां साधुताऽसाधुताभ्यामेव भवति। योग्यतया सहाध्यवसायो व्यक्तेः सफलताया मूलम्।

जुङ्गमहोदयमते वर्गीकरणम्

जुङ्गमहोदयानां मतं यज्जनेषु व्यक्तित्वभेदा जन्मजाता एव भवन्ति। यथा बाल्येऽन्ये भेदा न स्पष्टा भवन्ति, तथैव व्यक्तित्वभेदा अपि। यस्य मानसिको विकासः सम्यग् भवति, तस्मिन्नेव व्यक्तित्वं स्पष्टं प्रस्फुटति। सामान्यतो व्यक्तिषु द्वे वृत्ती परिलक्षिते भवतः, ते चान्तर्मुखी[6] बहिर्मुखी[7] चेति।

बहिर्मुखी वृत्तिः—येषां वृत्तिर्बहिर्मुखी भवति तेषां मानसी शक्तिर्बाह्यं प्रति, सामाजिकं परिवेशं वा प्रत्युन्मुखी भवति। तेषां रुचिरन्येषु भवति न तु स्वस्मिन्नेव, स्वसंवेगेषु वा। परिवेशे जायमाना घटनास्तेषां रुचिकर्यो भवन्ति। सामाजिकयोरादानप्रदानयोस्ते आनन्दमनुभवन्ति। ते

---

१. Volition.
२. Character.
३. Sociability.
४. Forcefulness.
५. persistence.
६. Introvert.
७. Extrovert.

In Public domain. Digitization Muthulakshmi Research Academy

शीघ्रं निर्णयं कुर्वन्ति, शीघ्रमेव स्वयोजनाः कार्ये परिवर्तयन्ति च। ते व्यावहारिकाः क्रियाशीलाश्च भवन्ति, वर्तमानं चिन्तयन्ति च। सामाजिका राजनीतिकाश्च कार्यकर्तारः, अभिनेतारः, क्रीडा-विनोदशीलाश्च बहिर्मुखवृत्तयो भवन्ति।

बहिर्मुखो विषयानुरक्तः, विषयचिन्तनपरः, सभा-समाजप्रियः, एकाकित्वद्वेषी, भोजन-भ्रमणप्रियो नवानि नवानि कार्याण्यारभते, असफलतयाऽपि न विरमते।

अन्तर्मुखी वृत्तिः—अन्तर्मुखस्य जनस्य स्वभावः पूर्णतयैतद्विपरीतः। सांसारिका विषयास्तस्य मनो न प्रभावयन्ति। विषयेभ्यः स मनो निवर्तयति। एकाकित्वं तस्मै रोचते, न तु जन-सम्मर्दः। क्रीडाविनोदोपहाससभादिमनोरञ्जनेषु व्यतीतं समयं स वृथा नष्टं मन्यते। तस्य नानेकानि मित्राणि भवन्ति। नवोत्तरदायित्वेभ्यः स बिभेति। न सुहृदां परिजनानां वा चिन्ता तमधिकं बाधते। न च तस्य मित्राणि तदुपरि प्रसन्नानि भवन्ति। एतादृशः पुरुषो गम्भीरः, विषयविशेषे दक्षो भवति; न तु व्यवहारकुशलः। यदा स परिवेशेऽननुकूलतामनुभवति, तदान्तर्निरीक्षितुमारभते। स्वविषये सोऽधिकं चिन्तयति। मननचिन्तनादिषु तस्य रुचिर्भवति। समीपवर्तिनां मित्राणाञ्च स्वविषयकं मतामतं प्रत्युदासीनः स क्रियां परित्यजन् विचारयोजनासु मग्नस्तिष्ठति। तस्य मनोऽस्थिरं दोलायमानं च भवति। वैज्ञानिकाः, दार्शनिकाः, कवयः, तथेतरे विचारका अन्तर्मुखा भवन्ति।

उभावप्येतौ विचारप्रधानौ भावप्रधानौ च भवतः। विचारभावौ परस्परं विरोधिनौ। यस्मिन् विचारस्य प्रधानता भवति तस्मिन् भावुकताया न्यूनता, यस्मिन् भावुकताधिक्यं भवति तस्मिन् विचारस्य न्यूनत्वं च। नहि भावप्रधाने वैचारिकतायाः सर्वथाऽभावः, न वा विचारशीले भावुकतायाः। विचारप्रधानेषु भावुकताया दमनं भवति, भावुके च विचाराणाम्।

लोके केवला अन्तर्मुखवृत्तयो बहिर्मुखवृत्तयो वा जनाः सुदुर्लभाः। अस्मासु सर्वेष्वपि प्रवृत्तिद्वयस्य संयोगोऽस्ति, अन्तरञ्च तरतमयोरेव। कश्चिन्मनोवैज्ञानिको व्याख्याता श्रोतृषु प्रवृत्तिद्वयभेदायोक्तवान्—'भवतां प्रवृत्तिरन्तर्मुखी बहिर्मुखी वेति ज्ञानाय सरलोऽयमुपायः। यदि मम प्रवचनं श्रुत्वा भवन्तो विचारयितुमारभन्ते, किमहमन्तर्मुख इति, तदा भवन्तोऽन्तर्मुखा एव। यदि च चिन्तयितुमारभेरन्, मम प्रतिवेशी कीदृश इति, तदा बहिर्मुखाः'।

युङ्गमहोदयस्यायं विचारो यद्ये जना व्यवहारलोके बहिर्मुखा दृश्यन्ते तेऽचेतने स्वजगति अन्तर्मुखा भवन्ति। ये चान्तर्मुखा अवलोक्यन्ते तेऽचेतने बहिर्मुखाः सन्ति। अचेतनं व्यक्तित्वं चेतनस्य पूरकं भवति। स मध्यवर्तिनं प्ररूपम्[1] उभयमुखमपि[2] स्वीकरोति। उभयमुखप्रवृत्तिमतां रुचिर्न केवले स्वस्मिन् भवति, नाऽपि परविषये। एतादृशामेव जनानां जगति बाहुल्यम्। अन्तर्मुख-बहिर्मुखौ तु चरमे[3] प्ररूपे। अपरञ्च, नहि स्वविषयकाया रुचेः परविषयकरुच्या विरोधः। तयोः समन्वयः सरलतया साध्यः। स व्यक्तीनां संवेदनशील-विचारशील-अनुभूतिशील-सहजज्ञानशीला-नीत्यपि प्ररूपाणि वर्णयति।

---

१. Type.
२. Ambivert.
३. Extreme type.

In Public domain. Digitization Muthulakshmi Research Academy

योऽतिशयमन्तर्मुखो भवति तस्मिन् त्रयो दोषाः प्रायेण विद्यन्ते । यथा—

(१) तस्य मनसि घृणा सन्देहश्चावासं करोति । स विश्वसिति यत्तमृते जगति सर्वेऽपि जना असाधवः, अयोग्याः, अविश्वसनीयाश्च । स आत्मनः सम्पूर्णशक्तेर्व्ययं जगत आत्मनो रक्षायामेव कुरुते ।

(२) स एकान्तप्रियो भवति । परैः सह मतैक्याभावे स परसहवासपराङ्मुखो भवति । न स कमपि द्वेष्टि, सर्वेभ्य उदासीनस्तु तिष्ठति । तन्मृते न कोऽपि चिन्तां करोति । अतः सोऽपि न कस्यचिच्चिन्तां करोति ।

(३) कदाचिदत्यन्तमन्तर्मुखो जनः परानाक्रष्टुमद्भुतं व्यवहारं करोति । एतादृशो जनः परेषां सहानुभूतिं प्राप्तुं स्वकष्टानि विपुलीकृत्यातिशयोक्तिपूर्वकं वर्णयति । स्वशक्त्या परान् पराभवितुं परनिन्दामाचरति । 'येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्' इति किंवदन्तीं वाऽवलम्बते । एवं तस्य सर्वमपि जीवनं मिथ्याडम्बरपूर्णं जायते ।

व्यक्तित्वपरीक्षा[1]

प्रश्नावलिपद्धतिः—अन्तर्मुखबहिर्मुखयोरन्तरं पूर्वमुक्तम् । युङ्गादिकैर्मनोवेत्तृभिर्व्यक्तिपरीक्षणायानेके विधयः पुरस्कृताः । तयोर्बौद्धिकमन्तरं तु स्पष्टमेव । बहिर्मुखो वर्तमाने विचरति, सम्पत्तिं लौकिकं साफल्यं चादरति । दृश्यं भौतिकञ्जगत् तस्मै रोचते । अन्तर्मुखश्च भवितव्यकल्पनामग्नः स्वप्रतिमानं[2] भावाँश्चादरति । प्रकृतेरव्यक्ता अदृश्या नियमाः शक्तयश्च तस्मै रोचन्ते । एते गुणा अवगुणाश्च जनस्य स्वीयाः सम्पत्तयः । सामाजिकदृष्ट्याऽन्तर्मुखताया बहिर्मुखतायाश्च परीक्षायै एवंविधाः प्रश्ना उपयुक्ता भवन्ति—

(१) किं भवते जनतायाः सम्मुखं वार्तालापो भाषणं वा रोचते ?

(२) किं भवान् सर्वदैव परान् स्वमतानुकूलान् कर्तुं चेष्टते ।

(३) किं भवाननायासेनैव परैः मैत्रीसम्बन्धं स्थापयति ?

(४) किं भवानपरिचितानां मध्येऽपि प्रसन्नतापूर्वकं स्थातुं शक्नोति ?

(५) किं जनसमूहे सामाजिकोत्सवे वा नेतृत्वेच्छा भवन्मनसि भवति ?

(६) किं जनानां स्वविषयकधारणा भवतः चिन्ताकारणं भवति ?

(७) किं भवान् परेषां मन्तव्यानि[3], उद्देश्यानि कार्याणि वा सन्देहदृष्ट्याऽवलोकयति ?

(८) किं भवानात्महीनत्वभावनया[4] पीडितोऽस्ति ?

(९) किं भवान् क्षुद्रैरपि कारणैः क्षुब्धो जायते ?

---

१. Measurement of personality.

२. Standard.

३. Motives.

४. Inferiority.

In Public domain. Digitization Muthulakshmi Research Academy

(१०) किं भवतो भावनाः शीघ्रमेवाहता भवन्ति ?

यद्येषु प्रश्नेषु पञ्चानां पूर्वेषामुत्तराणि स्वीकारात्मकानि भवेयुस्तदा व्यक्तित्वं बहिर्मुखमिति ज्ञातव्यम् । यदि चोत्तरेषां पञ्चानां स्वीकारात्मकानि तदा व्यक्तित्वमन्तर्मुखं ज्ञेयम् । एते प्रश्नाः सामाजिकदृष्ट्या व्यक्तित्वनिर्णायकाः । अन्तर्मुखताक्षेत्रे त्रयो विषयाः समाविष्टा भवन्ति—

(१) विचारं प्रति प्रवृत्तिर्न तु क्रियाशीलतां प्रति ।

(२) एकान्ते रुचिर्न तु समाजे ।

(३) जीवनं सङ्कटजालमिति दृष्टिश्च ।

अन्तर्मुखबहिर्मुखप्रकारौ सरलावपि न सर्वथा भ्रान्तिरहितौ । परीक्षणैः सिद्धं यज्जनानामधिकांशोऽनयोर्द्वयोर्मध्यगत एव । अतो द्वयोर्मिश्रस्वरूपोऽन्तर्बहिर्मुखो नाम तृतीयोऽपि भेदो जुङ्गादिभिर्विद्वद्भिः स्वीकृत इति निरूपितमेव ।

व्यक्तित्वपरीक्षायै मनोवैज्ञानिका आवश्यकतानुसारं प्रश्नावल्यां परिवर्तनं कुर्वन्ति । कस्यापि कार्यस्य, यत्र संवेगात्मिका दृढताऽपेक्ष्यते, श्रैष्ठ्यनिर्धारणाय तस्य सम्मुखं केचित् प्रश्ना उपस्थाप्यन्ते । जीवने येषां कष्टानां सम्भवः, तेषां विषये केचित् प्रश्ना इमे—

(१) किं भवतः स्वास्थ्यं निर्बलम् ?

(२) अस्ति कश्चित् शारीरिको दोषः ?

(३) किं मन्दाग्निदोषो बाधते भवन्तम् ?

(४) अस्ति किञ्चिदनिद्राकष्टम् ?

(५) किं दुःस्वप्ना रात्रौ पीडयन्ति ?

(६) काश्चिदज्ञाताः पीडा वेदना वाऽनुभूयन्ते ?

(७) काचित् स्नायविकी निर्बलता परिलक्ष्यते ?

(८) किं सततं श्रान्तिरेवानुभूयते ?

(९) किं शिरोवेदना व्यथयति भवन्तम् ?

(१०) किं भवान् सर्वदा चिन्तितस्तिष्ठति ?

(११) किं चिन्ता भवन्तं सदा पीडयति ?

(१२) किमेकाकित्वकष्टं वर्तते ?

(१३) किं सन्मित्राणामभाव इव प्रतीयते ?

(१४) अस्ति भवति सङ्कोचशीलता ?

(१५) किं भवति वर्ततेऽभाव आत्मविश्वासस्य ?

(१६) किं भवतो मनश्चञ्चलमस्ति ?

(१७) किमकारणं मूर्खतापूर्णं भयं भवन्तं दुःखाकरोति ?

In Public domain. Digitization Muthulakshmi Research Academy

(१८) वर्तते काचित् पश्चात्तापभावना ?

(१९) किं समाजे भवानालोचनाविषयः ?

(२०) किं परैरपमानितो भवान् ?

(२१) किं जना भवद्विषये भ्रान्तं मतं धारयन्ति ?

(२२) कि दुर्भाग्यग्रस्तो भवान् ?

(२३) किं सततमसफलतैव भवन्तं वरयति ?

(२४) किं जीवनमरक्षितमनुभवति भवान् ?

(२५) किं भवतो जीवनं निरानन्दं जातम् ?

(२६) किं जीवनं व्यर्थमिति मन्यते भवान् ?

एवंविधाः प्रश्ना व्यक्तित्वद्वार्ढ्यनिर्णये सहायका भवन्ति। यदि च पृष्टो जनः स्वार्थ-प्रेरितः शुद्धान्युत्तराणि न ददाति तदा निर्णयोऽपि भ्रान्तिमान् भवति । युद्धकाले सैनिका युद्धाद् विरन्तुम्, लोकसेवार्थिनश्च [1]लोकसेवायोगसमक्षे सेवां[2] प्राप्तुमशुद्धानि कल्पितान्युत्तराणि ददति। अन्यापेक्षया स्वयङ्कृता परीक्षा वरीयसी भवति ।

मूल्याङ्कनम्[3]

व्यक्तित्वं विविधासु श्रेणीषु परीक्षया विभाजितं भवति। तत्प्रदर्शनायैकं पार्श्वचित्रं प्रस्तूयते, येन कस्याऽपि व्यक्तित्वस्य विषये किञ्चिदनुमानं कर्तुं सुकरं भवति। तत्र जना विविधासु श्रेणीषु विभाज्यन्ते । बाला यथा–अल्पक्रियाशीलः, साधारणक्रियाशीलः, अत्यधिकक्रियाशील इति श्रेणीषु। तथैवासहयोगशीलः, सहयोगशीलः, अत्यधिकसहयोगशीलः; अथवाऽसामाजिकः, साधारणः सामाजिकः, अधिकसामाजिकः; अथवा विनीतः, उद्धतः, अत्यधिकमुद्धत इति विभागाः क्रियन्ते । मूल्याङ्कनस्यायं मापदण्डो व्यक्तित्वस्य सामान्यतयाऽनुमापकः । तथापि व्यक्तित्वमापाय काचिद् वरीयसी पद्धतिराश्रयणीया । श्रेणीत्रयनिर्धारणापेक्षयाऽधिकं संयतानां परिमाणबोधकानाञ्च शब्दानां प्रयोगः कार्यः । व्यक्तित्वमूल्यं प्रतिशतद्वाराऽप्युल्लिखितुं शक्यते । यावानधिकतमः प्रसन्न-चित्तो जनः कल्पयितुं शक्यते तादृशाय जनाय शतमङ्काः प्रदेयाः । निम्नतमाय च शून्योऽङ्कः । मध्यमाय जनाय प्रतिशतं पञ्चाशत् । एवं पञ्च दश वा श्रेण्यो विधेयाः । मूल्याङ्कनाय रेखीयो मापदण्डः[4] सुकरो भवति। अस्मिन् काञ्चिद् विमां[5] लक्षणं[6] वा रेखया प्रदर्शयन्ति। अस्यां विमा-याञ्च व्यक्तेरनुमितं स्थानं रेखामध्ये कुत्रचित् चिह्नेन प्रदर्शयन्ति। कस्यामपि विमायां सामान्य-जनस्य स्थानं मध्ये भवति ।

---

१. Public service commission,

२. Service.

३. profile.

४. Graphic rating scale.

५. Dimension.

६. Trait.

In Public domain. Digitization Muthulakshmi Research Academy

व्यवहारपरीक्षा[१], निष्पादनपरीक्षा[२] वा

व्यवहारपरीक्षया ज्ञायते यद्विशिष्टे परिवेशे कश्चिद्विशिष्टः पुरुषः कथं व्यवहरति। उदाहरणार्थं बालाः कासुचित् परिस्थितिषु स्थाप्यन्ते, तत्र तेषां प्रतिक्रियाश्चाभिलिख्यन्ते[३]। परीक्षको बालान् कश्चिदद्भुतालयं नयति। केचिद् बालाः शनैः शनैरेकं वस्तु परित्यज्यान्यत् प्रति यान्ति। न च तानि ध्यानपूर्वकं पश्यन्ति। एतेन तेषामन्तर्मुखता प्रकटिता भवति। अन्ये च शीघ्रतयैकस्माद्वस्तुनो द्वितीयं प्रति गच्छन्ति, ध्यानेनावलोकयन्ति तद्वस्तु, स्वत[४] एवानायासं तत्र रुचिं प्रदर्शयन्ति। एतद्बहिर्मुखतासूचकम्। एतादृश्यः परीक्षा बालेभ्य उपयोगिन्यः सन्ति, न तु प्रौढेभ्यो ये तासामुद्देश्येन परिचिता भवन्ति।

मुक्तसाहचर्यम्[५], स्वप्नविश्लेषणं च[६]

मनोविश्लेषणकुशला व्यक्तित्वस्य ज्ञानं मुक्तसाहचर्येण स्वप्नानामध्ययनेन च कुर्वन्ति। प्रथमं ते जनानां विश्वासमर्जयन्ति। ततस्ते तान् विष्टरेशयितुं समादिशन्ति। स्वकष्टविषये स्वेच्छं वार्तालापं कर्तुमनुजानन्ति च। स्वच्छन्दं वार्तालापं कुर्वन्तस्ते तथाविधं प्रसङ्गं स्पृशन्ति, यस्य विषये चर्चायां ते संकोचमनुभवन्ति। नाग्रे ते तद्विषये किञ्चिदपि वर्णयितुमुत्सहन्ते। तेषां मते ते प्रसङ्गा अश्लीला गोपनीयाश्च भवन्ति। मनोवेत्ता तान् निर्विघ्नं निर्लज्जं वा सर्वं प्रकटयितुं प्रेरयति। कतिपयैर्वासरैस्तेषां समग्रं व्यक्तित्वमुद्घाटितं भवति। ततस्ते मुहुर्मुहुर्दृश्यमानानां स्वप्नानां वर्णनं कुर्वन्ति। मनोवेत्ता विश्लेषणेन तेषां प्रेरकमभिज्ञातुं प्रयतते। एवं स तेषां मनस्यन्तर्निगूढस्य सर्वस्य ज्ञानं याथातथ्येन प्राप्नोति।

व्यक्तेरितिहासः[७]

यस्य व्यवहाराः समाजविरोधिनो भवन्ति, तस्य व्यक्तित्वाध्ययनाय तज्जीवनेतिहासः संगृह्यते। तस्य वंशस्य, परिवारस्य, शत्रुमित्राणाम्, कामविषयकानुभवानाम्, विद्यापीठादिषु प्राप्तयोः साफल्यवैफल्ययोश्च सम्बन्धे प्राप्ता सामग्री समाह्रियते। तया च तस्य मनोविकृतिविषये सर्वं सारल्येन ज्ञायते।

अभिक्षेपविधिः

यदि कश्चित्पुरुषस्तथाविधं कार्यं कर्तुं प्रेरितो भवेत्, यस्मिन् स स्वकल्पनाक्रियायाः यथेच्छमुपयोगं कर्तुं शक्नुयात्तदा तेन कार्येण प्रतिक्रियाविधयः, भावात्मिका वृत्तयः, चिन्तनशैली चाध्येतुं शक्या भवेयुः। स्वतन्त्रे नियन्त्रणविरहिते व्यापारे व्यक्तित्वप्रकाशनं सम्यक्तया भवति। अभिक्षेपपरीक्षायै जनो दिवास्वप्नेषु यथा मग्नो भवेत्तथा चेष्ट्यते। पश्चाच्च तस्य कल्पना-

---

१. Behaviour test.
२. performance test.
३. Are recorded.
४. Spontaneously.
५. Free association.
६. Dream analysis.
७. case-history.

In Public domain. Digitization Muthulakshmi Research Academy

विषये प्रश्नाः क्रियन्ते। कदाचिन्मनोवेत्ता काञ्चित् कल्पितामाख्यायिकामारभ्य मध्य एव विरमते, शिष्टांशं पूरयितुं परीक्षार्थिनमादिशति। अनेकदा परीक्षार्थिनः सम्मुखं काचिच्छब्दसूची प्रस्तूयते। प्रतिशब्दं तस्य प्रतिक्रिया न ज्ञायते। शब्दं श्रुत्वा योऽन्यः शब्दस्तस्य मनसि प्रथममायाति, तदाश्रयेण तस्य व्यक्तित्वमनुमीयते। अस्पष्टं चित्रं प्रदर्श्य तदाश्रयेण काञ्चित् कथां रचयितुं स आदिश्यते। मेघानां चित्राणि मसीबिन्दूँश्च प्रदर्श्य तत्कल्पनायाः परीक्षा क्रियते।

रोशाकमहोदयेन[1] तदनुयायिभिश्च व्यक्तित्वप्रतिमानीकरणस्य[2] विशिष्टो विधिर्निश्चितः। श्वेते पत्रे केचित् कृष्णाः केचिच्चान्यवर्णा विपुलाकृतयो दश बिन्दवो परीक्षार्थिनं प्रदर्श्यन्ते। एते बिन्दवस्तथाकृतयो भवन्ति, याभ्यः सर्वेऽपि तेषु किञ्चिद्वस्तु द्रष्टुं शक्नुवन्ति। एष बिन्दुसमूह एकैकं कृत्वा दर्श्यते पृच्छ्यते च यत्तेन तत्र दृष्टम्। तस्योत्तरेषु विचारं कृत्वा प्रतिक्रियाङ्कान् प्रदाय तस्य व्यक्तित्वं निश्चीयते। अङ्कप्रदानकाले विचारशैलीयम्—

(१) कति वारान् मनुष्याकृतयो दृष्टाः, कति वारांश्च पशुपक्षिपादपादीनाम्?

(२) किं तेनाकृतयः समग्ररूपेषु दृष्टाः, आहोस्विदभिन्नानामङ्गानां पृथक् पृथक्?

(३) बिन्दून् दृष्ट्वा यानि चित्राणि तस्य मनस्युदितानि तानि बिन्द्वाकृतिभिः प्रेरितान्यासन्? वर्णैर्वा?

(४) कति वारान् सरन्त्यो मानवाकृतयोऽवलोकिताः?

(५) या आकृतयस्तेन दृष्टास्तासां सौन्दर्यं किम्परिमाणम्?

(६) तस्य कल्पनासु कियन्नावीन्यं वैलक्षण्यं वा।

एतेन बहु स्पष्टं भवति। बिन्दूनां समग्ररूपेण दर्शनं सूक्ष्मां संश्लेषणात्मिकां[3] च योग्यतां प्रकटयति, विस्तारेण दर्शनञ्च तस्य दृढेषु पुष्टेषु च वस्तुषु रुचिम्, वर्णानां प्रतिक्रियावेगशीलताम्, सरन्त्यो मानवाकृतय आत्मचिन्तनप्रवृत्तिम्, पश्वाकृतयो विचारजाड्यम्, सुन्दरविशदाकृतिदर्शनम्, आत्मनियन्त्रणञ्च सूचयति। एतत्सर्वं समग्ररूपेण विचार्य मनोवेत्ता कञ्चिन्निष्कर्षं गच्छति। परीक्षणाज्ज्ञायते यद् ये जनाः शान्ता अवलोक्यन्ते तेषामन्तरे संवेगातिशयः, सङ्घर्षः, द्वन्द्वञ्चाभिवर्तते। परं ते तथा संवेगानां नियन्त्रणं कुर्वन्ति, येन तेषां कानिचिदपि चिह्नानि न प्रकटितानि भवन्ति। न तेषामन्तरं बहिः प्रतिबिम्बितं भवति।

व्यक्तित्वस्य विकासः

व्यक्तित्वस्य विकासे वंशानुक्रमः परिवेशश्च द्वे कारणे। वंशानुक्रमेण जनो जन्मजाताः शक्तीः[4] प्राप्नोति। परिवेशे च तासां विकासायावसरः। भौतिकस्य परिवेशस्य[5] मनसि प्रबलः

१. Rorschach.

२. Standardization.

३. Synthetic.

४. Potentialitis.

५. Physical environment.

ublic domain. Digitization Muthulakshmi Research Academy

प्रभावो जायते । जनो भूमिजलवाय्वन्नप्रकृतिप्रभावादलसः क्रियापरायणो बलवान् दुर्बलो वा जायते । सामाजिकस्य परिवेशस्य प्रभावोऽतोऽप्यधिको भवति ।

परिवारे यो बालक आत्मरक्षायाः कठिनपरिस्थितेर्वशीकरणस्यावसरं तदर्थं प्रोत्साहनञ्च लभते, तस्मिन् स्वावलम्बनम्, प्रभावशालिता, आत्मविश्वासश्च प्रवर्धते । यदि च पितरौ तस्यातिचिन्तां कुर्वन्तौ तस्यानावश्यकं संरक्षणं विदधाते, तस्य सर्वमभिवाञ्छितं प्रदत्तः, स बालकः परावलम्बी निर्बल आत्मविश्वासरहितश्च जायते ।

एडलरमते पित्रोरेक एव पुत्रस्तयोरतितरां प्रियो भवति । स प्रायेण पराश्रितः, कठोरहृदयश्च जायते । एवमेव ज्येष्ठः पुत्रः, यो नवागतस्य कनीयसो भ्रातुर्जन्मना स्नेहविरहितो भवति, प्रायेणेर्ष्यालुः, [1]अधिकारप्रियः, पक्षपातपूर्णव्यवहाराकाङ्क्षी[2] च जायते । कनीयाँश्च नियमव्यवस्थाभ्यां विद्रुह्यति । कनिष्ठोऽत्यधिकं पराश्रितो भवति । अवाञ्छितो बालकः परिवारे घृणाभाजनं भवति । स्वसामाजिकेन परिवेशेन समायोजनं कर्तुमशक्तोऽपराधी च जायते ।

बालानां विकासः समूहे भवति । परिवारे तस्य कार्येषु बाधा समुत्पद्यते । समूहे कश्चिन्नेतृत्वं करोति, कश्चित् साहसपूर्णानि कार्याणि, कश्चित् परसिद्धिसाधनमेव । सर्वेऽपि समूहे स्वानुकूलं स्थानं प्राप्तुं चेष्टन्ते, योग्यतानुसारं कार्यं कुर्वन्ति । यदा च स प्रौढो भवति तदा समाजस्याङ्गं जायते । समाजस्य नियमाचाराँश्च स स्वयमेव पालयति । सामाजिकपरिवेशस्य प्रभावो व्यक्तित्वस्य निर्माणे महान् भवति ॥

---

१. Authority.
२. Privilege.

In Public domain. Digitization Muthulakshmi Research Academy

द्वाविंशोऽध्यायः

व्यक्तित्वभेदः

व्यक्तित्वभेदकारणानि

ये जना लोके दृश्यन्ते ते गुणक्रियाभेदेन भिन्नाः। सर्वेषामाकृतयः, विचाराः, स्वभावाः, चेष्टितानि च वैविध्यमयानीति नात्र प्रमाणस्यावश्यकता। एतद्वैलक्षण्यमेव व्यक्तित्वभेदं जनयति। कश्चिद्वेदानधीते, अपरस्य मनो व्याकरणे काव्ये वा रमते, अन्यस्मै यथेच्छविहारो रोचते, इतरश्च चौर्यद्यूतासक्तो भवति। एकस्यैव पितुर्द्वौ पुत्रौ व्यक्तित्वद्वयं भजेते। किं कारणमस्य वैलक्षण्यस्य? को नाम भेदक एकं जनमन्यस्मात् पृथक् करोति? कथञ्च तस्य भेदकस्योत्पत्तिः? इति विचारणीयोऽयं प्रश्नः।

शारीरिककारणानि

स्नायुसंस्थानम्—'विद्यया वपुषा वाण्या' इति भणता वपुर्महत्त्वं स्वीकृतम्। शरीराकृतेः प्रभावः सर्वतः पूर्वं जायते। विद्याया वाण्याश्च ततोऽनन्तरम्। 'यत्राकृतिस्तत्र गुणा वसन्ति' इति न सदा सत्यमेव, तथापि जना आगतस्याकृतिं वीक्ष्य तेन मधुरं कटुं वा व्यवहारमारभन्ते। विशालकाया अपि मूर्खा अवलिप्ताश्च भवन्ति, वामनाश्चापि विचक्षणाः, नम्राश्च। रूपस्यापि प्रभावो नाल्पः। शरीरस्य विशालता सौन्दर्यं च द्वे पृथग्वस्तुनी इति स्पष्टमेव। नहि कायदैर्घ्यस्थौल्ययोस्तद्विपरीतयोर्वा सौन्दर्यं भवतीति नियमः कर्तुं शक्यः। केचिद् गुणा अनेकदा आकृतिसम्बद्धा दृश्यन्ते। स्थूला नातिदीर्घा वर्तुलाकारा जना अलसाः, हास्यप्रियाः, प्रसन्नचिताः, विश्रमकारिणः, मैत्रीकुशलाश्च भवन्ति। दीर्घास्तनुकायाश्च संयमिनः, सङ्कोचशीलाः, अन्तर्मुखाश्च। अत एव संस्कृतनाटकेषु विदूषकाः स्थूलकाया उपवर्ण्यन्ते। मृच्छकटिकनायकश्चारुदत्तः, अभिज्ञानशाकुन्तलनायको दुष्यन्तो न चातिस्थूलो नापि वामनः। व्यक्तिवैशिष्ट्ये न केवलं बाह्याकृतेः प्रभाव एव, शरीरान्तःसञ्चारिणां कतिपयानां द्रवाणामपि स्थानं महत्त्वपूर्णम्। प्राचीना मन्यन्ते स्म यदाशामयस्य प्रसन्नमुखोत्साहिनः शरीरे प्रचुरतरं रक्तं भवति। योऽकारणमेव वारं वारं क्रुद्धो जायते तस्य शरीरे पित्तस्य प्राबल्यम्, यश्च शान्तः सन्तुष्टस्तिष्ठति तस्य काये कफस्य, यश्च सदा खिन्न उदासीनश्च तस्य देहे प्लीहाया आधिक्यं भवति। नैतस्मिन् शरीरशास्त्रीये सिद्धान्तेऽर्वाचीनानां विश्वासः।

रक्तसञ्चारः—स्नायुसंस्थानमिव रक्तसञ्चारोऽपि शरीरस्य समायोजनं[1] करोति। तस्यायं प्रकारः—सर्वाण्यङ्गानि स्वोत्पादितानि द्रव्याणि रक्ते प्रमुञ्चन्ति। हृदयात् परिचालितञ्च रक्तं सर्वेष्वेवाङ्गेषु परिभ्रमति। तस्मिन् काले सर्वाण्यप्यङ्गानि रक्ते प्रवहमाणानि द्रव्याणि यथावश्यकतां गृह्णन्ति। रक्तसञ्चारगतिश्चाति तीव्रा। पञ्चदशस्वेव मिनटेषु रक्तप्रवाहे पतितं द्रव्यं शरीरस्य सर्वाण्यङ्गानि प्राप्य मस्तिष्कक्रियायां स्वप्रभावं जनयति।

---

१. Integration.

In Public domain. Digitization Muthulakshmi Research Academy

व्यक्तित्वनिर्माणे शरीरदशाया अतिमहत्त्वम् । श्रान्तो बुभुक्षितश्चातिशीघ्रं क्रुध्यति। स्वस्थः कृतभोजनश्चानायासं सर्वेभ्यः प्रसीदति। येषां रुधिरे रक्तकणानां न्यूनता भवति ते प्रायेणाशक्ता असाहसिकाः पश्चाद्गामिनो भवन्ति। रक्ते ओषजनस्य[1] न्यूनतैवास्य कारणम्। कस्या अपि शारीरिकव्यवस्थायाः प्रभावः प्रकृतौ सारल्येन परिलक्ष्यते। प्रतिश्यायात् पूर्वमेव शैथिल्यं शरीरमाक्रामति। नहि तदा कार्येषु मनः सँल्लगति।

ओषधयः—ओषधीनां प्रभावः शरीरे नाल्पो भवति । निद्राकृदादिशामकौषधि[2]-प्रयोगेण शरीरचेष्टाह्रासो जायते, ध्यानमुच्चाट्यते, पेशीनां सहयोगे बाधा जायते, तन्द्राऽभिभवति, पश्चाच्च निद्रा समाक्रामति। आसां प्रयोगेण मस्तिष्कस्य कश्चिदंशो निष्क्रियो भवति। मद्यपानस्य प्रभावोऽप्येवंविध एव। शरीरे मनसि च प्रतीयमानोत्तेजना भ्रान्तैव। मद्येन मस्तिष्कक्रिया मन्दा जायते। तेनाचरणनियन्त्रिका मस्तिष्कशक्तयो निष्क्रिया भवन्ति। जने च मद्यपानानन्तरं वाचाटतायाः, असामाजिकतायाः, कलहस्य च प्रवृत्तिः प्रबला जायते। एवमेव काश्चिदोषधयो मस्तिष्कमुत्तेजितं शान्तं निद्रावस्थं विदधते। काश्चिच्छान्तिमपहरन्ति, स्फूर्तिञ्च प्रवर्धयन्ति। चिकित्सकानां मते रुधिरे शर्कराया उपस्थितिरप्यावश्यकी । तैश्च तस्याः परिमाणमपि निश्चितम्। यदा च रक्ते शर्कराया मात्रा न्यूना भवति तदा मनोदशायां[3] परिवर्तनं लक्ष्यते, भयस्य भावना प्रवर्धते, स्वल्पेनैव कारणेन वारं वारं क्रोधः समुत्पद्यते।

भोजनम्—भोजने आवश्यकानां पोषकतत्त्वानामभावेनापि व्यक्तिगुणाः प्रभाविता भवन्ति। येषां भोजने खाद्योजाख्यतत्त्वस्य[4] न्यूनता भवति, तेषां गुणा न सम्यग् विकसन्ति। गतमहायुद्धेऽमेरिकादेशे केषाञ्चित् सैनिकानां साहाय्येन चिकित्सकैरेतद्विषये परीक्षणं विहितम्। तेभ्यः षण्मासान् वाञ्छितस्यार्धमेव भोजनं प्रदत्तम्। अस्मिन् काले ते कृशा अभवन्। तेषां शरीरभारस्य चतुर्थांशः क्षतिङ्गतः। व्यक्तिगुणेषु च परिवर्तनं जातम्। ते सदा भोजनचिन्तायामेव सँल्लग्ना भोजनविषयकानेव स्वप्नानपश्यन्। कामवासनासु, क्रीडासु, अन्यासु च मनोरञ्जनसामग्रीषु तेषां रुचिर्न्यूनतरा समपद्यत। ते उदासीनाः[5] क्रोधना[6] [7]असामाजिकाश्चाभवन्। हासोपहास-परिहासेषु नहि तेषां मनोऽरमत। यदा च षण्मासानन्तरं ते पुनरपि यथापूर्वं भोजनं प्रापुस्तदा ते पुनरपि पूर्ववत्तथैव प्रसन्नमुखाः परिहासशीलाश्चाभवन्।

रोगाः—रोगा अपि व्यक्तिगुणेषु परिवर्तनमुत्पादयन्ति । ज्वरावस्थायां रोगजनित-विषैर्न मस्तिष्कं सम्यक्तया कार्यं कर्तुं प्रभवति। रोगेऽपगतेऽपि तस्य प्रभावो दीर्घकालं तिष्ठति। रोगकाले प्राप्ता शुश्रूषा जनं परावलम्बिनं करोति। नीरोगावस्थायामपि स सर्वान् शासितुं

---

१. Oxygen.
२. Sedative drugs.
३. Mood.
४. Vitamin.
५. Depressed.
६. Irritable.
७. Unsocial.

In Public domain. Digitization Muthulakshmi Research Academy

कामयते। कदाचिदपयातेऽपि रोगे मस्तिष्कमशक्तमेव भवति। अशक्तता चौदासीन्ये, क्रोधे, वा परिणमते। मस्तिष्ककोपनाम्नि[१] रोगे व्यक्तौ बहूनि परिवर्तनानि जायन्ते। जनः संवेगशील-श्चञ्चलः क्षिप्रकारी क्रोधनश्च जायते। तस्य कार्याण्यनेकदाऽवाञ्छितानि भवन्ति। बुडवर्थ-महोदयेनैकस्य बालकस्येतिहासो रोगजनितव्यक्तिविकृतिनिदर्शनरूपेण प्रस्तावितः। कश्चिद् बालकश्चौर्यापराधाय तृतीयवारमारक्षिभिर्निगृहीतः, राजकीयबालभवनं[२] च प्रेषितः। अस्य बालकस्य जन्मामेरिकादेशेऽभूत्। तस्य पितराविटलीदेशवास्तव्यावभूताम्। तयोस्त्रयोदश बाला आसन्, एष च बालकस्तेषु सप्तमः। सर्वे बालाः सुशीलाः स्वस्थाश्चासन्। आयुषोऽष्टमे वर्षेऽय-मैञ्जिलनामा बालको मस्तिष्ककोपरोगेणाक्रान्तो बभूव। रोगानन्तरञ्च तस्य स्वभावो विकृतो जातः, तस्य वर्तनञ्चासामाजिकम्।

किञ्चित्कालानन्तरं तस्यान्त्रपुच्छस्य[३] शल्यक्रिया[४] जाता। तत्कालेऽतिस्नेहं शुश्रूषाञ्चावाप्तवान्। तदनन्तरं स परावलम्बी, चञ्चलश्चाभवत्। यत् किञ्चिदपि सोऽवाञ्छत्, तदवश्यमेव प्राप्तुं प्राणपणेनाचेष्टत। एवं क्रमेण तेन चौर्यव्यसनं शिक्षितम्। न स कुत्रचिदपि कञ्चिद् कालमेकाग्रमनसा स्थातुं शशाक। पित्रोर्नियन्त्रणम्, ताडनम्, चिकित्सकानामुपायाः, औषधयः, न्यायाधीशप्रदत्तो दण्डः, कारागृहवासश्च नहि तस्य सुधाराय बभूव। अध्ययने मन्दः स द्वादशे वर्षे द्वितीयस्यामेव श्रेण्यामभवत्। ततस्तृतीयवारं यदा स राजकीयबालभवने प्रवेशितस्तदा मनःशास्त्रिणस्तं परीक्षितवन्तः। बुद्धिपरीक्षायां तस्य प्राप्ताङ्काः प्रान्तस्तरे[५] आसन्, तस्यावधानमत्यस्थिरञ्च। एतच्चानुमितं परीक्षकैर्यत् स्थिरतावृद्ध्या सह तस्य प्राप्ताङ्केष्वपि वृद्धि-र्भविष्यति। भैषजिकस्नायविकपरीक्षाभ्यां विदितं यन्मस्तिष्करोगकोपानन्तरं तस्य मानसिका-स्थिरत्वमुत्पन्नम्। तदेव च कारणमेतेषां सर्वेषामुपद्रवाणाम्। बालभवने कृतेष्वप्यनेकेषु प्रयत्नेषु तस्याभिभावकैर्नहि तस्याचरणे किमपि परिवर्तनं पर्यलक्ष्यत। एतेन स्पष्टमेव यद्रोगा अपि व्यक्तित्वविकारकारणं भवन्ति।

अन्तरासर्गिग्रन्थयः[६]—अन्तरासर्गिग्रन्थयोऽपि व्यक्तित्वभेदकारणम्। एते ग्रन्थयः स्वोत्पादनरूपाणि तत्त्वानि रक्ते सम्मिश्रयन्ति। एते एकाधिकान् न्यासर्गान्[७] जनयन्ति। न्यासर्गाश्च कस्याप्यङ्गस्य क्रियाशक्तौ क्षयं वृद्धिं वा विदधति। आपाततोऽन्तरासर्गिग्रन्थीनां कार्ये नहि किञ्चिन्महत्त्वं परिलक्ष्यते। एते शरीरस्यातिलघून्यङ्गानि; परं शरीरशास्त्रिणो[८] भिषजश्चैतेषामु-

---

१. Encephalitis.

२. State Home for Boys.

३. Appendicitis.

४. Operation.

५. Border line level.

६ The endocrine glands.

७. Hormones.

८. Physiologists.

In Public domain. Digitization Muthulakshmi Research Academy

पयोगं सम्यग् विजानन्ति। यथा सर्वकिण्वी[१]नामको ग्रन्थिर्द्वावुदासर्गौ[२] जनयति। तत्रैकः सर्वकिण्वियूषः[३] अन्यश्च मधुवशी[४]। सर्वकिण्वियूष आन्त्रेषु गच्छति भोजनञ्च पाचयति। मधुवशिनाम्न उदासर्गस्याभावो मधुमेहं जनयति। एवमेव पोषगलोपगलोपवृक्किप्रजनादिग्रन्थयो विविधैर्न्यासगैः पुरुषमाक्रामकमात्मसंयमिनं विचारशीलं कुर्वन्ति; कृशम्, मन्दम्, शिथिलम्, क्रोधनम्, उत्साहरहितं कामुकं वा।

सामाजिकं कारणम्

सामाजिकाचारानुकृतिः—जनाः समाजे उत्पन्नाः समाजे च वर्धिता भवन्ति। सर्वस्याऽपि समाजस्य काश्चिद् रीतयः, प्रथाः, आदर्शाः, आचाराश्च भवन्ति। जन्मत एव बालकस्तानाचारान् शिक्षते। सिक्खसम्प्रदायपरिवारे जातो बालको गुरुद्वारं गन्तुम्, केशवृद्धिं कर्तुम्, अजाशूकरादिमांसं भक्षयितुं शिक्षते। बौद्धोऽनीश्वरवादी भवति। मुहम्मदीया मूर्तिपूजाविरोधिनो भवन्ति। भाषा वेष विचारादिषु समाजप्रभावो जायते। वङ्गीयानां वेषो मद्रदेशीयेभ्यो भिन्नो भवति। एवमाचरणरीतीः समाजनीत्याचारान् जनः समाजादेव गृह्णाति। यदि कश्चिद् दुरूहानाचारान् न पालयति, तद्विरुद्धञ्चाचरति, तदा समाजेन दण्डितो भवति। यस्मिन् समाजे सगोत्रविवाहो जात्यन्तरविवाहो वा वर्जितः, तस्मिन् सगोत्रामन्यजातीयां वा बालामुद्वहन् पुरुषः समाजाद्बहिष्कृतो भवति। लोकव्यवहाराश्च प्रतिकुटुम्बम्, प्रतिवर्णम्, प्रतिप्रदेशं भिद्यन्ते। कस्मिंश्चित् कुटुम्बे स्नात्वा धौतमेव वस्त्रं परिधाय शुचौ स्थाने भोजनस्य प्रथा भवति। तस्मिन् यतःकुतश्चिदागत्य विना हस्तपादप्रक्षालनमधौतान्येव वस्त्राणि पादत्राणे च परिदधद्भोजनं कुर्वाणो निन्दापात्रं भवति।

एवमेव यस्मिन् परिवारे स्त्रियोऽवगुण्ठनं धारयन्ति, तस्मिन् निरवगुण्ठना निन्द्यन्ते। प्रायो बालकाः समाजस्य नियमान् विना समीक्षया सरलतयाऽविवेकपूर्वमेव पालयितुं प्रारभन्ते। यश्च तेषां विरोधं करोति स दण्डितो निन्दित उपहसितो बहिष्कृतश्च भवति। यावत् स समाजनियमानुकूलं न व्यवहरति तावदेवमेवाकृपाभाजनं तिष्ठति। शनैः शनैर्विरोद्धारोऽपि समाजाचार[५]प्रतिमानं[६] स्वीकृत्य तदनुकूलमाचरितुं प्रयतन्ते।

यथा जनाः प्रायेण समाजाचाराननुसरन्ति, तथैवांशेन तेषां विरोधमपि कुर्वन्ति। नह्यन्धेन नीयमाना अन्धा इव, मेषानुसारिणो मेषा इव वा, अपर्यालोच्यैव सर्वदा सर्वत्र वा व्यवहरन्ति। अनेनैव कारणेन पुराणकालादरण्येषु गिरिषु वा वसन्त 'आदिवासिनः[७]' इति व्याह्रियमाणा जना अपि न व्यक्तित्वदृष्ट्या समानाः। अशिक्षिता विचारस्वातन्त्र्योद्घोषमश्रुत्वैव समाजाचाराननुसरन्तोऽपि विचारस्वातन्त्र्यमपि धारयन्ति। तत्र केचिद् भाग्यवादिनः, केचिच्च पुरुषार्थ-

---

१. Pancreas.
२. Secretions.
३. Pancreatic juice.
४. Insulin.
५. Manners.
६. Standard.
७. Aboriginals.

In Public domain. Digitization Muthulakshmi Research Academy

विश्वासिनः। केचिदलसाः, केचिच्च साहसिकाः। सर्वेष्वपि समाजेषु केचिज्जनास्तथाविधा भवन्त्येव ये पूर्णतया तेषां [1]नीत्यादर्शान्न स्वीकुर्वते। ये तेभ्योऽतिविचलिता भवन्ति, त एव दण्डिता भवन्ति। यथा अल्पवयस्काः क्रीडानियमानां पालनं पूर्वं तेषां मूल्यमविज्ञायैव कुर्वन्ति। ते जानन्ति यन्नियम-भङ्गेन ते दण्डमाप्स्यन्ति, क्रीडाक्षेत्राच्च निष्कासिता भविष्यन्ति। इदमेव तेषां नियमपालनप्रेरकम्। पश्चाच्च तेऽवगच्छन्ति यत्सर्वेऽपि नियमास्तेषामेव सौकर्याय। एवमेव पूर्वं समाजनियमाः पित्रोः परिजनानां वा भयेन पाल्यन्ते, पश्चात्तेषामुपयोगिताऽवगता भवति। तदा स्वयमेव विना भयेन तेषां पालनं क्रियते।

परिवारप्रभावः—परिवारे केषाञ्चिद् बालकानां पालनमतिस्नेहेन भवति। तेषां पितरौ तान् सर्वेभ्यः कष्टेभ्य आयासेभ्यश्च रक्षन्ति। न च किञ्चिदपि स्वप्रयत्नेन परिश्रमेण च कर्तुं तेऽवसरं लभन्ते। अन्येषु च कुटुम्बेषु बाला अहोरात्रं निर्भर्त्सिताः, ताडिताश्च भवन्ति। पदे पदे-ऽपमानमनुभवन्तस्ते पराधीना जायन्ते, न च किञ्चिदपि स्वात्मना चिन्तयितुं विधातुं वा शक्नुवन्ति। आचरणशिक्षणालये प्रविष्टा बहवो बालास्तथा भवन्ति येषां चरित्रविकृतेः कारणं तेषां कुटुम्बिन एव भवन्ति। नहि ते तेभ्यः समुन्नतेरात्मविकासस्य वाऽवसरं प्रददते। एवं बालेषु यानि व्यक्तित्वलक्षणानि प्रकटीभवन्ति तेषामधिकांशः परिवारप्रदत्त एव भवति। परिवारे यदि द्वावपि बालकौ स्तः, तदा तौ प्रति पित्रोर्व्यवहारो न समानो भवति। समानेऽपि नहि तयोर्मित्राणि समानस्वभावानि भवन्ति। एवं तयोर्व्यक्तित्वेऽन्तरं जायते।

एडलरमहोदयः परिवारप्रभावे [2]जन्मक्रममतिमहत्त्वपूर्णं मन्यते। यावद् बालकः पित्रोरेक एव पुत्रो भवति तावत्तस्याधिकारः परिवारेऽद्वितीयो भवति। न कोऽपि तस्य सम्पत्तौ भागाधिकारी भवति। एवंविधो बालकः परावलम्बी निर्दयश्च जायते। तदनन्तरं यदि तस्य कनीयान् भ्रातोत्पद्यते, तदा स तस्मै असूयति। स्वीयामेकाधिकारतां द्रढयितुं च चेष्टते। द्वितीयो नवागन्तुकः परिवारे स्वकीयां प्रतिष्ठां द्रढयितुं प्रयतते। स सदा सावधानो रूढव्यवस्थाविद्रोही च सम्पद्यते। कनिष्ठश्च, योऽधिकं प्रीतिपात्रं भवति, सदा पराश्रितः, परमुखापेक्षी च भवति। येन केन प्रकारेण परप्रीतिं प्राप्तुं प्रयतते। परमाचरणानुसन्धानशालासु नास्य सिद्धान्तस्य सत्यता परीक्षणैः सिद्धा। आचरणपरीक्षकाणां मते सर्वेषामपि बालानां व्यक्तित्वनिर्माणदौष्कर्यं समानमेव भवति, न वा जन्मक्रमे किमपि स्थानमन्यस्माद् वरीयः। एडलरमहोदयेन जन्मक्रमेण सह परिवारेऽन्येषामपि साधनानां महत्त्वं स्वीकृतम्। बालकेन सह मातुर्व्यवहारः, तस्य सुसङ्घटितव्यक्तित्वनिर्माणे तया प्रदत्तं साहाय्यं चातिप्रभावकारिणी सिद्ध्यतः।

फ्रायडमते बालको ज्येष्ठानामनुकरणं विचारपूर्वकमुत्सुकतया च करोति, न तु केवलेन निष्क्रियरूपेण। पुत्रः पितरमनुकरोति, पुत्री च मातरम्। कदाचिदयं क्रमो विपरीतोऽपि भवति। पितुरनुकरणेऽनेककारणानि भवन्ति। पिता ज्येष्ठतमो भवति, शक्तिसम्पन्नश्च। स बालकं प्रीणयति। माताऽपि तस्यादरं करोति, प्रशंसाञ्च। सर्वैरेतैन प्रभावितो बालकः पितरि प्रीतिं कर्तुमारभते; परं पितुर्व्यवहारः समये समयेऽप्रियोऽपि भवति। स दण्डमपि ददाति। एवं पितरं बालकोऽप्रियं

---

१. Morals.

२. Birth order.

In Public domain. Digitization Muthulakshmi Research Academy

प्रशासकं मन्यते, तं प्रति तस्याभि वृत्तिः[१] प्रतिपक्षिण इव भवति। तथापि तेन सहैकरूपतां[२] स्थापयित्वा बालको विरोधं परित्यजति। एवं प्रारम्भे यान् सदाचारनियमान् स्वीकर्तुं पालयितुं वा स बलान्नियोजितो भवति, त एव तस्य जीवनस्याङ्गं जायन्ते। व्यक्तेर्जीवने तस्याधारभूतं कार्यभागमवगन्तुं तस्य बाल्यकालिका परिवारिकपरिस्थितिर्ज्ञातव्येति विषये फ्रायड-एडलरयोरैकमत्यम्। तन्मते व्यक्तेः सम्पूर्णं स्वरूपं बाल्य एव निर्मितं भवति, नहि वयोवृद्धिस्तत्र परिवर्तनं विधत्ते। तावनन्तरं जायमानान् प्रभावान् वरिष्ठान्[३] मन्येते। न तेषां प्रभावो व्यक्तित्वे गभीरं भवति। व्यक्तित्वस्य मुख्यलक्षणानि शैशवे एव बद्धमूलानि भवन्ति; परं नैतन्मतं प्रामाणिकम्। यतः फ्रायडमहोदयेनास्वस्थमनसामेव परीक्षणानि कृतानि। तन्मतञ्च तदाश्रयि, न तु स्वस्थजनमनःपरीक्षणपरिणामः।

सामूहिकक्रीडादिप्रभावः—परिवारस्य प्रभावो व्यक्तित्वनिर्माणे निर्विवादः स्थायी च, तथापि बालकाः क्रीडाप्रिया भवन्तीति नात्र प्रमाणस्यावश्यकता। क्रीडा च नैकाकिना सम्भवति। सर्वेऽपि क्रीडार्थमन्यैस्तथाविधैः सम्पर्कं स्थापयन्ति। एवं बालकाः कस्यचित् समूहस्याङ्गीभूता एव क्रीडन्ति। समूहस्य केचिन्नियमा भवन्ति। क्रीडयामपि नियमाः सन्त्येव। बालका एतान्नियमान् स्वेच्छया पालयन्ति। तत्र ते स्वावलम्बिनो भवन्ति, साहसिककार्येभ्योऽवसरञ्च लभन्ते। उदारता-सहानुभूत्यादीनां गुणानां विकासस्तेषु समूहेषु जायते। केचिच्चेच्छानुकूलमवसरमलब्ध्वा तत्रैव विधिविरुद्धानि कार्याणि शिक्षन्ते। एवंविधानामसामाजिकानामपि समूहाः सङ्घटिता भवन्ति। क्रमेण तेऽपराधवृत्तयो जायन्ते। एतेषामसामाजिकानां विधिविरुद्धमाचरतां बुद्धिलब्धिरशीतिनवत्योर्मध्ये भवति। एवंविधानां बुद्धिः सामान्यापेक्षया मन्दतरा भवति। किशोरावस्थायामेते समूहा नृत्यसङ्गीतम्, विरुद्धलिङ्गाकर्षणं च प्रति प्रवृत्ता भवन्ति। बालिकास्वेतत्परिवर्तनं बालेभ्यः पूर्वमेव भवति। अस्मिन् काले नहि बाल्यकालिकाः क्रीडा रोचन्ते। नवेषु कार्येषु च मनो रमते। केषाञ्चिन्मतेऽस्यामवधौ बाला बालिकाश्चोपद्रवशीलतां भजन्ते। एतत्तु निर्विवादं यदस्मिन् काले किशोराः सांसारिकेषु कार्येष्वधिकां रुचिं प्रदर्शयन्ति, समाजे च सम्मानपूर्णं स्थानं प्राप्तुं चेष्टन्ते। स्वकीयां स्वतन्त्रसत्तां विज्ञापयितुमुत्सुका भवन्ति, न तु परिवारस्याङ्गीभूततयैव सन्तोषं लभन्ते। ते जगति स्वकीयं कार्यभागमन्वेष्टुमारभन्ते।

वंशानुक्रमस्य प्रभावः

जना आकृत्या स्वभावेन च परस्परं भिन्नाः। अस्या भिन्नतायाः शारीरिकं सामाजिकं च कारणं पूर्वं प्रतिपादितम्। परं यदि कश्चित्पृच्छेच्छारीरिकभेदस्य किं कारणम्? केन कारणेनैकस्य गलग्रन्थिरधिकं[४] न्यासर्गम्, अन्यस्य च न्यूनं प्रसूते? इति। तदाऽस्य प्रश्नस्योत्तराय वंशानुक्रमस्य[५] अनुसन्धानमावश्यकं भविष्यति। कथमेकः पुरुषः सामाजिके समूहे एकं कार्यभागं स्वीकरोति,

१. Attitude.
२. Identification.
३. Superficial.
४. Hormones.
५. Heredity.

In Public domain. Digitization Muthulakshmi Research Academy

अपरश्चान्यम्? इति प्रश्नस्योत्तरायापि वंशानुक्रमवातावरणयोर्विचार आवश्यकः। जीवनप्रारम्भकाले, जन्मनो नवमासपूर्वम्, गर्भाधानवेलायामपि च यत्किञ्चिद् व्यक्तौ वर्तमानं भवति तत्सर्वं वंशानुक्रमान्तर्गतम्। जन्मानन्तरं यस्य कस्यचिदपि वस्तुनः प्रभावो व्यक्तेर्जीवने जायते, तत्सर्वं वातावरणेन गृहीतं भवति। गर्भस्यान्यजीवरूपे वृक्षादिरूपे वाऽविकासो मानवरूपे च विकासः—श्यामता, गौरता, स्थूलता कृशता, दीर्घता, खर्वता, चापल्यं शान्ततेत्यादि सर्वं वंशानुक्रमे समाविष्टं भवति। एता वंशानुक्रमप्रवृत्तय आजीवनसहचारिण्यो भवन्ति। परमासां वृद्ध्यर्थं वातावरणादुत्तेजनाया[१] अवसरस्यावश्यकता[२] भवति। वंशानुक्रमात् प्राप्ता दृढाः सुशक्ताश्चापि मांसपेश्यः सन्तुलितभोजनस्य व्यायामस्य चाभावे दुर्बला एव स्थास्यन्ति। व्रततेर्वंशानुक्रमतत्त्वं तस्या बीजे सन्निहितं भवति, वातावरणस्य च तत्त्वानि मृदार्द्रतातपादिषु। चणकबीजाच्चणकवृक्ष एव भवति; परमुचितखाद्यजलश्रमादियोगभेदेन चणकवृक्षभेदः सम्पद्यते।

वंशानुक्रमवातावरणयोः कस्याधिकं महत्त्वमिति प्रश्नोऽपि विचारणीयः। यथाङ्कुरविकासाय भूमेरन्यस्याश्च सामग्र्या आवश्यकता भवति; परं सत्यामपि भूमावन्येषु च साधनेषु विद्यमानेषु नहि विना बीजमङ्कुरो जायत इति सत्यम्। एवं वातावरणवंशानुक्रमौ द्वावपि समानमेवेष्येते। अत्र कोऽपि प्रष्टुं शक्नोति—व्यक्तीनां परस्परं भेदे किं कारणं मुख्यम्? वंशानुक्रमः, वातावरणं वा? यदि कश्चिच्चणकवृक्षोऽन्यस्माच्चणकवृक्षाद्वरीयाँस्तर्हि किं कारणं तत्र? वंशानुक्रमः, वातावरणं वा? बुडवर्थमहोदयेनास्योत्तरं ददता प्रतिपादितं यद् व्यक्तिर्वंशानुक्रमे वातावरणेन गुणनक्रियायाः फलम्, न तु तयोर्योगः। तन्मते व्यक्तिः=वंशानुक्रमः × वातावरणम्। न तु व्यक्तिः=वंशानुक्रमः + वातावरणम्। यथा आयताकृतेः क्षेत्रफलमाधारस्य लम्बस्य च मध्ये कस्याप्येकतरस्य दैर्घ्येण दीर्घताम्, अल्पत्वेन चाल्पतां प्राप्नोति; तथैव वंशानुक्रमवातावरणयोर्मध्ये कस्याप्येकतरस्य बलवत्तया व्यक्तित्वं शक्तिमद्, दुर्बलतया च दुर्बलं जायते। यथा आधारलम्बयोर्मध्य एकतरस्याभावेन क्षेत्रफलस्याभावो भवति, तथैवानयोर्मध्ये एकतरस्याप्यभावे व्यक्तित्वमेव न सम्भवति।

द्वयोर्जनयोर्भिन्नतायाः कारणं केवलो वंशानुक्रमोऽपि भवितुमर्हति, केवलं वातावरणं वा। यदि सर्वेषां वातावरणं समानं स्यात्तदापि व्यक्तित्वेषु भिन्नता भविष्यत्येव। प्राप्तेऽनुकूलेऽवसरे भिन्नतायाः परिमाणे वृद्धिरेव भवति। यथा—द्वौ बालकौ समकालमुत्पन्नौ, तयोरेकः सङ्गीतमयः, अपरश्च न तथा। अननुकूले वातावरणे द्वयोरपि सङ्गीतशक्तिरविकसिता भविष्यति। तदा न तयोर्मध्येऽधिकमन्तरं प्राप्स्यते। प्राप्तेऽनुकूले वातावरणे तु सङ्गीतकलायां तयोरन्तरं महत् परिलक्षितं भविष्यति।

वंशानुक्रमस्य स्वरूपम्

सर्वेऽपि प्राणिनः कोशरूपेण[३] स्वकीयं जीवनमारभन्ते। मनुष्यस्य मूलस्वरूपमतिक्षुद्राकारेणाण्डेन समानं भवति। इदं स्वरूपं निषिक्तोऽण्डकोश[४] इति कथ्यते। अस्य व्यासः[५] प्रायेण १/१२० इञ्चो भवति। अयं कोशो [६]मातुरण्डाशयान्निःसृतेनाण्डकोशेन पितुः शुक्रकीटस्य[७]

१. Stimulation.
२. Opportunity.
३. Cell.
४. Fertilized ovam.
५. Circumference.
६. Ovary.
७. Spermatozoon.

In Public domain. Digitization Muthulakshmi Research Academy

संयोगाज्जायते। निषिक्तोऽण्डकोशो मातुर्गर्भाशयस्य[१] वातावरणे सुरक्षितो वर्धते, द्वयोः कोशयोश्च विभक्तो भवति। द्वौ कोशौ चतुर्षु, तेऽष्टसु, ते च षोडशसु विभक्ताः क्रमेण कोटिसंख्याका भवन्ति। निषिक्तादण्डकोशादेकस्मादुत्पन्ना अप्येते कोशा बहुषु रूपेषु वर्धन्ते। केचिन्मांसपेशी-कोशा भवन्ति, केचिद् ग्रन्थिकोशाः, केचिच्च स्नायुकोशा इत्यादयः। प्रत्येकं कोशे एका क्षुद्रा [२]न्यष्टिर्भवति। सा च रासायनिकदृष्ट्याऽवशिष्टकोशकायाद् भिन्ना। यदा चावशिष्टः कोशकायः[३] पेशीकोशरूपे सङ्कोचनस्य, ग्रन्थिकोशरूपे उदासर्गस्य, स्नायुकोशरूपे च संवाहनस्य क्रियां करोति; तदा न्यष्टिर्वृद्धौ, कोशविभाजने, कोशस्य सजीवत्वशक्तिमत्त्वसम्पादने च निरता भवति। निषिक्ताण्डकोशस्य न्यष्टिर्वर्धते, वर्धिता च द्वयोर्भागयोर्विभक्ता भवति। प्रत्येकं भागो निषिक्ताण्डकोशस्य विभाजनाज्जातयोरवयवयोरन्यतरेण सम्बद्धो भवति। सर्वस्मिन्नपि विभाजनेऽयं विधिरनुस्रियते। एवं शरीरस्य प्रत्येकं कोशे एका न्यष्टिरन्तर्भूता भवति। तस्याश्चोत्पत्तेर्मूलं निषिक्ताण्डकोशीया न्यष्टिर्भवति। एवं मनुष्यस्य वंशानुक्रमोऽनेककोटिकोश-न्यष्टिषु सन्निहितो भवति। कोशन्यष्टयश्च निषिक्ताण्डकोशस्यैकस्या न्यष्टेरुत्पन्ना भवन्ति। निषिक्त-स्याण्डकोशस्य निर्मितिश्च मातुः पितुश्च न्यष्ट्योः संयोगेन जायते।

एवं [४]जननविज्ञानानुसारेणेदं स्पष्टं भवति यद्—

(१) बालकस्य वंशानुक्रम उभाभ्यामपि पितृभ्यां निश्चितो भवति।

(२) निषेचनस्य काल एव तस्य स्वरूपं निश्चितं स्थिरं च भवति। नहि निषेचना-नन्तरं कोऽपि वंशानुक्रमस्तत्र प्रवेष्टुं शक्नोति। नव मासान् यावद्गर्भं धारयन्ती मातापि नहि तत्र किञ्चिदन्यत् प्रवेशयितुं क्षमते।

(३) प्रत्येकं कोशे उपस्थित्या वंशानुक्रमः सम्पूर्णे शरीरे व्याप्तो भवति।

न्यष्टौ केचित् क्षुद्राः कणा भवन्ति यष्ट्याकाराः। एषु केचिद्दीर्घाः, केचिद् ह्रस्वाः, केचित् सरलाः, केचिच्च वक्राः सन्ति। इमे कणाः पित्र्यसूत्राणि[५] कथ्यन्ते। मानवकोशेऽष्टचत्वारिं-शत् पित्र्यसूत्राणि चतुर्विंशति युग्मानि वा भवन्ति। कोशविभाजने पित्र्यसूत्रमपि द्विधा विभक्तं भवति। प्रत्येकं भागो विभक्तकोशावयवेन सन्निहितो भवति। एवं निषिक्ताण्डकोशवर्तिभ्यः पित्र्यसूत्रेभ्य उत्पन्नानि चतुर्विंशति युग्मानि अष्टचत्वारिंशद् वा पित्र्यसूत्राणि मानवशरीरस्य प्रत्येकं कोशे सन्निहितानि भवन्ति। युग्मस्यैकं पित्र्यसूत्रं शुक्रकीटादागतं भवति, द्वितीयञ्च गर्भाधानात् पूर्वमेवाऽनिषिक्तेऽण्डकोशे उपस्थितं भवति। अनेन प्रकारेण शिशोः पित्र्यसूत्रयुग्मं पितुर्मातुश्च प्राप्तयोः पित्र्यसूत्रयोर्निर्मितं भवति। अत एव यदि कस्यचित् पितुर्नेत्रे नीलवर्णे, शरीरञ्च नातिस्थूलं नातिकृशं वा भवति; मातुश्च नेत्रे कपिशे शरीरञ्च स्थूलम्; तदा बालक एकं गुणं पितुः, एकञ्च मातुरुपलभ्य नातिस्थूलो नीलनेत्रश्च भवितुं शक्नोति।

अणुवीक्षणयन्त्रेण वैज्ञानिकैर्दृष्टं यत् पित्र्यसूत्रं मणिमालासदृशं भवति। एषा माला च

---

१. Womb.
२. Nucleus.
३. Cell body.
४. Scinece of genetics.
५. Chromosomes.

In Public domain. Digitization Muthulakshmi Research Academy

विशिष्टेन क्रमेण सज्जितैः [1]पित्र्यैककैर्निमिता भवति। मनुष्यस्य पित्र्यैककाः सहस्रादप्यधिकाः सन्ति। ते चासमानसंख्याभिः पित्र्यसूत्रेष्वनुस्यूता वर्तन्ते। पित्र्यसूत्राणीव पित्र्यैकका अपि युग्मेन (एको मातुरेकः पितुश्च) तिष्ठन्ति। कस्यापि पित्र्यसूत्रस्य पित्र्यैककाः प्रायेण समा भवन्ति। तेन बालोऽपि मातापितृसमो जायते। तस्मिन् साम्यपरिमाणं वैषम्यादधिकं भवति। केषुचिद् युग्मेषु पित्र्यैककाणां भिन्नतायाः सम्भवः, यथा—एको गौरवर्णोत्पादकः, अपरश्च गोधूमवर्णोत्पादकः। यदि बालको मातुः पितुश्चैकैकं गोधूमवर्णोत्पादयितारं पित्र्यैककं प्राप्तवान्, तदा तस्य वर्णो गोधूमसमो भविष्यति। यदि च गौरवर्णोत्पादकं गौरवर्णमेकं गौरमेकञ्च गोधूमवर्णम्, तदा वर्णो गोधूमनिभ एव भविष्यति। गोधूमवर्णो गौरवर्णं बाधित्वा स्थास्यति।

कयोश्चिद्दम्पत्योर्बालको दीर्घो भविष्यति वामनो वेति विषयेऽपि पूर्वोक्तो वर्णसिद्धान्त एव घटते। वामनस्योर्ध्वजनस्य च मध्ये यदन्तरं भवति तत्पित्र्यैककाणां कारणेन। यथा पितरौ भवतस्तथैव पित्र्यैककास्तौ पुत्राय प्रयच्छतः। शक्तिबुद्ध्यादीन्यन्यान्यपि मानवीयानि लक्षणानि पित्र्यैककाश्रितानि भवन्ति।

अर्जितस्वभावगुणानां[2] सन्ततौ संक्रमणम्

अर्जितानां गुणानां सन्ततौ सङ्क्रमणं भवति न वेति विषयेऽपि बहु परीक्षणं कृतं मनोविद्भिः। विकासवादस्य प्राचीनसिद्धान्तानुसारेण व्यक्तौ वातावरणेन तस्य चेष्टाभिश्च यानि परिवर्तनानि जायन्ते, तानि तत्सन्ततयोऽपि पैतृकसम्पत्तिरूपेणाप्नुवन्ति। अर्वाचीना जीवशास्त्रिणो नैतत् स्वीकुर्वन्ति। बहुप्रयोगानन्तरं तैरवगतं यन्नार्जिता गुणाः सन्ततौ सङ्क्रामन्ति। कठिनशारीरिकश्रमेण केषाञ्चित्त्वक् कर्कशा रूक्षा च जायते। इयं कर्कशता रूक्षता च तैः स्वयमर्जिता कथं प्रजननग्रन्थीनां पित्र्यैककेषु प्रभावं जनयितुं शक्नोति! यदि वा केनाऽपि नूतना भाषा शिक्षिता, यस्या ज्ञानं तस्य वंशे पूर्वं न कोऽप्युपार्जयत्, कथमिदं भाषाज्ञानं पित्र्यैककेषु प्रेषयितुं शक्यम्! पितृभ्यामर्जिता ये गुणा बालकेषु सङ्क्रान्ता इव दृश्यन्ते, तेषां कारणमनुकृतिः, शिक्षणम्, निर्देशो वा, न तु वंशानुक्रमः। राजयक्ष्मन्नुपदंशादयो[3] घातका रोगाः, ये यावज्जीवं तिष्ठन्ति, तेऽपि पित्र्यैककैः पारेषिता[4] न भवन्ति।

वंशानुक्रमविषयकाः प्रयोगाः

वंशानुक्रमस्याध्ययनमनेकैर्मनःशास्त्रिभिः कृतम्। गाल्टनमहोदयेनाष्टानां यमलानां बालकानामध्ययनं कृतम्। तेन च तेषां जीवनेऽतीव सादृश्यं प्राप्तम्। डुग्डेल-स्टाब्रुकमहोदयाभ्यामेमेरिकादेशस्य कस्यचित् परिवारस्याध्ययनं विहितम्। तस्मिन् जूक्सोनामको जनो मुख्य आसीत्। स मृगयामत्स्यमांसैरात्मनिर्वाहमकरोत्। तेन कस्यचिद् भ्रष्टपरिवारस्य स्त्री परिणीता। एवंविधाभ्यां दम्पतीभ्यां जातेषु पुत्रपौत्रप्रपौत्रेषु भिक्षुका रोगिण आततायिनश्चैवाभवन्। कार्लपियरसनमहोदयेन वेजवुड-डार्विन-गाल्टनपरिवारपरम्परामधीत्य ज्ञातं यदस्मिन् परिवारे जनानां शतैः प्रतिष्ठायुक्तानि पदानि प्राप्तानि, समाजसेवा च विहिता। गोडार्डमहाशयेन अमेरिकादेशस्य सैनिकेन कालीककेत्याख्येन द्वे पत्न्या-कालीककपरिवारस्येतिवृत्तमधीतम्।

१. Genes or elementary genetic factors.
२. Characteristics.
३. Syphilis.
४. Transmit.

In Public domain. Digitization Muthulakshmi Research Academy

बुदूदे। तस्य प्रथमा पत्नी मन्दबुद्धिः, द्वितीया च प्रतिभावती बभूव। प्रथमाया वंशपरम्परया प्राप्तेषु ४८० जनेषु १४३ मन्दबुद्धयः, ७१ मद्यपाश्चोरा दुराचाराश्च बभूवुः। द्वितीयाया वंशपरम्परायामधिवक्तारः[1], चिकित्सकाः, विद्वांसश्चाभवन्। एवमेव विंशिपादिमहोदयैः परीक्ष्येदं ज्ञातं यद् व्यक्तित्वनिर्माणे वंशानुक्रमस्य महान् सर्वाधिकश्च प्रभावो जायते। एतैर्विद्वद्भिर्वंशानुक्रमविषये केचिन्नियमा विनिश्चिताः। ते चैवम्—

(१) कीटाणूनामबाधता[2]—बालकः पितृभ्यां तान् समस्तान् गुणान् प्राप्नोति ये ताभ्यां स्वपूर्वजेभ्यो लब्धाः। परं स ताभ्यां स्वजीवनकाल उपार्जितान् गुणान्नोपलभते। अस्य सिद्धान्तस्य समर्थनाय वाइसमैनमहोदयेन मूषकेषु केचित् प्रयोगाः कृताः। तेन कतिपये मूषकाः पालितास्तेषां पुच्छानि च छिन्नानि। यदा तेषां सन्ततयो जातास्तदा तासां पुच्छान्यभवन्। तेन तेषामपि पुच्छानि छिन्नानि। एवं द्वाविंशतिगोत्रापत्यानि यावत् स पुच्छानि छिन्दन्नतिष्ठत्; परं प्रतिवारमपत्यानि सपुच्छान्येवोत्पन्नानि। एतेन ज्ञातं यत् पितृभ्यां स्वजीवनेऽर्जिता दोषा न सन्ततौ सङ्क्रामन्ति। परं मैकड्गलपावलोवमहोदययोः प्रयोगैरेतद्विपरीतः परिणामः प्राप्तः। मैकड्गलमहोदयेन कतिपये मूषका विशाले जलभाण्डे क्षिप्ताः। भाण्डान्निःसरणस्य द्वौ मार्गौ बभूवतुः; तयोरेकः प्रकाशमयः, अपरश्चान्धकारमयः। मूषकाः प्रकाशमयेन मार्गेण बहिर्गन्तुमचेष्टन्त; परं तेन मार्गेण गमने ते विद्युदाघातं प्राप्नुवन्ति स्म। तदा तेऽन्यं मार्गमन्वेष्टुमारेभिरे। १६५ वारान् प्रयत्नं कृत्वाऽन्ते तैरन्धकारमयमार्गेण निःसरणं शिक्षितम्। तेषां पुत्रपौत्राश्चोत्तरोत्तरमल्पतरैः प्रयत्नैरेव शिक्षितुमशक्नुवन्। अन्ते च त्रयोविंशतितमैर्गोत्रापत्यैः पञ्चविंशतिवारैरेव निष्क्रमणं शिक्षितम्। पावलोवमहोदयेनापि मूषकेष्वेव प्रयोगः कृतः। स भोजनार्थं मूषकानाह्वयन् विद्युद्घण्टिकां वादयति स्म। प्रथमे मूषकास्त्रिशतवारं कृतैः प्रयत्नैः घण्टिकाशब्दं श्रुत्वा भोजनार्थमागन्तुं शिशिक्षिरे। ततोऽनन्तरं तेषां पुत्रपौत्रा उत्तरोत्तरमल्पतरैः प्रयत्नैः, अन्ते च तेषां पञ्चमैः गोत्रापत्यैः पञ्च वारान् प्रयत्नं कृत्वैव शिक्षितम्। एतेन सिध्यति यत्पितृभ्यां काठिन्येनार्जितान् गुणान् तदपत्यानि सारल्येनार्जयन्ति। भारतीयवर्णव्यवस्थेमं सिद्धान्तमवलम्ब्यैव कृतेति प्रतीयते। अनेनैव नियमेन ब्राह्मणपुत्रस्य रुचिरध्ययने, क्षत्रियस्य च युद्धे सुतरामेव भवति।

(२) भेदोत्पत्तिः[3]—वंशानुक्रमस्य द्वितीयो नियमो भेदोत्पत्तिसम्बन्धी। यद्यपि सन्ततिः पित्रोरनुरूपा भवतीति सत्यम्, तथापि कालान्तरे कस्यापि वर्गस्य प्राणिषु किञ्चिदन्तरं जायते। डार्विनमते एतानि परिवर्तनान्यकस्माद्भवन्ति, ततश्च वंशानुक्रमनियमेन स्थिरीभवन्ति। लेमार्कमहोदयस्य मतं यदेतेषां परिवर्तनानां कारणं तेषां प्राणिनामान्तरिकीच्छा। यदा कस्मिन्नपि नवे वातावरणे कानिचित् परिवर्तनानि वाञ्छितानि भवन्ति तदा प्रकृतिः स्वयमेव तथा विधत्ते।

(३) शुद्धवंशानुक्रमस्य स्थायिता—अनुभवेनैतत्सिद्धं यद् वर्णसङ्कराणामुन्नतिर्न भवति। केनापि कारणेन क्वापि वर्णसङ्करा जातिरुत्पद्यते कदाचित्, परं शनैश्शनैस्तस्या लोप एव जायते। एष नियमो मैण्डलमहोदयेन निर्मितो 'मैण्डलवादः' इति कथ्यते। तेन वर्णसङ्कराणि शुद्धानि च मटरबीजानि वारं वारं क्षेत्रे उप्तानि। क्रमेण वर्णसङ्कराणां सङ्ख्या क्षयङ्गता।

१. Legal practitioners.
२. Continuity of germplasm.
३. Law of variation.

In Public domain. Digitization Muthulakshmi Research Academy

(४) साम्यभावः—प्रायेण गुण-बुद्धि-बलेषु जनाः समाना एव भवन्तीति दृश्यते। यदि केनचित् कारणेन कोऽपि महाबलो महामूर्खो वा जायते, तदा तस्यापि सन्ततिः कालक्रमेणान्यतुल्यबलैव जायते। प्रकृतिनियम एवैष यज्जनेषु नातिवैषम्यं भवति।

एवं वंशानुक्रमस्य प्रभावो जनेषु निर्विवादः। सन्ततीनां व्यक्तित्वनिर्माणे पित्रोः प्रभावो महान् भवति।

वातावरणम्[१]

व्यक्तेर्विकासे वातावरणस्य प्रभावोऽनेकैः प्रकारैर्जायते। मनुष्यस्य शारीरिकी वृद्धिरोषजन-जल-भोजन-तापमानाद्याश्रिता भवति। तस्य स्वभावः कौशलञ्च वातावरणेन प्रस्तुतानां परिस्थितीनामधीनं भवति। तस्य ज्ञानं शिक्षावलम्बि, तस्य सामाजिकी रुचिश्च समाजस्य तेन सह सम्बन्धानुकूला भवति। जनः कार्यशीलतायै समुचितं प्रतिकूलं वावसरं वातावरणाल्लभते। किं वस्तूत्तेजकं प्रेरकं वा भविष्यतीति सर्वं प्रवृत्तिसामर्थ्याद्यधीनं भवति। एकस्यैव वातावरणस्य प्रभावो भिन्नासु व्यक्तिषु भिन्नो जायते। यदैकस्यैव वंशानुक्रमस्य बालका भिन्नेषु वातावरणेषु पोषिता भवन्ति, तदा तेषां रुचिशक्तिभेदस्य मूलं वातावरणमेव भवति। भिन्नेषु परिवारेषु पालिता यमला अपि वातावरणप्रभावादेव भिन्नस्वभावा भिन्नरुचयश्च जायन्ते। नगरेषु निवसन्तो बालका ग्रामीणेभ्यश्चतुरा भवन्ति; यतस्तत्रत्यं वातावरणं प्रेरकं भवति। वृत्तिकारणादपि[२] बुद्ध्यावन्तरं भवति। प्रायो दृश्यते यद् बुद्धिपरीक्षासु व्यावसायिका[३] जनाः सर्वाधिकानङ्कान् प्राप्नुवन्ति। पुस्तकपाला[४] आशुलिपिकाश्च[५] ततो न्यूनान्। प्रशिक्षिता यान्त्रिकाः सामान्यान्, अकुशला यान्त्रिकाश्च सर्वतो न्यूनानङ्कान् लभन्ते। लिङ्गजातिदेशादिभेदा नाधिकं भेदं जनयन्ति। स्त्रियोऽपि पुरुषा इव बुद्धिमत्यो भवन्ति। स्त्रीपुरुषयोरुभयोरपि सामान्यबुद्धिः समानैव भवति। उभयोर्व्यक्तित्वे यदन्तरं दृश्यते तस्य कारणं कार्यक्षेत्रभेदः, वातावरणभेदश्च। परीक्षणेन ज्ञातं यत्प्रारम्भिकशालासु बालिका बालकस्यापेक्षयाधिकेनावधानेन पाठं शृण्वन्ति, शालाकार्यं च सम्पादयन्ति। तेन ता अधिकानङ्कान् लभन्ते। परमुपलब्धिपरीक्षासु[६] एतदन्तरं नश्यति। माध्यमिकशालास्वपि बालिका भाषासु, भाषायां यदि बालिकाश्चातुर्यं लभन्ते, तर्ह्यङ्कगणिते बालकाः। माध्यमिकशालास्वपि बालिका भाषासु, बालकाश्च गणितविज्ञानयोर्दक्षा दृश्यन्ते। व्यापारोद्योगेष्वपि लिङ्गीयमन्तरं दृश्यत एव।

उपरि यत्प्रतिपादितं तेन सुस्पष्टमेव यद् व्यक्तित्वेषु यदन्तरं दृश्यते, तत्र वंशानुक्रमो वातावरणञ्च कारणे। अनयोः किं कारणं बलवत्तरम्? इति प्रश्नो नातिमहत्त्वपूर्णः। अस्माभिः स्ववंशोन्नतये चारुगृहाणि, श्रेष्ठं प्रतिवेश्म, साधुशिक्षणम्, व्यवसायः, सुशासनञ्चेत्यादीनि साधनानि निर्मातव्यानि।

---

१. Environment.
२. Occupational differences.
३. Professional man.
४. Book keepers.
५. Stenographers.
६. Achievement tests.

In Public domain. Digitization Muthulakshmi Research Academy

त्रयोविंशोऽध्यायः

अचेतनं मनः[1]

अचेतनस्य मनसोऽन्वेषणम्

अस्यां शताब्द्यां विद्वद्भिर्मनोविज्ञानविषये बह्वनुसन्धानं कृतम्, येनानेकानि नवानि वस्तूनि ज्ञाततामागतानि, बहवश्च नवाः सिद्धान्ताः प्रकाशमागताः, बहवश्च चिरस्वीकृताः सिद्धान्ता विचाराश्च भ्रान्ता इति खण्डिताः। एतादृशेऽनुसन्धाने यत्सर्वाधिकं प्रभावकारि विलक्षणञ्च वस्तु ज्ञातं तदस्त्यचेतनं मनः। मनसो ज्ञानं न्यूनाधिकपरिमाणेनाऽस्त्यस्माकं सर्वेषामेव। परं मनसोऽपि भेदद्वयम्—चेतनम्, अचेतनञ्चेति सिगमण्डफ्रायडमहोदयैरेव पूर्वं प्रतिपादितम्।

फ्रायडमहोदयः प्रसिद्धश्चिकित्सक आसीत्। तेनाधिव्याधिविषये बह्वधीतम्, अनुभूतञ्च। तेन ज्ञातं यदनेके तादृशा रोगाः सन्ति येषां शमनं बाह्योपचारैर्न सम्भवति। यतस्तेषां कारणं मनः, अतस्तेषां चिकित्सापि मानसी भवितुमर्हति। इति विचार्य स फ्रांसदेशस्य ख्यातनाम्नो मनश्चिकित्सकस्य कूयेमहोदयस्य सन्निधिं मनश्चिकित्साप्रशिक्षणाय गतः। तेन तत्र सर्वेषामपि मनोरोगाणां चिकित्सां निर्देशविधिना कुर्वाणः कूयेमहोदयो निरीक्षितः। अस्मिन् चिकित्साविधौ रोगी शरीरं शिथिलं कर्तुं निर्दिष्टो भवति स्म। ततः स विचारशून्यो भवितुमादिश्यते स्म। विचारक्रियां निरुध्य मनसि च स्वास्थ्यभावनामानेतुं निर्दिष्टो भवति स्म। एवमेनेके रोगिणः स्वास्थ्यलाभमकुर्वन्। परं कालान्तरे पुनरपि रोगाक्रान्ता बभूवुः। फ्रायडमहोदयोऽपश्यद् यत्कूये-महाशयो रोगकारणान्यनन्विष्य केवलं निर्देशपद्धतिमालम्बते स्म। एवं तेन निश्चितं यद्रोगे नष्टेऽपि तस्य कारणभूता भावनास्तु तिष्ठन्त्येव, अवसरं प्राप्य पुनरप्युत्तेजिता रोगमुत्पादयन्ति। अतो न तासां दमनं श्रेयस्करम्। रोगमूला भावना मनसो बहिर्निष्कास्याः। एतद्विषये चेष्टमानः स क्रमेणाचेतनं मनोऽवबुद्धवान्। तदनन्तरं तच्छिष्याभ्यामेलडर-जुङ्गमहोदयाभ्यां फ्रायडदिशाऽन्वेषण-कार्यं कुर्वद्भयां बहु नवं प्रतिष्ठापितम्।

मनोविभागाः

एतन्मते मनसस्त्रयो विभागाः—चेतनम्[2], चेतनोन्मुखम्, [3]अचेतनं च। चेतनं मनः पठन-लेखन-चिन्तन-भाषणादिक्रियाणां नियन्त्रणं करोति। अयं मनसो भागः यत्र समस्ताः क्रिया भवन्ति। सर्वेऽपि विचाराश्चेतनेनैव मनसा प्रकाश्यन्ते। चेतनमनःकार्याणां कर्तारं जन आत्मानं मन्यते। तेषां सौष्ठवासौष्ठवगुणदोषभाजमात्मानं स्वीकरोति। ततः परं चेतनोन्मुखं मनः। प्रकाशिताः प्रकाशनव्यग्रा भावनाः प्रकाशनात् पूर्वं चेतनोन्मुखे मनस्यवतिष्ठन्ते। तत्र विद्यमानं विचारजातं प्रेरितं सत् चेतनाक्षेत्रमवतरति। अस्मात् परमचेतनं मनः। अचेतनस्य मनसो

---

१. Unconscious.

२. Conscious.

३. Preconscious.

In Public domain. Digitization Muthulakshmi Research Academy

भावना विचाराश्च ज्ञाता एव तिष्ठन्ति। प्रयत्नेनापि न ते चेतनाप्रदेशमायान्ति। चेतनं मनो रङ्गमञ्चतुल्यम्, यत्र भावना विचाराश्चाभिनयप्रदर्शनायावतरन्ति। चेतनोन्मुखं मनो रङ्गद्वार-सदृशम्, अचेतनञ्च मनो नेपथ्यकक्षसन्निभम्। अस्माकं दान्ता निगृहीताश्च संवेगा अनष्टा एव मनसः कस्याऽपि निभृते कोणे तिष्ठन्ति। बहुत्वमापन्नाश्च व्यक्तित्वेऽनेकान् दोषानुत्पादयन्ति। मनुष्याणामनेकविकृतव्यवहारचेष्टाणां मनोरोगाणां च कारणं दान्ता भावना एव।

अचेतनमनसो वासनाः

दान्ता भावना अनष्टाः सत्यो वासनारूपेण मनसि तिष्ठन्त्योऽन्तर्निगूढा इति प्रतिपादितमेव। काश्च ता वासनाः ? कतमा तासु बलिष्ठा ? इति विषये नैकमत्यं मनोविदाम्। फ्रायडमते काम-वासनाऽचेतने मनसि बलवत्तमा। सभासमाजेषु कामचर्चा गर्हिता, अप्रकाश्या च भवति। जनाः तत्प्रकटीकरणादतिशयेन बिभ्यति, तस्याञ्च कठोरं नियन्त्रणं कुर्वन्ति। परोक्षरूपेणैवास्यास्तृप्ति-रान्वर्यते। अतोऽतृप्ता सा स्वप्नैः, सङ्केतैः, शरीरमनोरोगैश्चाभिव्यज्यते। एडलरमते आत्म-प्रकाशनभावना प्रबलतमा। तस्याः समीचीना तृप्तिरतिकठिना। दमनेन चास्या आत्महीनता-ग्रन्थिरुत्पद्यते। जुङ्गमहोदयानुसारं मनुष्येषु समाजभावनाऽतिशक्तिमती। यथा मनुष्यः स्वीयां कीर्तिं समृद्धिं सुखञ्च कामयते, तथैवाऽन्येषामात्मनः प्रति सद्भावनामनुग्रहदृष्टिं च। कीर्तिकामनापि समाजसम्बद्धैव। अतृप्ताः स्वीयाः सुखकामना अचेतने वैयक्तिके मनसि तिष्ठन्ति। ततः परे सामूहिकेऽचेतने[१] मनसि सामाजिकानां भावनानां प्रतिष्ठा। नीत्याचार-भावनानामुदयः सामूहिकाचेतनमनस एव भवति, न तु परिवेशाल्लब्धेभ्यः समाजागृहीतविचारेभ्यः। जुङ्गमतानुसारेण नहि सर्वा दान्तभावना अनैतिक्य एव।

गूढार्थचेष्टाः[२]

अचेतनस्य मनसो बलवत्यो भावना गूढार्थचेष्टारूपे व्यक्ता भवन्ति। यथा दन्तैरङ्गुलि-नखकर्तनशीलता, पीठे स्थित्वा जङ्घा-पादचालनम्, ओष्ठचर्वणम्, स्कन्धचालनम्, वारं वारं नासिकास्पर्शोऽर्थसूचिकाश्चेष्टाः। केचिन्मनुष्या एतासां चेष्टानामभ्यस्ता भवन्ति। केचिद्विचारकाले हस्तेन हस्तमुपमर्दयन्ति[३]। एताश्चेष्टा यन्त्रवत् स्वयमेव जायमानाः प्रतीयन्ते, न तु कर्ता तासां कर्तृत्वमनुभवति। नासौ चेतनमनोव्यापारः।

हेडफील्डमहाशयेन 'मनोविज्ञानं नैतिकता च' इति नाम्नि पुस्तके साङ्केतिकचेष्टाया एकमुदाहरणं दत्तम्। काचिन्महिला, या पत्युर्गुणवर्णने आनन्दमनुभवति स्म, स्वविवाहप्रशंसां च बहूपवर्ण्य सदा आत्मानं सन्तुष्टां प्रदर्शयति स्म। सा कदाचिद्रात्रौ स्वप्नमेकं दृष्टवती। तया स्वप्ने स्वकीयः पती रेलयानदुर्घटनाहतो दृष्टः। स्वप्नस्यार्थजिज्ञासया च हेडफील्डमहाशयं प्राप्तवती। यदा च सा तत्सम्मुखमुपविष्टा, तदाऽङ्गुलीयकमङ्गुल्यां वारं वारमपनेतुं पुनर्धारयितुञ्चोपचक्रमे। हेडफील्डमहोदयोऽन्यस्मिन्दिने तामागन्तुमादिष्टवान्। तदनन्तरं कतिपयैरेव दिनैस्तया स्वपतिः परित्यक्तः। सत्यं त्वेतद्यत् सा स्त्री न पत्या सह सन्तुष्टा आसीत्, तस्या वैवाहिकं जीवनं

१. Collective unconscious.
२. Symptomatic acts (Automatic)
३. Handwashing mania.

In Public domain. Digitization Muthulakshmi Research Academy

कष्टमयमासीत्, परं सा समाजे स्वप्रतिष्ठां स्थापयितुं मिथ्यैव सन्तोषं प्रदर्शयति स्म। तस्य मनः पतिवरणे स्वमौर्ख्यं स्वीकरोति स्म, अचेतने स्तरे च तस्मान्मुक्तिमीप्सति स्म। परमेषेच्छा न तस्याश्चेतनमनसः स्पर्शं करोति स्म, अतो न साऽपि तद्विषये किञ्चिज्जानाति स्म। परं तस्याः स्पृहा स्वप्नैः साङ्केतिकैर्व्यापारैश्चाभिव्यक्ताऽभूत्। विवाहे प्राप्तमङ्गुलीयकं वारं वारमपसारितं धारितं च तस्यास्तदधारणेच्छामेव प्रकटयति स्म।

प्राध्यापकैर्लालजीरामशुक्लमहोदयैः 'सरल मनोविज्ञान'नाम्नि ग्रन्थे गूढार्थचेष्टाया एकमन्यदुदाहरणं दत्तम्। काचिद् वृद्धा मार्गे चलन्ती किञ्चिदन्वेषयन्तीव पृथिव्यां दत्तदृष्टिरभूत्। 'किमन्वेषयति भवति' इति पृष्टा न किमप्युत्तरं दातुं शशाक, प्रश्नेन चाश्चर्यान्विता बभूव। पश्चादनुसन्धानेन प्रकटितमभूद् यत् त्रिभ्यो वर्षेभ्यः पूर्वं तस्यास्तथा स्वभावो नासीत्। पश्चात् केनापि तस्याः सञ्चितं सम्पूर्णं धनमपहृतम्। धनं भूम्यां निखातमासीत्। खनित्वापि यत्र तत्र भूमिं सा धनं लब्धुं न शशाक, तस्या धनेप्सा चाऽतृप्तैवावशिष्टा, साङ्केतिकचेष्टारूपे प्रकटिता च। यत्र कुत्रापि गृहे सा न्यवसत्तत्रैव गूढार्थचेष्टामकरोत्।

अङ्गुलिभिर्नखकर्तनं प्रतिहिंसायाः प्रतिशोधस्य वा सूचकं भवति। यस्य मातुः स्तनपानस्येच्छाऽतृप्ता भवति, यश्चाङ्गुष्ठपानादपि वर्ज्यते, स नखकर्तनाभ्यस्तो जायते। यदि स तस्मादपि दण्डाद्वर्जितो भवति तर्हि तत्स्थानेऽन्या चेष्टा पदमादधाति। एवं जङ्घाचालनं कामवासनायाः सूचकम्। हस्तेन हस्तोपमर्दः (कृत्रिमा करप्रक्षालनक्रिया) अनुचितकर्मजनितात्मग्लानिमुमुक्षाभिव्यञ्जिका। 'मैकवेथ'नाम्नि शेक्सपियरकृते नाटके मैकवेथपत्न्याः करप्रक्षालनरूपा चेष्टाऽस्योदाहरणम्।

गूढार्थचेष्टा रेचनस्वरूपा भवन्ति। अचेतनमनोऽन्तर्निगूढानां वासनारूपाणामतृप्तभावनानां तृप्तिप्रयत्न एव तत्र कारणम्। ता नहि कदाचिदपि स्वास्थ्यविघ्नकारिण्यः कार्यबाधिका वा। एवंविधचेष्टारतोऽपि मनुष्यः सर्वं यथातथं सम्पादयति। तासां विरोध एव कार्यबाधाजनकः। मनोग्रन्थिनाशादेव तासां नाशः सम्भवति।

अचेतनमनोजन्या रोगाः

अचेतने मनसि निगूढा भावना अनेकेषां मनोरोगाणां जनन्यो भवन्ति। तेषु प्रमुखाः—चलत्स्वप्नः[१], उन्मादः[२], द्विधा व्यक्तित्वम्[३], बहुव्यक्तित्वम्[४], अकारणभयम्[५], चिन्ता, विक्षिप्ततादयः[६]। तत्र—

चलत्स्वप्नास्तादृशा येषां विषयेऽचेतनं मनः क्रियाप्रेरकं भवदपि न किञ्चिज्जानाति।

१. Somnambulism.
२. Hysteria.
३. Double personality.
४. Multiple personality.
५. Phobia.
६. Insanity.

In Public domain. Digitization Muthulakshmi Research Academy

पुरुषः कार्यं कुर्वन्नपि तस्य कर्तृत्वं नानुभवति। आसीत् कस्याश्चित् स्त्रियः स्वसपत्नीं प्रति द्वेषः। एकदा साऽर्धस्वप्नावस्थायामुत्थिता, सपत्नीमञ्जूषायाश्च कानिचिद् बहुमूल्यान्याभूषणानि चोरितवती, पृष्टा च सा न शशाक तद्विषये किञ्चिदपि कथयितुम्। अथ सोपधानमध्ये तानि निधाय प्रतिनिशीथं तेषां निरीक्षणं चक्रे। एकदा च सा तथा कुर्वाणा सपत्न्या दृष्टा। पृष्टा च प्रातस्तद्विषये न किमपि वक्तुं शशाक। कार्यं कुर्वन्त्या अपि तस्याः कार्यबोधो नाभवत्।

द्विधा व्यक्तित्वम्, बहुव्यक्तित्वञ्च—व्यक्तित्वविघटनस्य परिणामो द्विधा व्यक्तित्वे बहुव्यक्तित्वे वा परिलक्षितो भवति। व्यक्ती रूपद्वये विभक्तो जायते। कदाचित् सा सरला, विनम्रा, दयाशीला, शान्ता, सदाचारिणी दृश्यते, कदाचिच्च तद्विरुद्धा। कदाचिद् व्यक्तित्वे पूर्णं परिवर्तनं जायते। परिवर्तितस्वरूपे स्वकीयं नाम-वंश-मित्र-परिजन-अतीतव्यापार-चेष्टितादिकं सर्वं विस्मृतं भवति। तदा पुरुष आत्मानं सर्वथा भिन्नं मनुते। तस्य स्वभावः, चरित्रञ्च विपरिवर्तते। कालान्तरे तस्यातीतं सर्वं पुनरावर्तते, परवर्तिजीवनघटितं च विस्मर्यते। कदाचित्तु पूर्ववर्तिपरवर्तिस्वरूपयोस्तथाऽन्तरं भवति यत्तयोः सम्बन्धः समग्ररूपेण विच्छिन्न इव प्रतीयते। अनयोरवस्थयोरधिकतरं कालमवतिष्ठमाना मूला[1], अल्पीयांसं कालमवतिष्ठमाना च गौणी[2] कथ्यते। गौण्यामवस्थायां मूलावस्थाव्यवहृतं सर्वं स्मर्यते, परं परेण सह घटितमिव। नहि मूलावस्थायां गौणावस्थाचेष्टितं किञ्चिदपि स्मर्यते। यो मूलावस्थायां शान्तो विनीतश्च भवति, स गौणावस्थायां उपद्रवी दुर्विनीतश्च भवितुं शक्नोति।

एतद्विषये [3]डोरिसनाम्न्यास्त्रिवर्षीयाया बालिकाया उदाहरणमतिप्रसिद्धम्। सैकदा स्वपितुः स्थाने मातुः पार्श्वे सुष्वाप। एतेन क्रुद्धः पिता तां भूमावक्षिपत्। तस्मादेव क्षणात् साऽतिशान्ता, बुद्धिमती, अध्यवसायशीला चाजायत। परमन्तरेऽन्तरे साऽत्युद्दण्डा, दुर्दमनीया चाभवत्। शान्तिकाले सा स्वोपद्रवान् नास्मरत्, उद्दण्डताकाले च सा स्वीयां शान्तां प्रकृतिं स्मरति स्म, घृणया तत्स्वरूपं पश्यति स्म। शान्तिकालेऽपि तस्या आत्मनः कोऽप्यंशो[4] लुप्त इव प्रतिभाति स्म। [5]ब्यूशान्नामिकाया बालिकाया जीवनवृत्तमतोऽप्यद्भुततरम्। बाल्य एव सा धर्मपरायणा, संयता, आत्मनिग्रहशीला समपद्यत। परं तस्या जीवनेऽकारणमेव काश्चिदौद्धत्यपूर्णा घटना घटन्ते स्म। सा कस्यचिन्मनोवैज्ञानिकस्य समक्षं नीता। तत्प्रयत्नानन्तरं तस्यां बाल्योचितानां[6] वृत्तीनां प्रादुर्भावोऽभूत्। कलहप्रवृत्तिः स्वार्थपरता च तस्यामुदिते। एतत्तस्यास्तृतीयं व्यक्तित्वमासीत्। मनश्चिकित्सकेन बहुप्रयत्नानन्तरमेष रोगो दूरीकृतः। स चिकित्सायै

---

१. Primary state.

२. Secondary state.

३. Doris.

४. Part of self.

५. Beauchamp.

६. Secondary state of childishness.

In Public domain. Digitization Muthulakshmi Research Academy

रोगिणीं सम्मोहनस्थितिं[1] प्रापयति स्म। तदा निश्चेष्टा[2] सा तस्य निर्देशग्रहणक्षमा[3] अभूत्। विलियमजेम्समहोदयेनाऽपि 'प्रिंसिपल्स आफ सायकालाजी' इति नाम्नि ग्रन्थे द्विविधव्यक्तित्व-मय्याः कस्याश्चित्तरुण्या वृत्तमुल्लिखितम्। यदा साऽष्टादशवर्षदेशीया आसीत्, तदा सैकदा बहु सुष्वाप। यदा चोत्थिता तदा तस्याः सर्वाऽपि पूर्वस्मृतिर्विनष्टा। न च सा स्वपितरावप्यभि-ज्ञातुं शशाक। बालेव सा पुनरपि पाठिता आवर्णमालम्।

उन्मादः[4]—उन्मादोऽपि बहुविधव्यक्तित्वसम्बद्धः। अस्मिन् रोगे विचाराणामेकता नश्यति। मोहनिद्राग्रस्ताः शरीरधारणासमर्थाः सर्वा अपि चेष्टाः कुर्वाणास्तदवबोधशून्या इव भवन्ति जनाः। कदाचित्तेषामङ्गानि अवसन्नानि[5] जायन्ते। नैतच्छरीराधाने भवति। अस्य कारणं निदेश एव। उन्मादग्रस्ता अत्यन्तं निदेशग्राहिणो भवन्ति। यदा च ते सामान्यां चेतनां पुनरावर्तन्ते, तदोन्माददशायां वृत्तं न किञ्चिदपि स्मर्तुं शक्नुवन्ति।

अकारणं भयम्—केषाञ्चिन्मनस्यकारणं भयं पदं निधत्ते। ते क्षुद्रेभ्यो जन्तुभ्योऽपि भेतुमारभन्ते। कस्यचिदपि कीटस्य स्पर्शमवाप्य तेऽनर्थकां कल्पनां कुर्वन्ति। अट्टालिकोपरि स्थितास्तेऽधःपतनमाशङ्कन्ते, नावि स्थिता निमज्जनम्, यानेन यात्रां कुर्वन्तो यानसङ्घट्टनम्। न च कोऽपि तर्कस्तेषां भयमपनेतुं शक्नोति। केचिच्च वारं वारं प्रत्येकं वस्तु प्रक्षालयन्ति, गृहमनेकदा प्रतिदिनं शोधयन्ति, पात्राणि मार्जयन्ति। एवंविधान्यनेकानि हास्यकराणि कार्याणि कुर्वन्ति। मनोनिहितभय-मार्जन-भावनायाः स्मरणेन विना नहि बाह्याभिव्यक्तयोऽप-सारयितुं शक्याः।

विक्षिप्तता[6]—विक्षिप्तताऽपि मानसिकविकृतिजन्याऽनेकेषु रूपेषु व्यक्ता भवति, यथा—मनसोऽत्यधिकमुद्दीप्तभावः, ततश्च तीव्रः सन्निपातः, अत्यधिको मानसिकोऽवसादः, खिन्नता च। व्यक्तित्वप्रहाणिरपि विक्षिप्तताया एव प्रभावः। उन्मादस्य विक्षिप्ततायाश्च कारणं न केवला स्नाय-विक्यव्यवस्था, दान्ता अचेतना इच्छा अपि कारणप्रामुख्यं लभन्ते।

अचेतना इच्छाः

फ्रायडमते यासामिच्छानां पूर्तिर्लोके न सम्भवति ता अचेतनरूपेण मनोऽन्तःप्रदेशे तिष्ठन्ति। एतादृशीष्विच्छासु कामेच्छा मुख्याः। तासां पूर्तिः सुदुर्लभा। प्रकाशनमपि तासां शिष्टविरुद्धं भवति। अचेतनरूपा इमा इच्छाः स्वप्नैः, दिवास्वप्नैः, स्नायुविकृतिभिश्च तृप्तिं प्राप्तुं चेष्टन्ते। फ्रायडमहोदयश्चेतनाचेतनयोर्मध्ये पूर्वचेतनमपि मनो मनुते। बुडवर्थमते पूर्व-चेतनं चेतनस्यातिसन्निकृष्टम्। तच्च सदा चेतनस्वरूपं प्राप्तुं सन्नद्धं तिष्ठति। केवले निर्दिष्टे एव कस्मिंश्चित् क्षणे तच्चेतनं न भवति। अचेतनं तद्यस्य निग्रहो विहितः, पूर्वचेतनं च तद्यस्य

---

१. Hypnosis.
२. Passive.
३. Suggesteble.
४. Hysteria.
५. Paralysed.
६. Insanity.

In Public domain. Digitization Muthulakshmi Research Academy

दमो न जातः। मनुष्यः स्वभावेन सुखाकाङ्क्षी। पूर्णया शक्त्या सुखाय चेष्टते। परं बाह्याः परिस्थितयस्तत्र बाधिका भवन्ति। विवशः सोऽनेका इच्छा दमयितुम्। अचेतने मनसि स सुखपूर्तये चेष्टते एव। नहि तत्र काऽपि बाधा भवति। नहि बाह्याः परिस्थितयस्तत्र नैराश्यमुत्पादयितुं क्षमन्ते। स्वप्नादयः पूर्तिसाधनानि। लोके तु तेन लौकिका नियमा अनुस्रियन्त एव।

एडलरमते दान्ता स्वस्थापनप्रवृत्तिरेवाचेतनजननी। नहि तन्मते चेतनाचेतनयोः कोऽपि विरोधः, ते चैकसूत्रबद्धे। अचेतनहीना भावनाग्रन्थिः, शक्तिप्राप्तये चेतनप्रयत्नश्च मिलित्वा सक्रियामेकतां[1] रचयतः।

जुङ्गमहोदयेनाचेतनस्य वैयक्तिकम्[2], सामूहिकं[3] चेति द्वौ भेदौ कृतौ। वैयक्तिकेऽचेतनेऽतृप्ताः कामनाः, चेतनाविच्छिन्ना अन्येऽनुभवाः, अचेतनरूपेणार्जिताऽन्या सामग्री च सम्मिलिता भवन्ति। सामूहिकमचेतनं च वंशानुक्रमप्राप्तं भवति। मूलप्रवृत्तयः, आदिकालिकाः कार्यविधयः[4], आदिकालिका विचाराः[5], आदिकालिका चिन्तनशैलीत्येवं सर्वमपि प्राचीनमवशिष्टं संस्काररूपेण सामूहिकेऽचेतने तिष्ठति। जडेषु प्राणित्वारोपणम्, क्रोधादिप्रकाशनप्रकारश्चास्योदाहरणे।

नहि कस्याऽपि जीवने सर्वासां कामनानां पूर्तिः सम्भवति। परिवेशवर्तिनो बाधा स्वशरीरगताऽशक्तता च तासां पूर्तौ विघ्नकारिणी भवति। अन्यजनविरोधः, दारिद्र्यम्, जलवायुस्थानकृताऽन्तरायाः परिवेशबाधाः। स्मृतिदौर्बल्य-कल्पनाप्रवणता-शरीरासामर्थ्यादयश्च स्वशरीरबाधाः। ताश्च जनं सङ्घर्षरतं कुर्वन्ति। सङ्घर्षरतश्च जनः प्रयत्नच्युतिविधिना विघ्नान् दूरीकर्तुं प्रयतते। स साफल्याय विविधानुपायाननुसरति। तेषु केचिदुपयोगिनः सिध्यन्ति, केचिच्चानुपयोगिनः। [6]क्षतिपूर्तिनियमोऽपि तत्र सहायको भवति। स्नेहविषयेऽसफलः सम्पूर्णां शक्तिं सङ्गीतकलायां नियोजयति। एकीकरणेनापि[7] साफल्यसन्तोषोऽवाप्यते। अयं सन्तोषः कृत्रिम एव। दिवास्वप्नाः, परनिन्दा, परच्छिद्रान्वेषणम्, परेषु दोषारोपणम्, युक्त्या[8] आत्मदोषासमर्थनम्, प्रक्षेपः[9], मानरोदनहस्तपादादिताडनप्रमुखबालोचितक्रियाः[10], अवसर्पणम्[11],

---

१. Dynamic unity.
२. Personal.
३. Collective or racial.
४. Primary ways.
५. Primary ideas.
६. Compensation.
७. Identification.
८. Rationalization.
९. projection.
१०. Childish reactions.
११. Regression.

In Public domain. Digitization Muthulakshmi Research Academy

कामना-विस्मरणम्, इच्छाऽस्वीकरणम्, दमनम्[१], निरोध[२] इत्येवमादिका अन्याः क्रिया मानसिक-सङ्घर्षोन्मूलनाय विधीयन्ते; परं नैताभिरैकान्तिकः शमः प्राप्यते।

मनश्चिकित्सा

मनोविकारजनितानां रोगाणां चिकित्सा मनोविश्लेषणविधिना[३] क्रियते। प्राचीनाः, दुःसाध्याश्च रोगा अनेन विधिना दूरीक्रियन्ते। अस्य विधेरङ्गद्वयम्—रेचनम्[४] पुनःशिक्षणं[५] च। रेचनेन दमनजो मनोग्रन्थिः स्पष्टतां नीयते। कश्चिद् विशेषज्ञ एवेदं कर्तुं पारयति। स प्रथमं मानसिकग्रन्थिमन्वेषयति। चेतनस्तरं चानीय तथाविधस्थितिमुत्पादयति यया रोगी तमात्मीयत्वेन स्वीकरोति। बहूनां रोगिणां मनःस्वीकृतेरनन्तरं स्वस्थं जायते। येषां रोगो जटिलो भवति तेषां विषये पुनः शिक्षणप्रक्रियाऽनुस्रियते। अनया रोगिणि नैतिकादर्शाचारविषये परिवर्तनं जायते, तस्य सञ्चितायाः शक्तेरुपयोगो विधीयते च। मानसिकग्रन्थेरन्वेषणायातीव कौशलस्य धैर्यस्य चावश्यकता भवति। रोगिणः स्वप्नाः साङ्केतिकव्यापाराश्चाधीयन्ते, सम्मोहनञ्च प्रयुज्यते, सहजशब्दसम्बन्धप्रक्रिया चानुस्रियते। शब्दप्रयोगे रोगिणः समक्षं केचिच्छब्दा उच्यन्ते। तान् श्रुत्वा तस्य मनस्युत्थितो विचारोऽभिलिख्यते।

मनोविश्लेषणविधिनाऽपराधप्रवृत्तिरपि निराक्रियते। होमरलेनमहोदयेन मृषाभाषण-चौर्य-व्यभिचार-परपीडनाद्यनेककुप्रवृत्तीनां चिकित्साऽनया पद्धत्या साफल्येन कृता। सर्वेऽप्येवं-विधा रोगिणो मनुष्यान् घृणयाऽवलोकयन्ति, आत्मानमपि च निर्भर्त्सयन्ति। दण्डेन तेषां दोषा वर्धन्त एव। अपराधमनोवृत्तिनिवारणाय स्नेहसहानुभूतिपूर्णो व्यवहारः कर्तव्यः। सहानु-भूतिप्रदर्शनेन तस्मिन्नात्मगौरवमुत्पद्यते, जीवने च तस्य रुचिर्वर्धते। अत एव 'प्रेमा परमेश्वरः' इति निगदन्ति सन्तः॥

---

१. Repression.
२. Inhibition.
३. psychoanalysis.
४. Catharsis.
५. Reeducation.

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्विंशोऽध्यायः

अचेतनमनोविषयकभारतीयं मतम्

अचेतनमनस आविष्कारः

पञ्चाशद्वर्षेभ्यः पूर्वं पाश्चात्त्या मनोवैज्ञानिका दर्शनशास्त्रिणश्च चेतनमनोऽध्ययन एव तत्परा बभूवुः। अचेतनमनोविषये ते किमपि नाजानन्। पाश्चात्त्यदेशेष्वचेतनस्य मनसोऽध्ययनं प्रथमं फ्रांसदेशीयाभ्यां चारकोट[१]-जेनेट[२] महोदयाभ्यां प्रारब्धम्। जेनेटमहोदयस्तु चारकोट-महोदयस्य शिष्य एवासीत्। रोगिणां चिकित्सां कुर्वद्भ्यां ताभ्यामुपलब्धं यन्मनुष्यो न केवलं चेतनस्यैव मनस आदेशं पालयति। तस्य कार्याणां नियन्त्रकमचेतनमपि मनोऽस्ति, यत्प्रच्छन्न-रूपेण कार्याणि सम्पादयति। मनसो वरीयान् भागस्त्वविदित एव तिष्ठति। यथा हिमशिला-खण्डानि[३] जले तरन्ति न पूर्णतो बहिरवलोक्यन्ते, तथा मनसोऽप्यल्पीयानेवांशः प्रत्यक्षतां भजते। यथा हिमशिलाखण्डस्य विपुलो भागो जलान्तवर्ती प्रच्छन्नस्तिष्ठति, तथैव मनसोऽपि विपुलोंऽशोऽज्ञात एव तिष्ठति। स एव कर्तव्याकर्तव्यं निर्दिशति, लोककार्यनियन्त्रणं च करोति। अनेकदा वयं स्वकार्याणामेव कारणं न जानीमः। पृच्छामश्चात्मानम्, 'कथं वयमिदमकार्ष्म' इति। अस्य कारणं त्विदमेव यत्तत्कार्यमस्माकमचेतनेन मनसा कार्यते, न तु चेतनेन। प्राच्यानां भारतीयानां मतेऽचेतनं मनः संस्कारसमुच्चयमात्रम्। अस्माभिर्वारं वारं कृतानि कार्याणि, चिन्तितानि वा वस्तूनि मनसि संस्काररूपेण चिह्नानि परित्यजन्ति। इमे संस्काराः प्रत्यक्षमननुभूयमाना अपि क्रियारता भवन्ति। मनुष्यस्याचरणं संस्कारानुसारेण शोभनमशोभनं वा भवति।

नियन्त्रकम्

अस्माकं मनः परस्परविरोधिनां भावानां विचाराणामिच्छानां च क्षेत्रमस्ति। तत्रानेके कामास्तथाविधा अपि जायन्ते, येषां निरोधाय मनो यतते, यतस्तेषां प्रकाशनमशोभनं भवति। इयं विरोधक्रिया 'प्रतिरक्षाक्रिया[४]' कथ्यते। ये भावा मूर्खतापूर्णाः, अनुचिताः, पीडकाश्च भवन्ति तेषामेव विरोधो भवति। परं न ते नश्यन्ति, अपि तु काले प्राप्ते पुनः प्रादुर्भवन्ति। अनेकदा विरुद्धा भावाः कामाश्च चेतनस्तरे प्रकाशनावसरमपि न लभन्ते, ते स्वातन्त्र्येणात्मानं प्रकटयितुमपि न शक्नुवन्ति। आधुनिका मनोविद एतादृशं बन्धकम् 'नियन्त्रक[५]' इति भणन्ति।

---

१. Charcot.

२. Janet.

३. Iceberg.

४. Defence reaction.

५. Censor.

In Public domain. Digitization Muthulakshmi Research Academy

उदात्तीकरणम्

अतृप्तानां निरुद्धानां च कामानां परितुष्टेर्द्वितीयो विधिः 'उदात्तीकरणम्[1]' इति कथ्यते। अशोभनस्य भावस्य स्थानेऽपरः शोभनो भावः प्रतिष्ठीयते। अतृप्तस्य कामस्य स्थाने कश्चिदन्यविषयकस्य कामस्य प्रतिष्ठापनेन पूर्वस्य कामस्य तृप्तिर्जायते। प्रेयस्याः स्थाने राधाकृष्णयोरुपासना, साहित्यकलासङ्गीतादीनां वा साधना पुरस्क्रियते। एवं दान्ताः कामना अभिव्यक्तेः साधनान्तरं प्राप्य तुष्यन्ति। अतृप्तैर्विरुद्धैश्च कामैर्ये रोगाः, विकृतयः, अव्यवस्था वा जायन्ते, तेऽपि दूरीभवन्ति। केचिच्चातृप्त्या निरोधेनासाफल्येन च तथा खिन्ना जायन्ते यथा तद्विस्मरणायानेकानन्यानुपायानाश्रयन्ते। ते मद्यपानादिना संवेगानां तृप्त्यै चेष्टन्ते। एतस्य परिणामस्तु भयङ्करो भवति। 'न जातु कामः कामानामुपभोगेन शाम्यति' इति मनूक्त्यनुसारेण प्रतिदिनं मद्यपानेच्छा वर्धते, तृप्तिर्न लभ्यते। अतिभोगेन सङ्कल्पशक्तिर्दुर्बलतरा जायते। ततो न मनःस्वास्थ्यस्य क्षीणाऽप्याशाऽवशिष्यते।

उपभोगः

आधुनिका मनश्चिकित्सका उदात्तीकरणोपभोगरूपावुभावपि विधी सदोषाविति मन्यन्ते। तेषां मते यदि जनः प्रच्छन्नानां संवेगानामिच्छानां वा प्रकाशने सफलो भवति, तदा स मनःस्वास्थ्यं लभते। यदैव तेषां छद्मवेशो वञ्चकता चाभिज्ञायते, स्वीक्रियते च मनोरोगिणा, तदैव तस्य रुग्णावस्था, सन्तुलितमनोदशा वापसरति। एतदर्थमाधुनिका मनःशास्त्रिणो द्वावुपायावाचरतः। तत्र प्रथमो निर्देशः, द्वितीयश्च विश्लेषणम्। निर्देशो द्विविधः—परनिर्देश आत्मनिर्देशश्च। परनिर्देशे चिकित्सको रोगिणे यन्निर्दिशति तद्रोगी स्वीकरोति, प्रयतते चात्मसात् कर्तुम्। तेन प्रबलेच्छाया अन्यासाञ्च प्रवृत्तीनां सङ्घर्षो विलीयते। एतदर्थं रोगिणा चिकित्सानुविधायिना भाव्यम्।

चिकित्स्य-चिकित्सकसम्बन्धः

प्राक्तनानां भारतीयमनोविदामपि मते गुरुशिष्ययोर्मध्ये पूर्णेन सहयोगेन भाव्यम्। रोगिणः श्रद्धा चिकित्सके, शिष्यस्य च गुरावत्यावश्यकी। तेन शिक्षाग्रहणायोत्सुकेन सश्रद्धेन च भवितव्यम्। दान्तानां कामानामभिव्यक्तिः, उपयोगः, तद्विषयिणी चर्चा वा स्वल्पकालिकीं शान्तिं प्रदातुं शक्ता भवेत्, क्षणाय निराशाया मानसिकसङ्घर्षाद्वा त्राणं प्रदद्यात्; परं नहि सर्वैरप्येतैरुपायैश्चिरन्तनः शम उपलभ्यते, मनो वा स्वास्थ्यं लभते। अतो भारतीयानां मनोविदां मते रोगी शिष्यो वा न केवलं चिकित्सकाय साहमत्यमेव दद्यात्, स उपदेशग्रहणोत्सुकः समर्पणपरोऽपि स्यात्। गुरुणापि स्वस्थमनसा भाव्यम्। तस्यापि व्यक्तित्वं स्वस्थं भवेत्। नहि सर्वोऽपि जनः चिकित्सिको भवितुमर्हति। नह्यशान्तोऽदान्तोऽनिग्रही वा विद्वानपि गुरुर्भवितुं शक्नोति। मनोज्ञानमेवान्येषां मार्गदर्शनाय नालम्, ज्ञानानुसार्याचरणमपि तत्रावश्यकम्। येषां मनस्येकम्, वचस्येकम्, कर्मण्येकं भवति; न तु मनस्यन्यत्, वचस्यन्यत्, कर्मण्यन्यच्च, त एव परान् स्वास्थ्यलाभं कारयितुं शक्ताः। आत्मनिर्देशविषये भारतीयानां पाश्चात्त्यैः सहैकमत्यमेव। तन्मतेऽप्यात्मविश्लेषणेनाऽन्यैः प्रकारैर्वा रोगीदं विज्ञातुं शक्नोति यत्तस्य मानसिकोऽसन्तोषः

---

1. Sublimation.

In Public domain. Digitization Muthulakshmi Research Academy

सङ्घर्षो वा तस्य स्नायविकाव्यवस्थाक्षोभचिन्तावेशानिद्रादीनां रोगाणां कारणम्। स्वयमात्मस्वास्थ्यमलभमान एव स गुरुचिकित्सकनिर्देशकशरणमन्विच्छति। यत्र मनोरोगो विषमावस्थां गतः, तत्र बाह्यसाहाय्यमपेक्ष्यते। सामान्ये रोगे त्वात्मनिर्देश एव रोगापसारणक्षमो भवति।

सम्मोहनविधिः

सम्मोहनं मनोरोगचिकित्साया अन्यो विधिर्यस्यानुसरणं पाश्चात्त्या विदधते। चिकित्सको विश्लेषणविधिमाश्रित्य स्वच्छन्दं भाषितुं रोगिणं प्रोत्साहयति, तज्जीवनवृत्तं सावधानः शृणोति, तद्रहस्यान्यवगन्तुं चेष्टते च। प्रारम्भे मनश्चिकित्सका एतदर्थं सम्मोहनस्य प्रयोगं चक्रुः। परं भारतीया विद्वांसो नैनं विधिं सहन्ते। तन्मते सर्वोऽपि सम्मोहनप्रयोगो हानिकर एव। सम्मोहनवशगो जनः कर्तृत्वशक्तिहीनो निर्णयाक्षमो मनःसन्तुलनविरहितोऽसमञ्जसभागेव भवति। तस्य मनःशक्तिरुत्तरोत्तरं दुर्बला जायते। प्रायेणासन्तोषदायिन्यः परिस्थितयः, दुष्टो निर्णयः, कौटुम्बिकी परवशता, सामाजिक्यो रूढयश्च संवेगानामनास्थाया अस्थानावस्थानस्य वा कारणं भवन्ति। विश्लेषणपद्धत्याऽस्य चिकित्सायां सौकर्यं भवति। तेन जीवनव्यवसाय[1]निर्णयेऽपि साहाय्यं शक्यम्। परं न केवलेन निर्णयेनैव कार्यं साधितं भवति। निर्णयानुकूलव्यवसायप्रबन्धोऽपि तथैवावश्यकः। यस्मिन् समाजेऽन्धविश्वासस्य, रूढपरम्पराणां वाऽभावो भवति, रुच्यनुकूलव्यवसायप्रबन्धश्च, तस्मिन् मनोरोगग्रस्तानां सङ्ख्याऽल्पैव भवति। आत्मनिरीक्षणमपि विश्लेषणप्रकार एव। परनिर्देशापेक्षया आत्मनिरीक्षणं वरीयः। यथा आत्मनिरीक्षणं निर्देशकं भवति, तन्निर्देशाश्च यथा विश्वासपूर्वकमनुष्ठीयन्ते, नहि परनिर्देशास्तथा। अत एव चिन्तनध्यानयोस्तथा महत्त्वं भारतीयैः स्वीकृतम्। आत्मविश्लेषणमन्तःशक्तिं प्रवर्धयति, विचारेषु दृढतामात्मविश्वासञ्चोत्पादयति। अत एव भारतीयाश्चिन्तका आत्मनिरीक्षणं मनोरोगचिकित्सायाः सर्वोत्तमविधिं मन्वते। ते मनसः समग्राय विकासाय स्वास्थ्याय च धर्मानुशासनविधिं समर्थयन्ति। तन्मते न केवलमात्मविश्लेषणम्, [2]जीवनपुनर्निर्माणमप्यावश्यकम्। केचन नियमाः, विशिष्टाचारदृष्टिः, तदनुसार्याचरणप्रयास इत्येतेषां सर्वेषां साहचर्येण जीवनस्य नूतना सङ्घटनैव किञ्चिदुपकर्तुं प्रभवति। ध्यानैकाग्र्यस्याभ्यासोऽधिको हितावहः। आत्मनिरीक्षणेन ध्यानैकाग्रतासहकृतेन, न तु केवलेन रोगज्ञानेन, विशृङ्खलाः संवेगाः स्थानावस्थितिमापद्यन्ते। नहि दीपज्ञानेन तमोऽपनुदति, तथैव न केवलेन रोगकारणज्ञानेन रोगनाशो जायते। भारतीयानां मतमेतस्मिन् विषये फ्रायडरोजरादिमहोदयेभ्यो भिन्नमेव। नहि भारतीयाः केवलेन विश्लेषणेन रोगापनोदं स्वीकुर्वन्ति, नाप्यात्मनिरीक्षणमात्रेण। समग्रस्य मनसश्चारुनिबन्धनाय [3]ध्यानाभ्यासावावश्यकौ। दोषकारणावगमेऽपि नहि संवेगानां प्रशमनं विना दोषापहारस्य संभवः। कारणावगमस्तु साधनान्यतमरूपेणैव व्याख्यातुं शक्यते।

स्वप्नविश्लेषणम्

फ्रायडानुयायिनोऽन्ये चार्वाचीना मनोविदो मनोविकृतिनिदाने स्वप्नानामतिमहत्त्वमिति प्रतिपादयन्ति। तेषां मते दान्ताः कामाः प्रतीकरूपेण स्वप्नद्वारा आत्मनः प्रकटयन्ति।

---

१. Vocation.
२. Reconstruction.
३. Concentration.

In Public domain. Digitization Muthulakshmi Research Academy

प्रतीकानां रहस्यावगमेन तेषां व्याख्यया चाऽन्तर्निगूढाः कामास्तेषां शक्तिश्चापि ज्ञातुं शक्यते। परं प्रतीकव्याख्यायां नार्वाचीनेष्वैकमत्यम्। फ्रायडानुयायिनः सर्वेषां स्वप्नानां मूलं कामातृप्तिम्, अस्तित्वसङ्घर्षं वा मन्यन्ते, एडलरादयश्च स्वस्थापनप्रवृत्तिम्। एकस्यैव स्वप्नस्य व्याख्या भिन्नैर्मनोवैज्ञानिकैर्भिन्ना क्रियते। भारतीया मनःशास्त्रिणो नहि सर्वान् स्वप्नान् गतानुभवभिन्नैर्मनोवैज्ञानिकैर्भिन्ना क्रियते। भारतीया मनःशास्त्रिणो नहि सर्वान् स्वप्नान् गतानुभव-जन्यान् स्वीकुर्वते, नापि कामातृप्तिजन्यान् स्वप्रकाशनातृप्तिजन्यान् वा। नहि ते मनोदमन-सम्बन्धद्वारा तान् व्याख्यातुमुत्सहन्ते। यद्यपि बहवः स्वप्ना गतानुभवप्रेरिता भवन्ति कामेच्छा-पूर्तिजन्या आत्मप्रतिष्ठापनाः शाद्वल्यप्रभवा वा, तथापि नहि स्वप्नानां सम्बन्ध एतैरनिर्वार्यः। स्वप्ना भाविनीनां घटनानामपि सूचका भवन्ति। जनाः स्वप्नेषु धार्मिकान् निर्देशान् प्राप्नुवन्ति, भाविकर्तव्यनिर्धारणसङ्केतं च। नह्येतेषां व्याख्या पूर्वानुभवैः कर्तुं शक्या।

संस्काराः

पाश्चात्या विचारका अचेतनं मनः कामाद्यतृप्तवासनानां संग्रहस्थानं मन्यन्ते। भारतीय-मतानुसारमचेतनं मनः संस्कारनिर्मितं भवति। संस्काराश्च प्राक्तनविचारकार्यानुसारं शुभा अशुभा वा भवितुं शक्नुवन्ति। प्रवृत्तिरूपेण तेऽचेतने मनस्यवतिष्ठन्ते। कदाचित्ते स्मृतिरूपेण प्रबुद्धाश्चेतनमनसः कार्यपथं निर्धारयन्ति। यदि कोऽपि जनोऽनवरतं दुष्टान् शब्दान् शृणोति, दुष्टमशिवं वा विचारयति, दुष्टं चाचरति, तदा तस्य मनो दुष्टसंस्काराकीर्णं भवति। तदा च ते दुष्टसंस्कारा अज्ञातरूपेणैव तस्य विचारान् कार्याणि वा प्रभावयन्ति। एवमेव शुभान् ध्यायमानः, शुभं चाचरन् जनस्तथा शुभसंस्कारान् गृह्णाति, येन तस्य प्रवृत्तिरेव शुभाचरणाय भवति। इच्छन्नपि स नाशुभमाचरितुं प्रभवति।

परिवेशः

परिवेशस्य सङ्गतेश्च प्रभावो मनसि जायते। जुङ्गमहाशयेन जातिप्रभावः सविशदं व्याख्यातः, तन्मते चेतनमचेतनञ्च मनो जातिगताचारव्यवहारैः प्रभावितं भवति। भारतीया विचारका अपि बाह्यप्रभावस्य महत्त्वं स्वीकुर्वन्ति। ते निर्देशकशक्तिगौरवमभिजानन्ति। गतजन्मभ्यः प्राप्तेषु संस्कारेष्वपि तेषां विश्वासो विद्यते। पुनर्जन्मवादिनो हि भारतीयाः। नष्टेऽपि स्थूलशरीरे संस्काराः सूक्ष्मशरीरवति मनसि तिष्ठन्त्येव। प्रतिजन्म समुपार्जिताः संस्कारा बीजे वृक्षाकृतिवद् भाविजन्मकर्मस्वरूपमप्यन्तर्निगूहयन्ति। भारतीयैर्मनोवैज्ञानिकैर्न केवलं स्थूल-शरीरमेवावास आत्मनः स्वीकृतः, तैः कारणशरीरं सूक्ष्मशरीरं वापि स्वीकृतम्। स्थूलं शरीरं स्थूले जगति क्रियाशीलं तिष्ठति। अन्यज्जन्म गृह्णता सह संस्कारा अपि गच्छन्ति। ते च संस्कारा एव प्रवृत्तिमूलम्। तेऽचेतने मनस्यवतिष्ठन्ते। यदा च तृष्णारागादिमुक्त आत्मा ज्ञानेन प्रकाशते, तदा स जन्ममृत्युविनिर्मुक्तो भवति। नवसंस्कारनिर्माणेन प्राक्तनाः संस्काराः परिवर्तन्ते। भारतीयमतानुसारमुचितज्ञानेन तदनुकूलाचरणेन च नवाः संस्कारा विरच्यन्ते। ततश्च मनोरोगाः शाम्यन्ति, जीवनं च सुव्यवस्थितं भवति॥

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चविंशोऽध्यायः

मनोविज्ञानस्येतिहासः

मनोविज्ञानस्य[1] प्रारम्भः

आधुनिकस्य मनोविज्ञानस्याध्ययनात् पूर्वं तस्येतिहासो ज्ञातव्यः, येन तस्य स्वरूपं स्पष्टतरं भवेत्। वर्तमानकाले प्रयुज्यमानस्य 'मनोविज्ञान' इति शब्दस्य स एवार्थो य आङ्गलभाषायां प्रयुज्यमानस्य 'सायकॉलाजी' इति शब्दस्य। 'सायकॉलाजी' इति शब्दस्य ग्रीकभाषायाः 'सायके[2]' 'लोगसे[3]' इति शब्दद्वयान्निष्पत्तिः। तस्य चार्थं आत्मविषयकः सँल्लापः। अतः प्राचीनकाले पाश्चात्त्यदेशेषु सायकॉलाजीति विषये आत्मनः स्वरूप-गत्युत्पत्ति-निलयादिषु विचारः क्रियते स्म। तेनैष विषय आध्यात्मिकदर्शनशास्त्रान्तर्गत इति तात्कालिकानां मतिरासीत्। ते च 'मनन-चिन्तनादिनाऽन्तर्निरीक्षणेन चात्मनः स्वरूपं विज्ञेयम्' इति स्वीकुर्वन्ति स्म। अतो मानव-व्यवहाराध्ययनस्यावश्यकता तस्मिन् काले न जाता।

भारतेऽपि दार्शनिकैरात्मनो मनसो वा विषये विपुलो विचारः कृतः। महान्तो दर्शनग्रन्था आत्ममनोविचारैः पूर्णास्तैर्निर्मिताः। उपनिषद्भ्य आरभ्य वल्लभाचार्यपर्यन्तमात्मतत्त्व-विवेचनायानेकेषां शास्त्राणां रचना जाता। परं भारतीयैर्विचारकैरपि पाश्चात्त्यैरिवात्मतत्त्वज्ञानार्थं चिन्तनमननात्मनिरीक्षणपद्धतिरेव स्वीकृता। गतशताब्द्यां संसारे महान्ति परिवर्तनानि जातानि। तत्र प्रयोगात्मकस्य विज्ञानस्योन्नतिर्विशेषत उल्लेखनीया। श्रद्धाया विश्वासस्य च स्थानं तर्केण गृहीतम्। अनुमानस्य स्थाने परीक्षणप्रयोगादयः प्रतिष्ठिताः। भौतिके जगति परीक्षणमकृत्वा किमपि सत्यं स्वीकर्तुं नोदसहन्त विज्ञाः। अस्य प्रभावोऽस्मिन् विषयेऽपि दृष्टिगोचरो बभूव। मनःशास्त्रस्य[4] स्थाने मनोविज्ञानस्य प्रतिष्ठा जाता। शास्त्रविज्ञानयोरन्तरमन्यत्र प्रतिपादितम्।

ग्रीसदेशीया विचारकाः

विक्रमकालाद् वर्षपञ्चशतीपूर्ववर्तिनो ग्रीसदेशीया दार्शनिका आत्मनः स्वरूपं व्यवहारा-नुभवानां निरीक्षणेन व्याचख्युः। तैः स्थिरीकृताः सिद्धान्ताः साम्प्रतं न स्वीक्रियन्ते मनोविद्भिः,

---

१. Psychology.

२. Psyche.

३. Logos.

४. Mental philosophy.

In Public domain. Digitization Muthulakshmi Research Academy

तथापि तैराश्रिता विश्लेषणात्मिका पद्धतिर्मनोऽध्ययनेऽतीव सहायिका बभूवेति नात्र शङ्कालेशः। तद्विचारैरेव कालक्रमेण मनोदर्शनस्य स्वरूपं प्राप्तम्।

पूर्वं ग्रीसदेशीयाः पण्डिता मनोऽन्तर्ज्योतिरिति स्वीचक्रुः। तत्र सर्वतः पूर्वं प्लेटो-नाम्ना पण्डितेन मनसो विचाराणां चैक्यं प्रतिपादितम्। ततोऽनन्तरमैरिस्टॉटिलनामकेन विदुषा शरीरमनसोरविच्छिन्नता निरूपिता। मनस्तु शरीरव्यापारमात्रमिति तस्य मतम्। यथा यथा तस्य शरीरविज्ञानविषयकं ज्ञानं प्रावर्धत तथा तथा तेनानुभूतं यद् व्यवहारोऽनुभवश्च प्राणिनो व्यापारमात्रम्।

षोडशी शताब्दी

अतोऽनन्तरमष्टशतवर्षाणि यावन्मनोविज्ञानस्य शृङ्खलाबद्ध इतिहासः पाश्चात्त्यदेशेषु नोपलभ्यते। खिस्ताब्दस्य षोडश्यां शताब्द्यां डेकार्टेनामको महान् विचारकोऽस्मिन् विषये स्वमतं प्रकटीकृतवान्। तन्मते प्राणिनां क्रिया द्विविधा—यान्त्रिकी[१], बौद्धिकी[२] च। बौद्धिकी क्रिया यान्त्रिक्याः पूर्णतो भिन्ना। बौद्धिकी क्रिया आत्मनो मनसो वा कार्यम्। आत्मा [३]प्रकृतिश्चेत्यनयो-र्द्वयोरपि परस्परं स्वतन्त्रा सत्ता। तयोः परस्परं प्रभावस्तु भवत्येव। आत्मप्रकृत्योरियं भिन्नत्व-स्वीकृतिः पाश्चात्त्यदेशेषु द्वैतवादसंज्ञामलभत। स्पिनोजानामकस्य[४] विदुषो विचार एतद्विपरीतः। स ह्यात्मनः शरीरस्य चैकत्वं प्रत्यपादयत्। आत्मशरीरे द्वे अपि एकस्यैव तत्त्वस्य द्वे अवस्थे इति तन्मतम्। अयं विचारः 'अद्वैतवादः' इति ख्यातः। लाइब्नेनीजनाम्ना[५] दार्शनिकेन स्वकीयं नवं मतमस्मिन् विषये प्रस्तावितम्। तन्मते शरीरस्य सञ्चालनं शरीरसम्बन्धिभिर्यान्त्रिकैर्नियमैर्भवति, मनसश्च स्वकीयैर्मानसिकैर्नियमैः। अतः शरीरक्रियाणां व्याख्यायै शारीरिका नियमा अन्वेष्टव्याः, मानसिकक्रियाणाञ्च व्याख्यायै मानसिकाः। नहि शरीरात्मनोर्मूलकारणस्यैकत्वं विना तयोः पारस्परिकः प्रभावः शक्यः। इदं मतं 'समानान्तरवादः[६]' इति कथ्यते। अत्रेदमवधार्यं यन्नैतेषु केनापि विचारकेणात्ममनसोर्भेदः परिलक्षितः। सर्वैरप्येभिः पण्डितैरात्ममनसोः पर्याय-वाचित्वमेव स्वीकृतम्।

साहचर्यवादः

खिस्ताब्दस्य सप्तदश्यामष्टादश्यां च शताब्द्यां यूरोपमहाद्वीपे हाब्ज[७]—लॉक[८]—बर्कले[९]—

---

१. Mechanical.
२. Rational.
३. Matter.
४. Spnoza.
५. Leibnitz.
६. Psycho-physical parallelism.
७. Hobbes.
८. Locke.
९. Burkley.

In Public domain. Digitization Muthulakshmi Research Academy

ह्यूम[१]–रीड[२]–वोल्फ[३]–वैन्थम[४]–काण्ट[५]प्रमुखा मनोविचारका अवातरन्। अस्यामेव शताब्द्यामाङ्ग्लदेशे साहचर्यवादस्य प्रचारो जातः। साहचर्यवादो मनसः प्रारम्भिकप्रक्रियाणामनुभवानां तेषां संयोगस्य नियमानाञ्चान्वेषकः। एतन्मते सर्वा अपि मानसिकप्रक्रियाः साहचर्यस्य प्रक्रिया एव। एतन्मते सम्पूर्णमपि मानसिकं जीवनं संवेदना-विचार-प्रतिक्षेप-कर्म-साहचर्यनियमैर्व्याख्यातुं शक्यते। संवेदना ज्ञानस्य प्रारम्भिकं घटकम्। विचाराश्च संवेदनानामस्पष्टाः प्रतिकृतयः। साहचर्यनियमानुसारमनेकैर्विधिभिस्तेषां पौनःपुनिकः संयोगो भवति। तेन च ज्ञाने जटिलतोत्पद्यते। एवमेव प्रतिक्षेपकर्माणि कर्मणां प्रारम्भिकानि घटकानि। साहचर्यनियमैस्तेषां संयोगो जटिलैच्छिककर्मरूपो भवति। नहि साहचर्यवादिनो मनस एकतां चेष्टां च स्वीकुर्वते। तैः सर्वा अपि मानसिकप्रक्रियाः साहचर्यप्रक्रियया व्याख्याताः। एतन्मते स्मृतिरेकस्य विचारस्यान्येन सम्बद्धता। यदा कस्याप्यनुभवे द्वे मानसिकप्रक्रिये साहचर्यनियमेन संयुज्येते, तयोरेका च सक्रिया भवति, तदा सा साहचर्येणान्यामपि प्रबोधयति। नह्यन्यस्यै नवोत्तेजनाऽपेक्ष्यते।

शक्तिवादः

मनोविज्ञाने शक्तिसिद्धान्तस्य[६] प्रवर्तनमस्मिन्नेव काले जातम्। अस्य प्रवर्तको वोल्फमहाशयो बभूव। एतन्मतानुसारमात्मनो विविधाः परस्परं पृथक् शक्तयः सन्ति। आत्मा चैकस्मिन् काले एकस्याः शक्तेर्यथेच्छमुपयोगं करोति। इच्छा-स्मरण-तर्कणादिशक्तयो ह्यात्मनः। आत्मा त्वेकोऽखण्डः। एकोनविंशतितमायाः शताब्द्या अन्ते साहचर्यवादस्य विरोधो जातः। अस्य विरोधिनामग्रणीर्जेम्सवार्डमहोदय आसीत्। स मानवीयानुभवव्यवहाराणामेकतायाः समर्थक आसीत्। स एवात्ममनोविज्ञानस्य[७] प्रथमः प्रतिपादकोऽपि बभूव। साहचर्यवादिनो यन्त्रवादिनोऽप्रयोजनवादिनश्चासन्। प्रयोजनवादिना मैकड्गलमहोदयेनापि तस्य विरोधः कृतः।

मानसिकरसायनम्

जे० एस० मिलमहोदयो मानसिकरसायनस्य प्रतिपादकोऽप्यस्मिन् काले बभूव। तेनोक्तम्—"यदा मनस्यनेके संस्कारा विचारा वा सहैव क्रियाशीला भवन्ति, तदाऽनेकदा रासायनिकसंयोग इव काचित् क्रिया भवति। यदा संस्काराणामनुभवस्तया सहैव वारं वारं भवति,

---

१. Hume,

२. Reid.

३. Wolff.

४. Benthem.

५. Kant.

६. Faculty psychology.

७. Self psychology.

In Public domain. Digitization Muthulakshmi Research Academy

येन ते सर्वे पृथक् पृथक् सम्पूर्णस्य समूहस्य विचारान् जागरयन्ति, तदा ते विचारा अनेकदा द्रवीभूता इव परस्परं संयुक्ता जायन्ते, समष्टिरूपे एकीभूता एके इव प्रतीयन्ते। सरला विचारा जटिलान् उत्पादयन्ति, न ते तेषां समूहाः" इति।

रचनावादः[1]

रचनावादश्चेतनाया रचनाया विश्लेषणं करोति पृथक् तत्त्वेषु, घटकेषु वा। स तेषां तत्त्वानां संयोगेन निर्मिते जटिले चेतनाप्रवाहे तेषां पारस्परिकसम्बन्धं विश्लिष्याधीते। सोऽन्तर्दर्शनं विशेषज्ञैरेकमात्रमध्ययनविधिं मन्यते। एतदनुसारं चेतनाप्रवाहस्य, तद्घटकानां परमाणूनां वा विश्लेषणम्, तत्संयोगविषयकाणां नियमानामन्वेषणञ्चैव मनोविज्ञानस्योद्देशः। साहचर्यवादो मानसिकरसायनवादश्च रचनावादस्यैव रूपाणि।

सत्तावादः

अस्या एव खिस्तशताब्द्याः प्रारम्भे [2]वुण्ड्टमैकमहोदयेनावेनेरियसमहोदयेन[3] च मनोविज्ञानस्याध्ययने प्रयोगात्मिकायाः पद्धत्याः समावेशो विहितः। अस्मिन् काले ज्ञानक्षेत्रेषु प्रयोगात्मिकायाः पद्धतेर्महान् प्रचारो जातः; तया च वैज्ञानिकानां तथ्यानां निरूपणं प्रारब्धम्। शरीरविज्ञानं भौतिकविज्ञानं चाति समृद्धमभवत्। जर्मनीयो मनोवैज्ञानिको वुण्ड्टमहोदयोऽनेनाकृष्टो मनोवैज्ञानिकानुसन्धानशालां स्थापितवान्। तेन दीक्षिता अनेकदेशीया विद्वांसस्तस्मात् प्रयोगविधिमम्यस्य स्वदेशेषु प्रयोगशालाः स्थापितवन्तः। एवं वुण्ड्टमहोदयः प्रयोगात्मकमनोविज्ञानस्य[4] प्रवर्तको बभूव। वुण्ड्टशिष्यष्टिचनरमहोदयः सत्तावादस्य[5] प्रवर्तको जातः। सत्तावादिनां मते मनोविज्ञाने मानवस्यानुभवकर्तृरूपेण कार्यकर्तृरूपेण चाध्ययनं कर्तव्यम्। तदर्थमनुभवानां विश्लेषणम्, तेषां तुलना, वर्गीकरणम्, समष्टौ[6] च तेषां [7]व्यवस्थापनमावश्यकम्। कार्याणां महत्त्वं स्वीकृत्याऽपि सत्तावादिनोऽनुभवानां वर्णने एवावधानं कुर्वन्ति, कार्याणामध्ययनं चान्यार्थं त्यजन्ति।

अस्मिन्नेव काले आङ्ग्लदेशे गाल्टनमहोदयो डार्विनमहाशयानां विकासवादस्याध्ययनेन सह व्यक्तीनां पारस्परिकभेदसम्बन्धिनो[8] मनोविज्ञानस्याध्ययने सँल्लग्नो बभूव। तेन चाङ्कवैज्ञानिक-[9]विधिभिर्व्यक्तीनामन्तरस्याध्ययनं कृतम्। गाल्टनमहोदयेन, एविङ्गासमहोदयेन च स्मृतिविषयेऽपि महत्त्वपूर्णमनुसन्धानं कृतम्।

---

१. Structuralism.
२. Wundt.
३. Avenarius.
४. Experimental psychology.
५. Existentialism.
६. System.
७. Arrangement.
८. Psychology of individual differences.
९. Statistical.

In Public domain. Digitization Muthulakshmi Research Academy

कार्यवादः[1]

अमेरिकादेशे विलियमजेम्समहाशयः कार्यवादिमनोविज्ञानस्य जनकोऽभवत्। सोऽपि वुण्ड्ट्तुल्य एव प्रतिभावानासीत्। तस्य च प्रभावो मनोविज्ञानस्य सर्वेष्वप्यङ्गेषु जातः। साम्प्रतमत्युन्नते समृद्धे चापि मनोविज्ञाने तस्य ग्रन्था मनोविज्ञानपण्डितानां मार्गदर्शकाः। तस्य सिद्धान्तः 'कार्यवादः' इति निगद्यते। रचनावादस्य लक्ष्यं चेतनाया रचनाया वर्णनं विश्लेषणञ्च। कार्यवादस्य लक्ष्यं व्यक्तीनां जीवने विविधानां चेतनानां कार्यस्यान्वेषणम्। कार्यवादी मानवजीवने संवेदना-प्रत्यक्ष-स्मृति-कल्पना-तर्क-संवेग-सङ्कल्पादीनां कार्याणामन्वेषणं करोति। 'प्राणिनां परिवेशेन वर्धमाने समायोजने मानसिकप्रतिक्रियाणां को योगः?' इति तस्य विचारविषयः। स विकासवादानुयायी। 'प्राणिनामावश्यकतानां पूर्तये जटिलमानसिकप्रक्रियाणामुदयो जातः। आवश्यकतानाञ्च जन्म प्राणिनस्तस्य जटिलेन परिवेशेन सफलसमायोजनाय बभूव' इति कार्यवादिनो मन्यन्ते। तेषां मते मनोविज्ञानं [2]जीवविज्ञानस्यैवाङ्गम्। ड्यूई-ऐञ्जिलादयः कार्यवादस्य समर्थकाः।

पावलोवप्रयोगः

अस्या एव खिस्तशताब्द्याः प्रारम्भकाले पावलोवनाम्ना रूसदेशीयेन शरीरवैज्ञानिकेन नियन्त्रितीकरणस्य[3] नियम आविष्कृतः। सारमेये प्रयोगं कृत्वा तेन नियन्त्रितप्रतिक्रियाया[4] ज्ञानं प्राप्तम्। एवञ्च मानसिकक्रियाणां भौतिकाधारान्वेषणविषयकेन तस्य प्रयत्नेन मनोविज्ञाने महती क्रान्तिर्जनिता।

व्यवहारवादः[5]

पावलोवस्य नवेन सिद्धान्तेन, डार्विनमहोदयस्य विकासवादेन च प्रोत्साहितो वाट्सन-(Watson)महाशयो मनोविज्ञानान्मनसः, चेतनाया वा वहिष्कारस्य प्रयत्नमारेभे। एतावन्तं कालं चेतनाया अध्ययनं[6] मनोविज्ञानस्य विषय इति पण्डिता मन्यन्ते स्म। अस्याध्ययनस्य प्रमुखो विधिरन्तर्निरीक्षणमासीत्। वाट्सनमहोदयेनास्या विरोधः कृतः। मनोविज्ञानस्य प्रमुखोऽध्ययनविषयो मानवव्यवहारस्याध्ययनम्। यतोऽस्माकं प्राणिनो व्यवहारेणैव प्रयोजनम्। अतश्चेतनायाः स्वरूपं किम्, कति च तस्या अङ्गानीति विचारस्य मनोविज्ञाने नावश्यकता। व्यवहाराध्ययनार्थं वस्तुनिष्ठो[7] विधिराश्रयणीयः, न त्वात्मदर्शनरूपः। व्यवहाराध्ययनस्य प्रामुख्येनायं 'व्यवहारवादः' इति संज्ञां लेभे। व्यवहारवादिनो मनोविज्ञानं विशुद्धजीवविज्ञानं मन्यन्ते,

---

१. Functionalism.

२. Biology.

३. Conditioning.

४. Conditioned Reflex.

५. Behaviourism.

६. Study of Consciousness.

७. Objective.

In Public domain. Digitization Muthulakshmi Research Academy

न त्वनुभवविज्ञानम्। तन्मतेऽन्तर्निरीक्षणं भ्रामको विधिः। पदार्थरसायनादीनामन्यविज्ञानानामिव मनोविज्ञानस्यापि विधिर्निरीक्षणं प्रयोगश्चैव। इदमुत्तेजना[1]प्रतिक्रिययोर्विज्ञानम्। ज्ञानेन्द्रियाण्युत्तेजनाः परिगृह्णन्ति। अतस्तान्यादातॄण्यङ्गानि कथ्यन्ते। उत्तेजनानां प्रतिक्रियारूपेण मांसपेश्यः कार्यं सम्पादयन्ति। तेन तानि कार्यकारीण्यङ्गानि निगद्यन्ते।

वाट्सनमहोदयः संवेदनानां सत्तां न स्वीकरोति। स संवेदनार्थे प्रतिक्रियाशब्दं प्रयुनक्ति, यथा—घ्राणप्रतिक्रिया। स प्रत्यक्षीकरणस्मृत्यादीनामप्युल्लेखं न करोति; यतो गत्यात्मकव्यवहाररूपेण तेषां व्याख्या कठिना। तन्मते संवेगा वंशक्रमागताः प्रतिक्रियाः, यासु समग्रे शरीरे आभ्यन्तरिकाणि परिवर्तनानि जायन्ते। प्रतिक्षेपक्रियाकर्मणः सरलतमं प्ररूपम्। मूलप्रवृत्त्यात्मकं कर्म च शृङ्खलामयानां प्रतिक्षेपाणां समष्टिः। स परिवेशवादी[2], परिवेशेन मानवः पूर्णतया शासितो भवतीति मन्यते। स शिक्षणस्य व्याख्यामभ्यासोपयोगानुपयोगवारंवारितानवीनतादिनियमैः करोति, प्रभावनियमञ्च न स्वीकरोति। तन्मते सर्वमपि शिक्षणं प्रयत्नच्युतिविधिना[3] भवति।

व्यवहारवादस्योपविकारवादे दृढा आस्थाऽस्ति। स मस्तिष्कं मनस उपविकारं मन्यते। व्यवहारवादिभिर्मनोविज्ञानस्याध्ययने व्यवहाराध्ययनस्य महत्त्वं प्रतिपादितम्। परं ते यन्त्रवादिनो नियतिवादिनश्च[4]।

प्रयोजनवादः[5]

वाट्सनमहोदयस्य समकालिकोऽन्यो मनोवैज्ञानिको मैकडूगलमहोदयो बभूव। तेन प्रतिपादितं यन्मनसाऽन्तःकरणेन वा विना न कोऽपि मानवीयो व्यवहारः सम्भवति। अतो व्यवहारस्याध्ययनाय मनसोऽध्ययनमावश्यकम्। यथा सत्तावादः संवेदनां मनोविज्ञानस्याधारभूतं तथ्यं मन्यते, व्यवहारवादश्च शारीरिकीं गतिम्, तथैव प्रयोजनवादः सप्रयोजनतां सहेतुकतां वा कार्याणाम्। मैकडूगलमते मनुष्याणामैच्छिकानि, मूलप्रवृत्त्यात्मकानि च कर्माणि सप्रयोजनानि तु भवन्त्येव, पशूनामपि सर्वाणि कर्माणि प्रयोजनवन्ति भवन्ति। इमं मूलप्रवृत्तीनां [6]सिद्धान्तमपि निगदन्ति कोविदाः।

सुखवादः[7]

अयं सिद्धान्तः सर्वासामपि चेष्टानां लक्ष्यं सुखं मन्यते। अस्माकं सर्वे प्रयत्नाः पूर्वतो ज्ञातस्य सुखस्य प्राप्तये दुःखस्य चापनोदाय भवन्ति। प्रयोजनवादिनां सुखवादे न विश्वासः।

---

१. Stimulus-response.
२. Environmentalist.
३. Trial and Error.
४. Determinist.
५. Hormic Psychology.
६. Theory of Instincts.
७. Hedonistic Psychology.

In Public domain. Digitization Muthulakshmi Research Academy

नहि भोजनादीनामिच्छा सुखसाधनानीमानीति क्रियते। वस्तुतस्त्वस्माकं रचनैव[१] तथाविधा, यया वयमिमानि वस्तून्यभिलषामः। वयमिमानि वस्तूनि शुभानि[२] वाञ्छनीयानि च मत्वेप्सामः, प्राप्तुञ्च प्रयतामहे।

प्रयोजनवादो व्यवहारवादविरुद्धः। प्राणिनां क्रियासु लक्ष्यज्ञानं तत्प्राप्तेश्च चेष्टा निहिता भवति। लक्ष्योन्मुखतायै[३] प्रेरकं[४] कर्मणः स्रोतो वा आवश्यकं भवति। मूलप्रवृत्तयश्च मुख्याः प्रेरिका भवन्ति। प्रयोजनवादिनः साहचर्यवादस्य मनोवैज्ञानिकपरमाणुवादस्य वापि विरोधिनः। तेषां मनस एकतायां [५]स्वतःक्रियायां चादम्यो विश्वासः। तैन्मते मनोऽनुभवस्य व्यवहारस्य च द्रष्टृ। तन्मते कर्मणः प्रेरणा प्रधाना, ज्ञानव्यापारस्तु ततो गौणः।

आकृतिवादः[६]

मनोविज्ञानस्याधुनिके स्वरूपे वर्थीमर(Wertheimer)-कायलर(Kohler)-कोफका-(Koffka)दिप्रमुखानां पण्डितानां प्रतिदानमतिमहत्त्वपूर्णम्। प्रत्यक्षीकरणे विषयेऽनेन विद्वत्त्रयेण निश्चिताः सिद्धान्ता अपि प्रतिष्ठां भेजिरे। एषां सिद्धान्ता गेस्टाल्टवादनाम्ना प्रसिद्धाः सन्ति। गेस्टाल्टवादस्योदय बुण्ड्टमहोदयस्य विश्लेषणात्मकमनोविज्ञानविरोधे जातः। अनुभवो यौगिकानां श्लिष्टानां[७] वा भवति, न तु [८]तत्त्वस्येति बुण्ड्टमहोदयेन प्रतिपादितमासीत्। तन्मते तु सर्वोऽप्यनुभवो जटिल एव। अतोऽनुभवस्याध्ययनाय प्रथमं जटिलप्रक्रियागां तत्त्वेषु विश्लेषणं कर्तव्यम्, ततश्च तत्त्वानां जटिलतामूलका नियमा अन्वेष्टव्याः। गेस्टाल्टवादिनां मते सर्वोऽप्यनुभवो व्यवहारो वा काचिदपूर्वा समष्टिः, यस्या विश्लेषणं तत्त्वेष्ववयवेषु वाऽशक्यम्। 'गेस्टाल्ट'शब्दस्यार्थ आकृतिः, रूपम्, समष्टिर्वा। नहि मनोविज्ञानस्य लक्ष्यं जटिलानामनुभवानां कर्मणां वा तत्त्वेष्ववयवेषु वा विश्लेषणम्। विश्लेषणमनुभवस्य कर्मणो वा प्रकृतिमेव दूषयति। मनोविज्ञानेऽनुभवानां कर्मणां च तेषां समष्टिरूपाणामेवाध्ययनं कार्यम्।

आकृतिवादिनां मते मनुष्यस्य पशोर्वा शरीरमपि समष्टिरूपमेव, न त्ववयवानां समूहः। शरीरस्य सर्वेऽपि भागाः परस्परं सम्बद्धाः, न तु पृथक् पृथक् तेषामध्ययनं कर्तव्यम्। समष्टिरूपमेव शरीरं कार्यक्षमम्। एवं व्यवहारा अपि न प्रतिक्षेपकर्मणां समुच्चयाः। मस्तिष्कमपि समष्टिरूप एव कार्यकारि। शेरिङ्गटनमहाशयेन साधितं यत् स्नायुतन्त्रसमष्टिरूप एव कार्यं करोति, न तु स्नायवः पृथक् पृथक्। लैशलीमहाशयेन मस्तिष्कं शिक्षणे समग्रतयैव क्रियापरं

१. Constitution.

२. Intrinsically good and desirable.

३. Good seeking.

४. Motives.

५. Spontaneously.

६. Gestalt Psychology.

७. Compound.

८. Element.

In Public domain. Digitization Muthulakshmi Research Academy

भवति, न तु तस्याङ्गानि पृथक् पृथगिति निरूपितम्। एषां मतं यत् पञ्चुरपि न सरलानि कर्माणि परस्परं संयोज्य सरलासंयुक्तगतिभिर्जटिलसंयुक्तगतीरुपगच्छति। प्रारम्भादेव तेषां गतयः समग्रस्य शरीरस्य समष्टिरूपा गतयो भवन्ति। वयं सर्वमपि वस्तुजातं समष्टिरूपमेव पश्यामः, न तु किञ्चिदपि वस्त्ववयवरूपेषु। प्रत्यक्षविषयः समष्टिरेव भवति, न तु व्यक्तिः। तैः प्रत्यक्षीकरण आकृतेराधारस्य च नियमः पुरस्कृतः। प्रत्यक्षीकरणेऽन्तर्दृष्टेर्नियमो गेस्टाल्टवादिभिरेव स्थापितः।

बुद्धिपरीक्षा[1]

आधुनिकस्य मनोविज्ञानस्यातिमहत्त्वपूर्णा शाखाऽन्तर्मनोविज्ञानम्। अस्मिन् मानवीययोग्यताया अन्वेषणाय प्रयत्नः क्रियते। बुद्धिपरीक्षासाधनान्यपि मनोवैज्ञानिकैर्ज्ञातानि। अल्फ्रेडविनेमहोदयस्य[2] नामास्मिन् प्रसङ्गे मुख्यत उल्लेख्यम्, येन सर्वप्रथमं बुद्धिपरीक्षापद्धतिराविष्कृता। तदनन्तरं स्पियरमैनमहाशयेन, थर्संडरमहोदयेनापि बहु संशोधनं कृतमत्र।

अचेतनमनोवादः

अस्यामेव शताब्द्यां फ्रांसदेशीयेन सिगमण्डफ्रायडमहोदयेन मनोविज्ञानस्य वैज्ञानिककार्यकारणशृङ्खलायामचेतनस्य मनसः समावेशं कृत्वा चिन्तनस्य नवं द्वारमुद्घाटितम्। बीजगणिते ऋणात्मकानामङ्कानां यन्मूल्यं तदेव मनोविज्ञानेऽचेतनमनस आविष्कारस्य। स 'मनः सक्रियम्' इति निरूपयति। मनसः कार्यं चेष्टात्मकम्, आभोगात्मकं वा, न तु ज्ञानात्मकम्। मनसो द्वौ स्तरौ—चेतनः, अचेतनश्च। "मनः संवेदनाप्रत्यक्षविचारादिबौद्धिकप्रक्रियाणां समष्टिर्नास्ति। नहि तद्विचारसंवेदनादिधर्मयुक्त आध्यात्मिकः पदार्थः। तत्तु गम्भीरतरङ्गितसागर इव। तस्य रहस्यानि चेतनातर्कयोः शान्ते स्तरे नावगम्यन्ते। तानि तु आन्तरिकेऽचेतनेऽबुद्धिगम्ये गम्भीरतलेऽधिगम्यन्ते" इति फ्रायडोक्तिः। फ्रायडमहोदयो मनसश्चेतनम्, पूर्वचेतनम्, अचेतनञ्चेति त्रीन् स्तरान् स्वीकरोति। एतद्विषयेऽन्यत्र विस्तरशश्चर्चा कृतैव।

साम्प्रतिकी स्थितिः

साम्प्रतं मनोविज्ञानस्य प्रवेशो जीवनस्य सर्वेषु क्षेत्रेषु जातः। अस्योद्देश्यं प्राणिनः सामाजिके वैयक्तिके च जीवने विद्यमानं द्वन्द्वमवगम्य तस्योन्नत्यै सुखाय चोचितानां दशानां व्यवस्थाऽस्ति। अमेरिकादेशे वाट्सनमहोदयप्रभावेण क्रियात्मकमनोविज्ञानस्याति प्रचारो जातः। अस्मिन् विषये प्रतिदिनं नवनवाः प्रयोगाः क्रियमाणाः सन्ति। आशास्यते च यद्विदुषां प्रयत्नैरनेकानि नवानि रहस्यान्युद्घाटितानि भविष्यन्ति॥

॥ इति शम्॥

---

१. Intelligence teste.

२. Alfred binet.

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम्–१

आङ्ग्ल-संस्कृतशब्दानुक्रमणी

Abnormal Psychology	विकृत-मनो-विज्ञानम्
Aboriginals	वनवासिनः, आदिवासिनः
Abstraction	प्रत्याहारशक्तिः
Achievement test	उपलब्धिपरीक्षा
Actual	वर्तमाना
Acids	क्षाराः
Acquired	अर्जितम्
Active seeking	सक्रियमन्वेषणम्
Adaptation	समायोजनम्
Adjustment	समायोजनम्
Adrenal glands	उपवृक्क्य ग्रन्थयः
Adrenin	औपवृक्किः
Aesthetics	सौन्दर्यशास्त्रम्
Affection	चेष्टा
Affective Intermediary	मध्यस्था वेदना
Afferent	अन्तर्गामी
Afferent Neurones	नाडीतन्तवः
After image	पश्चात्प्रतिमा
Allegorical	रूपकमया, रूपकप्रधाना
Alternative	विकल्पः
Altruistic	परार्थी
Ambiguous	द्व्यर्थकाः
Ambivert	उभयमुखवृत्तिकः
Amoeba	अमीवा
Amplitude	वैपुल्यम्
Amusement	विनोदः
Analytical	विश्लेषात्मकम्
Anatomy	रोगविज्ञानम्

In Public domain. Digitization Muthulakshmi Research Academy

Anemone	एनोमीनः
Anger	क्रोधः
Animal Psychology	पशुमनोविज्ञानम्
Anterior Petuitory	अग्रपोषः
Appeal	शरणागतिः
Appendicitis	आन्त्रपुच्छम्
Appetite	बुभुक्षा, क्षुधा
Appreciable difference	संवेद्यमन्तरम्
Apprehension	उपलब्धिः
Aptitude	प्रवणता
Aqueous humour	नेत्ररसः
Aquirement of meaning	अर्थोपलब्धिः
Area	क्षेत्रम्
Arithmatical Progression	समानान्तरवृद्धिः
Arrangement	व्यवस्थापनम्
Artistic	कलात्मिका
Assertion	आत्मगौरवम्
Association Areas	साहचर्यक्षेत्राणि
Association of ideas	विचारसाहचर्यम्
Associative memory	सहचारी स्मृतिः
Association Neurone	साहचर्यकोशाः, अनुबन्धकोशाः
Assumption	मतम्
Atroply Theory	क्षयसिद्धान्तः
Attention	अवधानम् , ध्यानम्
Attitude	अभिवृत्तिः
Attitude of being attentive	अवधानमुद्रा
Attributes	धर्माः
Auditory Area	श्रवणाधिष्ठानम्
Auditory sensation	श्रवणसंवेदना
Autistic thinking	स्वयंपर्याप्ता विचाराः
Automatic acts	स्वतःस्फूर्ताः क्रियाः
Automatic Actions	स्वतश्चालिताः क्रियाः
Automatic nervous system	स्वतन्त्रं स्नायुसंस्थानम्
Axis Cylinder	अक्षरम्भः

In Public domain. Digitization Muthulakshmi Research Academy

Balance	समतोलः
Basilarmembrane	आधारकला
Behaviour	व्यवहारः
Behaviourism	व्यवहारवादः
Bias	पक्षपातः
Biology	जैविकं विज्ञानम्
Birthorder	जन्मक्रमः
Binocular	द्विनेत्रविषयकम्
Biting	दंशनम्
Blueprints	रेखाकृतिः
Boarder line	निर्बलबुद्धिः
Bodily stage	शारीरिकी भूमिका
Bodily Tissues	शरीरतन्तवः
Book Keeper	पुस्तपालः
Border line level	प्रान्तस्तरे, सीमस्थाने
Brain	मस्तिष्कः
Bright	तीव्रबुद्धिः
Bulb	सेतुः
Capacity	योग्यता
Carnial nerves	कपालस्नायवः
Carnial Division	शीर्षविभागः
Cartoon	व्यङ्ग्यचित्रम्
Case History Method	जीवनवृत्तसंघटनाविधिः
Catharsis	रेचनम्
Call	कोशाः
Censor	प्रतिरोधकम्, नियन्त्रकम्
Central Fissure	दरीस्थानम्, मध्यदरी
Cerebrospinal Axis	मस्तिष्कसुषम्नाक्षः
Cerebellum	लघुमस्तिष्कः
Cerebrum	बृहन्मस्तिष्कः
Cerebrial nerves	मस्तिष्कस्नायवः
Character	चरित्रम्
Characteristic	वैशिष्ट्यम्
Characteristics	स्वभावगुणाः

In Public domain. Digitization Muthulakshmi Research Academy

Child Psychology	बालमनोविज्ञानम्
Choleric	तामसिकः
Choroid	मध्यं पटलम्
Chromosomes	पित्र्यसूत्राणि
Chronological age	कालकृतमायुः
Circumference	व्यासः
Circumspection	परिदर्शनम्
Classification	वर्गीकरणम्
Coats	पटलानि
Coarse emotions	परुषाः संवेगाः
Cochlea	कोकला
Cognition	ज्ञानम्
Collector	संग्राहकम्
Colour Contrast	वर्णविरोधः
Cold Spots	शीतस्थानानि
Collective uncousciousness	सामूहिकमचेतनम्
Coma	मूर्च्छा
Combination of Concepts	प्रत्ययसमष्टिः
Combat	युयुत्सा
Comic	उपहास्यः
Compensation	क्षतिपूर्तिः
Comparative method	तुलनात्मको विधिः
Comparative Psychology	तुलनात्मकं मनोविज्ञानम्
Compositian	रचना
Compound Reflex Theory	मिश्रप्रतिक्षेपसिद्धान्तः
Compound	मिश्रम्
Common Characteristics	सामान्यप्रवृत्तयः
Complication	जटिलीकरणम्
Complementary	अनुपूरकम्
Complexity	जटिलता
Conation	चेष्टा
Concentration	ध्यानैकाग्र्यम्
Concepts	प्रत्ययाः
Conceptual System	प्रत्ययतन्त्रम्

In Public domain. Digitization Muthulakshmi Research Academy

Concrete	मूर्तम्
Condition	परिस्थितिः, हेतुः
Conditional Response	नियन्त्रिता प्रतिक्रिया
Conditional Reflex	नियन्त्रितोत्क्षेपक्रिया
Conditioning	नियन्त्रणम्
Conduct	आचरणम्
Conductivity	संवाहिता
Cones	शङ्कवः
Conical Papillac	शङ्क्वाकाराः अङ्कुराः
Constitution	संरचना, संविधानम्
Consciousness	चेतना
Consonance	समस्वरता, संध्वनिः
Construction	रचना
Constituents	घटकाः
Consolidation	दृढीकरणम्
Contemplation	चिन्तनम्
Continuity	अविच्छिन्नता
Continuity of germ plasm	कीटाणूनामबाधता
Convergence	संसरणम्
Co-ordinating centres	समन्वयकारकाः केन्द्राः
Cortex	त्वक्षः, त्वांक्षिः
Correspondence	परिसंवादः
Cornea	कनीनिका
Creative	सर्जनात्मिका
Creativeness	स्रष्टृत्वम्
Curiosity	जिज्ञासा
Curve line	वक्ररेखा
Data	सामग्री
Dead lock	अवरोधः
Defence reaction	प्रतिरक्षाक्रिया
Delusion	भ्रान्तिः
Delusion of grandeur	श्रेष्ठत्वभ्रान्तिः
Delusion of persecution	पीडनभ्रान्तिः
Delusion of reference	सङ्केतभ्रान्तिः

In Public domain. Digitization Muthulakshmi Research Academy

Dependent Veriable	आश्रितपरिवर्त्यम्
Depressed	खिन्नः, उपासीनः
Derivation	विचलनम्
Duration of attention	ध्यानावधिः, अवधानावधिः
Derived	व्युत्पन्नम्
Derived attention	अजितमवधानम्
Dermis	निचयः
Desire	इच्छा
Determinist	प्रयोजनवादी
Diagrams	शब्दप्रतीकाः
Difference threshold	समानान्तरः
Differenciation	भिन्नीकरणम्
Dimension	विमाः
Discord	विस्वरता
Disgust	अरुचिः
Disposition	प्रवृत्तिः
Distraction	विक्षेपः
Distribution	वितरणम्
Double personality	द्विधा व्यक्तित्वम्
Ductless glands	प्रणालीविहीनग्रन्थयः
Dull	निर्बुद्धिः
Dynemical	प्रवैगिकः
Dynamical unity	सक्रिया एकता
Education	शिक्षाशास्त्रम्
Effection	कार्यकारी
Efferent	बहिर्गामी
Egoaltruistic	स्वार्थपरार्थी
Egoistic	स्वार्थी
Elaborate Symbols	विशदाः प्रतीकाः
Elated	प्रफुल्लाः
Elation	अभिमानः
Electric Resistance	वैद्युतिकनिरोधशक्तिः
Elementary Genetic factors	पित्र्यैककम्
Emotion	संवेगः

In Public domain. Digitization Muthulakshmi Research Academy

Emotionality	संवेगशीलता
Emotional Disturbance	मनोवेगानामनवस्थितिः
Empathy	समानुभूतिः
Empirical self	अनुभवमूलकोऽहंभावः
Encephalitis	मस्तिष्ककोषः
Encephalan	मस्तिष्कः
Environment	वातावरणम् , परिवेशः
Environmentalist	परिवेशवादी
Epidermis	अधिचर्म
Equilibrium	सन्तुलनम्
Ether	व्योम
Ether waves	व्योमतरङ्गाः
Ethics	नीतिशास्त्रम्
Exclusive	व्यावर्तकम्
Excitement	उद्दीप्तिः
Existantialism	सत्तावादः
Experience	अनुभवः
Experiment	परीक्षणम् , प्रयोगः
Experemental Psychology	प्रयोगात्मकं मनोविज्ञानम्
External auricle	बाह्यं श्रोत्रम्
Externality	बाह्यं परिमाणम्
External reality	बाह्यं जगत्
Extreme type	चरमं प्ररूपम्
Extroceptor	बाह्यादातृ, अङ्गम्
Extrovert	बहिर्मुखवृत्तिः
Eyeball	अक्षिगोलकम्
Factors	तत्त्वानि
Faculty	शक्तिः
Fantastic	विक्षोभमयी, मनःसृष्टिमयी
Fat	वसा
Fear	भयम्
Feeling	वेदना
Feeling of tone	वेदनांशः
Feeling of loneliness	एकाकित्वम्

In Public domain. Digitization Muthulakshmi Research Academy

Fibres	तन्तवः
Field of view	दृश्यवस्तुक्षेत्रम्
Figures and Grounds	प्रकृतिराधारश्च
Flight	पलायनम्
Focus of consciousness	चेतनाकेन्द्रः
Folk Psychology	लोकमनोविज्ञानम्
Food seeking	भोजनान्वेषणम्
Forcefulness	दृढता
Foresight	अग्रदृष्टिः
Formal	निदेशात्मकम्
Facts	तत्त्वानि
Fronted labe	अग्रखण्डम्
Fruity smell	पक्षुगन्धः
Fundamental mode	मूलप्रकाराः
Functionalism	कार्यमापः
Gastalt Psychology	आकृतिवादः
Gastric juice	जठररसः
Generalisation	साधारणीकरणम्
Generic difference	जातिमूला भिन्नता
Genetic	पित्र्यैककम्
Genetic mothod	विकासविधिः
Genius	प्रतिभाशाली
Geometrical Progrecia	गुणोत्तरवृद्धिः
Gesturing	हावभावाः
Glands	ग्रन्थयः
Glandular	ग्रन्थिकी
Glandular reaction	ग्रन्थिस्रावः
Goal seeking	लक्ष्योन्मुखता
Goal set	लक्ष्यतत्परता
Gonods glands	प्रजननग्रन्थयः
Graphic rating scale	रेखीयो मानदण्डः
Ground tone	मूलस्वरः
Gustering area	रसनाधिष्ठानम्
Habitual action	अभ्यासजनितं कर्म

In Public domain. Digitization Muthulakshmi Research Academy

Hallucination	विभ्रमः
Hand washing mania	हस्तेन हस्तोपमर्दनम्
Harmony	समस्वरता, संध्वनिः
Hadomistic Psychology	प्रयोजनवादः
Heridity	वंशानुक्रमः
Hermones	न्यासर्ग्राः
Hesitancy	अनिश्चयावस्था
Height of sensibility	संवेदनाया ऊर्ध्वसीमा
Hit manipulation	घातात्पातप्रहस्तनम्
Hind sight	प्रतीपदृष्टिः
Hoarding	संग्रहवृत्तिः
Hormic Psychology	प्रयोजनवादः
Hypnosis	सम्मोहनविधा
Hypnotic sleep	सम्मोहजनिद्रा
Hypothesis	परिकल्पना
Hysteria	उन्मादः
Idea motor action	विचारप्रेरितं कर्म
Ideation	प्रत्ययनम्
Ideational attention	अन्तरमवधानम्
Identification	एकात्मीकरणम्
Idiot	जडः
Illusion	भ्रमः
Imagination	कल्पना
Imbical	मूढः
Immediate attention	अव्यवहितमवधानम्
Impersonal	निर्वैयक्तिकम्
Impressions	संस्काराः
Impulse	आवेगः
Impulsiveness	आवेगशीलता
Inborn	जन्मजातम्
Inclusiveness	अन्तर्वेशिता
Incongruity	असंगतिः
Incubation	परिपालनम्
Independent effectors	स्वतन्त्रं कार्याङ्गम्

In Public domain. Digitization Muthulakshmi Research Academy

Indecision	अनिश्चयावस्था
Independent variable	स्वतन्त्रं परिवर्त्यम्
Inferiority	हीनत्ववृत्तिः
Inhiliation	निरोधः
Insanity	विक्षिप्तता
Insight	अन्तर्दृष्टिः
Instincts	मूलप्रवृत्तयः
Instinctive action	सहजप्रवृत्त्यात्मकं कर्म
Integration	संयुक्तता
Intellectual	बौद्धिकम्
Intelligent	विचारात्मकम्
Intelligent question	बुद्धिलब्धिः
Intensity	तीक्ष्णत्वम्
Interactionism	पारस्परिकप्रतिक्रियावादः
Interest	रुचिः
Interference theory	बाधासिद्धान्तः
Internal labyrinth	आन्तरिकं श्रोत्रम्
Introceptor	अन्तर्वेशितम्
Introspective	भूतकालीनः
Introvert	अन्तर्मुखवृत्तिः
Iris	प्रणालीविहीनग्रन्थयः
Irrelevent	अप्रासङ्गिकम्
Irritability	उद्दीपकता
Irritated	क्रोधितः
Invention	आविष्कारः
Involuntary	अनैच्छिकम्
Larynx	स्वरयन्त्रम्
Laughable	हास्यजनकम्
Laughter	हास्यम्
Law	विधिः
Law of constancy	सातत्यनियमः
Law of disuse	अनुपयोगनियमः
Law of figure and ground	चित्रफलकयोः नियमः
Law of frequency	पुनरावृत्तिनियमः

In Public domain. Digitization Muthulakshmi Research Academy

Law of harmony and discord	समन्वयनिरोधनियमः
Law of homogenity	समानजातित्वनियमः
Law of proximity	सामीप्यनियमः
Law of relativity	सापेक्षतानियमः
Law of simmilarity	समानताया नियमः
Law of symmetry	सङ्गतेर्नियमः
Law of variation	भेदोत्पत्तिनियमः
Law of use	उपयोगनियमः
Laws of learning	शिक्षणनियमाः
Learning curve	शिक्षणस्य वक्ररेखा
Legal practitioners	अधिवक्तारः
Lenen or threshold sensibility	संवेदनाद्वारम्
Lense	तालः
Length	आयामः
Libido	कामः
Localisation	स्थानसीमनम्
Local sign or local colour	स्थानीयं चिह्नम्
Logic	तर्कशास्त्रम्
Logical	तर्कानुकूलम्
Loudspeaker	ध्वनिविस्तारकः
Loyd Morgan's cannon	लायडमार्गनमतम्
Lust	कामुकता
Male harmones; female harmones	पुरुषन्यासर्गाः, स्त्रीन्यासर्गाः
Mammals	स्तनधारिणः
Management	व्यवस्था
Margin of conciousness	चेतनायाः सीमप्रदेशः
Material element	पार्थिवतत्त्वम्
Maternal Instinct	मातृकप्रवृत्तिः
Materialism	जडवादः
Matter	प्रकृतिः
Measurement	मापः
Measurement of Intelligence	बुद्धिपरीक्षा
Measurement of personality	व्यक्तित्वपरीक्षा
Mechanical	यान्त्रिकी

In Public domain. Digitization Muthulakshmi Research Academy

Meddulary sheath	विभज्जिकञ्चुकम्
Medulla ablongata	मस्तिष्कपुच्छम्
Melancholic	विषण्णः
Memorising	कण्ठस्थीकरणम्
Memory	स्मृतिः
Memory image	स्मृतिप्रतिमा
Memory span	स्मृतिविस्तारः
Memory trace	स्मृतिचिह्नम्
Mental age	मानसिकम् आयुः
Mentally defficient	मानसिकाभावग्रस्तः
Mental occupation	अध्यवसायः
Mental proeess	मानसिकी प्रक्रिया
Mental stage	मानसिकी भूमिका
Metabolic	चयापचयात्मकः
Metabolism	चयापचय प्रक्रिया
Metaphysics	तत्त्वमीमांसा
Middle tympanum	मध्यक्षेत्रम्
Mismanipulation	घातानुघातप्रहस्तनम्
Modifiability	परिवर्तनीयता
Modification	परिवर्तनम्
Mood	मनोदशा
Moral	नैतिकम्
Moron	मूर्खः
Motivation	प्रेरणा
Motive	प्रेरकः
Motor adjustment	गतिसमायोजनम्
Motor area	कार्याधिष्ठानम्
Motor centres	चेष्टाकेन्द्राः
Motor exploration	गत्यात्मकमनुसन्धानम्
Motor impulse	बोधावेगाः
Motor sensation	गतिसंवेदना
Motor tendency	चेष्टाप्रवृत्तिः
Movement	गतिः
Mucous membrane	श्लैष्मिककला

In Public domain. Digitization Muthulakshmi Research Academy

Multiple personality	बहुव्यक्तित्वम्
Muscle Fibres	मांसतन्तवः
Muscular	पैशिकम्
Nasal membane	नासाकला
Nature	स्वरूपम्
Negative	अभावात्मकम्
Negative Adaptation	निषेधात्मकं समायोजनम्
Nerve cells	स्नायुकोशाः
Nerve fibres	स्नायुसूत्राणि
Nerves	स्नायवः
Nervous current	स्नायविकी धारा; स्नायविकः प्रवाहः
Nervous system	स्नायुतन्त्रम्
Neural habit	स्नायविकी प्रकृतिः
Neural impulse	स्नायविकावेगः
Neural net	स्नायविकं जालम्
Neural system	स्नायुसंहतिः
Neurilamma	स्नायुकञ्चुकम्
Noise	कोलाहलः
Nonvolitional	निष्प्रयत्नम्
Norcotic sleep	कृत्रिमनिद्रा
Normal	सामान्यम्
Normative	विधायकम्, नियामकम्
Nucleali	लघुन्यष्टयः
Nucleus	न्यष्टिः
Objective	वस्तुनिष्ठम्
Objective situation	वस्तुगता परिस्थितिः
Observation	निरीक्षणम्
Occipital labe	पश्चखण्डम्
Occupational differenee	वृत्तिकारकम् अन्तरम्
Olfactory area	नासाकला
Olfactory reception	गन्धादातृ अङ्गम्
Openminded	निष्पक्षः
Operation	शल्यक्रिया

In Public domain. Digitization Muthulakshmi Research Academy

Opportunity	अवसरः
Order	विन्यासः, क्रमः
Organic matter	जीवांशः
Organic state	प्राङ्गिकी अवस्था
Orgnisation chart	साधनतालिका
Ossicles	आस्थिकम्
Over-existantiality	अतिशीघ्रक्षुब्धता
Overtone	उपस्वरः
Overy	अण्डाशयः
Oxygen	ओषजनम्
Painspots	पीडास्थानानि
pancreas	सर्वकिंवी
Pancreative juice	सर्वकिंवियूषः
Parallelism	समानान्तरवादः
Paralysed	अवसन्नम्
Parasite	परोपजीवी
Partial tone	आंशिकः स्वरः
Partial labe	पार्श्वखण्डम्
Passive	निश्चेष्टः
Pathological method	विकृतमनोविज्ञानविधिः
Pelvic organs	श्रौणाङ्गानि
Perception	प्रत्यक्षीकरणम्
Perceptional Process	प्रत्यक्षीकरण-प्रक्रिया
Peformance test	निष्पादनपरीक्षा
Perstistance	दृढता
Persistancy with varied efforts	प्रबलपरिवर्तनसहगामिनी दृढता
Personality	व्यक्तित्वम्
Philosophy	दर्शनशास्त्रम्
Philosophy of life	जीवनदर्शनम्
Phlagmatic	पित्तप्रधानः
Physical appearance	शरीररचना
Physical science	भौतिकविज्ञानम्
Physical psychology	भौतिकमनोविज्ञानम्
Physiologist	शरीरशास्त्री

In Public domain. Digitization Muthulakshmi Research Academy

Physiological limit	शरीरशक्तेः सीमा
Physiological Phychology	शारीरिकं मनोविज्ञानम्
Physiological reaction	शारीरिकी प्रतिक्रिया
Physiology	शरीररचनाविज्ञानम्
Pit	गर्तः
Pitch	उच्चैर्ध्वनिः
Pituitary glands	पोषग्रन्थयः
Platau of learning	शिक्षणस्य प्रगतिः
Pneumograph	न्यूमोग्राफः
Possession	स्वामित्वम्
Potencial	सम्भाव्यम्
Practical	क्रियात्मिका, व्यावहारिकी
Pragmatic	उपयोगी
Preconception	पूर्वमतम्
Preconcious	चेतनोन्मुखः
Preganglionce	प्रगण्डपूर्वतन्तवः
Prejudice	पूर्वग्रहः
Preorgnised mechanism	पूर्वसञ्चारितं तन्त्रम्
Preparation	उपक्रमः
Proposition	साध्यम्
Primarical ideas	आदिकालीना विचाराः
Primary	मौलिकी
Primary colour sensation	मौलिकी वर्णसंवेदना
Primary ways	आदिकालीना विषयः
Principles	सिद्धान्ताः
Problem	समस्या
Product	उत्पादितम्
Professional	व्यावसायिकम्
Projection	प्रक्षेपणम्, प्रक्षेपः
Proportion	अनुपातः
Proprioceptor	पूर्वम् आदातृ अङ्गम्
Prospective	भविष्यत्कालीनम्
Protu bereness or propellare	जिह्वातलाङ्कुराः
Psychoanalysis	मनोविश्लेषणम्

In Public domain. Digitization Muthulakshmi Research Academy

Psycho galoon meter	सायको गेल्वनमीटर
Psychology of Individual difference	पारस्परिकभेदसम्बन्धि मनोविज्ञानम्
Psycho physical parallelism	मनोभौतिकः समानान्तरवादः
Psycho physics	मनोभौतिकं मनोविज्ञानम्
Public Service Commission	लोकसेवायोगः
Pupil	नेत्रतारिका
Pure Self	विशुद्धात्मा
Purposive thinking	सप्रयोजना विचारणा
Puzzle box	समस्यापेटिका, पत्रमञ्जूषा
Quality	गुणः
Racial or collective unconcious	वंशगतं जातिगतं वाऽवचेतनम्
Randum acts	अनियमिताः क्रियाः
Range	विस्तारः
Range of sensibility	संवेद्यताया विस्तारः
Rate memory	कण्ठस्थीकरणम्
Ratina	दृष्टिपटलम्
Rate of frequency	आवृत्तिसंख्या
Rational	बौद्धिकम्
Rationalisation	यौक्तिकीकरणम्, आत्मदोषदर्शनम्
Reaction	प्रतिक्रिया
Recall	प्रत्याह्वानम्
Readiness	तत्परता
Recency	नवता
Receptive	ग्रहणात्मकम्
Receptive attitude	ग्रहणात्मिकाभिवृत्तिः
Receptor	आदाता
Recitation	प्रपाठः
Recognition	प्रत्यभिज्ञा
Redirection	मार्गान्तरीकरणम्
Reduced clues	प्रह्रासिताः सङ्केताः
Reflexes	उत्क्षिप्ताः क्रियाः, उत्क्षेपः
Reflex action	प्रतिक्षेपक्रियाः
Refracted	भुजायितम्

In Public domain. Digitization Muthulakshmi Research Academy

Regression	अवसर्पणम्
Regulation	विधानम् , नियमः
Regulative	नियामकम् ,
Reinforcement	पुष्टीकरणम्
Relaxation	प्रत्ययनम् , शैथिल्यम्
Relearning method	पुनःशिक्षणविधिः
Religious	धार्मिकः
Repressed	दान्तम्
Repression	दमनम्
Reproduction	प्रत्याह्वानम् , पुनरुत्पादः
Repulsive	विकर्षकम्
Resienous smell	सल्गन्धः
Resiprocal in nervation	सहकारणम्
Resistance	प्रतिरोधः
Resolution	सङ्कल्पः
Response	प्रत्याघातः
Response mechanism	प्रतिक्रियातन्त्रम्
Retension	धारणा
Retrospection	प्रतीपदर्शनम्
Rods	शलाकाः
Rodent	पृथक्करणम्
Rule	विधिः
Sacral division	मैकविभागः
Somnam buism	चलत्स्वप्नः, निद्राचारः
Sanguine	वातुलः, सुप्रत्याशी
Science of Genetics	जननविज्ञानम्
Seat of intellect	प्रज्ञाधिष्ठानम्
Secondary	गौणः
Secretion	स्रावः
Sedative drug	शामकौषधिः
Selective	चयनात्मकम्
Self assertion	स्वस्थापनम्
Self conciousness	आत्मचेतना
Self control	आत्मसंयमः

In Public domain. Digitization Muthulakshmi Research Academy

Sensory area	बोधाधिष्ठानम्, संवेदनाधिष्ठानम्
Sensory attention	संवेदकम् अवधानम्
Sensory cells	संवेदनकोशाणवः, संवेदकोशिका
Sensory centre	संवेदनात्मकः केन्द्रः
Sensory character	सांवेदनिकं स्वरूपम्
Sensory Image	संवेदनात्मिका प्रतिमा
Sensory Impulse	बोधवेगः, संवेदनावेगः
Sensory motor action	संवेदनाप्रेरितं कर्म
Sensory neurones	बोधक्रियास्नायवः
Sensation	संवेदना
Sense cells	ज्ञानकोशाः
Sensitive Receptor	संवेदनशील आदाता
Sentimental	भावनाप्रवणम्
Sex	कामः
Sharability	सहोपभोग्यता
Shifting	विचलनम्
Simple reflex area	साधारणप्रतिक्षेपचापः
Size	परिमाणम्
Size weight illusion	परिमाण-भार-भ्रमः
Sociability	सामाजिकता
Social influence	सामाजिकः प्रभावः
Social	सामाजिकता
Sociology	समाजविज्ञानम्
Social manners	समाजाचाराः
Social Psychology	समाजमनोविज्ञानम्
Somaesthetic area	बोधाधिष्ठानम्, बोधनक्षेत्रम्
Solidarity	सान्द्रत्वम्
Span of attention	अवधानविस्तारः
Spinal Column	मेरुदण्डः
Spinal Cord	सुषुम्ना
Spontaneous	परतोऽनिष्पन्नम्, स्वतःस्फूर्तम्
Spontaneously	स्वतः
Stages	भूमिकाः
Stage of consequences	फलसम्बन्धिनी भूमिका

In Public domain. Digitization Muthulakshmi Research Academy

Standard	प्रतिमानम्
Standardisation	प्रतिमानीकरणम्
State home for Boys	राजकीयबालभवनम्
Statistics	अङ्कविज्ञानम्
Stem	स्कन्धभागः
Stenographer	आशुलिपिकः
Stimulating organ	उत्तेजकाङ्गम्
Stimulation	उत्तेजना
Stimulus	उत्तेजकः
Strength of stimuli	प्रेरकबलम्
Structuralism	संरचनावादः
Structure	संरचना
Subconscious	अवचेतनः
Subject	विषयः, द्रष्टा
Subjective	आत्मनिष्ठम्
Subjective perception	द्रष्टृसापेक्षप्रत्यक्षीकरणम्
Subjection	विनीतता
Sublimation	शोधः
Submission	आत्मलाघवम्
Substitute	स्थानापन्नः
Successive Contract	अनुपूरकः
Successiveness of stimuli	आघातक्रमः
Suggestible	निर्देशग्रहणक्षमः
Suggestive	निर्देशात्मकम्
Summation	समष्टीकरणम् , सङ्कलनम्
Superficial	उपरिष्ठम्
Sustained	स्थिरम्
Sweat glands	स्वेदग्रन्थयः
Syllogism	आधारवाक्यम् ; हेत्वनुमानम्
Symmetry	सामञ्जस्यम्
Sympathetic Intutionalism	अन्तःप्रज्ञावादः
Sympathy	सहानुभूतिः
Synapse	स्नायुसन्धिः, अन्तर्ग्रथनम्
Symtomatic acts	मूढार्थाश्चेष्टाः

In Public domain. Digitization Muthulakshmi Research Academy

Synthetical	संश्लेषणात्मकम्
Syphilis	उपदेशः
Systematize	व्यवस्थापनम्
Table	सारिणी
Tactual sensation	स्पर्शसंवेदना
Tastbuds	स्वादकालिकाः
Taste sensation	स्वादसंवेदना
Temper	प्रकृतिः
Temperament	स्वभावः
Temperature spots	तापमानस्थानानि
Temporary	तात्कालिकम्
Tendon	कण्डराः
Tenderness	वात्सल्यसंवेगः
Tension	क्षोभः
Test condition	परीक्षात्मकपरिस्थितिः
Theoritical	सैद्धान्तिकम्
Theory of lapsed intelligence	नष्टबुद्धिसिद्धान्तः
Theory of organic selection	जैविकचयनसिद्धान्तः
Thing or tool learning	वस्तुशिक्षणम् , साधनशिक्षणम्
Thinking	विचारणा
Threshold Point	निम्नतमो बिन्दुः
Thyroxin	गलग्रन्थिनिसर्गः
Thyroid glands	गलग्रन्थयः
Timbre	वैयक्तिकत्वम् (ध्वनेः)
Tip	अग्रभागः
Tissue	ऊतिः
Tone	तानः
Tool chest	साधनपेटिका, साधनमञ्जूषा
Tool of thought	विचारसाधनम्
Touch Corpuscle	स्पर्शदेहाणुकोशाः, स्पर्शकणिकाः
Touch spots	स्पर्शस्थानानि
Training	प्रशिक्षणम्
Transformer	परिवर्तकः
Transmission	संक्रमणम् , प्रेषणम्

In Public domain. Digitization Muthulakshmi Research Academy

Trial-error-method	प्रयत्नच्युतिविधिः
Tri-dimentional	त्रिवैमः
True false examination	शुद्धाशुद्धपरीक्षा
Uncomplexed	अश्लिष्टा
Unconcious attitude	अचेताभिवृत्तिः
Undifferenciated whole	समावयवी समष्टिः
Unnamed	असंज्ञातम्
Unstable	चञ्चलम्
Volition	सङ्कल्पः
Vasomotor system	वाहिनीदेशीतन्त्रम्
Verbal symbols	शब्दप्रतीकाः
Verbatim	हावभावाः, इङ्गितानि
Very	प्रखरबुद्धिः, उत्कृष्टबुद्धिः
Vestibule	अन्तर्द्वारम्
Visual area	दृष्ट्यधिष्ठानम्
Visual attention	दृष्ट्यवधानम्
Vitamin	खाद्योजतत्त्वम्
Vital feelings	जीवनसंवेदना
Vitreous humous	काचरसः
Voluntary	ऐच्छिकम्
Voluntary action	ऐच्छिकं कर्म
Volitional	सप्रयत्नम्
Warmth spots	उष्णतास्थानानि
Wave lengths	तरङ्गायामः
Will power	इच्छाशक्तिः
Womq	गर्भाशयः
Wonder	आश्चर्यम्
Worry	चिन्ता

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम्–२

संस्कृत-आङ्ग्लशब्दानुक्रमणी

अकारणभयम्	Phobia
अक्षरम्भः	Axis Cylinder
अक्षिगोल्कम्	Eye-ball
अग्रखण्डम्	Fronted labe
अग्रदृष्टिः	Foresight
अग्रपोष्रः	Anterior Petuitory
अग्रभागः	Tip
अङ्कविज्ञानम्	Statistics
अचेतनः	Unconcious
अचेतनाभिवृत्तिः	Unconcious attitude
अण्डाशयः	Overy
अतिशीघ्रक्षुब्धता	Over-existantiality
अधिचर्म	Epidermis
अधिवक्तारः	Legal practitioners
अध्यवसायः	Mental occupation
अनियमिताः क्रियाः	Randum acts
अनिश्चयावस्था	Indecision
अनुपयोगनियमः	Law of disuse
अनुपातः	Proportion
अनुपूरकः	Successive Contract
अनुबद्धा	Corclatid
अनुबन्धकोशाः	Association co-relation Ncurone
अनुभवः	Experience
अनुभवमूलकोऽहंभावः	Empirical self
अनुसन्धानम्	Discovery
अनैच्छिकम्	Involuntary
अन्तरावेशिता	Inclusiveness
अन्तरस्य न्यूनतमा मात्रा	Diffcrence threshold

In Public domain. Digitization Muthulakshmi Research Academy

अन्तरासारिणो ग्रन्थयः	Endocrine glands
अन्तर्गामी	Afferent
अन्तर्दृष्टिः	Insight
अन्तर्दृष्ट्या ज्ञानम्	To perceive by mental eye
अन्तर्दर्शनम्	Introspection
अन्तर्मुखवृत्तिः	Introvert
अन्तर्वर्ति आदात्रङ्गम्	Introceptor
अन्तर्द्वारम्	Vestibule
अप्रासङ्गिकम्	Irrelevent
अभावात्मकम्	Negative
अभिमानः	Elation
अभिवृत्तिः	Attitude
अभ्यासजनितं कर्म	Habitual action
अमीवा	Amoeba
अरुचिः	Disgust
अर्जितम्	Acquired
अर्जितमवधानम्	Derived attention
अर्थोपलब्धिः	Aquirement of meaning
अवचेतनः	Subconscious
अवधानम्, ध्यानम्	Attention
अवधानमुद्रा	Attitude of being attentive
अवधानविस्तारः	Span of attention
अवधानावधिः	Duration of attention
अव्यवहितमवधानम्	Immediate attention
अवरोधः	Dead lock
अवसरः	Opportunity
अवसन्नम्	Paralysed
अवसर्पणम्	Regression
अविच्छिन्नता	Continuity
अश्लिष्टा	Uncomplexed
असङ्गतिः	Uncongruity
असंज्ञातम्	Unnamed
अस्थिकम्	Ossicles

In Public domain. Digitization Muthulakshmi Research Academy

अस्वीकृता	Unavowed
आकारात्मकम्	Formal
आकृतिराधारश्च	Figure of ground
आकृतिवादः	Gastalt Psychology
आघातक्रमः	Successiveness of stimuli
आङ्गिकी व्यवस्था	Organic State
आचरणम्	Conduct
आत्मगौरवम्	Assertion
आत्मदोषसमर्थनम् अथवा यौक्तिकीकरणम्	Rationalization
आत्मनिष्ठम्	Subjective
आत्मचेतना	Self conciousness
आत्मसंयमः	Self control
आदर्शप्रतिमा	Eidetic image
आदाता	Receptor
आदिकालीना विचाराः	Primarical ideas
आदिकालीनः विषयः	Primary ways
आदिवासिनः	Alorigin als
आधारकला	Basilar membrane
आधारवाक्यम्, हेत्वनुमानम्	Syllogism
आन्तरमवधानम्	Ideotional attention
आन्तरिकं श्रोत्रम्	Internal labyrinth
आन्त्रपुच्छम्	Appendicitis
आयामः	Length
आविष्कारः	Invention
आवृत्तिसंख्या	Rate of frequency
आवेगः	Impulse
आवेगशीलता	Impulsiveness
आंशिकः स्वरः	Partial tone
आशुलिपिकः	Stenographer
आश्चर्यम्	Wonder
आश्रितपरिवर्त्यम्	Dependent Veriable
इङ्गितानि	Gesturing
इच्छा	Desire
उच्चैर्ध्वनिः	Pitch
उत्कुत्य भक्षयन्तः पशवः	Rodents

In Public domain. Digitization Muthulakshmi Research Academy

उत्कृष्टबुद्धिः	Very Superion
उत्क्षिप्ताः क्रियाः, उत्क्षेपः	Reflex action
उत्तेजकाङ्गम्	Stimulating organ
उत्तेजना	Stimulation
उत्पादितम्	Product
उदासर्गः	Secretion
उदासीनः	Depressed
उद्दीप्तिः	Excitement
उद्दीपकता	Irritability
उन्मादः	Hysteria
उपक्रमः	Preparation
उपतारिका	Iris
उपदंशः	Syphilis
उपयोगनियमः	Law of use
उपयोगी	Pragmatic
उपरिस्थम्	Superficial
उपलब्धिः	Apprehension
उपलब्धिपरीक्षा	Achievement test
उपवृक्क्यग्रन्थयः	Adrenal glands
उपस्वरः	Overtone
उपहास्यः	Comic
उभयमुखवृत्तिकः	Ambivert
उरः प्राचीरम्	Diaphragm
उष्णतास्थानानि	Warmth spots
ऊतिः	Tissue
एकाकित्वम्	Feeling of loneliness
एकात्मीकरणम् , एकरूपता, एकीकरणम्	Identification
एनेमीनः	Anemone
एकेनाक्ष्णा दूरत्वज्ञानम्	Monocular factor of space pesception
ऐच्छिकं कर्म	Voluntary action
ओषजनम्	Oxygen
औपवृक्किः	Adrenin
कण्ठस्थीकरणम्	Memorising
कण्ठस्थीकरणसंबद्धा स्मृतिः	Rate memory

In Public domain. Digitization Muthulakshmi Research Academy

कण्डराः	Tendon
कनीनिका	Cornea
कपालस्नायवः	Carnial nerves
करुणा	Distress
कर्णः	Ear
कर्मावेगाः	Motor Impulses
कर्माधिष्ठानम्	Motor area
कलात्मिका	Artistic
कल्पना	Imagination
काचररसः	Vitreous humous
कामः	Libido, sex
कामुकता	Lust
कार्यकारी	Effection
कार्यवादः	Functionalism
कालकृतमायुः	Chronological age
कीटाण्वूनामबाधता	Continuity of germ plasm
कृतिशक्तिः	Will power
कृत्रिमा निद्रा	Norcotic sleep
कोकला	Cochlea
कोलाहलः	Noise
कोशाः	Cells
क्रमः	Order
क्रियात्मिका, व्यावहारिकी	Practical
क्रोधः	Anger
क्रोधनः, क्रोधी	Irritated
क्षयसिद्धान्तः	Atroply Theory
क्षाराः	Acids
क्षतिपूर्तिः	Compensation
क्षुधा	Appctite
क्षोभः	Tension
खाद्योजतत्त्वम्	Vitamin
खिन्नः, उदासीनः	Depressed
गतिः	Movement
गतिसमायोजनम्	Motor adjustment

In Public domain. Digitization Muthulakshmi Research Academy

गतिसंवेदना	Motor sensation
गत्यात्मकमनुसन्धानम्	Motor exploration
गन्धादातृ अङ्गम्	Olfactory reception
गर्तः	Pit
गर्भाशयः	Womb
गलग्रन्थयः	Thyroid glands
गलग्रन्थिन्यासर्गाः	Thyroxin
गुणोत्तरवृद्धिः	Geometrical Progrecia
गूढार्थाश्चेष्टा	Symptomatic acts, Automatic acts
गौणी	Secondary
ग्रन्थयः	Glands
ग्रन्थिस्रावः	Glandular reaction
ग्रहणात्मकम्	Receptive
ग्रहणात्मिकाऽभिवृत्तिः	Receptive attitude
ग्रान्थिकी	Glandular
घटकाः	Constituents
घाताघातप्रहस्तनम्	Hit or mis manipulation
घ्राणाधिष्ठानम्	Olfactory area
चञ्चलम्	Unstable
चयनात्मकम्	Selective
चयापचयप्रक्रिया	Metabolism
चयापचयात्मकः	Metabolic
चरमं प्ररूपम्	Extreme type
चरित्रम्	Character
चलत्स्वप्नम्	Somnam buism
चित्रप्रतीकाः	Diagrams
चित्रफलकयोर्नियमः	Law of figure and ground
चिन्तनम्	Contemplation
चिन्तनात्मिका	Contemplative
चिन्ता	Worry
चेतना	Consciousness
चेतनाकेन्द्रः	Focus of consciousness
चेतनायाः सीमप्रदेशः	Margin of conciousness
चेतनोन्मुखः	Preconcious

In Public domain. Digitization Muthulakshmi Research Academy

चेष्टा	Conation
चेष्टाप्रवृत्तिः	Motor tendency
छेदायाः अनुपातः	Logorithm
जटिलता	Complexity
जटिलीकरणम्	Complication
जठररसः	Gastric juice
जडः	Idiot
जडवादः	Materialism
जननविज्ञानम्	Science of Genetic
जन्मक्रमः	Birth order
जन्मजातम्	Inborn
जातिमूला भिन्नता	Generic difference
जिज्ञासा	Curiosity
जिह्वातलाङ्कुराः	Protu bereness or propellare
जीवनदर्शनम्	Philosophy of life
जीवनविज्ञानम्	Biology
जीवनवृत्तसंघटनाविधिः	Case History Method
जीवनसंवेदना	Vital feelings
जीवांशः	Organic matter
जैविकं विज्ञानम्	Biology
जैविकचयनसिद्धान्तः	The Theory of organic selection
ज्ञानकोशाः	Sense cells
ज्ञानम्	Cognition
ज्ञानमीमांसा	Epistemolgy
टेचिस्टास्कोपः	Tachistascope
तत्परता	Radineess
तत्त्वमीमांसा	Metaphysics
तत्त्वानि	Facts
तन्तवः	Fibres
तरङ्गायामः	Wave lengths
तर्कशास्त्रम्	Logic
तर्कानुकूलम्	Logical
तात्कालिकी	Temporary
तानः	Tone

In Public domain. Digitization Muthulakshmi Research Academy

तापमानस्थानानि	Temperature
तामसिकः	Choleric
तारता	Pitck
तालः	Lense
तीक्ष्णत्वम्	Intensity
तीव्रबुद्धिः	Bright
तुलनात्मको विधिः	Comparative method
त्रिवैमः	Tri-dimentional
त्रैकविभागः	Sacral division
त्वक्षः, त्वाक्षिः	Cortex
दक्षुगन्धः	Ethercal or Fruity small
दरीस्थानम्, मध्यदरी	Central Fissure
दर्शनशास्त्रम्	Philosophy
दंशनम्	Biting
दान्तम्	Reprened
दृढता	Perstistance
दृढीकरणम्	Consolidation
दृश्यवस्तुक्षेत्रम्	Field of view
दृष्टा	Subject
दृष्टिपटलम्	Ratina
दृष्टिप्रतिमा	Visual image
दृष्ट्यधिष्ठानम्	Visual area
दृष्ट्यवधानम्	Visual attention
दोला	Vacillation
द्वन्द्ववासना	Spite wishes
द्वन्द्वसापेक्ष्यं प्रत्यक्षीकरणम्	Subjective perception
द्व्यर्थकम्	Ambiguous
द्विधा व्यक्तित्वम्	Double personality
द्विनेत्रविषयकम्	Binocular
द्विविधा	Hesitancy
धर्माः	Attributes
धारणा	Retention
धार्मिकः	Religeous
ध्यानम्	Attention

In Public domain. Digitization Muthulakshmi Research Academy

ध्यानावधिः	Duration of attention
ध्यानैकाग्यम्	Concentration
ध्वनिविस्तारकः	Loud speaker
नवता	Recency
नष्टबुद्धिसिद्धान्तः	Theory of lapsed intellegnce
नाडीतन्तवः	Afferent Neurones
नासाकला	Nasal membrane
निचयः	Dermis
निम्नकर्मकेन्द्राः	Lower motor centres
निम्नतमो बिन्दुः	Threshold point
नियतिवादी	Determinist
नियन्त्रणम्	Conditioning
नियमः	Rule
नियन्त्रिता प्रतिक्रिया	Conditional Response
नियन्त्रितोत्क्षेपक्रिया	Conditional Reflex
नियामकः	Normotive
निरीक्षणम्	Observation
निरोधः	Inhiliation
निर्देशग्रहणक्षमा	Suggestive
निर्देशात्मकम्	Formal
निर्बलबुद्धिः	Boarder line
निलम्बनम्	Incubation
निर्वैयक्तिकम्	Impersonal
निश्चेष्टः	Passive
निषिक्तोऽण्डकोशः	Fertilising ovan
निषेधात्मकं समायोजनम्	Negative Adaptation
निष्पक्षः	Openminded
निष्पादनपरीक्षा	Peformance test
नीतिशास्त्रम्	Ethics
नेत्रतारिका	Pupil
नेत्ररसः	Aqueous humour
नैतिकम्	Moral
न्यष्टिः	Nucleus

In Public domain. Digitization Muthulakshmi Research Academy

न्यासर्गाः	Hermones
न्यूमोग्राफः	Pneumograph
पक्षपातः	Bias
परतो निष्प्रयत्नम्	Enforced
परार्थी	Altruistic
परिकल्पना	Hypothesis
परिदर्शनम्	Circumspection
परिपालनम्	Incubation
परिमाणम्	Size
परिमाण-भार-भ्रमः	Size weight illusion
परिवर्तनम्	Modification
परिवर्तनीयता	Modifiability
परिवर्तकः	Transformer
परिवेशः	Enuironment
परिवेशवादी	Environmentalist
परिसंवादः	Correspondence
परिस्थितिः, हेतुः	Condition
परीक्षणम् , प्रयोगः	Experiment
परीक्षात्मकपरिस्थितिः	Test condition
परुषाः संवेगाः	Coarse emotions
परोपजीवी	Parasite
पलायनम्	Flight
पशुमनोविज्ञानम्	Animal Psychology
पश्चखण्डम्	Occipital labe
पश्चात्प्रतिमा	After image
पारस्परिकभेदसम्बन्धि मनोविज्ञानम्	difference
पारेषणम्	Transmission
पार्थिवतत्त्वम्	Material element
पार्श्वखण्डम्	Partial labe
पित्तप्रधानः	Phlagmatic
पित्र्यसूत्राणि	Chromosomes
पित्र्यैककम्	Elementary Genetic factors
पीडनभ्रान्तिः	Delusion of persecution

In Public domain. Digitization Muthulakshmi Research Academy

पीडास्थानानि	Painspots
पुनरावृत्तिनियमः	Law of frequency
पुनरुत्पादः	Reproduction
पुनःशिक्षणविधिः	Relearning method
पुरुषन्यासर्गाः, स्त्रीन्यासर्गाः	Male harmones; female harmones
पुष्टीकरणम्	Reinforcement
पुस्तपालः	Book Keeper
पूर्वग्रहः	Prejudice
पूर्वसञ्चारितं तन्त्रम्	Preorgnised mechanism
पूर्वमादातृ अङ्गम्	Proprioceptors
पूर्वोत्तरविरोधः	Suceenive contrast
पृथक्करणम्	Rodent
पैशिकम्, पैशिकी	Muscular
पोषग्रन्थयः	Pituitary glands
प्रकृतिः	Matter, Temper
प्रक्षेपणम्, प्रक्षेपः	Projection
प्रखरबुद्धिः, उत्कृष्टबुद्धिः	Very superion
प्रगण्डपूर्वतन्तवः	Pre ganglionic
प्रगण्डोत्तरतन्तवः	Post ganglionic
प्रजननग्रन्थयः	Gonods glands
प्रज्ञाधिष्ठानम्	Seat of intellect
प्रणालीविहीनग्रन्थयः	Dust less glands
प्रतिक्रिया	Reaction
प्रतिक्रियातन्त्रम्	Response mechanism
प्रतिभाशाली	Genius
प्रतिमानम्	Standard
प्रतिमानीकरणम्	Standardization
प्रतिरक्षाक्रिया	Defence reaction
प्रतिरुद्ध गतिः	Impeded movement
प्रतिरोधः	Resistance
प्रतिरोधकम्, नियन्त्रकम्	Censor
प्रतीपदर्शनम्	Retrospection
प्रत्यक्षीकरणप्रक्रिया	Perceptional Process

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षीकरणम्	Perception
प्रत्यभिज्ञा	Recognition
प्रत्ययाः	Concepts
प्रत्ययनम्	Relaxation
प्रत्ययतन्त्रम्	Conceptual System
प्रत्ययसमष्टिः	Combination of Concepts
प्रत्याघातः	Response
प्रत्याहारशक्तिः	Abstraction
प्रत्याह्वानम् , पुनरुत्पादः	Reproduction
प्रपाठः	Recitation
प्रफुल्लाः	Elated
प्रयत्नपरिवर्तनसहगामिनी दृढता	Persistancy with varied effort
प्रयत्नच्युतिविधिः	Trial-error-method
प्रयोगः	Experiment
प्रयोगात्मकं मनोविज्ञानम्	Experemental Psychology
प्रयोजनवादः	Hormic Psychology
प्रवणता	Aptitude
प्रवृत्तिः	Disposition
प्रवैगिकः	Dynemical
प्रशिक्षणम्	Training
प्रश्नमञ्जूषा	Puzzle Bax
प्रसर्पणम्	Repression
प्रह्रासिताः सङ्केताः	Reduced clues
प्रान्तस्तरे, सीमस्थाने	Border line level
प्राथमिकी स्मृतिप्रतिमा	Eidetic image
प्रेरकबलम्	Strength of stimuli
प्रेरकः	Motive
प्रेरणा	Motivation
फलसम्बन्धिनी भूमिका	Stage of consequences
बहिर्गामी	Efferent
बहिर्मुखवृत्तिः	Extrovert
बहुव्यक्तित्वम्	Multiple personality
बाधासिद्धान्तः	Interference theory

In Public domain. Digitization Muthulakshmi Research Academy

बालमनोविज्ञानम्	Child Psychology
बाह्यं जगत्	External reality
बाह्यता	Externatity
बाह्यादातृ अङ्गम्	Extroceptor
बाह्यमवधानम्	Sensasy attention
बाह्यं श्रोत्रम्	External auricle
बुद्धिपरीक्षा	Measurement of Intelligence
बुद्धिलब्धिः	Intelligent question
बुद्ध्यात्मकम्	Rationel
बुभुक्षा, क्षुधा	Appetite
बृहन्मस्तिष्कः	Ceregram
बोधकेन्द्राः	Sensory centres
बोधक्रियास्नायवः	Sensory neurones
बोधाधिष्ठानम् , बोधनक्षेत्रम्	Somaesthetic area
बोधावेगाः	Motor impulse
बौद्धिकः	Intellectual
बौद्धिकी	Rational
भयम्	Fear
भविष्यत्कालीनम्	Prospective
भावना	Sentiment
भावात्मिका	Positive
भावनाप्रवणम्	Sentimental
भिन्नीकरणम्	Differenciation
भुजायितम्	Refracted
भूतकालीनः	Introspective
भूमिका	Stage
भेदोत्पत्तिनियमः	Law of variation
भोजनान्वेषणम्	Food seeking
भौतिकविज्ञानम्	Physical science
भ्रमः	Illusion
भ्रान्तिः	Delusion
मज्जकः	Mudulla
मतम्	Assumption

In Public domain. Digitization Muthulakshmi Research Academy

मधुवशीयूषः	Insulin
मध्यदरी	Centarl Fissure
मध्यं पटलम्	Choroid
मध्यमो विभागः	Sympathetic Division
मध्यक्षेत्रम्	Middle tympanum
मध्यस्था वेदना	Affective Intermediary
मनःस्मृतिमयी	Faintastic
मनोदशा	Mood
मनोभौतिकं मनोविज्ञानम्	Psycho physics
मनोराज्यमयी	Faintastic
मनोविश्लेषणम्	Psychoanalysis
मन्दबुद्धिः	Dull
मस्तिष्कः	Brain
मस्तिष्ककोषः	Encephalitis
मस्तिष्कपुच्छम्	Medulla ablongata
मस्तिष्कसुषम्नाक्षः	Cerebrospinal Axis
मस्तिष्कस्नायवः	Cerebrial nerves
मातृकप्रवृत्तिः	Maternal Instinct
माधुर्यम् (ध्वनेः)	Quality
मानसिकी प्रक्रिया	Mental processrs
मानसिकम् आयुः	Mental age
मानसिकाभावग्रस्तः	Mentally defficient
मानसिकी भूमिका	Mental stage
मांसतन्तवः	Muscle Fibres
मापः	Measurement
मार्गान्तरीकरणम्	Redirection
मिश्रम्	Compound
मिश्रप्रतिक्षेपसिद्धान्तः	Compound Reflex Theory
मुक्तिः	Relascation
मूढः	Imbical
मूर्खः	Moron
मूर्च्छा	Coma
मूर्तम्	Concrete
मूलप्रकाराः	Fundamental modes

in Public domain. Digitization Muthulakshmi Research Academy

मूलप्रवृत्तयः	Instincts
मूलस्वरः	Ground tone
मूला	Primary
मेरुदण्डः	Spinal Column
मौलिकी वर्णसंवेदना	Primary colour sensation
यान्त्रिकी	Mechanical
युयुत्सा	Combat
योग्यता	Capacity
यौक्तिकीकरणम्, आत्मदोषदर्शनम्	Rationalisation
रचना	Construction
रचनावादः	Structvratism
रसनाधिष्ठानम्	Gustering area
रससंवेदना	Tasti sensation
राजकीयबालभवनम्	State home for Boys
रालगन्धः	Rasinous smell
रुचिः	Interest
रूपकमया, रूपकप्रधाना	Allegorical
रेखाकृतिः	Bueprint
रेखीयो मानदण्डः	Graphic rating scale
रेचनम्	Chtharsin
लक्षः	Cartex
लक्ष्यतत्परता	Goal set
लक्ष्योन्मुखता	Goal seeking
लघुमस्तिष्कः	Cerebellum
लघुन्यष्टयः	Nucleali
लायडमार्गनमतम्	Loyd Morgan's cannon
लोकमनोविज्ञानम्	Folk Psychology
लोकसेवायोगः	Public Service Commission
वक्ररेखा	Curve line
वर्गीकरणम्	Classification
वर्तमाना	Actual
वर्णविरोधः	Colour Contrast
वर्णमयगन्धः	Specis
वंशानुक्रमः	Heridity

In Public domain. Digitization Muthulakshmi Research Academy

वंशगतं जातिगतं वाऽवचेतनम्	Racial or collective unconcious
वस्तुगतः	Objective
वस्तुगता परिस्थितिः	Objective situation
वस्तुशिक्षणम् , साधनशिक्षणम्	Thing or tool learning
वसा	Fat
वातावरणम् , परिवेशः	Environment
वातुलः, सुप्रत्याशी	Sanguine
वात्सल्यसंवेगः	Tenderness
वायुकणाः	Gaseous
वाहिनीपेशीतन्त्रम्	Vasomotor system
विकासविधिः	Genetic mothod
विकीर्णं स्नायुतन्त्रम्	Neural net
विकृतमनोविज्ञानम्	Abnormal Psychology
विकृतमनोविज्ञानविधिः	Pathological method
विकल्पः	Alternative
विकर्षकम्	Repulsive
विक्षिप्तता	Insanity
विक्षेपः	Distraction
विक्षेपमयी	Fantastic
विचलनम्	Shifting
विचारणा	Thinking
विचारप्रेरितं कर्म	Idea motor action
विचारात्मकम्	Intelligent
वितरणम्	Distribution
विधानम् , नियमः	Regulation
विधायकम् , नियामकम्	Normative
विधिः	Rule
विनीतता	Subjection
विनोदः	Amusement
विन्यासः, क्रमः	Order
विभ्रमः	Hallucination
विभजिकञ्चुकम्	Meddulary sheath
विमाः	Dimension

In Public domain. Digitization Muthulakshmi Research Academy

विशदाः प्रतीकाः	Elaborate Symbols
विशुद्धात्मा	Pure Self
विषण्णः	Melancholic
विषयः, द्रष्टा	Subject
विस्तारः	Range
विस्वरता	Discord
वृत्तिकारणमन्तरम्	Occupational differenee
वेदना	Feeling
वेदनांशः	Feeling of tone
वैद्युतिकनिरोधशक्तिः	Electric Resistance
वैपुल्यम्	Amplitude
वैयक्तिकत्वम् (ध्वनेः)	Timbre
वैशिष्ट्यम्	Characteristic
व्यक्तिमनोविज्ञानम्	Indillidual Psychology
व्यक्तित्वम्	Personality
व्यक्तित्वपरीक्षा	Measurement of personality
व्यवहारः	Behaviour
व्यवहारवादः	Behaviourism
व्यवस्था	Management
व्यवस्थापनम्	Systematize
व्यङ्ग्यचित्रम्	Cartoon
व्यावसायिकम्	Professional
व्यासः	Circumference
व्योम	Ether
व्योमतरङ्गाः	Ether waves
शक्तिः	Fcaulty
शङ्कवः	Cones
शङ्क्वाकारा अङ्कुराः	Conical Papillac
शब्दप्रतीकाः	Verbal symbols
शब्दानुकृतिः	Verbatim
शरणागतिः	Appeal
शरीरक्रियाविज्ञानम्	Physiology
शरीरतत्त्वम्	Bodily element
शरीररचना	Physical appearance

In Public domain. Digitization Muthulakshmi Research Academy

शरीररचनाविज्ञानम्	Anatomy
शरीरशक्तेः सीमा	Physiological limit
शरीरशास्त्री	Physiologist
शल्यक्रिया	Operation
शलाकाः	Rods
शामकौषधिः	Sedative drug
शारीरिकं मनोविज्ञानम्	Physiological Phychology
शारीरिकी प्रतिक्रिया	Physiological reaction
शारीरिकी भूमिका	Bodily stage
शिक्षणनियमाः	Laws of learning
शिक्षणस्य प्रगतिः	Platau of learning
शिक्षणस्य वक्ररेखा	Learning curve
शीतस्थानानि	Cold Spots
शीर्णविभागः	Carnial Division
शुक्रकीटः	Spar metazoon
शुक्लपटलम्	Coat
शुद्धाशुद्धपरीक्षा	True false examination
शैथिल्यम्	Relexation
शोधः	Sublimation
श्रवणसंवेदना	Auditory sensation
श्रवणाधिष्ठानम्	Auditory Area
श्रेष्ठत्वभ्रान्तिः	Delusion of grandeur
श्रोत्रम्	Ear
श्रौणाङ्गानि	Pelvic organs
श्लैष्मिककला	Mucous membrane
सक्रियमन्वेषणम्	Active seeking
सक्रिया एकता	Dynamical unity
सङ्कल्पः	Volition
सङ्केतभ्रान्तिः	Delusion of reference
सङ्क्रमणम्	Transmission
सङ्गतेर्नियमः	Law of symmetry
संग्रहवृत्तिः	Hoarding
संग्राहकम्	Collector
संघटनतालिका	Orgnisation chart

In Public domain. Digitization Muthulakshmi Research Academy

सत्तावादः	Existantialism
संध्वनिः, समस्वरता	Harmony
सन्तानरक्षा	Parental Instinct
सन्तुलनम्	Equilibrium
सप्रयोजना विचारणा	Purposive thinking
समतोलिः	Balance
समन्वयकारकाः केन्द्राः	Co-ordinating centres
समन्वयविरोधनियमः	Low of harmony and discord
समष्टिः	System
समष्टीकरणम् , सङ्कलनम्	Summation
समस्या	Problem
समस्यापेटिका, पत्रमञ्जूषा	Puzzle box
समस्वरता, संध्वनिः	Consonance
समाजमनोविज्ञानम्	Social Psychology
समाजविज्ञानम्	Sociology
समाजाचाराः	Social manners
समानजातित्वनियमः	Law of homogenity
समानताया नियमः	Law of simmilarity
समानान्तरवादः	Parallelism
समानान्तरवृद्धिः	Arithmatical Progression
समानुभूतिः	Empathy
समायोजनम्	Adaptation
समावयवा समष्टिः	Uudifferenciated whole
सम्भाव्यम्	Potencial
सम्मोहजनिद्रा	Hypnotic sleep
सम्मोहनविद्या	Hypnosis
संरचना, संविधानम्	Constitution
सर्वकिंवी	pancreas
सर्वकिंवियूषः	Pancreaticive juice
संलग्नता	Persistance
संविधानम्	Constitution
संवेगः	Emotion
संवेगशीलता	Emotionality
संवेगानामनवस्थितिः	Emotional disterbence

In Public domain. Digitization Muthulakshmi Research Academy

संवेदनशील आदाता	Sensitive Receptor
संवेदनकोशाणवः, संवेदकोशिका	Sensory cells
संवेदना	Sensation
संवेदनाद्वारम्	Lenen or threshold sensibility
संवेदनाप्रेरितं कर्म	Sensory motor action
संवेदनाया ऊर्ध्वसीमा	Range of sensibility
संवेद्यताया विस्तारः	Range of sensibility
संवाहिता	Conductivity
संवेद्यमन्तरम्	Appreciable difference
संश्लेषणात्मकम्	Synthetical
संसरणम्	Convergence
संस्काराः	Impressions
सहकारणम्	Resiprocal in nervation
सहचारी स्मृतिः	Associative memory
सहभाविभागाः	Sympathetic diuisions
सहानुभूतिः	Sympathy
सहोपभोग्यता	Sharability
सातत्यनियमः	Law of constancy
साधनपेटिका, साधनमञ्जूषा	Tool chest
साधारणप्रतिक्षेपचापः	Simple reflex area
साध्यम्	Proposition
सान्द्रत्वम्	Solidarity
सापेक्षतानियमः	Law of relativity
सामग्र्यम्	Integration
सामग्री	Data
सामाजिकता	Sociability
सामाजिकः प्रभावः	Social influence
सामाजिकप्रवृत्तयः	Common Characteristics
सामान्यबुद्धिः	Normal
सामान्यीकरणम्	Generalisation
सामीप्यनियमः	Law of proximity
सामूहिकमचेतनम्	Collective uncousciousness
सायकोगेल्वनमीटर	Psycho galoon meter
सारणी	Table

In Public domain. Digitization Muthulakshmi Research Academy

सांवेदनिकचिह्नानि	Sensory images
सांवेदनिकं स्वरूपम्	Sensory character
साहचर्यकोशाः, अनुबन्धकोशाः	Association Neurone
साहचर्यक्षेत्राणि	Association Areas
सिद्धान्ताः	Principles
सिल्वियस	Sylvious
सीमरेखने	Boarder line level
सुखवादः	Hedonestic Psychology
सुषुम्ना	Spinal Cord
सृजनात्मिका	Creative
सेतुः	Bulb
सैद्धान्तिकम्	Theoritical
सौन्दर्यशास्त्रम्	Aesthetics
सौन्दर्यात्मिका	Aesthetic
स्कन्धभागः	Stem
स्तनधारिणः	Mammals
स्थानापन्नः	Substitute
स्थानसीमनम्	Localisation
स्थानीयं चिह्नम्	Local sign or local colour
स्थिरम्	Substained
स्नायवः	Nerves
स्नायविकी धारा; स्नायविकः प्रवाहः	Nervous current
स्नायविकी प्रकृतिः	Neural habit
स्नायुकञ्चुकम्	Neurilamma
स्नायुकोशाः	Nerve cells
स्नायुतन्तवः	Nervous febres
स्नायुतन्त्रम्	Nervous system
स्नायुसन्धिः, अन्तर्ग्रथनम्	Synapse
स्नायुसंहतिः	Neural system
स्नायुसूत्राणि	Nerve fibres
स्पञ्जः	Sponge
स्पर्शदेहाणुकोशाः, स्पर्शकणिकाः	Touch Corpus cles
स्पर्शसंवेदना	Tactual sensation
स्पर्शस्थानानि	Touch spots

In Public domain. Digitization Muthulakshmi Research Academy

स्फिग्मो मेनोमीटर	Sphygnomanometer
स्मृतिः	Memory
स्मृतिचिह्नम्	Memory trace
स्मृतिप्रतिमा	Memory image
स्मृतिविस्तारः	Memory span
स्रष्टृत्वम्	Creativeness
स्वतः	Spontaneously
स्वतन्त्रं कार्याङ्गम्	Independent effector
स्वतन्त्रं परिवर्त्यम्	Independent variable
स्वतन्त्रं स्नायुसंस्थानम्	Automatic nervous system
स्वतःस्फूर्ताः क्रियाः	Automatic acts
स्वतो निष्प्रयत्नम्	Spontaneous
स्वभावः	Temperament
स्वभावगुणाः	Characteristics
स्वयंपर्याप्ता विचाराः	Autistic thinking
स्वरयन्त्रम्	Larynx
स्वरूपम्	Nature
स्वस्थापनम्	Self assertion
स्वामित्वम्	Possession
स्वार्थी	Egoistic
स्वार्थपरार्थी	Egoaltruistic
स्वेदग्रन्थयः	Sweat glands
हाइयो थेलेमस	Hypethalamus
हावभावाः, इङ्गितानि	Gestuing
हास्यजनकम्	Laughable
हास्यम्	Laughter
हीनत्ववृत्तिः	Inferiority
हेतुः	Condition

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy